हिन्दी, मराठी, गुजराती और अङ्ग्रेजी चार
भाषाओं में अलग अलग प्रसिद्ध होनेवाला

वेदों का भाषांतर।

प्रति मास में ६४ पृष्ठ: ३२ पृष्ठ संहिता [स्वर और पदपाठ सहित]

* * ३२ पृष्ठ भाषान्तर। * *

वर्ष १] जुलै १९११—आषाढ संवत १९६८ [अंक १

वार्षिक मूल्य डाकव्ययसह ४ रु.

हिन्दी

श्रुतिबोध.

सम्पादक।

रामचन्द्र विनायक पटवर्धन, [illegible]
अच्युत बलवंत कोल्हटकर, [illegible]
दत्तो अप्पाजी तुलजापुरकर [illegible]

स्थाणुरयं भारहार किलाभूत् ।
अधीत्य वेदं न विजानाति योऽर्थम् ।

यास्काचार्य

प्रकाशक—प्राणशंकर अमृतराम दीक्षित
'श्रुतिबोध' ऑफिस, ४७, कालबादेवी रोड, मुम्बई.

है। ऋग्वेद में प्रार्थना, यजुर्वेद में यज्ञसंबंधी उपयुक्त मंत्र, सामवेद में परमेश्वर का यशोगायन और अथर्ववेद में धर्मज्ञान का विवेचन किया है।

फ्रान्स या जर्मनी का हिन्दुस्थान से कोई संबंध नहीं है। उन देशों से यह आशा नहीं की जा सकती कि वे भारत के आचार विचार साहित्य और विद्वानों की प्रशंसा करें। उसके अतिरिक्त भारत को वर्तमान काल में प्रमुखत्व भी नहीं प्राप्त है। इससे यह संभव है कि. अन्य देशवासी हिन्दुओं को तिरस्कारदृष्टि से देखें। किन्तु ऐसी दशा होने पर भी उन देशों के विचारवान पुरुषों ने हिन्दुओं के अनेक ग्रन्थों का बहुत आदर किया है। इससे स्पष्ट है और यह प्रत्येक निःपक्षपाती मनुष्य को मानना होगा कि उन ग्रंथों में अवश्य कोई विलक्षण ओज और विशेषता है। वेदों का पता जब जर्मन पंडितों को लगा और उनकी दृष्टि इन पर पड़ी, तो वेदों के निसर्गसौन्दर्य को देख वे मुग्ध हो गये। उनमें से कितने ही तो यहां तक मोहित हुए कि उन्होंने आद्योपान्त वेदों का अध्ययन कर डाला। किसीको वेदों की भाषा पसंद आई. किसीको उनकी सादी और सरल रचना भाई, उनके काव्य पर कोई लट्टू हो गया, कोई उनमें तत्वज्ञान पाकर आनंदित हुआ। इन सबमें रोट नामक विद्वान ने बहुत परिश्रम पूर्वक वेदों का परिशीलन किया और वेदविषयक साहित्य चिरस्थायी करनेके अभिप्राय से उन्होंने अन्य कई विद्वानों की सहायता से अपना सुप्रसिद्ध कोश बना डाला। हो सकता है कि अर्थविषयमें कुछ मत भेद हो. परन्तु इसमें सन्देह नहीं कि यह कोश बड़ी आस्था और अत्यन्त परिश्रम से तय्यार किया गया।

अर्वाचीन शोधकों का मत है कि वेद कम से कम दस हजार वर्ष पुराने हैं। इतने प्राचीन कालके ग्रंथ की भाषा अवश्य ही अव्यवस्थित, बेजोड़ और भद्दी होनी चाहिये; परन्तु वेदों में यह बात नहीं है। बल्कि उनका काव्य सरल, सुबोध और मधुर है। कविताका सम्पूर्ण सौन्दर्य वेदों में कूट कूट कर भरा हुआ है।

वेदों में अक्षरों के ऊपर और नीचे रेखा मारकर कुछ स्वर दिखाये है। उन्हींके अनुसार वेदपाठी लोग अपनी गर्दन या हाथ हिलाकर मन्त्रों का उच्चारण करते हैं। वेदों की यह बात भी ध्यान देने योग्य है। भाषण करनेमें शब्दों के कुछ विवक्षित अक्षरों पर जोर देकर उच्चारण करनेका प्रचार बहुतसी भाषाओं में है। अक्षरों की ध्वनि की इस विशेषता को ही स्वर कहते है। जब तक वेदों का अधिक प्रचार था तब तक उनके अनुसार स्वरोच्चारण के नियम मालूम थे। किन्तु संस्कृत का प्रचार बन्द होनेके बाद उसके स्वरों का भी लोप हो गया। वेदों में स्वर तीन प्रकार के हैं—उदात्त, अनुदात्त और स्वरित।

उदात्त स्वर दिखानेके लिये अक्षर पर कोई चिन्ह नहीं लगाते। अनुदात्त स्वर में अक्षर के नीचे एक आड़ी रेखा खींच देतें हैं और स्वरित स्वर दिखानेके लिये अक्षरको ऊपर खड़ी लकीर खींचते हैं। स्वरित अक्षरके आगे जितने अनुदात्त अक्षर आते हैं उन पर कोई चिन्ह नहीं लगाया जाता। वेदों का स्वरूप शुद्ध रखने और उनका सूक्ष्मार्थ और सत्यार्थ निश्चित करनेमें स्वरों का बहुत उपयोग किया गया है।

वेदों के विषय में एक बात विशेषरूप से ध्यान देने की है। वह यह कि उनमें पाठान्तर नाम मात्र को भी नहीं है। हमारे प्राचीन ऋषि महर्षिओं ने ऐसे परिश्रम से उनकी रक्षा की, कि उनमें अपपाठ या भिन्नपाठ को घुसने को अवसर ही न मिला इसके लिये उनकी जितनी प्रशंसा की जाय, थोडी ही है। यों तो वेदों के अर्थसंबंध में बहुत कुछ मतभेद है, परन्तु जो कहीं ब्राह्मणों की उपेक्षा के कारण वेदों का पाठ भी शुद्ध न होता, तो आज तत्वार्थज्ञान का लोप ही हो जाता।

वेदों के अर्थसंबंध में यहां कुछ कहना आवश्यक है। (भगवान यास्काचार्य ने ऐसे लोगों की निन्दा की है, जो बिना अर्थ समझे वेदों का पाठ करते हैं। इससे स्पष्ट है कि उनके समय में भी ऐसे लोग थे जो अर्थ की अपेक्षा शब्दों का विशेष महत्व समझते थे। पीछे सायणाचार्य ने अपना सुप्रसिद्ध भाष्य तय्यार किया। उससे जनसाधारण को वेदों का अर्थ कैसा सुलभ हो गया यह सभी जानते हैं। उनके इसी प्रशंसनीय प्रयत्न के फलस्वरूप आज वेदों का अर्थ समझ ने में सबको सहायता मिलती है। किन्तु कालचक्र के प्रभाव से दशा यहां तक बदल गई है कि अब आङ्गरेजी भाषा देशी भाषा के समान हो रही है। इस लिये यह आवश्यक है कि वेदों का भाषांतर अङ्गरेजी या किसी भाषा में किया जाय। यह स्थिति अच्छी है अथवा बुरी, या संस्कृत भाषा का इतना ऱ्हास होने देना योग्य है अथवा नहीं, यह प्रश्न अलग है। परन्तु धर्म के पुनर्जीवित करनेका कैसा भी प्रयत्न काल देश वर्तमान के अनुसार करना ही चाहिये। इसी लिये हमने वेदों का भाषान्तर अङ्ग्रेजी, मराठी, हिन्दी और गुजराती इन चार प्रचलित भाषाओं में करना आरंभ किया है। हिन्दी भाषा का प्रसार भारत में सबसे अधिक है। तो भी जो उसको न समझें उनके लिये हमने अंगरेजी भाषान्तर रक्खा है। इससे वे अपनी तृषा बुझा सकते हैं। इस प्रकार हमें आशा है कि इन चार भाषाओं के योग से हम वेदों का ज्ञान भारत के कोने कोने में फैला सकते हैं। आजपर्यन्त देश की किसी किसी भाषा में वेदों का अनुवाद करने का थोड़ा बहुत प्रयत्न किया जा चुका है,

किन्तु समस्त देशवासियों के सुभीते की दृष्टि से और विस्तृत प्रमाण पर वेदों का अनुवाद करनेका यह पहिला ही प्रयत्न है। हम आशा करते हैं कि इसको यशस्वी करनेमें हमारे देशबन्धु अपनी सहानुभूति से हमको कृतार्थ करनेकी कृपा करेंगे। आजतक वेदों के जितने भाषान्तर हुए हैं उनकी अपेक्षा यह भाषान्तर कुछ अलग दृष्टि से किया गया है। मनुष्य प्रायः समाज, मत, कुटुंब आदि के पाश में फंसा ही रहता है। इस लिये प्रत्येक विषय में उसका कोई अपना विशेष मत हुआ करता है। ऐसा मनुष्य जब किसी वेद समान धर्मग्रन्थ का अनुवाद करता है, तो अनुवाद मूल का प्रतिबिंब प्रायः नहीं होता; वह अनुवाद खास उसीके मत का चित्रपट होता है। ऐसा न होने पावे और वेदों का कथन ज्यों का त्यों अपने देशवासिओं के सामने धर सकें, इस अभिप्राय से अपने निज के विचारों को अलग रखकर केवल सत्यबुद्धि से हम वेदों का भाषांतर करना चाहते हैं। इस भाषान्तर में कहीं कहीं हम पौर्वात्य और पाश्चात्य इन दोनों ही विद्वानों को छोड़कर कोई तीसरा ही भिन्न अर्थ करेंगे, परन्तु उससे हमारे पाठकों को यह कदापि न समझना चाहिये कि वह अर्थ हमने किसी पक्ष, पंथ अथवा मतविशेष को पुष्ट करनेके अभिप्राय से किया है। ऐसा कभी न होगा। जो अर्थ हम स्वीकार नहीं करेंगे उसका उल्लेख स्वतन्त्र अङ्क में किया जायगा। उससे पाठकों को आप ही विदित होगा कि कौनसा अर्थ उचित है और कौन नहीं। भाषान्तर में जहां बहुत ही आवश्यक जचेगा वहां हम कुछ नोट देंगे। किसी किसी जगह देवता अथवा पद-पाठ की बड़ी गड़बड़ देखनेमें आती है, परन्तु वहां भी अभी हम कुछ नोट नहीं देंगे। अभी केवल सरल भाषान्तर किया जावेगा। जहां कहीं बहुत विवाद होगा, या व्याक रण संबंधी कोई विशेष कठिनता समझानेकी आवश्यकता होगी, या जहां अर्थ संबंध में टीकाकारों का तीव्र मतभेद होगा अथवा पदपाठ या देवता के संबंध में जहां विशेष-रूपसे स्पष्टीकरण करना आवश्यक होगा, इन सबका सविस्तर विचार करनेके लिये साधक बाधक प्रमाणों के साथ हम प्रसंगानुसार विशेष अङ्क निकाला करेंगे। सामान्यपाठक लोग इतनी टीका टिप्पणी के बखेड़ में नहीं पड़ना चाहते। उनको तो केवल सरल भाषान्तर चाहिये। भाषान्तर में किसी प्रकार विच्छेद न हो इस कारण से हम अलग ही एक विशेष अंक छापना अच्छा समझते हैं। आशा है कि इससे साधारण पाठक और तार्किक विद्वान भी संतोष प्राप्त कर सकेंगे।

भाषान्तर शुद्ध हिन्दी भाषा में हो, इसकी ओर हमारा विशेष लक्ष रहेगा। वेद यदि हिन्दी भाषा में होते तो जैसी उनकी भाषा होती, हमारी राय में ठीक वैसी ही भाषान्तर की भाषा होनी चाहिये। अच्छा भाषान्तर वही है जो पढ़ने में मनो-

रंजक हो। जिस भाषान्तर में केवल मूल शब्द के समर्थकशब्द मात्र रख दिये गये हों वह भाषान्तर नहीं कहा जा सकता—वह केवल बेगार का काम है। भाषान्तर पढ़ कर यह न मालूम होना चाहिये कि यह भाषान्तर है।

मूल के शब्द ज्यों के त्यों उठाकर अनुवाद में रख देनेसे भी अनुवाद होना नहीं कहा जा सकता। मूल के सब शब्द और सब अर्थ भाषान्तर में प्रतिबिम्बित होना चाहिये। कभी कभी मूल के शब्दार्थ की अपेक्षा मूलका संकल्पित अर्थ और भी अधिक होता है। ऐसी जगह भाषान्तर में अधिक शब्दों का व्यवहार करके अर्थ समझाना आवश्यक है। कहीं कहीं मूल में कोई अर्थभरित गहन शब्द या प्रयोजनगर्भ वाक्यरचना आ जाती है ऐसे स्थानपर भी बिना अधिक शब्द के व्यवहार के काम नहीं चलता। इससे भाषान्तर में कोई दोष नहीं आता, क्यों कि ऐसा किये बिना अच्छा भाषान्तर हो सकता ही नहीं। उदाहरणार्थ

अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम॥ ऋ. १. १२. २

इस ऋचा में जिस क्रम से शब्द रखे हुए हैं उसके देखते ही अर्थ की विशेषता का आभास होता है। इस सूक्त को गानेवाले मानो भक्ति में इतने लीन हो गये हैं कि सदा की वाक्यरीति छोड़ कर "अग्निमग्निं" कहने लगे। मूल का यह भाव जिस तरह हिंदीभाषा में आ सके उसी रीति से भाषान्तर करना चाहिये। ऐसे स्थान में एक एक मूल शब्द की टक्कर के लिये एक एक हिन्दी शब्द रखदेनेसे भाषान्तर का सत्यानाश करना है। शब्दों की गणना न करके मूल का भाव भाषान्तर में होना चाहिये। इसी पर दृष्टि रखकर सरल हिंदीभाषा में यह भाषान्तर किया गया है। यदि ऐसा न करके "मक्षिकास्थाने मक्षिका" का अवलम्बन किया जाता तो कौन ऐसे पाठक हैं जो भाषान्तर द्वारा मूलके अर्थ को समझ सकते?

ऋचा, वर्ग, अध्याय और अष्टक इन्हीं चारों में ऋग्वेद विभक्त किया गया है। ऋचा, एक मंत्र या एक श्लोक को कहते हैं। कई ऋचाएं मिलकर एक वर्ग और बहुतसे वर्ग मिलकर एक अध्याय होता है। प्रथमाध्याय में ३७ वर्ग हैं। आठ अध्यायों का एक अष्टक होता है। ऋग्वेद ऐसे ही आठ अष्टकों में पूरा हुआ है। इसको विभक्त करनेकी और भी पद्धति है। उसके अनुसार कुछ ऋचाओं का एक सूक्त, कई सूक्तों का एक अनुवाक और बहुतसे अनुवाक मिलकर एक मंडल होता है। इस रीति से ऋग्वेद के दस मंडल हैं। अष्टक केवल अङ्कगणित की दृष्टि से ऋग्वेद के ८ भाग करनेसे बने हैं, विषय की भिन्नता के ध्यान से ऐसा नहीं किया। यही बात अध्यायों में है। वे भी केवल हिसाब बराबर रखने के लिये प्रत्येक अष्टक में आठ आठ रखे गये हैं। किन्तु मंडल और सूक्त में यह बात नहीं है। उनका विभाग कुछ तो

विषय और कुछ ऋषिसंबंध की दृष्टि से किया गया है। इस लिये अष्टक विभाग की अपेक्षा यह अधिक उपयोगी और उचित है। साथ ही सुभीते की दृष्टि से देखिये तो अष्टकों का भी कुछ महत्त्व है। इस लिये हमने दोनों ही विभाग प्रत्येक पृष्ठ के सिरे पर लिख दिये हैं।

" श्रुतिबोध " प्रकाशित करनेकी विज्ञप्ति किये आज प्रायः तीन मास हुए। हमको यह लिखते बड़ा हर्ष होता है कि इस बीच में सैकड़ों सज्जनों ने ग्राहकों की सूची में अपने नाम लिखा कर अपनी धार्मिकता का परिचय दिया और दिखा दिया है कि भारत में धर्मजिज्ञासुओं का अब भी ह्रास नहीं हुआ। इससे और भी उत्साहित होकर हम आज " श्रुतिबोध " का यह प्रथमांक सुविज्ञ पाठक महाशयों की सेवा में समर्पित करते हैं। हिन्दी भाषा के पाठकों को प्रतिमास ६४ पृष्ठ और बड़े आकार की ऐसी पुस्तक डाक महसूल सहित मात्र ४) रु. वार्षिक में भेट की जायगी। दूसरे शब्दों में यों कहना चाहिये कि सालभर में मूल वेद और भाषान्तर का लगभग ८०० पृष्ठ का भारी ग्रंथ हम कुल ४) में दे देने को तैयार हैं। यही नहीं, यदि हमारे देशवासियों ने हमारे इस परिश्रम को सार्थक किया तो हम मूल्य और भी कम कर देंगे। सारांश यह कि हर तरह से इसमें रिआयत की जायगी, जिससे देशभर में इसका प्रचार बढ़े। ईसाइओं के धर्मग्रंथ बायबल देखिये, करोड़ों की संख्या में प्रति वर्ष छपती है। इस पर भी यह हालत, कि एक वर्ष की आवृत्ति की कोई प्रति दूसरे वर्ष के लिये नहीं बचती ! ऐसी ही दशा यदि हिन्दुओं के हिन्दुस्थान में हिन्दुओं के वेद की न हो, तो बस, यह कहना होगा कि हममें जीवन्त मनुष्य अब रहे ही नहीं।

इस काम में हमने किसीसे धन की सहायता नहीं मांगी, और न आप ही किसीने दी। अपने ही धन, अपने ही श्रम और अपने देशबन्धुओं की गुणज्ञता पर ही भरोसा करके हमने यह भारी काम अपने सिर पर उठाया है। होना तो यह चाहिये था कि वेदों का भाषान्तर देश के गरीब से गरीब मनुष्य के हाथों में पहुंचाया जाता; परन्तु यह भरपूर धन साहाय्य के बिना हो नहीं सकता। ऐसी दशा में यही बहुत है कि पांच सात वर्षों के अन्दर चारों वेद, मूल और अर्थ सहित, अत्यन्त अल्प मूल्य में देशवासियों को देवें। यही हमारा उद्देश है आशा है पूर्ण होगा।

" श्रुतिबोध " में मूल वेद और भाषान्तर की पुस्तकें अलग अलग बांधी जा सकें, इस अभिप्राय से दोनों अलग छापे गये हैं। उत्तम कागज सुन्दर छपाई और सफाई के विषय में भी हमने अपने हिसाब कोई कसर बाकी नहीं रखी। ' सुबोधिनी ' प्रेस के उदार स्वामी और चतुर मॅनेजर ने हमारे इस कार्य का महत्व समझकर सदा सस्वर संस्कृत, हिन्दी, मराठी, गुजराती और अंग्रेजी के नवीन टाईपों द्वारा तथा अन्य

रीति से पत्र के मनोहर बनानेमें अत्यन्त परिश्रम किया है । यदि इन महाशयों से ऐसी सहायता न मिलती, तो 'श्रुतिबोध' ऐसे चित्ताकर्षक रूप में पाठकों के सामने उपस्थित हो सकता, इसमें सन्देह है ।

अनेक महाशयों ने हमको लिखा कि 'श्रुतिबोध' में सायणाचार्य की टीका और भाषान्तर भी दिया जाना चाहिये, परन्तु कार्य शीघ्र सम्पूर्ण होना चाहिये, अतः हम उनकी इस सूचना को स्वीकार नहीं कर सके । इसके सिवाय और भी बहुतसे मित्रों, शुभचिन्तकों और वेदाभिमानी सज्जनों ने हमको कई प्रकारकी सूचनाएं दीं । ग्राह्य मालूम हुई हमने उन्हें स्वीकार किया । इनके अतिरिक्त कुछ महाशयों ने ऐसा भी लिखा कि मूल वेद देवनागरी लिपी में छापकर गुजराती में छापो किसीने तामिल अथवा तेलगू अक्षरों में छापने की सलाह दी । किसीने कहा मराठी आदि में भाषान्तर न करके केवल सरल संस्कृत भाषा में कीजिये, किसीने लिखा सम्पूर्ण वेद भाषान्तर सहित छापकर ६०—७० अङ्क साथ भेज देना, किसी किसीने ऐसी इच्छा भी प्रकट की कि हम यजुर्वेदी हैं, इससे पहले उसी वेद का भाषान्तर होना चाहिये, किसीने कहा कि कृष्णयजुर्वेद का भाषान्तर मत करें तो हम ग्राहक होंगे इत्यादि । ऐसी ही अनेकानेक सूचनाएं हमको मिलीं । पर यह ग्राह्य नहीं हैं, यह स्पष्ट है । जो हो इस सब पत्रव्यवहार से देशवासियों की वेदविषयक निष्ठा और "श्रुतिबोध" के प्रति उनका उत्साह भली भांति प्रकट होता है ।

अन्तमें हम उन सज्जनों का धन्यवाद किये बिना नहीं रह सकते जिन्होंने इस काम में हमारी सहायता की, सहानुभूति दिखाई अथवा प्रोत्साहित किया । इसके अतिरिक्त हम उन विद्वानों का भी आभार मानते हैं जो इस आधुनिक समय में वेदार्थ प्रगट करनेका प्रयत्न करचुके हैं । ये चाहे किसी भी दृष्टि से किये गये हों और हमसे चाहे कितने भी भिन्न हों, तो भी हम अपनी कृतज्ञता इन ग्रंथकारों के प्रति प्रकट करते हैं । यदि वेदों का समग्र प्रकाशन-कार्य हम समाप्ति तक पहुंचा सके और उसके द्वारा हिन्दूधर्म और भी पवित्र हो तथा उसपर लोगों का प्रेम और भी बढ़ सके तो हम इसको परमोपयोगी मानेंगे और अपना परिश्रम सार्थक समझेंगे । किन्तु इसके लिये ईश्वर की कृपा होना चाहिये । इसके प्राप्त करनेकी अभिलाषा से वेदों के निम्न लिखीत मंत्र द्वारा ईश्वरवंदना करके हम इस प्रस्तावना को समाप्त करते हैं:—

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ।
त्वामभि प्रणोनुमो जेतारमपराजितम् ॥ १. ११. २.

प्रथमोऽष्टकः

॥ ऋग्वेदः ॥

प्रथमं मण्डलम्

[प्रथमोऽध्यायः]

[प्रथमोऽनुवाकः]

॥ १ ॥ १-९ मधुच्छन्दा ऋषिः ॥ अग्निर्देवता ॥ गायत्री छन्दः ॥ षड्जः स्वरः ॥

॥ हरिः ॐ ॥

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥१॥
अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ एह वक्षति ॥ २ ॥
अग्निना रयिमश्नवत्पोषमेव दिवेदिवे । यशसं वीरवत्तमम् ॥ ३ ॥
अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद्देवेषु गच्छति ॥ ४ ॥
अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः । देवो देवेभिरा गमत् ॥५॥१ ॥
यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवेत्तत्सत्यमङ्गिरः ॥ ६ ॥
उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥ ७ ॥
राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानं स्वे दमे ॥ ८ ॥

अग्निं । ईळे । पुरःऽहितं । यज्ञस्य । देवं । ऋत्विजं । होतारं । रत्नऽधातमं ॥१॥ अग्निः । पूर्वेभिः । ऋषिऽभिः । ईड्यः । नूतनैः । उत । सः । देवान् । आ । इह । वक्षति ॥ २ ॥ अग्निना । रयिं । अश्नवत् । पोषं । एव । दिवेऽदिवे । यशसं । वीरवत्ऽतमं ॥३॥ अग्ने । यं । यज्ञं । अध्वरं । विश्वतः । परिऽभूः । असि । सः । इत् । देवेषु । गच्छति ॥ ४ ॥ अग्निः । होता । कविऽक्रतुः । सत्यः । चित्रश्रवःऽतमः । देवः । देवेभिः । आ । गमत् ॥ ५ ॥ १ ॥ यत् । अंग । दाशुषे । त्वं । अग्ने । भद्रं । करिष्यसि । तव । इत् । तत् । सत्यं । अंगिरः ॥ ६ ॥ उप । त्वा । अग्ने । दिवेऽदिवे । दोषाऽवस्तः । धिया । वयं । नमः । भरंतः । आ । इमसि ॥ ७ ॥ राजंतं । अध्वराणां । गोपां । ऋतस्य । दीदिविं । वर्धमानं । स्वे । दमे ॥ ८ ॥

स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥ ९ ॥ २ ॥

॥ २ ॥ १-९ मधुच्छन्दा ऋषिः ॥ देवता-१-३ वायुः । ४-६ इन्द्रवायू । ७-९ मित्रावरुणौ ॥ छन्दः-१,२ पिपीलिकामध्या निचृद्गायत्री ॥ षड्जः स्वरः ॥

(२) वायवा याहि दर्शतेमे सोमा अरंकृताः । तेषां पाहि श्रुधी हवम् ॥ १ ॥
वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः । सुतसोमा अहर्विदः ॥ २ ॥
वायो तव प्रपृञ्चती धेना जिगाति दाशुषे । उरूची सोमपीतये ॥ ३ ॥
इन्द्रवायू इमे सुता उप प्रयोभिरा गतम् । इन्दवो वामुशन्ति हि ॥ ४ ॥
वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू । तावा यातमुप द्रवत् ॥ ५ ॥ ३ ॥
वायविन्द्रश्च सुन्वत आ यातमुप निष्कृतम् । मक्ष्वि१त्था धिया नरा ॥ ६ ॥
मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीं साधन्ता ॥ ७ ॥
ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ॥ ८ ॥

सः । नः । पिताऽइव । सूनवे । अग्ने । सुऽउपायनः । भव । सचस्व । नः । स्वस्तये ॥ ९ ॥ २ ॥
वायो इति । आ । याहि । दर्शत । इमे । सोमाः । अरंऽकृताः । तेषां । पाहि । श्रुधि । हवं ॥ १ ॥ वायो इति । उक्थेभिः । जरंते । त्वां । अच्छ । जरितारः । सुतऽसोमाः । अहःऽविदः ॥ २ ॥ वायो इति । तव । प्रऽपृञ्चती । धेना । जिगाति । दाशुषे । उरूची । सोमऽपीतये ॥ ३ ॥ इंद्रवायू इति । इमे । सुताः । उप । प्रयःऽभिः । आ । गतं । इंदवः । वां । उशंति । हि ॥ ४ ॥ वायो इति । इंद्रः । च । चेतथः । सुतानां । वाजिनीवसू इति वाजिनीऽवसू । तौ । आ । यातं । उप । द्रवत् ॥ ५ ॥ ३ ॥ वायो इति । इंद्रः । च । सुन्वतः । आ । यातं । उप । निःऽकृतं । मक्षु । इत्था । धिया । नरा ॥ ६ ॥ मित्रं । हुवे । पूतऽदक्षं । वरुणं । च । रिशादसं । धियं । घृताचीं । साधंता ॥ ७ ॥ ऋतेन । मित्रावरुणौ । ऋतऽवृधौ । ऋतऽस्पृशा । क्रतुं । बृहंतं । आशाथे इति ॥ ८ ॥ कवी इति । नः । मित्रावरुणा ।

क॒वी नो॑ मि॒त्रावरु॑णा तुविजा॒ता उ॑रु॒क्षया॑ । दक्षं॑ दधाते अ॒पस॑म् ॥९॥४॥

॥ ३ ॥ १—१२ मधुच्छन्दा ऋषिः ॥ देवता—१-३ अश्विनौ । ४—६ इन्द्रः । ७—९ विश्वे देवाः । १०—१२ सरस्वती ॥ छन्दः—२ निचृद्गायत्री । ४, ११ पिपीलिकामध्या निचृद्गायत्री । १, ३, ५-१०, १२ गायत्री ॥ षड्जः स्वरः ॥

(३) अश्वि॑ना॒ यज्व॑री॒रिषो॒ द्रव॑त्पाणी॒ शुभ॑स्पती । पुरु॑भुजा चन॒स्यत॑म् ॥१॥
अश्वि॑ना॒ पुरु॑दंससा॒ नरा॒ शवी॑रया धि॒या । धिष्ण्या॒ वन॑तं॒ गिरः॑ ॥ २ ॥
दस्रा॑ यु॒वाक॑वः सु॒ता नास॑त्या वृ॒क्तब॑र्हिषः । आ या॑तं रुद्रवर्तनी ॥ ३ ॥
इन्द्रा या॑हि चित्रभानो सु॒ता इ॒मे त्वा॒यवः॑ । अण्वी॑भि॒स्तना॑ पू॒तासः॑ ॥४॥
इन्द्रा या॑हि धि॒येषि॒तो विप्र॑जूतः सु॒ताव॑तः । उप॒ ब्रह्मा॑णि वा॒घतः॑ ॥ ५ ॥
इन्द्रा या॑हि॒ तूतु॑जान॒ उप॒ ब्रह्मा॑णि हरिवः । सु॒ते द॑धिष्व न॒श्चनः॑ ॥६॥५॥
ओमा॑सश्चर्षणीधृतो॒ विश्वे॑ देवास॒ आग॑त । दाश्वां॑सो दा॒शुषः॑ सु॒तम् ॥७॥
विश्वे॑ दे॒वासो॑ अ॒प्तुरः॑ सु॒तमा ग॑न्त॒ तूर्ण॑यः । उ॒स्रा इ॑व॒ स्वस॑राणि ॥ ८ ॥

तु॒वि॒ऽजा॒तौ । उ॒रु॒ऽक्षया॑ । दक्ष॑म् । द॒धा॒ते॒ इति॑ । अ॒पस॑म् ॥९॥४॥ अश्वि॑ना । यज्व॑रीः । इषः॑ । द्रव॑त्पाणी॒ इति॒ द्रव॑त्ऽपाणी । शुभः॑ । प॒ती॒ इति॑ । पुरु॑ऽभुजा । च॒न॒स्यत॑म् ॥१॥ अश्वि॑ना । पुरु॑ऽदंससा । नरा॑ । शवी॑रया । धि॒या । धिष्ण्या॑ । वन॑तम् । गिरः॑ ॥२॥ दस्रा॑ ॥ यु॒वाक॑वः । सु॒ताः । नास॑त्या । वृ॒क्तऽब॑र्हिषः । आ । या॒त॒म् । रु॒द्र॒व॒र्त॒नी॒ इति॑ रुद्रऽवर्तनी ॥३॥ इन्द्र॑ । आ । या॒हि॒ । चि॒त्र॒भा॒नो॒ इति॑ चित्रऽभानो । सु॒ताः । इ॒मे । त्वा॒ऽयवः॑ । अण्वी॑भिः । तना॑ । पू॒तासः॑ ॥ ४ ॥ इन्द्र॑ । आ । या॒हि॒ । धि॒या । इ॒षि॒तः । विप्र॑ऽजूतः । सु॒तऽव॑तः । उप॑ । ब्रह्मा॑णि । वा॒घतः॑ ॥ ५ ॥ इन्द्र॑ । आ । या॒हि॒ । तूतु॑जानः । उप॑ । ब्रह्मा॑णि । ह॒रि॒ऽवः॒ । सु॒ते । द॒धि॒ष्व॒ । न॒ः । चनः॑ ॥ ६ ॥ ५ ॥ ओमा॑सः । च॒र्ष॒णि॒ऽधृ॒तः॒ । विश्वे॑ । दे॒वा॒सः॒ । आ । ग॒त॒ । दा॒श्वांसः॑ । दा॒शुषः॑ । सु॒तम् ॥ ७ ॥ विश्वे॑ । दे॒वासः॑ । अ॒प्ऽतुरः॑ । सु॒तम् । आ । ग॒न्त॒ । तूर्ण॑यः । उ॒स्राःऽइ॑व । स्वस॑राणि ॥८॥

विश्वे देवासो अस्रिध एहिमायासो अद्रुहः। मेधं जुषन्त वह्नयः ॥ ९ ॥
पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः ॥ १० ॥
चोदयित्री सूनृतानां चेतन्ती सुमतीनां। यज्ञं दधे सरस्वती ॥ ११ ॥
महो अर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा विराजति।
॥ १२ ॥ ६ ॥ १ ॥

॥ द्वितीयोऽनुवाकः ॥

॥ ४ ॥ १-१० मधुच्छन्दा ऋषिः ॥ इन्द्रो देवता ॥ छन्दः-३ विराड् गायत्री। १० निचृद्गायत्री। १, २, ४-९ गायत्री ॥ षड्जः स्वरः ॥

(४) सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ॥ १ ॥
उप नः सवना गहि सोमस्य सोमपाः पिब। गोदा इद्रेवतो मदः ॥ २ ॥
अथा ते अन्तमानां विद्याम सुमतीनाम्। मा नो अति रुध आ गहि ॥३॥
परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम्। यस्ते सखिभ्य आ वरम् ॥४॥
उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत। दधाना इन्द्र इद्दुवः ॥ ५ ॥ ७ ॥

विश्वे। देवासः। अस्रिधः। एहिऽमायासः। अद्रुहः। मेधं। जुषंत। वह्नयः ॥ ९ ॥ पावका। नः। सरस्वती। वाजेभिः। वाजिनीऽवती। यज्ञं। वष्टु। धियाऽवसुः ॥१०॥ चोदयित्री। सूनृतानां। चेतंती। सुऽमतीनां। यज्ञं। दधे। सरस्वती ॥११॥ महः। अर्णः। सरस्वती। प्र। चेतयति। केतुना। धियः। विश्वाः। वि। राजति।
॥ १२ ॥ ६ ॥ १ ॥

॥ द्वितीयोऽनुवाकः ॥

सुरूपऽकृत्नुं। ऊतये। सुदुघांऽइव। गोऽदुहे। जुहूमसि। द्यविऽद्यवि ॥ १ ॥ उप। नः। सवना। आ। गहि। सोमस्य। सोमऽपाः। पिब। गोऽदाः। इत्। रेवतः। मदः ॥ २ ॥ अथ। ते। अंतमानां। विद्याम। सुऽमतीनां। मा। नः। अति। रुधः। आ। गहि ॥ ३ ॥ परा। इहि। विग्रं। अस्तृतं। इंद्रं। पृच्छ। विपःऽचितं। यः। ते। सखिऽभ्यः। आ। वरं। ॥ ४ ॥ उत। ब्रुवंतु। नः। निदः। निः। अन्यतः। चित्। आरत। दधानाः। इंद्रे। इत्। दुवः ॥ ५ ॥ ७ ॥ उत। नः। सुऽभ-

उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः । स्यामेदिन्द्रस्य शर्मणि ॥ ६ ॥
एमाशुमाशवे भर यज्ञश्रियं नृमादनम् । पतयन्मन्दयत्सखम् ॥ ७ ॥
अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः । प्रावो वाजेषु वाजिनम् ॥८॥
तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो । धनानामिन्द्र सातये ॥ ९ ॥
यो रायोऽवनिर्महान्त्सुपारः सुन्वतः सखा । तस्मा इन्द्राय गायत ॥१०॥८॥

॥ ५ ॥ १-१० मधुच्छन्दा ऋषिः ॥ इन्द्रो देवता ॥ छन्दः—१ विराड् गायत्री । ३ पिपीलिकामध्या निचृद्गायत्री । ५-७, ९ निचृद्गायत्री । ८ पादनिचृद्गायत्री । आर्च्युष्णिक् ४, १० गायत्री । ऋषभः स्वरः ॥

(५) आ त्वेता नि षीदतेन्द्रमभि प्र गायत । सखायः स्तोमवाहसः ॥१॥
पुरूतमं पुरूणामीशानं वार्याणाम् । इन्द्रं सोमे सचा सुते ॥ २ ॥
स घा नो योग आ भुवत्स राये स पुरन्ध्याम् । गमद्वाजेभिरा स नः ॥३॥
यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः । तस्मा इन्द्राय गायत ॥ ४ ॥

गान् । अरिः । वोचेयुः । दस्म । कृष्टयः । स्याम । इत् । इंद्रस्य । शर्मणि ॥ ६ ॥ आ । ईं । आशुं । आशवे । भर । यज्ञऽश्रियं । नृऽमादनं । पतयत् । मंदयत्ऽसखं ॥ ७ ॥ अस्य । पीत्वा । शतक्रतो इति शतऽक्रतो । घनः । वृत्राणां । अभवः । प्र । आवः । वाजेषु । वाजिनं ॥ ८ ॥ तं । त्वा । वाजेषु । वाजिनं । वाजयामः । शतक्रतो इति शतऽक्रतो । धनानां । इंद्र । सातये ॥ ९ ॥ यः । रायः । अवनिः । महान् । सुऽपारः । सुन्वतः । सखा । तस्मै । इंद्राय । गायत ॥ १० ॥ ८ ॥ आ । तु । आ । इत । नि । सीदत । इंद्रं । अभि । प्र । गायत । सखायः । स्तोमऽवाहसः ॥१॥ पुरुऽतमं । पुरूणां । ईशानं । वार्याणां । इंद्रं । सोमे । सचा । सुते ॥ २ ॥ सः । घ । नः । योगे । आ । भुवत् । सः । राये । सः । पुरंऽध्यां । गमत् । वाजेभिः । आ । सः । नः ॥३॥ यस्य । संऽस्थे । न । वृण्वते । हरी इति । समत्ऽसु । शत्रवः । तस्मै । इंद्राय । गायत ॥ ४ ॥

सुतपाव्ने सुता इमे शुचयो यन्ति वीतये । सोमासो दध्याशिरः ॥५॥ ९ ॥
त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः । इन्द्र ज्यैष्ठ्याय सुक्रतो ॥६॥
आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः । शं ते सन्तु प्रचेतसे ॥७॥
त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो । त्वां वर्धन्तु नो गिरः ॥ ८ ॥
अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम् । यस्मिन्विश्वानि पौंस्या ॥९॥
मा नो मर्ता अभि द्रुहन्तनूनामिन्द्र गिर्वणः । ईशानो यवया वधम् ॥१०॥१०॥

॥ ६ ॥ १–१० मधुच्छन्दा ऋषिः ॥ देवता–१–३ इन्द्रः । ४, ६, ८, ९, मरुतः । ५, ७ मरुत इन्द्रश्च । १० इन्द्रः ॥ छन्दः–२ विराड् गायत्री ४, ८ निचृद्गायत्री । १, ३, ५–७, ९, १० गायत्री ॥ षड्जः स्वरः ॥

(६) युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥ १ ॥
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ २ ॥
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ ३ ॥

सुतऽपाव्ने । सुताः । इमे । शुचयः । यंति । वीतये । सोमासः । दधिऽआशिरः ॥ ५ ॥९॥ त्वं । सुतस्य । पीतये । सद्यः । वृद्धः । अजायथाः । इंद्र । ज्यैष्ठ्याय । सुक्रतो इति सुऽक्रतो ॥६॥ आ । त्वा । विशंतु । आशवः । सोमासः । इंद्र । गिर्वणः । शं । ते । संतु । प्रऽचेतसे ॥ ७ ॥ त्वां । स्तोमाः । अवीवृधन् । त्वां । उक्था । शतक्रतो इति शतऽक्रतो । त्वां । वर्धंतु । नः । गिरः ॥ ८ ॥ अक्षितऽऊतिः । सनेत् । इमं । वाजं । इंद्रः । सहस्रिणं । यस्मिन् । विश्वानि । पौंस्या ॥ ९ ॥ मा । नः । मर्ताः । अभि । द्रुहन् । तनूनां । इंद्र । गिर्वणः । ईशानः । यवय । वधं ॥१०॥१० ॥ युंजंति । ब्रध्नं । अरुषं । चरंतं । परि । तस्थुषः । रोचंते । रोचना । दिवि ॥ १ ॥ युंजंति । अस्य । काम्या । हरी इति । विऽपक्षसा । रथे । शोणा । धृष्णू इति । नृऽवाहसा ॥ २ ॥ केतुं । कृण्वन् । अकेतवे । पेशः । मर्याः । अपेशसे । सं । उषत्ऽभिः । अजायथाः ॥ ३ ॥ आत् । अह । स्वधां । अनु । पुनः । गर्भऽत्वं ।

आदह स्वधामनु पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियम् ॥ ४ ॥
वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः । अविन्द उस्रिया अनु ॥५॥११॥
देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः । महामनूषत श्रुतम् ॥ ६ ॥
इन्द्रेण सं हि दृक्षसे सञ्जग्मानो अबिभ्युषा । मन्दू समानवर्चसा ॥ ७ ॥
अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति । गणैरिन्द्रस्य काम्यैः ॥ ८ ॥
अतः परिज्मन्ना गहि दिवो वा रोचनादधि । समस्मिन्नृञ्जते गिरः ॥ ९ ॥
इतो वा सातिमीमहे दिवो वा पार्थिवादधि । इन्द्रं महो वा रजसः ॥१०॥१२॥

॥ ७ ॥ १—१० मधुच्छन्दा ऋषिः ॥ इन्द्रो देवता ॥ छन्दः—२, ४ निचृद्गायत्री । ८, १० पिपीलिकामध्या निचृद्गायत्री । ९ पादनिचृद्गायत्री । १, ३, ५—७ गायत्री ॥ षड्जः स्वरः ॥

(७) इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥ १ ॥
इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा । इन्द्रो वज्री हिरण्ययः ॥२॥
इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि । वि गोभिरद्रिमैरयत् ॥ ३ ॥

आऽईरिरे । दधानाः । नाम । यज्ञियं ॥ ४ ॥ वीळु । चित् । आरुजत्नुऽभिः । गुहा । चित् । इंद्र । वह्निऽभिः । अविंदः । उस्रियाः । अनु ॥५॥११॥ देवऽयंतः । यथा । मतिं । अच्छ । विदद्वसुं । गिरः । महां । अनूषत । श्रुतं ॥ ६ ॥ इंद्रेण । सं । हि । दृक्षसे । संऽजग्मानः । अबिभ्युषा । मंदू इति । समानऽवर्चसा ॥७॥ अनवद्यैः । अभिद्युऽभिः । मखः । सहस्वत् । अर्चति । गणैः । इंद्रस्य । काम्यैः ॥ ८ ॥ अतः । परिऽज्मन् । आ । गहि । दिवः । वा । रोचनात् । अधि । सं । अस्मिन् । ऋंजते । गिरः ॥९॥ इतः । वा । सातिं । ईमहे । दिवः । वा । पार्थिवात् । अधि । इंद्रं । महः । वा । रजसः ॥१०॥१२॥ इंद्रं । इत् । गाथिनः । बृहत् । इंद्रं । अर्केभिः । अर्किणः । इंद्रं । वाणीः । अनूषत ॥ १ ॥ इंद्रः । इत् । हर्योः । सचा । संऽमिश्लः । आ । वचःऽयुजा । इंद्रः । वज्री । हिरण्ययः ॥ २ ॥ इंद्रः । दीर्घाय । चक्षसे । आ । सूर्यं । रोहयत् । दिवि । वि । गोभिः । अद्रिं । ऐरयत् ॥ ३ ॥

इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः ॥ ४ ॥
इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे। युजं वृत्रेषु वज्रिणम् ॥ ५ ॥ १३ ॥
स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि। अस्मभ्यमप्रतिष्कुतः ॥ ६ ॥
तुंजेतुंजे य उत्तरे स्तोमा इंद्रस्य वज्रिणः। न विंधे अस्य सुष्टुतिं ॥ ७ ॥
वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा। ईशानो अप्रतिष्कुतः ॥ ८ ॥
य एकश्चर्षणीनां वसूनामिरज्यति। इंद्रः पंच क्षितीनां ॥ ९ ॥
इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः ॥१०॥१४॥२॥

॥ तृतीयोऽनुवाकः ॥

॥ ८ ॥ १—१० मधुच्छन्दा ऋषिः ॥ इन्द्रो देवता ॥ छन्दः—१ निचृद् गायत्री । २ प्रतिष्ठा गायत्री । १० वर्धमाना गायत्री । ३—५, ६, ७—९ गायत्री ॥ षड्जः स्वरः ॥

(८) एन्द्र सानसिं रयिं सजित्वानं सदासहम्। वर्षिष्ठमूतये भर ॥ १ ॥

इंद्र। वाजेषु। नः। अव। सहस्रऽप्रधनेषु। च। उग्रः। उग्राभिः। ऊतिऽभिः ॥ ४ ॥ इंद्रं। वयं। महाऽधने। इंद्रं। अर्भे। हवामहे। युजं। वृत्रेषु। वज्रिणं। ॥५॥१३॥ सः। नः। वृषन्। अमुं। चरुं। सत्राऽदावन्। अप। वृधि। अस्मभ्यं। अप्रतिऽस्कुतः ॥ ६ ॥ तुंजेतुंजे। ये। उत्ऽतरे। स्तोमाः। इंद्रस्य। वज्रिणः। न। विंधे। अस्य। सुऽस्तुतिं ॥ ७ ॥ वृषा। यूथाऽइव। वंसगः। कृष्टीः। इयर्ति। ओजसा। ईशानः। अप्रतिऽस्कुतः ॥ ८ ॥ यः। एकः। चर्षणीनां। वसूनां। इरज्यति। इंद्रः। पंच। क्षितीनां ॥ ९ ॥ इंद्रं। वः। विश्वतः। परि। हवामहे। जनेभ्यः। अस्माकं। अस्तु। केवलः ॥ १० ॥ १४ ॥ २ ॥

॥ तृतीयोऽनुवाकः ॥

आ। इंद्र। सानसिं। रयिं। सऽजित्वानं। सदाऽसहं। वर्षिष्ठं। ऊतये। भर ॥ १ ॥

नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै । त्वोतासो न्यर्वता ॥ २ ॥
इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि । जयेम सं युधि स्पृधः ॥ ३ ॥
वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयं । सासह्याम पृतन्यतः ॥ ४ ॥
महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे । द्यौर्न प्रथिना शवः ॥५॥ १५ ॥
समोहे वा य आशत नरस्तोकस्य सनितौ । विप्रासो वा धियायवः ॥६॥
यः कुक्षिः सोमपातमः समुद्र इव पिन्वते । उर्वीरापो न काकुदः ॥ ७ ॥
एवा ह्यस्य सूनृता विरप्शी गोमती मही । पक्वा शाखा न दाशुषे ॥ ८ ॥
एवा हि ते विभूतय ऊतय इन्द्र मावते । सद्यश्चित्सन्ति दाशुषे ॥ ९ ॥
एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या । इन्द्राय सोमपीतये ॥१०॥१६॥

नि । येन॑ । मुष्टिऽहत्यया॑ । नि । वृत्रा । रुणधा॑महै । त्वाऽऊ॑तासः । नि । अर्व॑ता॥२॥
इंद्र॑ । त्वाऽऊ॑तासः । आ । वयं । वज्रं । घना । ददीमहि । जयेम । सं । युधि । स्पृधः॥३॥
वयं । शूरे॑भिः । अस्तृ॑ऽभिः । इंद्र॑ । त्वया॑ । युजा । वयं । ससह्याम॑ । पृतन्यतः ॥४॥
महान् । इंद्रः । परः । च । नु । महिऽत्वं । अस्तु । वज्रिणे॑ । द्यौः । न । प्रथिना ।
शवः ॥ ५ ॥ १५ ॥ संऽओहे । वा । ये । आश॑त । नरः । तोकस्य॑ । सनि॑तौ ।
विप्रा॑सः । वा । धियाऽयवः॑ ॥ ६ ॥ यः । कुक्षिः । सोमऽपात॑मः । समुद्रःऽइ॑व ।
पिन्व॑ते । उर्वीः । आपः॑ । न । काकुदः॑ ॥ ७ ॥ एव । हि । अस्य । सूनृता॑ । विऽ-
रप्शी । गोऽमती । मही । पक्वा । शाखा॑ । न । दाशुषे॑ ॥ ८ ॥ एव । हि । ते ।
विऽभूतयः । ऊतयः॑ । इंद्र । माऽव॑ते । सद्यः । चित् । संति॑ । दाशुषे॑ ॥ ९ ॥ एव ।
हि । अस्य । काम्या॑ । स्तोमः॑ । उक्थं । च । शंस्या॑ । इंद्रा॑य । सोम॑ऽपीतये ॥१०॥१६॥

॥ ९ ॥ १–१० मधुच्छन्दा ऋषिः ॥ इन्द्रो देवता ॥ छन्दः—१, ३, ७, १० निचृद्गायत्री । ५,६ पिपीलिकामध्या निचृद्गायत्री । २, ४, ८, ९ गायत्री ॥ षड्जः स्वरः ॥

(९) इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ अभिष्टिरोजसा ॥ १ ॥
एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने । चक्रिं विश्वानि चक्रये ॥ २ ॥
मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे । सचैषु सवनेष्वा ॥ ३ ॥
असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत । अजोषा वृषभं पतिम् ॥ ४ ॥
सं चोदय चित्रमर्वाग्राध इन्द्र वरेण्यम् । असदित्ते विभु प्रभु ॥ ५ ॥ १७ ॥
अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः । तुविद्युम्न यशस्वतः ॥ ६ ॥
सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत् । विश्वायुर्धेह्यक्षितम् ॥ ७ ॥
अस्मे धेहि श्रवो बृहद्द्युम्नं सहस्रसातमम् । इन्द्र ता रथिनीरिषः ॥ ८ ॥

इंद्र । आ । इहि । मत्सि । अंधसः । विश्वेभिः । सोमपर्वऽभिः । महान् । अभिष्टिः । ओजसा ॥ १ ॥ आ । ईं । एनं । सृजत । सुते । मंदिं । इंद्राय । मंदिने । चक्रिं । विश्वानि । चक्रये ॥ २ ॥ मत्स्व । सुऽशिप्र । मंदिऽभिः । स्तोमेभिः । विश्वऽचर्षणे । सचा । एषु । सवनेषु । आ ॥ ३ ॥ असृग्रं । इंद्र । ते । गिरः । प्रति । त्वां । उत् । अहासत । अजोषाः । वृषभं । पतिं ॥ ४ ॥ सं । चोदय । चित्रं । अर्वाक् । राधः । इंद्र । वरेण्यं । असत् । इत् । ते । विऽभु । प्रऽभु ॥ ५ ॥ १७ ॥ अस्मान् । सु । तत्र । चोदय । इंद्र । राये । रभस्वतः । तुविऽद्युम्न । यशस्वतः ॥ ६ ॥ सं । गोऽमत् । इंद्र । वाजऽवत् । अस्मे इति । पृथु । श्रवः । बृहत् । विश्वऽआयुः । धेहि । अक्षितं ॥ ७ ॥ अस्मे इति । धेहि । श्रवः । बृहत् । द्युम्नं । सहस्रऽसातमं । इंद्र । ताः । रथिनीः ।

वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियम्। होम गन्तारमूतये ॥ ९ ॥
सुतेसुते न्योकसे बृहद्बृहत एदरिः। इन्द्राय शूषमर्चति ॥ १० ॥ १८ ॥

॥ १० ॥ १–१२ मधुच्छन्दा ऋषिः ॥ इन्द्रो देवता ॥ छन्दः–१–३, ५, ६ विराडनुष्टुप्। ८ निचृदनुष्टुप्। ४ भुरिगुष्णिक्। ७, ९–१२ अनुष्टुप् ॥ गान्धारः स्वरः। ४ ऋषभः स्वरः ॥

(१०) गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ १ ॥
यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वम्।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥ २ ॥
युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा।
अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥ ३ ॥

इषः ॥ ८ ॥ वसोः। इंद्रं। वसुऽपतिं। गीःऽभिः। गृणंतः। ऋग्मियं। होम। गंतारं। ऊतये ॥ ९ ॥ सुतेऽसुते। निऽओकसे। बृहत्। बृहते। आ। इत्। अरिः। इंद्राय। शूषं। अर्चति ॥ १० ॥ १८ ॥

गायंति। त्वा। गायत्रिणः। अर्चंति। अर्कं। अर्किणः। ब्रह्माणः। त्वा। शतक्रतो इति शतऽक्रतो। उत्। वंशंऽइव। येमिरे ॥ १ ॥ यत्। सानोः। सानुं। आ। अरुहत्। भूरि। अस्पष्ट। कर्त्वं। तत्। इंद्रः। अर्थं। चेतति। यूथेन। वृष्णिः। एजति ॥ २ ॥ युक्ष्व। हि। केशिना। हरी इति। वृषणा। कक्ष्यऽप्रा। अथ। नः। इंद्र। सोमऽपाः। गिरां। उपऽश्रुतिं। चर ॥ ३ ॥

एहि स्तोमाँ अभि स्वराभि गृणीह्या रुव ।
ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ॥ ४ ॥

उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ।
शक्रो यथा सुतेषु णो रारणत्सख्येषु च ॥ ५ ॥

तमित्सखित्व ईमहे तं राये तं सुवीर्ये ।
स शक्र उत नः शकदिन्द्रो वसु दयमानः ॥ ६ ॥ १९ ॥

सुविवृतं सुनिरजमिन्द्र त्वादातमिद्यशः ।
गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥ ७ ॥

नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः ।
जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ॥ ८ ॥

आ । इहि । स्तोमान् । अभि । स्वर । अभि । गृणीहि । आ । रुव । ब्रह्म । च । नः । वसो इति । सचा । इंद्र । यज्ञं । च । वर्धय ॥ ४ ॥ उक्थं । इंद्राय । शंस्यं । वर्धनं । पुरुनिःऽसिधे । शक्रः । यथा । सुतेषु । नः । ररणत् । सख्येषु । च ॥५॥ तम । इत् । सखिऽत्वे । ईमहे । तं । राये । तं । सुऽवीर्ये । सः । शक्रः । उत । नः । शकत् । इंद्रः । वसु । दयमानः ॥ ६ ॥ १९ ॥ सुऽविवृतं । सुनिःऽअजं । इंद्र । त्वाऽदातं । इत् । यशः । गवां । अप । व्रजं । वृधि । कृणुष्व । राधः । अद्रिऽवः ॥ ७ ॥ नहि । त्वा । रोदसी इति । उभे इति । ऋघायमाणं । इन्वतः । जेषः । स्वःऽवतीः । अपः । सं । गाः । अस्मभ्यं । धूनुहि ॥ ८ ॥ आश्रुत्ऽकर्ण । श्रुधि । हवं । नु । चित् । दधिष्व ।

आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः ।
इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ॥ ९ ॥
विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम् ।
वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम् ॥ १० ॥
आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब ।
नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिम् ॥ ११ ॥
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः ।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥ १२ ॥ २० ॥

॥ ११ ॥ १-८ जेता माधुच्छन्दस ऋषिः ॥ इन्द्रो देवता ॥ अनुष्टुप् छन्दः ॥ गान्धारः स्वरः ॥

(११) इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ १ ॥

मे । गिरः । इंद्र । स्तोमं । इमं । मम । कृष्व । युजः । चित् । अंतरं ॥९॥ विद्म । हि । त्वा । वृषन्ऽतमं । वाजेषु । हवनऽश्रुतं । वृषन्ऽतमस्य । हूमहे । ऊतिं । सहस्रऽसातमां ॥ १० ॥ आ । तु । नः । इंद्र । कौशिक । मंदसानः । सुतं । पिब । नव्यं । आयुः । प्र । सु । तिर । कृधि । सहस्रऽसां । ऋषिं ॥ ११ ॥ परि । त्वा । गिर्वणः । गिरः । इमाः । भवंतु । विश्वतः । वृद्धऽआयुं । अनु । वृद्धयः । जुष्टाः । भवंतु । जुष्टयः ॥ १२ ॥ २० ॥

इंद्रं । विश्वाः । अवीवृधन् । समुद्रऽव्यचसं । गिरः । रथिऽतमं । रथिनां । वाजानां । सतऽपतिं । पतिं ॥ १ ॥

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ।

त्वामभि प्र णोनुमो जेतारमपराजितम् ॥ २ ॥

पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः ।

यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ॥ ३ ॥

पुरां भिन्दुर्युवा कविरमितौजा अजायत ।

इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ ४ ॥

त्वं वलस्य गोमतोऽपावरद्रिवो बिलम् ।

त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ ५ ॥

तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन् ।

उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ॥ ६ ॥

मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः ।

विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥ ७ ॥

सख्ये । ते । इंद्र । वाजिनः । मा । भेम । शवसः । पते । त्वां । अभि । प्र । नोनुमः । जेतारं । अपराऽजितं ॥ २ ॥ पूर्वीः । इंद्रस्य । रातयः । न । वि । दस्यंति । ऊतयः । यदि । वाजस्य । गोऽमतः । स्तोतृऽभ्यः । मंहते । मघं ॥ ३ ॥ पुरां । भिंदुः । युवा । कविः । अमितऽओजाः । अजायत । इंद्रः । विश्वस्य । कर्मणः । धर्ता । वज्री । पुरुऽस्तुतः ॥ ४ ॥ त्वं । वलस्य । गोऽमतः । अप । अवः । अद्रिऽवः । बिलं । त्वां । देवाः । अबिभ्युषः । तुज्यमानासः । आविषुः ॥ ५ ॥ तव । अहं । शूर । रातिऽभिः । प्रति । आयं । सिंधुं । आऽवदन् । उप । अतिष्ठंत । गिर्वणः । विदुः । ते । तस्य । कारवः ॥ ६ ॥ मायाभिः । इंद्र । मायिनं । त्वं । शुष्णं । अव । अतिरः । विदुः । ते । तस्य । मेधिराः । तेषां । श्रवांसि । उत् । तिर ॥७॥ इंद्रं । ईशानं ।

इन्द्रमीशानमोजसाभि स्तोमा अनूषत ।

सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥८॥२१॥३॥

॥ चतुर्थोऽनुवाकः ॥

॥ १२ ॥ १-१२ मेधातिथिः काण्व ऋषिः ॥ अग्निर्देवता ॥ गायत्री छन्दः ॥ षड्जः स्वरः ॥

(१२) अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।

अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥

अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् ।

हव्यवाहं पुरुप्रियम् ॥ २ ॥

अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे ।

असि होता न ईड्यः ॥ ३ ॥

ओजसा । अभि । स्तोमाः । अनूषत । सहस्रं । यस्य । रातयः । उत । वा । संति । भूयसीः ॥ ८ ॥ २१ ॥ ३ ॥

॥ चतुर्थोऽनुवाकः ॥

अग्निं । दूतं । वृणीमहे । होतारं । विश्वऽवेदसं । अस्य । यज्ञस्य । सुऽक्रतुं ॥१॥
अग्निंऽअग्निं । हवीमऽभिः । सदा । हवंत । विश्पतिं । हव्यऽवाहं । पुरुऽप्रियं ॥ २ ॥
अग्ने । देवान् । इह । आ । वह । जज्ञानः । वृक्तऽबर्हिषे । असि । होता । नः । ईड्यः ॥ ३ ॥

ताँ उ॒श॒तो वि बो॑धय॒ यद॑ग्ने॒ यासि॑ दू॒त्य॑म् ।
दे॒वैरा स॑त्सि ब॒र्हिषि॑ ॥ ४ ॥
घृता॑हवन दीदिवः॒ प्रति॑ ष्म॒ रिष॑तो दह ।
अग्ने॒ त्वं र॑क्ष॒स्विनः॑ ॥ ५ ॥
अ॒ग्निना॒ग्निः समि॑ध्यते क॒विर्गृ॒हप॑ति॒र्युवा॑ ।
ह॒व्य॒वाड् जु॒ह्वा॑स्यः ॥ ६ ॥ २२ ॥
क॒विम॒ग्निमुप॑ स्तुहि स॒त्यध॑र्माणमध्व॒रे ।
दे॒वम॑मीव॒चात॑नम् ॥ ७ ॥
यस्त्वाम॑ग्ने ह॒विष्प॑तिर्दू॒तं दे॑व सप॒र्यति॑ ।
तस्य॑ स्म प्रावि॒ता भ॑व ॥ ८ ॥
यो अ॒ग्निं दे॒ववी॑तये ह॒विष्माँ॑ आ॒विवा॑सति ।
तस्मै॑ पावक मृळय ॥ ९ ॥
स नः॑ पावक दीदि॒वोऽग्ने॑ दे॒वाँ इ॒हा व॑ह ।
उप॑ य॒ज्ञं ह॒विश्च॑ नः ॥ १० ॥

तान् । उ॒श॒तः । वि । बो॒ध॒य॒ । यत् । अ॒ग्ने॒ । यासि॑ । दू॒त्य॑म् । दे॒वैः । आ । स॒त्सि॒ । ब॒र्हिषि॑ ॥ ४ ॥ घृत॑ऽआहवन । दी॒दि॒ऽवः॒ । प्रति॑ । स्म॒ । रिष॑तः । द॒ह॒ । अग्ने॑ । त्वम् । र॒क्ष॒स्विनः॑ ॥ ५ ॥ अ॒ग्निना॑ । अ॒ग्निः । सम् । इ॒ध्य॒ते॒ । क॒विः । गृ॒हऽप॑तिः । युवा॑ । ह॒व्य॒ऽवाट् । जु॒हुऽआ॑स्यः ॥ ६ ॥ २२ ॥ क॒विम् । अ॒ग्निम् । उप॑ । स्तु॒हि॒ । स॒त्यऽध॑र्माणम् । अ॒ध्व॒रे । दे॒वम् । अ॒मी॒व॒ऽचात॑नम् ॥ ७ ॥ यः । त्वाम् । अ॒ग्ने॒ । ह॒विःऽप॑तिः । दू॒तम् । दे॒व॒ । स॒प॒र्यति॑ । तस्य॑ । स्म॒ । प्र॒ऽअ॒वि॒ता । भ॒व॒ ॥ ८ ॥ यः । अ॒ग्निम् । दे॒वऽवी॑तये । ह॒विष्मा॑न् । आ॒ऽविवा॑सति । तस्मै॑ । पा॒व॒क॒ । मृ॒ळ॒य॒ ॥ ९ ॥ सः । नः॒ । पा॒व॒क॒ । दी॒दि॒ऽवः॒ । अग्ने॑ । दे॒वान् । इ॒ह । आ । व॒ह॒ । उप॑ ।

स नः स्तवान आ भर गायत्रेण नवीयसा ।
रयिं वीरवतीमिषम् ॥ ११ ॥
अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः ।
इमं स्तोमं जुषस्व नः ॥१२॥२३॥

॥ १३ ॥ मेधातिथिः काण्व ऋषिः ॥ १ ॥ देवता–इध्मः समिद्धो वाग्निः । २ तनूनपात् । ३ नराशंसः । ४ इळः । ५ बर्हिः । ६ देवीर्द्वारः । ७ उषासानक्ता । ८ दैव्यौ होतारौ प्रचेतसौ । ९ तिस्रो देव्यः सरस्वतीळाभारत्यः । १० त्वष्टा । ११ वनस्पतिः । १२ स्वाहाकृतयः ॥ गायत्री छन्दः ॥ षड्जः स्वरः ॥

(१३) सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते ।
होतः पावक यक्षि च ॥ १ ॥
मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे ।
अद्या कृणुहि वीतये ॥ २ ॥
नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये ।
मधुजिह्वं हविष्कृतम् ॥ ३ ॥
अग्ने सुखतमे रथे देवाँ ईळित आ वह ।
असि होता मनुर्हितः ॥ ४ ॥

यज्ञं । हविः । च । नः ॥ १० ॥ सः । नः । स्तवानः । आ । भर । गायत्रेण । नवीयसा । रयिं । वीरऽवतीं । इषं ॥ ११ ॥ अग्ने । शुक्रेण । शोचिषा । विश्वाभिः । देवहूतिऽभिः । इमं । स्तोमं । जुषस्व । नः ॥ १२ ॥ २३ ॥
सुऽसमिद्धः । नः । आ । वह । देवान् । अग्ने । हविष्मते । होतरिति । पावक । यक्षि । च ॥१॥ मधुऽमंतं । तनूऽनपात् । यज्ञं । देवेषु । नः । कवे । अद्य । कृणुहि । वीतये ॥२॥ नराशंसं । इह । प्रियं । अस्मिन् । यज्ञे । उप । ह्वये । मधुऽजिह्वं । हविःऽकृतं ॥३॥ अग्ने । सुखऽतमे । रथे । देवान् । ईळितः । आ । वह । असि । होता । मनुःऽहितः ॥४॥

स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः ।

यत्रामृतस्य चक्षणम् ॥ ५ ॥

वि श्रयन्तामृतावृधो द्वारो देवीरसश्चतः ।

अद्या नूनं च यष्टवे ॥ ६ ॥ २४ ॥

नक्तोषसा सुपेशसास्मिन्यज्ञ उप ह्वये ।

इदं नो बर्हिरासदे ॥ ७ ॥

ता सुजिह्वा उप ह्वये होतारा दैव्या कवी ।

यज्ञं नो यक्षतामिमम् ॥ ८ ॥

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः ।

बर्हिः सीदन्त्वस्रिधः ॥ ९ ॥

इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये ।

अस्माकमस्तु केवलः ॥ १० ॥

स्तृणीत । बर्हिः । आनुषक् । घृतऽपृष्ठं । मनीषिणः । यत्र । अमृतस्य । चक्षणं ॥५॥ वि । श्रयंतां । ऋतऽवृधः । द्वारः । देवीः । असश्चतः । अद्य । नूनं । च । यष्टवे ॥६॥२४॥ नक्तोषसा । सुऽपेशसा । अस्मिन् । यज्ञे । उप । ह्वये । इदं । नः । बर्हिः । आऽसदे । ॥७॥ ता । सुऽजिह्वौ । उप । ह्वये । होतारा । दैव्या । कवी इति । यज्ञं । नः । यक्षतां । इमं ॥ ८ ॥ इळा । सरस्वती । मही । तिस्रः । देवीः । मयःऽभुवः । बर्हिः । सीदंतु । अस्रिधः ॥ ९ ॥ इह । त्वष्टारं । अग्रियं । विश्वऽरूपं । उप । ह्वये । अस्माकं । अस्तु । केवलः ॥ १० ॥ अव । सृज । वनस्पते । देव । देवेभ्यः ।

अव॑ सृजा वनस्पते॒ देव॑ दे॒वेभ्यो॑ ह॒विः ।

प्र दा॒तुर॑स्तु॒ चेत॑नम् ॥ ११ ॥

स्वाहा॑ य॒ज्ञं कृ॑णोत॒नेन्द्रा॑य॒ यज्व॑नो गृ॒हे ।

तत्र॑ दे॒वाँ उप॑ ह्वये ॥ १२ ॥ २५ ॥

॥ १४ ॥ १-१२ मेधातिथिः काण्व ऋषिः ॥ विश्वेदेवा देवताः ॥ गायत्री छन्दः ॥ षड्जः स्वरः ॥

(१४) ऐभि॑रग्ने॒ दुवो॒ गिरो॒ विश्वे॑भि॒ः सोम॑पीतये ।

दे॒वेभि॑र्याहि॒ यक्षि॑ च ॥ १ ॥

आ त्वा॒ कण्वा॑ अहूषत गृ॒णन्ति॑ विप्र ते॒ धियः॑ ।

दे॒वेभि॑रग्न॒ आ ग॑हि ॥ २ ॥

इ॒न्द्र॒वा॒यू बृह॒स्पतिं॑ मि॒त्राग्निं पू॒षणं॒ भग॑म् ।

आ॒दि॒त्यान्मारु॑तं ग॒णम् ॥ ३ ॥

प्र वो॑ भ्रियन्त॒ इन्द॑वो मत्स॒रा मा॑दयि॒ष्णवः॑ ।

द्र॒प्सा मध्व॑श्चमू॒षदः॑ ॥ ४ ॥

ह॒विः । प्र । दा॒तुः । अ॒स्तु॒ । चेत॑नं ॥ ११ ॥ स्वाहा॑ । य॒ज्ञं । कृ॒णो॒त॒न॒ । इं॒द्रा॑य । यज्व॑नः । गृ॒हे । तत्र॑ । दे॒वान् । उप॑ । ह्व॒ये॒ ॥ १२ ॥ २५ ॥

आ । ए॒भिः॒ । अ॒ग्ने॒ । दुवः॑ । गिरः॑ । विश्वे॑भिः । सोम॑ऽपीतये । दे॒वेभिः॑ । या॒हि॒ । यक्षि॑ । च॒ ॥१॥ आ । त्वा॒ । कण्वाः॑ । अ॒हू॒ष॒त॒ । गृ॒णंति॑ । वि॒प्र॒ । ते॒ । धियः॑ । दे॒वेभिः॑ । अ॒ग्ने॒ । आ । ग॒हि॒ ॥२॥ इं॒द्र॒वा॒यू इति॑ । बृह॒स्पतिं॑ । मि॒त्रा । अ॒ग्निं । पू॒षणं॑ । भगं॑ । आ॒दि॒त्यान् । मारु॑तं । ग॒णं ॥३॥ प्र । वः॒ । भ्रि॒यं॒ते॒ । इंद॑वः । म॒त्स॒राः । मा॒द॒यि॒ष्णवः॑ । द्र॒प्साः । मध्वः॑ । च॒मू॒ऽसदः॑ ॥ ४ ॥

ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः ।
हविष्मन्तो अरंकृतः ॥५॥

घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः ।
आ देवान्त्सोमपीतये ॥६॥२६॥

तान्यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि ।
मध्वः सुजिह्व पायय ॥ ७ ॥

ये यजत्रा य ईड्यास्ते ते पिबन्तु जिह्वया ।
मधोरग्ने वषट्कृति ॥ ८ ॥

आकीं सूर्यस्य रोचनाद्विश्वान्देवाँ उषर्बुधः ।
विप्रो होतेह वक्षति ॥ ९ ॥

विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना ।
पिबा मित्रस्य धामभिः ॥१०॥

त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि ।
सेमं नो अध्वरं यज ॥ ११ ॥

(ईळते । त्वां । अवस्यवः । कण्वासः) । वृक्तऽबर्हिषः । हविष्मंतः । अरंऽकृतः ॥ ५ ॥ घृतऽपृष्ठाः । मनःऽयुजः । ये । त्वा । वहंति । वह्नयः । आ । देवान् । सोमऽपीतये ॥ ६ ॥ २६ ॥ तान् । यजत्रान् । ऋतऽवृधः । अग्ने । पत्नीऽवतः । कृधि । मध्वः । सुऽजिह्व । पायय ॥७॥ ये । यजत्राः । ये । ईड्याः । ते । ते । पिबंतु । जिह्वया । मधोः । अग्ने । वषट्ऽकृति ॥८॥ आकीं । सूर्यस्य । रोचनात् । विश्वान् । देवान् । उषःऽबुधः । विप्रः । होता । इह । वक्षति ॥९॥ विश्वेभिः । सोम्यं । मधु । अग्ने । इंद्रेण । वायुना । पिब । मित्रस्य । धामऽभिः ॥१०॥ त्वं । होता । मनुःऽहितः । अग्ने । यज्ञेषु । सीदसि । सः । इमं । नः । अध्वरं ।

युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः ।

ताभिर्देवाँ इहा वह ॥ १२॥ २७ ॥

॥ १५ ॥ १–१२ मेधातिथिः काण्व ऋषिः ॥ देवता—ऋतवः । १ इन्द्रः । २ मरुतः । ३ त्वष्टा । ४ अग्निः । ५ इन्द्रः । ६ मित्रावरुणौ । ७–१० द्रविणोदाः । ११ अश्विनौ । १२ अग्निः ॥ गायत्री छन्दः ॥ षड्जः स्वरः ॥

(१५) इन्द्र सोमं पिब ऋतुना त्वा विशन्त्विन्दवः ।

मत्सरासस्तदोकसः ॥ १ ॥

मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन ।

यूयं हि ष्ठा सुदानवः ॥ २ ॥

अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना ।

त्वं हि रत्नधा असि ॥ ३ ॥

अग्ने देवाँ इहा वह सादया योनिषु त्रिषु ।

परि भूष पिब ऋतुना ॥ ४ ॥

युज्व ॥ ११ ॥ युक्ष्व । हि । अरुषीः । रथे । हरितः । देव । रोहितः । ताभिः । देवान् । इह । आ । वह ॥ १२ ॥ २७ ॥

इन्द्र । सोमं । पिब । ऋतुना । आ । त्वा । विशन्तु । इन्दवः । मत्सरासः । तत्ऽओकसः ॥ १ ॥ मरुतः । पिबत । ऋतुना । पोत्रात् । यज्ञं । पुनीतन । यूयं । हि । स्थ । सुऽदानवः ॥२॥ अभि । यज्ञं । गृणीहि । नः । ग्नावः । नेष्टरिति । पिब । ऋतुना । त्वं । हि । रत्नऽधाः । असि ॥ ३ ॥ अग्ने । देवान् । इह । आ । वह । सादय । योनिषु । त्रिषु । परि । भूष । पिब । ऋतुना ॥ ४ ॥

ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँरनु ।

तवेद्धि सख्यमस्तृतम् ॥ ५ ॥

युवं दक्षं धृतव्रत मित्रावरुण दूळभम् ।

ऋतुना यज्ञमाशाथे ॥ ६ ॥ २८ ॥

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे ।

यज्ञेषु देवमीळते ॥ ७ ॥

द्रविणोदा ददातु नो वसूनि यानि शृण्विरे ।
देवेषु ता वनामहे ॥ ८ ॥

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत ।

नेष्ट्रादृतुभिरिष्यत ॥ ९ ॥

यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे ।

अध स्मा नो ददिर्भव ॥ १० ॥

ब्राह्मणात् । इन्द्र । राधसः । पिब । सोमं । ऋतून् । अनु । तव । इव । हि । सख्यं । अस्तृतं ॥ ५ ॥ युवं । दक्षं । धृतऽव्रता । मित्रावरुणा । दुःऽदभं । ऋतुना । यज्ञं । आशाथे इति ॥६॥ २८ ॥ द्रविणःऽदाः । द्रविणसः । ग्रावऽहस्तासः । अध्वरे । यज्ञेषु । देवं । ईळते ॥७॥ द्रविणःऽदाः । ददातु । नः । वसूनि । यानि । शृण्विरे । देवेषु । ता । वनामहे ॥८॥ द्रविणःऽदाः । पिपीषति । जुहोत । प्र । च । तिष्ठत । नेष्ट्रात् । ऋतुऽभिः । इष्यत ॥९॥ यत् । त्वा । तुरीयं । ऋतुऽभिः । द्रविणःऽदः । यजामहे । अध । स्म । नः । ददिः । भव ॥१०॥ अश्विना । पिबतं । मधु । दीद्यग्नी इति दीदिऽअग्नी । शुचिऽव्रता । ऋतुना । यज्ञऽ-

अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता ।

ऋतुना यज्ञवाहसा ॥ ११ ॥

गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि ।

देवान्देवयते यज ॥ १२ ॥ २९ ॥

॥ १६ ॥ १–९ मेधातिथिः काण्व ऋषिः ॥ इन्द्रो देवता ॥ गायत्री छन्दः ॥ षड्जः स्वरः ॥

(१६) आ त्वा वहन्तु हरयो वृषणं सोमपीतये ।

इन्द्र त्वा सूरचक्षसः ॥ १ ॥

इमा धाना घृतस्नुवो हरी इहोप वक्षतः ।

इन्द्रं सुखतमे रथे ॥ २ ॥

इन्द्रं प्रातर्हवामह इन्द्रं प्रयत्यध्वरे ।

इन्द्रं सोमस्य पीतये ॥ ३ ॥

उप नः सुतमा गहि हरिभिरिन्द्र केशिभिः ।

सुते हि त्वा हवामहे ॥ ४ ॥

वाहसा ॥ ११ ॥ गार्हऽपत्येन । सन्त्य । ऋतुना । यज्ञऽनीः । असि । देवान् । देवऽयते । यज ॥ १२ ॥ २९ ॥

आ । त्वा । वहन्तु । हरयः । वृषणं । सोमऽपीतये । इंद्र । त्वा । सूरऽचक्षसः ॥१॥ इमाः । धानाः । घृतऽस्नुवः । हरी इति । इह । उप । वक्षतः । इंद्रं । सुखऽतमे । रथे ॥२॥ इंद्रं । प्रातः । हवामहे । इंद्रं । प्रऽयति । अध्वरे । इंद्रं । सोमस्य । पीतये ॥ ३ ॥ उप । नः । सुतं । आ । गहि । हरिऽभिः । इंद्र । केशिऽभिः । सुते । हि । त्वा । हवामहे ॥४॥

सेमं नः स्तोममा गह्युपेदं सवनं सुतम् ।

गौरो न तृषितः पिब ॥५॥ ३० ॥

इमे सोमास इन्दवः सुतासो अधि बर्हिषि ।

ताँ इन्द्र सहसे पिब ॥ ६ ॥

अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शन्तमः ।

अथा सोमं सुतं पिब ॥ ७ ॥

विश्वमित्सवनं सुतमिन्द्रो मदाय गच्छति ।

वृत्रहा सोमपीतये ॥ ८ ॥

सेमं नः काममा पृण गोभिरश्वैः शतक्रतो ।

स्तवाम त्वा स्वाध्यः ॥ ९ ॥ ३१ ॥

॥ १७ ॥ १-९ मेधातिथिः काण्व ऋषिः ॥ इन्द्रावरुणौ देवते ॥ छन्दः—२ यवमध्या विराड् गायत्री । ४ पादनिचृद् गायत्री । ५ भुरिगार्चि गायत्री । ६ निचृद्गायत्री । ८ पिपीलिकामध्या निचृद्गायत्री । १, ३, ७, ९, गायत्री ॥ षड्जः स्वरः ॥

सः । इमं । नः । स्तोमं । आ । गहि । उप । इदं । सवनं । सुतं । गौरः । न । तृषितः । पिब ॥ ५ ॥ ३० ॥ इमे । सोमासः । इंदवः । सुतासः । अधि । बर्हिषि । तान् । इंद्र । सहसे । पिब ॥६॥ अयं । ते । स्तोमः । अग्रियः । हृदिऽस्पृक् । अस्तु । शंऽतमः । अथ । सोमं । सुतं । पिब ॥ ७ ॥ विश्वं । इत् । सवनं । सुतं । इंद्रः । मदाय । गच्छति । वृत्रऽहा । सोमऽपीतये ॥८॥ सः । इमं । नः । कामं । आ । पृण । गोभिः । अश्वैः । शतक्रतो इति शतऽक्रतो । स्तवाम । त्वा । सुऽआध्यः ॥ ९ ॥ ३१ ॥

(१७) इन्द्रावरुणयोरहं सम्राजोरव आ वृणे ।
ता नो मृळात ईदृशे ॥ १ ॥
गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः ।
धर्तारा चर्षणीनाम् ॥ २ ॥
अनुकामं तर्पयेथामिन्द्रावरुण राय आ ।
ता वां नेदिष्ठमीमहे ॥ ३ ॥
युवाकु हि शचीनां युवाकु सुमतीनां ।
भूयाम वाजदाव्नाम् ॥ ४ ॥
इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम् ।
क्रतुर्भवत्युक्थ्यः ॥ ५ ॥ ३२ ॥
तयोरिदवसा वयं सनेम नि च धीमहि ।
स्यादुत प्ररेचनम् ॥ ६ ॥
इन्द्रावरुण वामहं हुवे चित्राय राधसे ।
अस्मान्त्सु जिग्युषस्कृतम् ॥ ७ ॥
इन्द्रावरुण नू नु वां सिषासन्तीषु धीष्वा ।
अस्मभ्यं शर्म यच्छतम् ॥ ८ ॥

इंद्रावरुणयोः। अहं । संऽराजोः। अवः । आ। वृणे । ता। नः। मृळातः। ईदृशे ॥१॥ गंतारा। हि। स्थः। अवसे। हवं। विप्रस्य। माऽवतः। धर्तारा। चर्षणीनां ॥ २ ॥ अनुऽकामं। तर्पयेथां। इंद्रावरुणा। रायः। आ। ता। वां। नेदिष्ठं। ईमहे ॥३॥ युवाकु। हि। शचीनां। युवाकु। सुऽमतीनां। भूयाम। वाजऽदाव्नां। ॥४॥ इंद्रः। सहस्रऽदाव्नां। वरुणः। शंस्यानां। क्रतुः। भवति। उक्थ्यः ॥५॥३२॥ तयोः। इत्। अवसा। वयं। सनेम। नि। च। धीमहि। स्यात्। उत। प्रऽरेचनं ॥६॥ इंद्रावरुणा। वां। अहं। हुवे। चित्राय। राधसे। अस्मान्। सु। जिग्युषः। कृतं ॥ ७ ॥ इंद्रावरुणा। नु। नु। वां। सिसासंतीषु। धीषु। आ। अस्मभ्यं। शर्म। यच्छतं ॥ ८ ॥

प्र वामश्नोतु सुष्टुतिरिन्द्रावरुण यां हुवे ।
यामृधाथे सधस्तुतिम् ॥ ९ ॥ ३३ ॥ ४ ॥

॥ पञ्चमोऽनुवाकः ॥

॥ १८ ॥ १–९ मेधातिथिः काण्व ऋषिः ॥ देवता १–३ ब्रह्मणस्पतिः । ४ ब्रह्मणस्पतिरिन्द्रश्च सोमश्च । ५ बृहस्पतिदक्षिणे । ६–८ सदसस्पतिः । ९ सदसस्पतिर्नाराशंसो वा ॥ छन्दः–१ विराड् गायत्री । ३, ६. ८ पिपीलिकामध्या निचृद्गायत्री । ४ निचृद्गायत्री । ५ पादनिचृद्गायत्री । २, ७, ९ गायत्री ॥ षड्जः स्वरः

(१८) सोमानं स्वरणं कृणुहि ब्रह्मणस्पते ।
कक्षीवन्तं य औशिजः ॥ १ ॥
यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः ।
स नः सिषक्तु यस्तुरः ॥ २ ॥
मा नः शंसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य ।
रक्षा णो ब्रह्मणस्पते ॥ ३ ॥
स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः ।
सोमो हिनोति मर्त्यम् ॥ ४ ॥
त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यम् ।
दक्षिणा पात्वंहसः ॥ ५ ॥ ३४ ॥

प्र । वां । अश्नोतु । सुऽस्तुतिः । इंद्रावरुणा । यां । हुवे । यां । ऋधाथे इति । सधऽस्तुतिं ॥ ९ ॥ ३३ ॥ ४ ॥

॥ पञ्चमोऽनुवाकः ॥

सोमानं स्वरणं कृणुहि । ब्रह्मणः । पते । कक्षीवंतं । यः । औशिजः ॥१॥ यः । रेवान् । यः । अमीवऽहा । वसुऽवित् । पुष्टिऽवर्धनः । सः । नः । सिसक्तु । यः । तुरः ॥२॥ मा । नः । शंसः । अररुषः । धूर्तिः । प्रणक् । मर्त्यस्य । रक्ष । नः । ब्रह्मणः । पते ॥३॥ सः । घ । वीरः । न । रिष्यति । यं । इंद्रः । ब्रह्मणः । पतिः । सोमः । हिनोति । मर्त्यं ॥४॥ त्वं । तं । ब्रह्मणः । पते । सोमः । इंद्रः । च । मर्त्यं । दक्षिणा । पातु । अंहसः ॥ ५ ॥ ३४ ॥ सदसः । पतिं । अद्भुतं । प्रियं । इंद्रस्य । काम्यं । सनिं ।

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम् ॥ ६ ॥
यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन ।
स धीनां योगमिन्वति ॥ ७ ॥
आदृध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरम् ।
होत्रा देवेषु गच्छति ॥ ८ ॥
नराशंसं सुधृष्टममपश्यं सप्रथस्तमम् ।
दिवो न सद्ममखसम् ॥ ९ ॥ ३५ ॥

॥ १९. ॥ १—९. मेधातिथिः काण्व ऋषिः ॥ देवता अग्निर्मरुतश्च ॥ छन्दः—२ निचृद्गायत्री । ९ पिपीलिकामध्या निचृद्गायत्री । १, ३ ८ गायत्री ॥ षड्जः स्वरः ॥

(१९.) प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे ।
मरुद्भिरग्न आ गहि ॥ १ ॥
नहि देवो न मर्त्यो महस्तव क्रतुं परः ।
मरुद्भिरग्न आ गहि ॥ २ ॥
ये महो रजसो विदुर्विश्वे देवासो अद्रुहः ।
मरुद्भिरग्न आ गहि ॥ ३ ॥

मेधां । अयासिषं ॥ ६ ॥ यस्मात् । ऋते । न । सिध्यति । यज्ञः । विपःऽचितः । चन । सः । धीनां । योगं । इन्वति ॥७॥ आत् । ऋध्नोति । हविःऽकृतिं । प्राञ्चं । कृणोति । अध्वरं । होत्रा । देवेषु । गच्छति ॥८॥ नराशंसं । सुऽधृष्टमं । अपश्यं । सप्रथःऽतमं । दिवः । न । सद्मऽमखसं ॥ ९ ॥ ३५ ॥

प्रति । त्यं । चारुं । अध्वरं । गोऽपीथाय । प्र । हूयसे । मरुत्ऽभिः । अग्ने । आ । गहि ॥१॥ नहि । देवः । न । मर्त्यः । महः । तव । क्रतुं । परः । मरुत्ऽभिः । अग्ने । आ । गहि ॥ २ ॥ ये । महः । रजसः । विदुः । विश्वे । देवासः । अद्रुहः । मरुत्ऽभिः । अग्ने । आ । गहि ॥ ३ ॥

य उ॒ग्रा अ॒र्कमा॑नृ॒चुरना॑धृष्टास॒ ओज॑सा ।
मरु॑द्भिरग्न॒ आ ग॑हि ॥ ४ ॥
ये शु॒भ्रा घो॒रव॑र्पसः सुक्ष॒त्रासो॑ रि॒शाद॑सः ।
मरु॑द्भिरग्न॒ आ ग॑हि ॥ ५ ॥ ३६ ॥
ये नाक॒स्याधि॑ रोच॒ने दि॒वि दे॒वास॒ आस॑ते ।
मरु॑द्भिरग्न॒ आ ग॑हि ॥ ६ ॥
य ई॒ङ्खय॑न्ति॒ पर्व॑तान् ति॒रः स॑मु॒द्रम॑र्ण॒वम् ।
मरु॑द्भिरग्न॒ आ ग॑हि ॥ ७ ॥
आ ये त॒न्वन्ति॑ र॒श्मिभि॑स्ति॒रः स॑मु॒द्रमोज॑सा ।
मरु॑द्भिरग्न॒ आ ग॑हि ॥ ८ ॥
अ॒भि त्वा॑ पू॒र्वपी॑तये सृ॒जामि॑ सो॒म्यं मधु॑ ।
मरु॑द्भिरग्न॒ आ ग॑हि ॥ ९ ॥ ३७ ॥ १ ॥

॥ इति प्रथमाष्टके प्रथमोऽध्यायः ॥ १ ॥

ये । उ॒ग्राः । अ॒र्कम् । आ॒नृ॒चुः । अना॑धृष्टासः । ओज॑सा । म॒रुत्ऽभिः॑ । अग्ने॑ । आ । ग॒हि॒ ॥ ४ ॥ ये । शु॒भ्राः । घो॒रऽव॑र्पसः । सु॒ऽक्ष॒त्रासः॑ । रि॒शाद॑सः । म॒रुत्ऽभिः॑ । अ॒ग्ने॒ । आ । ग॒हि॒ ॥ ५ ॥ ३६ ॥ ये । नाक॑स्य । अधि॑ । रो॒च॒ने । दि॒वि । दे॒वासः॑ । आस॑ते । म॒रुत्ऽभिः॑ । अ॒ग्ने॒ । आ । ग॒हि॒ ॥६॥ ये । ई॒ङ्खय॑न्ति । पर्व॑तान् । ति॒रः । स॒मु॒द्रम् । अ॒र्ण॒वम् । म॒रुत्ऽभिः॑ । अ॒ग्ने॒ । आ । ग॒हि॒ ॥७॥ आ । ये । त॒न्वन्ति॑ । र॒श्मिऽभिः॑ । ति॒रः । स॒मु॒द्रम् । ओज॑सा । म॒रुत्ऽभिः॑ । अ॒ग्ने॒ । आ । ग॒हि॒ ॥ ८ ॥ अ॒भि । त्वा॒ । पू॒र्वऽपी॑तये । सृ॒जामि॑ । सो॒म्यम् । मधु॑ । म॒रुत्ऽभिः॑ । अ॒ग्ने॒ । आ । ग॒हि॒ ॥ ९ ॥ ३७ ॥ १ ॥

॥ इति प्रथमाष्टके प्रथमोऽध्यायः ॥ १ ॥

प्रथम अष्टक । प्रथम अध्याय]

॥ ऋग्वेद ॥

प्रथम मण्डल । [प्रथम अनुवाक]

॥ १ ॥ १-९ मधुच्छन्दा ऋषि ॥ अग्नि देवता ॥

अग्नि यज्ञ का अग्रणी है । यज्ञ का प्रमुख देव भी वही है । यज्ञ के हविर्भाग को उन देवताओं को पहुंचानेवाला सन्माननीय आचार्य भी वही है । उनके पास असंख्य रत्नों की अमूल्य निधि है । इस लिये ऐसे अग्निदेव को मैं भक्तिपुर:सर स्तवन करता हूं । १

पूर्व कालीन ऋषि प्रेम से इन अग्नि की स्तुति करते थे । और अर्वाचीन ऋषि भी उनके स्तवन को सर्वथैव योग्य समझते हैं । हमारे यज्ञ में वह समस्त देवताओं को ले आते हैं । २

इन्ही अग्नि के कारण भक्तों को वैभव प्राप्त होता है । और वह वैभव भी कैसा, कि जो दिन प्रति दिन वृद्धिंगत होता जाता है । वीरश्रेष्ठ पुरुषों को ही जो जयश्री प्राप्त हो सकती है वही जयश्री अग्नि की कृपा से पूजकों को प्राप्त होती है । ३

(हे अग्निदेव, जिस यज्ञ पर चारों ओर आपकी दृष्टि रहती है उसी यज्ञ को सब देव ग्रहण करते हैं ।) ४

सब देवों को उनके हविर्भाग अग्निद्वारा ही प्राप्त होते हैं । बुद्धिशाली पण्डितों को ज्ञानसामर्थ्य उन्हींसे प्राप्त होता है । उनके दिये हुए वर निःसंशय सफल होते ही हैं । कोई भक्त चाहे कितने ही स्थानों पर उनसे प्रार्थना करे, उसकी प्रार्थना उनके कानों तक नहीं पहुंचे, यह असंभव है । ऐसे अग्नि देवसमुदाय के साथ यहां पधारे हुए हैं । ५ (१)

हे अग्निदेव, हे अंगिरस्, अपने उपासकों को आप जो मङ्गल आशीर्वचन देंगे, वह अवश्य ही सत्य होगा । इसमें तनिक भी शङ्का नहीं । ६

हे अग्निदेव, नित्य, रात और दिन, अन्तःकरण से आपकी वंदना करता हुआ मैं आपके चरणों का आश्रय करता हूं । ७

क्यों कि प्रत्येक पुण्ययज्ञ में आप विराजमान होते हैं। सब विधियों का रक्षण करनेवाले आप ही हैं । आपका तेज अत्यंत देदीप्यमान है । आप यज्ञ में जब स्थित होते हैं तभी आपको असीम आनन्द प्राप्त होता है । ८

हे अग्निदेव, हम आपके बच्चे हैं । हमारा लाड प्यार आप उत्तम रीति से पिता समान कीजिये । हमारे पास से दूर मत हों । इसी में हमारा मङ्गल है । ९ (२)

सूक्त २

मधुच्छन्दा ऋषि ॥ देवता, १-३ वायु; ४-६ इंद्रवायु; ७-९ मित्रावरुण ॥

हे दर्शनीय वायुदेव, आप आइये । ये सोमरस हमने आप ही के लिये तय्यार करके रखे हैं । इन का सेवन कीजिये और हमारी प्रार्थना सुनिये । १

यागकाल के उत्तम ज्ञानी और स्तोत्रप्रबंध करनेवाले विद्वान् सोमरस सिद्ध करके आपका महत्व सुंदर सुंदर स्तोत्रोंद्वारा गाते हैं । २

पाहि सदमिद्विश्वायुः ॥ ३ ॥

सुऽअग्नयः । हि । वार्यं । देवासः । दधिरे । च । नः । सुऽअग्नयः । मनामहे ॥ ८ ॥ अथ । नः । उभयेषां । अमृत । मर्त्यानां । मिथः । सन्तु । प्रऽशस्तयः ॥ ९ ॥ विश्वेभिः । अग्ने । अग्निऽभिः । इमं । यज्ञं । इदं । वचः । चनः । धाः । सहसः । यहो इति ॥ १० ॥ २१ ॥

अश्वं । न । त्वा । वारऽवन्तं । वन्दध्यै । अग्निं । नमःऽभिः । सम्ऽराजन्तं । अध्वराणां ॥ १ ॥ सः । घ । नः । सूनुः । शवसा । पृथुऽप्रगामा । सुऽशेवः । मीढ्वान् । अस्माकं । बभूयात् ॥ २ ॥ सः । नः । दूरात् । च । आसात् । च । नि । मर्त्यात् । अघऽयोः । पाहि । सदं । इत् । विश्वऽआयुः ॥ ३ ॥

इमम् ऊ षु त्वमस्माकं सनिं गायत्रं नव्यांसम् ।

अग्ने देवेषु प्र वोचः ॥ ४ ॥

आ नो भज परमेष्वा वाजेषु मध्यमेषु ।

शिक्षा वस्वो अन्तमस्य ॥ ५ ॥ २२ ॥

विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ ।

सद्यो दाशुषे क्षरसि ॥ ६ ॥

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः ।

स यन्ता शश्वतीरिषः ॥ ७ ॥

नकिरस्य सहन्त्य पर्येता कयस्य चित् ।

वाजो अस्ति श्रवाय्यः ॥ ८ ॥

स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता ।

विप्रेभिरस्तु सनिता ॥ ९ ॥

जराबोध तद्विविड्ढि विशेविशे यज्ञियाय ।

स्तोमं रुद्राय दृशीकम् ॥ १० ॥ २३ ॥

इमं । ऊं इति । सु । त्वं । अस्माकं । सनिं । गायत्रं । नव्यांसं । अग्ने । देवेषु । प्र । वोचः ॥ ४ ॥
आ । नः । भज । परमेषु । आ । वाजेषु । मध्यमेषु । शिक्ष । वस्वः । अंतमस्य ॥ ५ ॥ २२ ॥
विऽभक्ता । असि । चित्रभानो इति चित्रऽभानो । सिंधोः । ऊर्मौ । उपाके । आ ।
सद्यः । दाशुषे । क्षरसि ॥ ६ ॥ यं । अग्ने । पृत्ऽसु । मर्त्यं । अवाः । वाजेषु । यं ।
जुनाः । सः । यंता । शश्वतीः । इषः ॥ ७ ॥ नकिः । अस्य । सहंत्य । परिऽएता ।
कयस्य । चित् । वाजः । अस्ति । श्रवाय्यः ॥ ८ ॥ सः । वाजं । विश्वऽचर्षणिः । अर्वत्ऽभिः ।
अस्तु । तरुता । विप्रेभिः । अस्तु । सनिता ॥ ९ ॥ जराऽबोध । तत् । विविड्ढि । विशेऽविशे
यज्ञियाय । स्तोमं । रुद्राय । दृशीकं ॥ १० ॥ २३ ॥

स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः ।
धिये वाजाय हिन्वतु ॥ ११ ॥
स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः ।
उक्थैरग्निर्बृहद्भानुः ॥ १२ ॥
नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः ।
यजाम देवान्यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः ॥ १३ ॥ २४ ॥

॥ २८ ॥ १-९ शुनःशेप आजीगर्तिर्ऋषिः ॥ इन्द्रयज्ञसोमा देवताः ॥ छन्दः-१-६ अनुष्टुप् । ७-९ गायत्री ॥ स्वरः—१-६ गान्धारः ७-९ षड्जः ॥

(२८) यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥ १ ॥
यत्र द्वाविव जघनाधिषवण्या कृता ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥ २ ॥

सः । नः । महान् । अनिऽमानः । धूमऽकेतुः । पुरुऽचन्द्रः । धिये । वाजाय । हिन्वतु ॥ ११ ॥ सः । रेवान्ऽइव । विश्पतिः । दैव्यः । केतुः । शृणोतु । नः । उक्थैः । अग्निः । बृहत्ऽभानुः ॥ १२ ॥ नमः । महत्ऽभ्यः । नमः । अर्भकेभ्यः । नमः । युवऽभ्यः । नमः । आशिनेभ्यः । यजाम । देवान् । यदि । शक्नवाम । मा । ज्यायसः । शंसम् । आ । वृक्षि । देवाः ॥ १३ ॥ २४ ॥

यत्र । ग्रावा । पृथुऽबुध्नः । ऊर्ध्वः । भवति । सोतवे । उलूखलऽसुतानाम् । अव । इत् । ऊँ इति । इन्द्र । जल्गुलः ॥ १ ॥ यत्र । द्वौऽइव । जघना । अधिऽसवन्या । कृता । उलूखलऽसुतानाम् । अव । इत् । ऊँ इति । इन्द्र । जल्गुलः ॥ २ ॥

यत्र नार्यपच्यवमुपच्यवं च शिक्षते ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥ ३ ॥

यत्र मन्थां विबध्नते रश्मीन्यमितवा इव ।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥४॥

यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे ।
इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥ ५ ॥ २५ ॥

उत स्म ते वनस्पते वातो वि वात्यग्रमित् ।
अथो इन्द्राय पातवे सुनु सोममुलूखल ॥ ६ ॥

आयजी वाजसातमा ता ह्युच्चा विजर्भृतः ।
हरी इवान्धांसि बप्सता ॥ ७ ॥

ता नो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः ।
इन्द्राय मधुमत्सुतम् ॥ ८ ॥

यत्र । नारी । अपऽच्यवं । उपऽच्यवं । च । शिक्षते । उलूखलऽसुतानां । अव । इत् । ऊं इति । इंद्र । जल्गुलः ॥३॥ यत्र । मंथां । विऽबध्नते । रश्मीन् । यमितवैऽइव । उलूखलऽसुतानां । अव । इत् । ऊं इति । इंद्र । जल्गुलः ॥ ४ ॥ यत् । चित् । हि । त्वं । गृहेऽगृहे । उलूखलक । युज्यसे । इह । द्युमत्ऽतमं । वद । जयतांऽइव । दुंदुभिः ॥५॥२५॥ उत । स्म । ते । वनस्पते । वातः । वि । वाति । अग्रं । इत् । अथो इति । इंद्राय । पातवे । सुनु । सोमं । उलूखल ॥ ६ ॥ आयजी इत्याऽयजी । वाजऽसातमा । ता । हि । उच्चा । विऽजर्भृतः । हरी इवेति हरीऽइव । अंधांसि । बप्सता ॥ ७ ॥ ता । नः । अद्य । वनस्पती इति । ऋष्वौ । ऋष्वेभिः । सोतृऽभिः । इंद्राय । मधुऽमत् । सुतं ॥ ८ ॥

उच्छिष्टं चम्वोर्भर सोमं पवित्र आ सृज ।

नि धेहि गोरधि त्वचि ॥ ९ ॥२६॥

॥ २९ ॥ १-७ शुनःशेप आजीगर्तिर्ऋषिः ॥ इन्द्रो देवता ॥ पङ्क्तिश्छन्दः ॥ पञ्चमः स्वरः ॥

(२०) यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि ।

आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ १ ॥

शिप्रिन्वाजानां पते शचीवस्तव दंसना ।

आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ २ ॥

नि ष्वापया मिथूदृशा सस्तामबुध्यमाने ।

आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ३ ॥

ससन्तु त्या अरातयो बोधन्तु शूर रातयः ।

आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ४ ॥

उत् । शिष्टं । चम्वोः । भर । सोमं । पवित्रे । आ । सृज । नि । धेहि । गोः । अधि । त्वचि ॥ ९ ॥ २६ ॥

यत् । चित् । हि । सत्य । सोमऽपाः । अनाशस्ताःऽइव । स्मसि । आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ १ ॥ शिप्रिन् । वाजानां । पते । शचीऽवः । तव । दंसना । आ । तु । नः इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ २ ॥ नि । स्वापय । मिथुऽदृशा । सस्तां । अबुध्यमाने इति । आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ३ ॥ ससंतु । त्याः । अरातयः । बोधंतु । शूर । रातयः । आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ४ ॥

समिन्द्र गर्दभं मृण नुवन्तं पापयामुया ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ५ ॥
पताति कुण्डृणाच्या दूरं वातो वनादधि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ६ ॥
सर्वं परिक्रोशं जहि जम्भया कृकदाश्वम् ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥७॥२७॥

॥ ३० ॥ १-२२ शुनःशेप आजीगर्तिर्ऋषिः ॥ देवता—१-१६ इन्द्रः । १७-१९ अश्विनौ । २०-२२ उषाः ॥ छन्दः—१—१०, १२-१५, १७-२२ गायत्री । ११ पादनिचृद्गायत्री । १६ त्रिष्टुप् ॥ स्वरः—१—२२ षड्जः । १६ धैवतश्च ॥

(३०) आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् ।
मंहिष्ठं सिञ्च इन्दुभिः ॥ १ ॥

सं । इंद्र । गर्दभं । मृण । नुवंतं । पापया । अमुया । आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ५ ॥ पताति । कुण्डृणाच्या । दूरं । वातः । वनात् । अधि । आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ६ ॥ सर्वं । परिऽक्रोशं । जहि । जंभय । कृकदाश्वं । आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ७ ॥ २७ ॥

आ । वः । इंद्रं । क्रिविं । यथा । वाजऽयंतः । शतऽक्रतुं । मंहिष्ठं । सिंचे । इंदुऽभिः ॥ १ ॥

शतं वा यः शुचीनां सहस्रं वा समाशिराम् ।
एदु निम्नं न रीयते ॥ २ ॥

सं यन्मदाय शुष्मिण एना ह्यस्योदरे ।
समुद्रो न व्यचो दधे ॥ ३ ॥

अयमु ते समतसि कपोत इव गर्भधिम् ।
वचस्तच्चिन्न ओहसे ॥ ४ ॥

स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते ।
विभूतिरस्तु सूनृता ॥ ५ ॥ २८ ॥

ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो ।
समन्येषु ब्रवावहै ॥ ६ ॥

योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
सखाय इन्द्रमूतये ॥ ७ ॥

आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः ।
वाजेभिरुप नो हवम् ॥ ८ ॥

शतं । वा । यः । शुचीनां । सहस्रं । वा । सम्ऽआशिरं । आ । इत् । ऊं इति । निम्नं । न । रीयते ॥ २ ॥ सं । यत् । मदाय । शुष्मिणे । एना । हि । अस्य । उदरे । समुद्रः । न । व्यचः । दधे ॥३॥ अयं । ऊं इति । ते । सं । अतसि । कपोतःऽइव । गर्भऽधिं । वचः । तत् । चित् । नः । ओहसे ॥ ४ ॥ स्तोत्रं । राधानां । पते । गिर्वाहः । वीर । यस्य । ते । विऽभूतिः । अस्तु । सूनृता ॥५॥ २८ ॥ ऊर्ध्वः । तिष्ठ । नः । ऊतये । अस्मिन् । वाजे । शतक्रतो इति शतऽक्रतो । सं । अन्येषु । ब्रवावहै ॥ ६ ॥ योगेऽयोगे । तवःऽतरं । वाजेऽवाजे । हवामहे । सखायः । इंद्रं । ऊतये ॥ ७ ॥ आ । घ । गमत् । यदि । श्रवत् । सहस्रिणीभिः । ऊतिऽभिः । वाजेभिः । उप । नः । हवं ॥ ८ ॥

अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् ।
यं ते पूर्वं पिता हुवे ॥ ९ ॥

तं त्वा वयं विश्ववारा शास्महे पुरुहूत ।
सखे वसो जरितृभ्यः ॥ १० ॥ २९॥

अस्माकं शिप्रिणीनां सोमपाः सोमपाव्नाम् ।
सखे वज्रिन्त्सखीनाम् ॥ ११ ॥

तथा तदस्तु सोमपाः सखे वज्रिन्तथा कृणु ।
यथा त उश्मसीष्टये ॥ १ २ ॥

रेवतीर्नः सधमाद इंद्रे सन्तु तुविवाजाः ।
क्षुमन्तो याभिर्मदेम ॥ १ ३ ॥

आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः ।
ऋणोरक्षं न चक्र्योः ॥ १४ ॥

अनु । प्रत्नस्य । ओकसः । हुवे । तुविऽप्रतिं । नरं । यं । ते । पूर्वं । पिता । हुवे ॥ ९ ॥ तं । त्वा । वयं । विश्वऽवार । आ । शास्महे । पुरुऽहूत । सखे । वसो इति । जरितृऽभ्यः ॥१०॥२९॥ अस्माकं । शिप्रिणीनां । सोमऽपाः । सोमऽपाव्नां । सखे । वज्रिन् । सखीनां ॥११॥ तथा । तत् । अस्तु । सोमऽपाः । सखे । वज्रिन् । तथा । कृणु । यथा । ते । उश्मसि । इष्टये ॥१२॥ रेवतीः । नः । सधऽमादे । इंद्रे । संतु । तुविऽवाजाः । क्षुऽमंतः । याभिः । मदेम ॥१३॥ आ । घ । त्वाऽवान् । त्मना । आप्तः । स्तोतृऽभ्यः । धृष्णो इति । इयानः । ऋणोः । अक्षं । न । चक्र्योः ॥ १४ ॥

आ यद्दुवः शतक्रतवा कामं जरितॄणाम् ।
ऋणोरक्षं न शचीभिः ॥ १५ ॥ ३० ॥

शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वसद्भिर्धनानि ।
स नो हिरण्यरथं दंसनावान्त्स नः सनिता सनये स नोऽदात् ॥१६॥

आश्विनावश्वावत्येषा यातं शवीरया ।
गोमद्दस्रा हिरण्यवत् ॥ १७ ॥

समानयोजनो हि वां रथो दस्रावमर्त्यः ।
समुद्रे अश्विनेयते ॥ १८ ॥

न्यघ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः ।
परि द्यामन्यदीयते ॥ १९ ॥

कस्त उषः कधप्रिये भुजे मर्तो अमर्त्ये ।
कं नक्षसे विभावरि ॥ २० ॥

आ । यत् । दुवः । शतक्रतो इति शतऽक्रतो । आ । कामं । जरितॄणां । ऋणोः । अक्षं । न । शचीभिः ॥१५॥३०॥ शश्वत् । इन्द्रः । पोप्रुथत्ऽभिः । जिगाय । नानदत्ऽभिः । शाश्वसत्ऽभिः । धनानि । सः । नः । हिरण्यऽरथं । दंसनाऽवान् । सः । नः । सनिता । सनये । सः । नः । अदात् ॥ १६ ॥ आ । अश्विनौ । अश्वऽवत्या । इषा । यातं । शवीरया । गोऽमत् । दस्रा । हिरण्यऽवत् ॥ १७ ॥ समानऽयोजनः । हि । वां । रथः । दस्रौ । अमर्त्यः । समुद्रे । अश्विना । ईयते ॥१८॥ नि । अघ्न्यस्य । मूर्धनि । चक्रं । रथस्य । येमथुः । परि । द्यां । अन्यत् । ईयते ॥१९॥ कः । ते । उषः । कधऽप्रिये । भुजे । मर्तः । अमर्त्ये । कं । नक्षसे । विभाऽवरि ॥२०॥

वयं हि ते अमन्मह्यान्तादा पराकात् ।
अश्वे न चित्रे अरुषि ॥ २१ ॥
त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिवः ।
अस्मे रयिं नि धारय ॥२२॥ ३१ ॥६ ॥

॥ सप्तमोऽनुवाकः ॥

॥ ३१ ॥ १–१८ हिरण्यस्तूप आङ्गिरस ऋषिः ॥ अग्निर्देवता ॥ छन्दः १–७, ९–१५, १७ जगती । ८, १६, १८ त्रिष्टुप् ॥ स्वरः १–७, ९–१५, १७ निषादः । ८, १६, १८ धैवतः ॥

(३१) त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥ १ ॥
त्वमग्ने प्रथमो अङ्गिरस्तमः कविर्देवानां परि भूषसि व्रतम् ।
विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे ॥ २ ॥

वयं । हि । ते । अमन्महि । आ । अंतात् । आ । पराकात् । अश्वे । न । चित्रे । अरुषि ॥ २१ ॥ त्वं । त्येभिः । आ । गहि । वाजेभिः । दुहितः । दिवः । अस्मे इति । रयिं । नि । धारय ॥ २२ ॥ ३१ ॥ ६ ॥

॥ सप्तमोऽनुवाकः ॥

(त्वं । अग्ने । प्रथमः । अंगिराः । ऋषिः ।) देवः । देवानां । अभवः । शिवः । सखा । तव । व्रते । कवयः । विद्मनाऽअंपसः । अजायंत । मरुतः । भ्राजत्ऽऋष्टयः ।
॥१॥ त्वं । अग्ने । प्रथमः । अंगिरःऽतमः । कविः । देवानां । परि । भूषसि । व्रतं ।
विऽभुः । विश्वस्मै । भुवनाय । मेधिरः । द्विऽमाता । शयुः । कतिधा । चित् ।
आयवे ॥ २ ॥

त्वम॑ग्ने प्रथ॒मो मा॑त॒रिश्व॑न आ॒विर्भ॑व सुक्रतू॒या वि॒वस्व॑ते ।
अरे॑जेतां॒ रोद॑सी होतृ॒वूर्येऽस॑घ्नोर्भा॒रमय॑जो म॒हो व॑सो ॥ ३ ॥
त्वम॑ग्ने॒ मन॑वे॒ द्याम॑वाशयः पुरू॒रव॑से सु॒कृते॑ सु॒कृत्त॑रः ।
श्वा॒त्रेण॒ यत्पि॒त्रोर्मुच्य॑से॒ पर्या त्वा॒ पूर्व॑मनय॒न्नाप॑रं॒ पुनः॑ ॥ ४ ॥
त्वम॑ग्ने वृष॒भः पु॑ष्टि॒वर्ध॑न॒ उद्य॑तस्रुचे भवसि श्र॒वाय्यः॑ ।
य आहु॑तिं॒ परि॒ वेदा॒ वष॑ट्कृति॒मेका॑यु॒रग्रे॒ विश॑ आ॒विवा॑ससि ॥५॥३२॥
त्वम॑ग्ने वृजि॒नव॑र्तनिं॒ नरं॒ सक्म॑न्पिपर्षि वि॒दथे॑ विचर्षणे ।
यः शूर॑साता॒ परि॑तक्म्ये॒ धने॑ द॒भ्रेभि॑श्चि॒त्समृ॑ता॒ हंसि॒ भूय॑सः ॥ ६ ॥
त्वं तम॑ग्ने अमृत॒त्व उ॑त्त॒मे मर्तं॑ दधासि॒ श्रव॑से दि॒वेदि॑वे ।
यस्ता॑तृषा॒ण उ॒भया॑य॒ जन्म॑ने॒ मयः॑ कृ॒णोषि॒ प्रय॒ आ च॑ सू॒रये॑ ॥ ७ ॥

त्वं । अ॒ग्ने॒ । प्र॒थ॒मः । मा॒त॒रिश्व॑ने । आ॒विः । भ॒व॒ । सु॒क्र॒तु॒ऽया । वि॒वस्व॑ते । अरे॑जेतां । रोद॑सी॒ इति॑ । हो॒तृ॒ऽवूर्ये॑ । अस॑घ्नोः । भा॒रं । अय॑जः । म॒हः । व॒सो॒ इति॑ ॥३॥ त्वं । अ॒ग्ने॒ । मन॑वे । द्यां । अ॒वा॒श॒यः॒ । पु॒रू॒रव॑से । सु॒ऽकृते॑ । सु॒कृत्ऽत॑रः । श्वा॒त्रेण॑ । यत् । पि॒त्रोः । मुच्य॑से । परि॑ । आ । त्वा॒ । पूर्वं॑ । अ॒न॒य॒न् । आ । अप॑रं । पुन॒रिति॑ । ४॥ त्वं । अ॒ग्ने॒ । वृ॒ष॒भः । पु॒ष्टि॒ऽवर्ध॑नः । उद्य॑तःऽस्रुचे । भ॒व॒सि॒ । श्र॒वाय्यः॑ । यः । आऽहु॑तिं । परि॑ । वेद॑ । वष॑ट्ऽकृतिं । एक॑ऽआयुः । अग्रे॑ । विशः॑ । आ॒ऽविवा॑ससि ॥५॥३२॥ त्वं । अ॒ग्ने॒ । वृ॒जि॒नऽव॑र्तनिं । नरं॑ । सक्म॑न् । पि॒प॒र्षि॒ । वि॒दथे॑ । वि॒ऽच॒र्ष॒णे॒ । यः । शूर॑ऽसाता । परि॑ऽतक्म्ये । धने॑ । द॒भ्रेभिः॑ । चि॒त् । सम्ऽऋ॑ता । हंसि॑ । भूय॑सः ॥ ६ ॥ त्वं । तं । अ॒ग्ने॒ । अ॒मृ॒त॒ऽत्वे । उ॒त्ऽत॒मे । मर्तं॑ । द॒धा॒सि॒ । श्रव॑से । दि॒वेऽदि॑वे । यः । त॒तृ॒षा॒णः । उ॒भया॑य । जन्म॑ने । मयः॑ । कृ॒णोषि॑ । प्रयः॑ । आ । च॒ । सू॒रये॑ ॥ ७ ॥

त्वं नो अग्ने सनये धनानां यशसं कारुं कृणुहि स्तवानः ।
ऋध्याम कर्मापसा नवेन देवैर्द्यावापृथिवी प्रावतं नः ॥ ८ ॥

त्वं नो अग्ने पित्रोरुपस्थ आ देवो देवेष्वनवद्य जागृविः ।
तनूकृद्बोधि प्रमतिश्च कारवे त्वं कल्याण वसु विश्वमोपिषे ॥ ९ ॥

त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयम् ।
सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य ॥१०॥३३॥

त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुषस्य विश्पतिम् ।
इळामकृण्वन्मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य जायते ॥ ११ ॥

त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते ॥ १२ ॥

त्वं । नः । अग्ने । सनये । धनानां । यशसं । कारुं । कृणुहि । स्तवानः । ऋध्याम । कर्म । अपसा । नवेन । देवैः । द्यावापृथिवी इति । प्र । अवतं । नः ॥ ८ ॥ त्वं । नः । अग्ने । पित्रोः । उपऽस्थे । आ । देवः । देवेषु । अनवद्य । जागृविः । तनूऽकृत् । बोधि । प्रऽमतिः । च । कारवे । त्वं । कल्याण । वसु । विश्वं । आ । उपिषे ॥ ९ ॥ त्वं । अग्ने । प्रऽमतिः । त्वं । पिता । असि । नः । त्वं । वयःऽकृत् । तव । जामयः । वयं । सं । त्वा । रायः । शतिनः । सं । सहस्रिणः । सुऽवीरं । यंति । व्रतऽपां । अदाभ्य ॥ १० ॥ ३३ ॥ त्वां । अग्ने । प्रथमं । आयुं । आयवे । देवाः । अकृण्वन् । नहुषस्य । विश्पतिं । इळां । अकृण्वन् । मनुषस्य । शासनीं । पितुः । यत् । पुत्रः । ममकस्य । जायते ॥११॥ त्वं । नः । अग्ने । तव । देव । पायुऽभिः । मघोनः । रक्ष । तन्वः । च । वंद्य । त्राता । तोकस्य । तनये । गवां । असि । अनिऽमेषं । रक्षमाणः । तव । व्रते ।

त्वमग्ने यज्यवे पायुरन्तरोऽनिषङ्गाय चतुरक्ष इध्यसे ।
यो रातहव्योऽवृकाय धायसे कीरेश्चिन्मन्त्रं मनसा वनोषि तम् ॥१३॥

त्वमग्न उरुशंसाय वाघते स्पार्हं यद्रेक्णः परमं वनोषि तत् ।
आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः ॥१४॥

त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः ।
स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोपमा दिवः ॥१५॥३४॥

इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम दूरात् ।
आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानाम् ॥ १६ ॥

मनुष्वदग्ने अङ्गिरस्वदङ्गिरो ययातिवत्सदने पूर्ववच्छुचे ।
अच्छ याह्या वहा दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियम् ॥१७॥

त्वं । अग्ने । यज्यवे । पायुः । अंतरः । अनिषंगाय । चतुःऽअक्षः । इध्यसे । यः । रातऽहव्यः । अवृकाय । धायसे । कीरेः । चित् । मंत्रं । मनसा । वनोषि । तं ॥१३॥ त्वं । अग्ने । उरुऽशंसाय । वाघते । स्पार्हं । यत् । रेक्णः । परमं । वनोषि । तत् । आध्रस्य । चित् । प्रऽमतिः । उच्यसे । पिता । प्र । पाकं । शास्सि । प्र । दिशः । विदुःऽतरः ॥१४॥ त्वं । अग्ने । प्रयतऽदक्षिणं । नरं । वर्मऽइव । स्यूतं । परि । पासि । विश्वतः । स्वादुऽक्षद्मा । यः । वसतौ । स्योनऽकृत् । जीवऽयाजं । यजते । सः । उपऽमा । दिवः ॥१५॥३४॥ इमां । अग्ने । शरणिं । मीमृषः । नः । इमं । अध्वानं । यं । अगाम । दूरात् । आपिः । पिता । प्रऽमतिः । सोम्यानां । भृमिः । असि । ऋषिऽकृत् । मर्त्यानां ॥ १६ ॥ मनुष्वत् । अग्ने । अंगिरस्वत् । अंगिरः । ययातिऽवत् । सदने । पूर्वऽवत् । शुचे । अच्छ । याहि । आ । वह । दैव्यं । जनं । आ । सादय । बर्हिषि । यक्षि । च । प्रियं ॥ १७ ॥

एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा ।
उत प्र णेष्यभि वस्यो अस्मान्त्सं नः सृज सुमत्या वाजवत्या ॥१८॥३५॥

॥ ३२ ॥ १–१५ हिरण्यस्तूप आङ्गिरस ऋषिः ॥ इंद्रो देवता ॥ त्रिष्टुप् छंदः ॥ धैवतः स्वरः ॥

(३२) इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥ १ ॥
अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः ॥ २ ॥
वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥ ३ ॥
यदिन्द्राहन्प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः ।
आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से ॥ ४ ॥

एतेन । अग्ने । ब्रह्मणा । ववृधस्व । शक्ती । वा । यत । ते । चकृम । विदा । वा । उत । प्र । नेषि । अभि । वस्यः । अस्मान् । सं । नः । सृज । सुऽमत्या । वाजऽवत्या ॥ १८ ॥ ३५ ॥

इंद्रस्य । नु । वीर्याणि । प्र । वोचं । यानि । चकार । प्रथमानि । वज्री । अहन् । अहिं । अनु । अपः । ततर्द । प्र । वक्षणाः । अभिनत । पर्वतानां ॥ १ ॥ अहन् । अहिं । पर्वते । शिश्रियाणं । त्वष्टा । अस्मै । वज्रं । स्वर्यं । ततक्ष । वाश्राःऽइव । धेनवः । स्यंदमानाः । अंजः । समुद्रं । अव । जग्मुः । आपः ॥ २ ॥ वृषऽयमाणः । अवृणीत । सोमं । त्रिऽकद्रुकेषु । अपिबत । सुतस्य । आ । सायकं । मघऽवा । अदत्त । वज्रं । अहन् । एनं । प्रथमऽजां । अहीनां ॥ ३ ॥ यत । इंद्र । अहन् । प्रथमऽजां । अहीनां । आत । मायिनां । अमिनाः । प्र । उत । मायाः । आत । सूर्यं । जनयन् । द्यां । उषसं । तादीत्ना । शत्रुं । न । किल । विवित्से ॥४॥

अहन्वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन ।
स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः ॥५॥३६॥

अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषम् ।
नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ॥ ६ ॥

अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥ ७ ॥

नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः ।
याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतःशीर्बभूव ॥ ८ ॥

नीचावया अभवद्वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार ।
उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः ॥ ९ ॥

अहन् । वृत्रं । वृत्रऽतरं । विऽअंसं । इंद्रः । वज्रेण । महता । वधेन । स्कंधांसिऽइव । कुलिशेन । विऽवृक्णा । अहिः । शयते । उपऽपृक् । पृथिव्याः ॥५॥३६॥ अयोद्धाऽइव । दुःऽमदः । आ । हि । जुह्वे । महाऽवीरं । तुविऽबाधं । ऋजीषं । न । अतारीत् । अस्य । संऽऋतिं । वधानां । सं । रुजानाः । पिपिषे । इंद्रऽशत्रुः ॥६॥ अपात् । अहस्तः । अपृतन्यत । इंद्रं । आ । अस्य । वज्रं । अधि । सानौ । जघान । वृष्णः । वध्रिः । प्रतिऽमानं । बुभूषन् । पुरुऽत्रा । वृत्रः । अशयत् । विऽअस्तः ॥ ७ ॥ नदं । न । भिन्नं । अमुया । शयानं । मनः । रुहाणाः । अति । यंति । आपः । याः । चित् । वृत्रः । महिना । परिऽअतिष्ठत् । तासां । अहिः । पत्सुतःऽशीः । बभूव ॥ ८ ॥ नीचाऽवयाः । अभवत् । वृत्रऽपुत्रा । इंद्रः । अस्याः । अव । वधः । जभार । उत्ऽतरा । सूः । अधरः । पुत्रः । आसीत् । दानुः । शये । सहऽवत्सा । न । धेनुः ॥ ९ ॥

दुसरा अध्याय.

सूक्त २०.

ऋषि—मेधातिथि कण्व । देवता ऋभु ।

जीवनमरण के बंधनों से जिन देवों¹ का छुटकारा नहीं हुआ उनके लिये यह स्तुति विद्वान उपासकों ने स्वमुख से गाई थी । इसके योग से उत्कृष्ट वैभव की प्राप्ति होती है ।　　१

आज्ञा होते ही अपने आप रथ में जुड़ जानेवाले दोनो अश्व देवताओंने अपनी कल्पना से इन्द्रके लिये निर्मित किये, जिन्होंने अपने अद्भुत कृत्यों से यज्ञों में अपने को सन्मान का पात्र बनाया.　　२

जिन्होंने अश्वी देवताओं के लिये सर्वत्र विचरनेवाला सुखकारक रथ बनाया और जिन्होंने दूध देनेवाली गौ को भी उत्पन्न किया.　　३

इन ऋभुओं के लिये जो प्रार्थना की जाती है वह निःसंशय सफल होती है । उनकी वृत्ति बड़ी सरल है । उन्होंने अपने सामर्थ्य से मातापिता को पुनः तरुण बनाया ।　　४

१ मूल मन्त्रमें यह शब्द एकवचनही है । परन्तु यहां बहुवचन का उपयोग करना चाहिये । २ जन्मने ॥
३ शमीभिः ॥
४ परिज्मानम् ॥
५ विष्टी ॥

मरुद्गण से मंडित इन्द्र और राजश्री से विभूषित आदित्य के पास ऋभु तुम्हारे लिये गये हैं। वे मूर्तिमान आनंद हैं। ५ (१)

इसके अतिरिक्त त्वष्टा देवता के बताये प्रसिद्ध चमसे के पुनः चार चमसे इन्होंने बनाये। ६

आप ऐसे पराक्रमी हैं, इस लिये अपना उत्तम आशीर्वाद और इक्कीस प्रकार के रत्न हम भक्तों में से प्रत्येक को दीजिये। ७

अन्य देवताओं को जैसा यज्ञ का भाग मिलता है वैसा ही इन्होंने अपने लिये भी प्राप्त किया हुआ है। यह श्रेष्ठ है। इन्होंने यज्ञ हवि को स्वीकार किया। ८ (२

सूक्त २१.

ऋषि मेधातिथि काण्व । देव [illegible] इन्द्र, अग्नि । [illegible]

इन्द्र और अग्नि इन दोनों को मैं यहां बुलाता हूं। उन्हीं की स्तुति करने की हमारी इच्छा है। वे सोमरस का प्राशन करें। उनको सोमरस भाता है। १

हे मनुष्य, यज्ञ में इन्द्र और अग्नि का स्तवन कर। उनको स्तुतियों से अलंकृत कर। गानों में उनका गायन कर। २

१ सदासः ।
२ एकमेकम् ।
३ अभजन्त ॥
४ उश्मसि ।
५ शुम्भत ॥

मित्र के गौरव[1] के लिये मैं सोमपानार्थ सोमप्रिय इन्द्र और अग्नि का पाचारण करता हूं । ३

तैयार करके रखे हुए हवि के पास मैं उन उग्र परन्तु उदार देवताओं को बुलाता हूं । वह इन्द्र और अग्नि यहां पधारें । ४

हे सर्वश्रेष्ठ इन्द्राग्नि देव आप सर्व लोकसमुदाय का रक्षण करनेवाले हैं । राक्षसों का शासन कीजिये । दुष्ट निःसन्तान हों । ५

चैतन्य–तेज से अतिशय उज्ज्वल स्थान में विराज कर हे इन्द्राग्निदेव, आप अपने सुप्रसिद्ध सत्यत्व का ध्यान रखें और हमको सौख्य अर्पण करें । ६ (३)

सूक्त २२.

ऋषि मेधातिथि काण्व । देवता १–४ अश्वि । ५–८ सविता । ९–१० अग्नि । ११ देवी । १२ इन्द्राणी वरुणानी, अग्नायी । १३–१४ द्यावा, पृथ्वी । १६ विष्णु अथवा देव । १७–२१ विष्णु ।

प्रातःकाल में रथ जोड़कर सिद्ध होनेवाले अश्वी देवताओं के पास जाकर उनको जताओ । वे सोमरस का प्राशन करने के लिये यहां पधारें । १

जिनका रथ उत्कृष्ट है, जो महारथी योद्धाओं में श्रेष्ठ हैं और जो द्युलोक पर्यन्त जाते हैं, ऐसे दोनो अश्वि देवों का मैं पाचारण करता हूं । २

१ प्रशस्तये ॥
२ सन्ता ॥
३ सदसस्पती ॥
४ प्रचेतुन पदं ॥
५ रुजा ॥
६ हवामहे ॥

आपके रथ के चाबुक की ध्वनि सुनते ही यज्ञकर्ताओं में आपके सन्मानार्थ मधुर सोमरस तैयार करनेकी उतावली पड़ जाती है और सत्य तत्व का मनोहर लाभ होने की सबको आशा होने लगती है। उसके योग से हमारे यज्ञ में सुखसमृद्धि की धारा प्रवाहित कीजिये। ३

हे अश्विन, सोमरस अर्पण करनेवाले जिस भक्त के घर अपने रथ द्वारा जानेके लिये जब आप तैयार हो जाते हैं तो वह घर आपके लिये कुछ भी दूर नहीं है। ४

स्वर्ण की भांति कान्तिमान हाथवाले सविता देवता का आमन्त्रण मैं अपने संरक्षण के लिये करता हूं। सविता देवता परम पद के ज्ञाता हैं। ५ । ४ ।

जल में से अवतीर्ण होनेवाले सविता देवता की स्तुति अपने संरक्षण के लिये करो। उन्हीकी आज्ञा हमको मान्य है। ६

सविता देवता को हम भक्तिपूर्वक बुलाते हैं। सब मनुष्योंपर उनकी दृष्टि रहती है। यह आश्चर्यकारक और मन को आल्हादित करनेवाली सम्पत्ति सबको बांटते हैं। ७

आओ मित्रो, बैठो: क्या हमको सविता की स्तुति नहीं करना है? वह दानी हैं। मनोरम ऐश्वर्य को शोभायुक्त करते हैं। ८

हे अग्निदेव, सन्तोषपूर्वक यहां आनेके लिये तैयार बैठी हुई देवपत्नी तथा त्वष्टा देवता को सोमपानार्थ लेकर यहां आइये। ९

---

१ मिमिक्षतम ॥
२ सोमिनः ॥
३ वत्ता ॥
४ उश्मसि ॥
५ राधसः ॥
६ राधांसि ॥
७ उशतीः ॥

होत्रा, भारती, वरूत्री और धिषणा इन अत्यन्त तरुण देवस्त्रियों को, हे अग्नि-देव, हमारे संरक्षण के लिये यहां ले आइये। १० (५)

वीरपत्नी के मार्ग में कहीं भी विघ्न न पड़े, वह हमारे पास आकर हमको कृपा, सौख्य और आनंद की प्राप्ति करावें। ११

अपने क्षेमके लिये हम इन्द्राणी, वरुणानी और अग्नायी को सोमपानार्थ बुलाते हैं। १२

मही, द्यौ और पृथ्वी हमारे यज्ञ पर सुखसमृद्धि की धारा प्रवाहित करें। वह हमारी भरपूर उन्नति करें। १३

उनके घृत परिपूर्ण दुग्ध की प्रशंसा गंधर्वों के लोक में विद्वान पुरुष अपने स्तोत्रों द्वारा करते हैं। १४

हे पृथ्वी आप हम पर सन्तुष्ट हों। आप किसी का नाश नहीं होने देतीं आपमें सबका समावेश होता है। हमको अतिशय सौख्य प्रदान कीजिये। १५ (६)

पृथ्वी के सप्त प्रदेशों सहित समस्त जग में विष्णु ने जहां जहां आक्रमण किया, देवगण उन स्थानों परसे हमारी रक्षा करें। १६

---

१ रना: ॥
२ सचन्ताम् ॥
३ स्वस्तये ॥
४ भरीमभिः ॥
५ रिहन्ति ॥
६ स्योना ॥
७ अतः ॥

विष्णु ने सब स्थानों पर आक्रमण किया। उन्होंने तीन पग धरे। उनके पदरज में ही सब व्याप्त हो गये। १७

अजेय और जगत् संरक्षक विष्णु ने उन स्थानों में धर्म नियम स्थापित करके तीन पग से आक्रमण किया। १८

जिन अलौकिक पराक्रमी कृत्यों के योग से विष्णु ने जगत में अखिल कर्म अवलोकन किये उन कृत्यों पर तनिक दृष्टि डालो। विष्णु इन्द्र का सहायता और मित्र है। १९

ज्ञाता लोक विष्णु के परम पद का सदा निरीक्षण करते रहते हैं। ऐसे समय आकाश की ओर टक टकी लगी रहने की भांति उनकी दृष्टि विस्तीर्ण होती है। २०

सदा जागकर परम भक्ति से विष्णु के परम पद का स्तवन करनेवाले बुद्धिमान पुरुष सर्वत्र उसको प्रसिद्ध करते हैं। २१ (७)

---

१ सम्‌ढुम ॥

२ अदाभ्यः ॥

३ पश्यतो ॥

४ दिवीव ॥

५ विपन्यवः ॥

सूक्त २३.

ऋषि मेधातिथि काण्व । देवता १ वायु । २, ३ इंद्र वायु । ४, ५ मित्र, वरुण । ७-९ मरुत्वान् । १०-१२ विश्वेदेवा । १३-१५ पूषा । १६-२२ आप । २३, २४ अग्नि

यह सोम तीव्र हैं । आप आइये । दही मिलाकर इनको तैयार करके रखा है हे वायुदेव, इनको चखिये वे आपहीके वास्ते रखे हुए हैं । १

इस सोमरसका प्राशन करनेके लिये मैं इन्द्र और वायुका आव्हान करता हूं । ये दोनो द्युलोक पर्यन्त चल जा सकते हैं । २

विद्वानोंने अपने संरक्षणार्थ इन्द्र और वायु का ही पाचारण किया। मन की गति-की भांति इनकी गति भी शीघ्र है । उनके हजारो नेत्र हैं । वे सर्व बुद्धिमता के अधिपति हैं । ३

हम मित्र और वरुणको सोमपानार्थ निमंत्रित करते हैं । वे बडे ज्ञानी हैं और पवित्र कार्योंमें अपने सामर्थ्य का उपयोग करते हैं । ४

नीति मार्गसे नीति नियमनका ज्ञान वृद्धिंगत करनेवाले, तेजके अधिष्ठाता मित्र वरुणको मैं हवि अर्पण करता हूं । ५ (८)

१ आशीर्वन्तः ॥
२ दिविस्पृशा ॥
३ [illegible]जुवा ॥
४ पूतदक्षसा ॥
५ ज्योतिष्पती ॥

हमारा रक्षण करने के जितने मार्ग है, उन सबमें मित्र हमारी रक्षा करें और वरुणभी हमारे संरक्षक हो। वे दोनों हमको बहुत सुखी करें. ६

इंद्रको मरुद्देवो सहित हम सोमपानार्थ बुलाते हैं। हमारे पास आकर उनको सन्तोष हो। ७

हे इन्द्रको प्रमुख रखनेवाले मरुद्देव, आप पूषाके स्नेही हैं। आप सर्व हमारी पुकारको सुनिये। ८

हे अति उदार देव, अपने मित्र इन्द्रके पराक्रमकी सहायता लेकर वृत्रका वध कीजिये। वह अभद्रभाषी हमारा स्वामी न हो। ९

हम सोमपानार्थ सब मरुद्देवो का निमंत्रण करते हैं। वास्तवमें वे पृश्नीके पुत्र बडे उग्र हैं। १० (९.)

विजय पाकर आये हुए वीरोंकी भांति मरुद्देवो की गर्जना बडे जोरसे सुन पडती हैं। हे शूर जिस मार्गमें हमारा कल्याण है उसका अवलम्बन कीजिये। ११

विद्युत्-लताके प्रचंड हास्यमें से अवतीर्ण होनेवाले मरुद्देव हमारी रक्षा करें। वे हमको सुखी रखे। १२

---

१ करताम् ॥
२ मरुत्वन्तम॥
३ विश्वे ॥॥
४ दुःशंसः ॥
५ पृश्निमातरः ॥
६ पायना ॥
७ हस्कारात् ॥

हे अत्यंत देदीप्यमान पूषन् चित्रविचित्र रंगके मयूरपंखोंसे सुसज्जित आकाशके *बालकको भटके हुए बछडेकी भांति ढूंढकर ले आइये। १३

रंगबरंगे मयूरपंखोंसे सुसज्जित, परंतु गुहामें छिपाये जानेके कारण अदृष्ट, ऐसे हमारे राजा पुनः देदीप्यमान पूषणसे मिले। १४

जिस तरह कृषक बैलोंके योगसे धानको उत्पन्न करके घर ले आता है, उसी तरह यह पूषण छ ऋतुओंको सोमरस पानार्थ हमारे पास ले आवे। १५ (१०)

अपने जलोंको माधुर्यसे परिपूरित करके भाविक यज्ञ कर्ताओंकी ये प्रेममयी माताएं अपने मार्गोंसे बहती है। १६

जो सूर्यके पास है, अथवा सूर्य जिनके समीप है, वह सब यज्ञको यशस्वी करें। १७

जहां हमारे धेनु जल पीते हैं उन जलदेवताओंका मैं आमंत्रण करता हूं इन नदीयोंको हवि अर्पण करना योग्य है। १८

---

* आकाशका बालक कौन है यह मूलमें स्पष्ट रीतिसे लिखा हुआ नहीं है।

१ धरुणम् ॥

२ अपगूळ्हम् ॥

३ अनुसेषिधत् ॥

४ जायय: ॥ यह ऋचा नदीके विषयमें है।

५ हिन्वन्ति ॥

६ कर्त्वम् ॥

जल के बीच में अमृत है. जल के बीच में औषधिके गुण है, जल का स्तवन करनेके लिये हे देव शीघ्रता कीजिये,   १६

सोमने हमको कहा है कि, जल के अंदर सब औषधियां वास करती है, और अग्निदेव सब लोगों का कल्याणकर्ता है । जल सब रोगों का नाश करनेवाला है ।   २० (११)

हे जलदेवताओ, हमारा शरीर प्रतिदिन स्वस्थ रहनेके लिये तथा हमको सूर्यका दर्शन होनेके लिये आप हमको अत्युत्कृष्ट औषध दीजिये ।   २१

हे जलदेवताओ हमारे शरीरमें यदि कोई दुष्टता वास करती हो, अथवा किसीके साथ हमने शत्रुत्व किया हो, अथवा किसीके साथ खराब वर्ताव किया हो, अथवा असत्य भाषण किया हो तो सब हमारे दुष्ट आचरण का नाश करो ।   २२

हे जल देवताओ, मैं अभी आपके पास आया हूं और मैं आपके मधुर रसमें सम्मीलित हुआ हूं; हे जलमें रहनेवाले अग्निदेव, आप यहां पधारिये और हमारा मिलाप तेज के साथ कर दीजिये.   २३

हे अग्निदेव, आप तेज, सन्तति और आयुष्य हमको दीजिये ; वैसा करनेमें हमारा वैभव परमेश्वर को मालुम होगा, और ऋषी तथा इंद्र को भी मालुम पडेगा । २४(१२)

---

१ वाजिनः ॥
२ विश्वशम्भुवम् ॥
३ वरूथम् ॥
४ शपे ॥
५ पयस्वान् ॥
६ संसृज ॥

अनुवाक ६.

सूक्त २४.

ऋषि—~~शुनःशेप आजीगर्ति~~; कृत्रिम, विश्वामित्र, देवरात,। देवता—१ प्रजापति, २ अग्नि, ३—५ सविता अथवा भग, ६—१५ वरुण

वह कौन सा सुन्दर नाम है—सर्व अमर देवताओं में वह किस देवता का मनो-[1] हर नाम है—जिसके हम स्मरण करें ? अदिती से पुनः मेरी कौन भेंट करायेगा, जिससे मैं जनक और जननी को देख सकूं। १

सब अमर देवताओं में प्रमुख जो अग्निदेव है उन्हीके मोहक नामका मैं स्मरण[2] करता हूं। वह अदिति से पुनः मेरी भेंट करायेंगे, जिससे मैं जनक और जननी को देख सकूंगा। २

हे हमारा निरन्तर रक्षण करनेवाले सविता—देवता आप समस्त स्पृहणीय वस्तु-ओं के स्वामी है। हम अपने योग्य सम्पत्ति का भाग आपसे मांगते हैं। ३

इसी प्रकार वह प्रशंसनीय भाग भी आपके हाथमें है, जिसकी निंदा करनेकी किसीमें भी शक्ति नहीं है और जिसे दुष्ट जनभी कोई आघात नहीं पहुंचा सकते। ४

ऐसा भाग्य आपही की कृपा से हमको प्राप्त हो और सम्पत्ति के सर्वोच्च शिखर पर हम सुस्थिर होकर बढ़ें। सब मनुष्यों को भाग्य बांटनेवाले आप ही है। ५ (१३)

---

१ मनामहे ॥
२ अमृतानाम् ॥
३ ईमहे ॥
४ शशमानः ॥
५ उदशेम ॥

ये अत्यंत ऊंचे उडनेवाले पक्षी, ये एक निमिष भी स्थिर न रहनेवाले जल या जो वायुका दर्प हरण करते है वे सब ही आपके पराक्रम, बल अथवा कोप की बराबरी नहीं कर सकते। ६

भला, आकाश का भी कोई आधार है ? पर वहांभी पवित्र पराक्रम करनेवाले राजा वरुण वृक्षका स्तंभ खड़ाकर देते है। खडा करते ही वृक्षकी जड ऊपर और शाखाएं नीचे हो गयीं। इन्हींके आन्दर आवश्य ही हमारा निवासस्थान होगा। ७

सूर्यको दैनिक प्रवास करनेके लिये वरुणराजाने उनका मार्ग विस्तृत किया। जहां पग धरनेका स्थान नहीं था वहां उन्होंने चलने योग्य पंथ बना दिया। कटु वचन बोलनेवालों का वरुण अत्यंत तिरस्कार करते हैं। ८

हे राजा वरुण, आपकी औषधियां सैंकडों क्या, सहस्रावधि हैं। आपकी कृपा असीम और अविच्छिन्न हो। हमारे नाशकारक दुःखोंको मिटाकर उनका उन्मूलन कीजिये और हमारे हाथमे जो पाप हुए हो उनको दूर कीजिये. ९

जो नक्षत्र आकाशमें चमकते हैं वे केवल रात्रिमें दृष्टिगोचर होते है। दिनमें वे कहां चले जाते हैं। वरुण की आज्ञा कभी उल्लंघन नहीं हो सकती। चन्द्रमा रात को प्रकाशमान होकर उदय होता है. १० (१४)

१ हिंसन्ति ॥
२ स्तूपम ॥ यह जगत्की वृक्षका वर्णन होगा।
३ हृदयाविधः ॥
४ प्रमुमुग्धि ॥
५ विचाकशत् ॥

इसी कारणसे स्तुति स्तोत्रों द्वारा आपको नमस्कार करनेके लिये मैं आपके पास आता हूं, इसी कारणसे याग करनेवाले भक्त हवि अर्पण करके आपसे याचना करते हैं। हे वरुण, कोप न करके यहां जागृत अवस्थामें रहिये और हमारी आयु कम न कीजिये। आपकी कीर्ति सर्वत्र प्रसिद्ध है! ११

रात-दिन सब लोक मुझसे यही बात कहते हैं और मेरे हृदयका भी ऐसाही स्पष्ट उपदेश है कि बंधनोंमें जकडे हुए शुनःशेपने भक्तिपूर्वक जिन वरुण राजाका आह्वान किया था वही हमको बंधनोंसे मुक्त करेंगे। १२

तीन स्तम्भोंसे[3] जकडकर बांधे हुए शुनःशेपने आदित्यकी पुकार की। भला, ज्ञानवान वरुण-राजाको कौन हानि पहुंचा सकता है? वही शुनःशेपके बंधन शिथिल करें और उसको मुक्त करें। १३

नमस्कारसे, यागसे और हविसे आपका कोप शांत करनेके लिये हे वरुण, हम आपकी प्रार्थना करते हैं। आप शत्रुका नाश करनेवाले हो, और अत्यंत ज्ञानवान हो, आप हमारे लिये यहां वास कीजिये, हे वरुण आप हमारे पातकका नाश कीजिये. १४

हे वरुण आप हमारे ऊपरके बाजूपर तथा पीछेके बाजूपर बंधे हुए पाश शिथिल करो; हे आदित्य, आपका आश्रय करके हम पापसे मुक्त होकर अदिती का आश्रय करनेके लिये योग्य होवे। १५ (१५)

---

१ अहेळमानः ॥
२ अक्रतु ॥
३ द्रुपदेषु ॥
४ शिश्रथः ॥
५ अनागसः ॥

सूक्त २५.

ऋषि–शुनःशेप आजीगर्ति । देवता–वरुण ॥

हे वरुण, हम आपकी प्रजा हैं; यदि आपकी किसी आज्ञा का हम उल्लंघन करते हो, १

उसके बदले आप कोपायमान होकर यदि वधका दंड नियत किया हो, तो कृपया वह दण्ड हमको मत दीजिये। हमपर मन्तप्त होकर हमको अपने क्रोध की वली न दीजिये। २

हे वरुण, जैसे कोई महारथी घोडे को डोरीसे मजबूत बांध रखता है (जिससें घोडा भाग न जाय) वैसेही आपसे सुखप्राप्ति की इच्छासे अनेक स्तोत्रों द्वारा अपना मन आपके चरणोंमें बद्ध रखते हैं। ३

जिस प्रकार पक्षी अपने निवास स्थान को लौटते हैं उसी तरह हमारी सब उच्चतम मनः कल्पनाएँ सुखलाभार्थ आपकी ओर दौडती हैं। ४

पराक्रम ही जिनका अलंकार है ऐसे सर्व साक्षी वरुण को अपनी सुख समृद्धि के लिये भला हम कब ले आयेंगे। ५ (१६)

वास्तवमें ये दोनों ही अत्यन्त कृपा से उसका स्तोत्र एकसाथ स्वीकार करते हैं। आज्ञाधारक यागकर्ताओं को वे कभी निराश नहीं करते। ६

जो अन्तरिक्षमें परिश्रम करनेवाले पक्षीओं के मार्ग जानता है, जो समुद्र निवासी होनेके कारण जहाजों के पथ से परिचित है; ७

---

१ व्रतम् ॥
२ हत्नवे ॥
३ संदितम् ॥
४ विमन्यवः ॥
५ क्षत्रश्रियम् ॥
६ समानम् ॥ ये दोनों याने मित्र और वरुण।
७ वीनाम् ॥

जो अपनी आज्ञा का पालन सबसे कराते है जिनको बारह मासका—जिनमें प्रत्येकमें मनुष्योंकी लगातार वृद्धि होती है—ज्ञान है, और जिसको अधिक मास की भी खबर रहती है; ८

जो सर्व संचारी उत्तुंगगामी सामर्थ्यवान वायु की गति जानते हैं और वायुलोक के ऊपर जो कुछ हैं उससे भी जो परिचित है; ९

ऐसे सामर्थ्यवान वरुण, अपनी आज्ञाओं का पालन कराते हुए अपने साम्राज्य को जगप्रसिद्ध करनेके लिये मर्त्र लोकोंमें आकर विराजमान हुए हैं। १० (१७)

इस लिये वह ज्ञानवान देव उन सब आश्चर्यों का—जो उसने उत्पन्न किये हैं और जो वैसे ही अभी और उत्पन्न करनेवाला है- अवलोकन करता रहता है। ११

वह सब सामर्थ्यवान आदित्य हमको सुपथपर ले जावे । वह हमारी आयुष्य की वृद्धि करें। १२

अपना स्वर्णमय कवच पहनकर उन्होंने देदीप्यमान वस्त्र धारण किये हैं। चारों ओर उनके दूत बैठे हैं। १३

इनको दुष्ट लोक डरा नहीं सकते, मनुष्य जाति के शत्रु इनको भयभीत नहीं कर सकते, पापी खल भी इनको भयचकित करनेमें समर्थ नहीं है। १४

---

१ उपजायते ॥
२ ऋष्वस्य ॥
३ पस्त्या ॥
४ चिकित्वान् ॥
५ तविषत् ॥
६ द्रापिं ॥
७ द्रिप्सवः ॥

इसके अतिरिक्त उनका वैभव मनुष्य जाति भरमें प्रसिद्ध है । आधा तौहा वैभव प्रसिद्ध हो सो बात नहीं पूर्ण रूपसे प्रसिद्ध है । यहां क्या, स्वयं अपने शरीरमें इन्होंने कीर्तिप्रद सुन्दर रचना की हुई है । १५ (१८)

गौ जिस प्रकार उत्सुकतासे अपने चारा रखे हुए स्थानको लौटती है वैसे ही इन सर्वदर्शी देवके विषयमें हमारी प्रेमपूरित प्रार्थना पुनः इन्हींके पास जाती है । १६

हमारा मधुर हवि बिलकुल तैयार है । इस लिये अपने परस्पर अब कुछ प्रत्यक्ष भाषण होने दो । यह हवि आपको बहुत प्रिय है । यागकर्ता की भांति आप उसका स्वीकार करते हैं । १७

अपने रूपके कारण सम्पूर्ण विश्वमें जिनकी ख्याति है उनका दर्शन आज हमको प्राप्त हुआ । इस पृथ्वीपर उनका रथ मैंने देखा । हमारी इस स्तुतिका उन्होंने स्वीकार किया है । १८

हे वरुण, हमारी पुकार सुनिये, और हमको सुखमें रखिये । आपकी कृपा हमपर हो, इस इच्छासे हम आपसे याचना करते हैं । १९

हे प्रज्ञाशील देव सम्पूर्ण पृथ्वी और स्वर्गपर आप ही की सत्ता है । इसलिये जाते समय हमको आश्वासन दीजिये । २०

हम चिरकाल पर्यन्त आयुष्यका उपभोग कर सकें, इस लिये हमारे शरीरके ऊपरी भागका पाश शिथिल कीजिये, मध्य और नीचेके भागवाले बंधन भी खोल दीजिये । २१ (१९)

---

१ असामि ॥
२ गव्यूतीः ॥
३ अदर्श ॥
४ अभिश्रमि ॥
५ माचकं ॥
६ यामनि ॥
७ विपाशा ॥

सूक्त २६.

ऋषि–शुनःशेप आजीगर्ति । देवता–अग्नि ॥

हे सामर्थ्याधिपति देव, हे यज्ञार्ह अग्नि, अपने दिव्य वस्त्रोंको धारण कीजिये। और यों विभूषित होकर हमारे यज्ञ को सिद्ध कीजिये। १

हे अत्यन्त तरुण अग्निदेव, हमारा वचन श्रवण कीजिये। आप दिव्य कान्तिसे युक्त हैं। अन्तःकरणपूर्वक किये हुए स्तवन आपही को शोभा देते हैं। आपही हमारे हविको पहुचाते हैं। २

सचमुच वह पुत्रोंके लिये पिता समान है। अग्नि संबंधी मनुष्यों के लिये कुटुम्बी की भांति है और मित्रों के लिये अत्युत्तम मित्र है। ऐसे वह (अग्नि) हमारे यज्ञको सिद्ध करते हैं। ३

जैसे मनुष्य दर्भके आसनपर बैठते हैं, उसी तरह खलोंका नाश करनेवाले वरुण, मित्र और अर्यमा देवभी प्रेमपूर्वक आकर दर्भासनोंपर विराजमान हो। ४

देवताओंको हवि अर्पण करनेवाले हे पुराण पुरुष, हमारे हविसे सन्तुष्ट हो, हमारे प्रेमसे आनंदित हो और हमारी प्रार्थना श्रवण कर। ५ (२०)

जो हवि हम नित्य अलग अलग देवताओं को देते है वह आपही को अर्पण होते हैं। ६

---

१ मियध्य ॥
२ दिवित्मता ॥
३ आपये ॥
४ रिशादसः ॥
५ अधि ॥
६ शश्वता ॥

हम शुभकारक अग्निका पूजन करनेवाले उनको बहुत प्रिय है। उन पर ही हमारा सच्चा प्रेम है। वह प्रेम करने के योग्य है। वह आनंद देनेवाले हैं। वह देवताओं को हवि पहुंचाते हैं। सर्व मानवोंके वह राजा हैं। ७

शुभकारक अग्निसे सरल रखनेवाले देवताओंने अपने लिये अत्यन्त स्पृहणीय वैभव तैयार करके रखा है। हमभी कल्याणकारी अग्निके भक्त हैं, इस लिये उनका चिन्तन करते हैं। ८

और अब हे अमरदेव, यज्ञ के दोनों ओर बैठे हुए हम लोगोंमें परस्पर प्रेम-संभाषण होना चाहिये। ९

सामर्थ्यसे प्रादुर्भूत होनेवाले हे अग्निदेव, अन्य सर्व अग्नियों सहित यहां पधारकर इस यज्ञ और इस स्तोत्रको प्रेमपूर्वक स्वीकार कीजिये। १० (२१)

सूक्त २७.

ऋषि–शुनःशेप आजीगर्ति। देवता–१–१२ अग्नि १३ विश्वदेव॥

कवचं पहनाकर सजाये हुए अश्वकी तरह, अनेक बार वन्दन करके, मुझे आप अपना सन्मान करने दीजिए, आप प्रत्येक यज्ञ में बिराजमान होते रहते हैं। १

यह दाता अपने सामर्थ्य के योगसे अनेक स्थानों में गमन करता है। यह उत्तम सुख देनेवाला है। वह हमारे लिये कृपा की वर्षा करे। २

---

१ विश्पतिः॥
२ दधिरे॥
३ प्रशस्तयः॥
४ विश्वेभिः॥
५ वारवन्तम्॥
६ मीढ्वान्॥

आप सबके प्राण[1] हैं। वे आप, हम चाहे आपके पास हों या दूर हो, पापी मनुष्यों से सदैव हमारी रक्षा कीजिये। ३

हे अग्निदेव! सब कामनाओं को परिपूर्ण करनेवाले ये नवीन स्तोत्र जो हमने गाये[2] हैं उनकी आपने देव-समुदाय में प्रशंसा की है। ४

सर्वोत्कृष्ट और मध्यम श्रेणीका सामर्थ्य प्राप्त होते समय आप हमारे पास रहें[3] और हमें यह भी सिखाइये कि, अन्तिम श्रेणीमें जिस सम्पत्ति की गणना है वह कैसे प्राप्त करना चाहिए। ५ (२२)

अलौकिक कान्तिसे दैदीप्यमान रहनेवाले हे देव! आप सम्पत्ति का विभाग करते हैं। आप कृपा के सागर हैं, अतएव आपकी प्रसाद-लहरों के पास जो भक्त खड़ा रहता है उसके लिए आप तुरन्त ही सम्पत्ति के नद बहाते हैं। ६

सचमुच आप युद्ध में जिस मनुष्य के संरक्षक बनते हैं और जिसको आप शूरता के कामों में प्रेरणा करते हैं उसकी सत्ता शाश्वत संम्पत्ति पर प्रस्थापित होती है। ७

फिर वह चाहे जैसा हो, हे बलशाली देव! उसे कोई रोक नहीं सकता। चारों ओर उसके सामर्थ्य की कीर्ति छा जाती है। ८

यह सर्व संचारी देव हमसे हमारे अश्वों सहित, पराक्रम के कार्य पूर्ण करावे और विद्वान स्तोताओं सहित हमें सम्पत्ति[4] प्रदान करे। ९

---

१ विश्वायुः ॥
२ सनिम् ॥
३ आभज ॥
४ आभक ॥
५ इषः ॥
६ अतिश्रवाय्यः ॥
७ सनिता ॥

स्तवनोंसे जागृत होनेवाले हे देव ! आप यज्ञकर्म से सम्बन्ध रखनेवाले प्रत्येक मनुष्य के लिए कोई ऐसा स्तोत्र चुनकर निकाल दें जो रुद्र को प्रिय हो । १० (२३)

ये अग्निदेव अत्यन्त श्रेष्ठ हैं । इनके गुणों की गणना ही नहीं । धूम्र उनके ध्वजा के ऊपरका चिन्ह है । उनकी कान्ति बहुत विस्तृत है । वे बुद्धिमत्ता और सामर्थ्य प्राप्त करनेमें हमारी योजना करें । ११

किसी वैभवशील राजाकी भांति हमारी स्तुतियों से मोहित होकर वे अग्निदेव हमारी प्रार्थना श्रवण करें । वे मानवों के राजा हैं, वे दिव्य सौन्दर्य की मूर्ति हैं । उनका तेज प्रखर है । १२

श्रेष्ठ व्यक्तियों को मेरा नमस्कार है, छोटों को मेरा नमस्कार है, तरुणों को मेरा नमस्कार है और जो वृद्ध हैं उन्हें भी मेरा नमस्कार है । आइये, यदि हो सके तो हम सब लोग देवताओं के सन्मानार्थ याग करें । हे देवताओ ! जो सब से श्रेष्ठ है उसकी स्तुति करने में मैं कभी न चूकूं । १३ (२४)

सूक्त २८.

ऋषि—शुनःशेप आजीगर्ति । देवता—इन्द्र, यज्ञ, सोम ॥

जो रस सोमवल्लियों से निकालने में बड़ी पेंदीवाली मुसला ऊपर लाना पड़ता है उन, उलूखल में बहनेवाले, सोमरसों को, हे इन्द्र देव, आप उत्सुक होकर स्वीकार करें । १

जिन सोमरसों के लिये, युगुल जंघाओं की भांति परस्पर संलग्न होनेवाले, दो रस—निष्पादक पाषाण तैयार किये जाते हैं, उन, उलूखल में बहनेवाले सोमरसों को, हे इन्द्र महाराज, आप बड़ी उत्सुकता से स्वीकार करें । २

---

१ दर्शीकम् ॥
२ अतिमान: ॥
३ रेवान् ॥
४ आशिनेभ्यः ॥
५ पृथुबुध्नः ॥
६ जल्गुलः ॥

जिसके योग से स्त्री को, हाथ आगे[1]–पीछे कर के मन्थन करनेका पाठ मिलता है उस उलूखल से बहनेवाले सोमरसों का, हे इन्द्र देव, आप बड़े उत्साह से स्वीकार करें। ३

जो सोमरस निकालते समय मानो मथानी (रई) को जलदीसे न दौड़ने देनेही के लिए उसके डोरियां बांधते हैं, उन, उलूखल से बहनेवाले सोमरसों का, हे इन्द्रजी, आप बड़े उत्साह से स्वीकार करें। ४

हे उलूखल प्रत्येक घर में चलते समय तुम ऐसी गम्भीर ध्वनि किया करो जैसे विजयी सेना का सन्मान करने के लिए दुंदुभी गर्जती हो। ५ (२५)

हे उत्तम काष्ठ! यह वायु तुम्हारे सामनेही बह रही है। हे उलूखल इन्द्र को सोमपान मिलने के लिए तुम सोमरस तैयार करो। ६

ये दो यज्ञ–सम्बन्धी उपकरण, जिनके कारण सामर्थ्य का अत्यन्त लाभ होता है, इस प्रकारकी ध्वनि उत्पन्न करते हैं जैसे घास चरते समय घोड़े। ७

अतएव, हे उच्चता से शोभनेवाले काष्ठ के उत्तम उपकरणो, सोम निकालने में निपुण ऋत्विजों की सहायता लेकर, तुम इन्द्र के लिए मधुर सोमरस तयार करो। ८

नीचे गिरे हुए सोमरस को दो चमसों में भरो और पवित्र दर्भों से टपकने के लिए डालो। वृषभ–चर्म पर उसे ला कर रखो। ९ (२६]

---

१ अपच्यवम्–उपेच्यवम् ॥
२ यमित वा ॥
३ उलूखलम् ॥
४ अयामित् ॥
५ बप्सता ॥
६ ऋष्व ॥

सूक्त २९.

ऋषि—शुनःशेप आजीगर्ति । देवता-इन्द्र ।

हे सत्यस्वरूप और अत्यन्त उदार इन्द्र, जब कि हमारा यह हाल है कि कहीं भी हमारा मान नहीं है, तब आप ऐसा करें कि जिससे धेनु, अश्व, उज्ज्वल धन, और सहस्रो भोग-वस्तु ओं की हमारी श्रेष्ठता शीघ्र ही बढ़े। १

हे सुन्दर मुकुट धारण करनेवाले अत्यन्त उदार इन्द्र, हे सामर्थ्याधिपति, हे पराक्रमी देव, अपनी अद्भुत कृति से ऐसा कीजिए कि जिसमें धेनु, अश्व, उज्ज्वल धन और सहस्रो भोग—वस्तु ओंकी हमारी श्रेष्ठता शीघ्र ही बढ़े। २

एक दुसरे की ओर बराबर दृष्टि डालनेवाली उन दोनों को निद्रित करिये। ऐसा कीजिए कि जिससे वे जगने न पावें और पड़ी ही रहें। हे अत्यन्त उदार इन्द्र! ऐसा कीजिए कि जिससे धेनु, अश्व उज्ज्वल धन और सहस्रों भोग्य वस्तुओं में हमारी श्रेष्ठता शीघ्र ही बढ़े। ३

वे हमारे शत्रु निद्रित हों, परन्तु हे शूर, हमारे स्नेही अवश्यही जागृत रहें। हे अत्यन्त उदार इन्द्र, ऐसा कीजिए कि धेनु, अश्व, उज्ज्वल धन, और सहास्रवधि भोग्य वस्तुओं में हमारा सामर्थ्य शीघ्र ही बढ़े। ४

ऐसी अभद्र भाषा बोलनेवाले गधे को मार डालिये। हे अत्यन्त उदार इन्द्र, ऐसा कीजिए कि धेनु, अश्व, उज्ज्वल धन और सहस्रों भोग्य पदार्थों का हमारा सामर्थ्य शीघ्र ही बढ़े। ५

१ अनाशस्ता ॥
२ तुवीमघ ॥
३ अबुध्यमाने ॥
४ शुभ्रिषु ॥
५ तुवन्तम्॥

वक्रमार्ग से जानेवाली वायुका, बहुत दूरवाले वन से भी आगे, पतन हो । हे अत्यन्त उदार इन्द्र, ऐसा कीजिए कि जिससे धेनु, अश्व, उज्ज्वल धन और सहस्रो भोग्य पदार्थों में हमारी श्रेष्ठता शीघ्र ही बढ़ जाय । ६

सब शत्रुओं का संहार कीजिए । और हमारा नाश करने के लिये जो कोई ताक[1] बैठा हो उसे मार डालिये । हे अत्यन्त उदार इन्द्र, ऐसा कीजिए कि जिससे धेनु, अश्व, उज्ज्वल धन और सहस्रो भोग के पदार्थों में हमारा सामर्थ्य शीघ्र ही बढ़े । ७ (२७)

सूक्त ३०.

ऋषि शुनःशेप । देवता १-१६ इन्द्र, १७-१९ अश्वि, २०-२२ उषा ॥

जिनका सामर्थ्य शतगुण बड़ा है, और जो तुम्हें प्रिय हैं, ऐसे इन्द्र देव की स्तुति में निमग्न हुए हे ऋत्विजो, जिस प्रकार कोई कुआं पानी से लबालब भर दिया जाय उसी प्रकार मानो हम उन अति उदार इन्द्र को सोमरस से भर देते हैं । १

जिस प्रकार जल ढालू भाग की ओर बहता जाता है उसी प्रकार सोमरस की ओर इन इन्द्र महाराज की स्वाभाविकही प्रवृत्ति होती है—फिर चाहे वे दुग्ध मिश्रित सोम के सहस्र चमसे हों अथवा, जिसमें कुछभी मिश्र नहीं किया ऐसे शुद्ध सोम के सौ ही चमस हों । २

---

१ कृकदाश्वम ॥
२ कृकदाश्वम ॥
३ किर्वि ॥
४ समाशिरां ॥

जो सोमरस सामर्थ्यवान् [illegible] को सन्तुष्ट करता है उस से उनका उदर समुद्र की भांति भरे जाता है । ३

यह सोम आपके लिए तैयार कर रखा है । जिस प्रकार कपोत पक्षी अपने छोटे बच्चों[2] की ओर प्रेम से जाता है उसी प्रकार आप बड़े प्रेम से इस सोम रस की ओर आ रहे हैं । और इसी लिये आप हमारी स्तुति को भी स्वीकार करते हैं । ४

हे इन्द्र, आप सम्पूर्ण अभीष्ट वस्तुओं के स्वामी हैं और स्तुति करने पर आप अपने भक्तों की ओर आते है । हे वीर, हम आपका स्तोत्र गाते[3] हैं, अतएव आपकी ओर से हमें सत्यप्रेम से परिपूर्ण वैभव प्राप्त हो । ५ (२८)

हे अत्यन्त बलशाली इन्द्र, पराक्रम के इस कार्य में हमारी रक्षा करने के लिए आप उठ कर खड़े हो जाइये । अन्यों[4] को छोड़ कर, आइये, हम एक दूसरे से सम्भाषण करें । ६

जब वैभव प्राप्त करलेने का अवसर आता है, अथवा जब जब शूरता के कर्म दिखलाने का मौका आता है तब तब, अपनी संरक्षा के लिए, हम इन्द्र के स्नेह पात्र भक्त, उन अत्यन्त बलाढ्य इन्द्र का आह्वान करते हैं । ७

यदि[6] हमारी स्तुति उन्हें सुन पड़ती है तो अपने हजारों प्रकार के संरक्षा के मार्ग प्रकट करते हुए और अपना सामर्थ्य सब को दिखलाते हुए ये इन्द्र देव हमारी पुकार के अनुरोध से निस्सन्देह यहां प्राप्त होते हैं । ८

---

१ व्यचो दधे ॥

२ गर्भधि ॥

३ गिर्वाहः ॥

४ अन्येषु ॥

५ योगेयोगे ॥

६ यदि श्रवत् ॥

जिन इन्द्र को पहले तुम्हारे पिता ने पुकारा था उन्हीं, अनेक शत्रुओं की भी परवा न करनेवाले, शूर इन्द्र से, अपने पुरातन दिव्य स्थान से यहां आने के लिए, मैं विनती करता हूं। ९

हे हमारे प्रिय इन्द्र, आज हम आपकी स्तुति करते हैं। सम्पूर्ण विश्वमें, आपके सिवाय, प्रेम करने योग्य, कोई नहीं है! अनेक विद्वानों ने आपका स्तवन किया है। जो भक्त आपके स्तोत्र गाते हैं उनके आप मूर्तिमन्त भाग्य ही हैं १० (२६)

हे वज्रधारी इन्द्र, आप हमारे और हमारी सहचारिणियों के हितकर्त्ता हैं। सब सोमरस-प्रिय देवताओं में आपही का सोम पर अत्यन्त प्रेम है। ११

हे वज्रधारी देव, हे हमारे मित्र, आप ऐसा कीजिए—आपकी इच्छा से ऐसा हो—कि हम आपही की कृपा की इच्छा करें। १२

हमारे सहवास में इन्द्रको आनन्द हो और वैभवयुक्त तथा समृद्धि—परिपूर्ण ऐसा अतिशय सामर्थ्य हमें प्राप्त हो कि जिससे हमें हर्ष हो १३

आपको आपही की उपमा देनी चाहिए; आप हमारे आप्त हैं। आपको प्रार्थना करने से, हे शूर देव, आप भक्तोंके लिए (रथचक्रके) अक्षकी तरह दौड़ते रहे हैं। १४

---

१ तुविप्रतिं ॥
२ विश्ववार ॥
३ शिप्रिणीनां ॥
४ दक्षे ॥
५ सधमादे ॥
६ स्वावान ॥

हे अत्यन्त बुद्धिशाली इन्द्र, अपने सेवकों का हव्य ग्रहण करने के लिए और उनकी इच्छाएं परिपूर्ण करने के लिए, आप अपने सब सामर्थ्यों सहित (रथचक्र के) अक्षकी भांति दौड़े है। १९ (३०)

अपने अत्यन्त फड़कनेवाले, ठेहनानेवाले और वेग से श्वासोच्छ्वास करनेवाले अश्वों के योगसे इन्द्र सदैवही सम्पत्ति जीतकर लाते रहे हैं। ऐसे अद्भुत कार्य करनेवाले और हमपर उदारता दिखलानेवाले उन इन्द्रदेवने हमारे वैभव की वृद्धि करनेके लिए हमें सुवर्णरथ दिया है ! १६

+ हे अश्विनो, आप अश्वादिकोंसे परिपूर्ण और कल्याणप्रद सम्पत्ति लेकर आइये। अहो सुन्दर देवताओ, आप हमें जो वैभव दें उसमें धेनु और सुवर्ण का संग्रह भरपूर हो। १७

हे सुन्दर अश्विनो, आप जो अविनाशी रथ दोनों के लिए मिलकर जुटाते हो वह सचमुच समुद्र में भी गमन करता है। १८

आपने अपने रथ का एक चक्र ऐसे पर्वत के मस्तकपर, जो अभेद्य है, भिड़ाया था। दूसरा चक्र द्युलोक के आसपास भ्रमण करता रहता है। १९

+ हे स्तुतिप्रिय, उषे ! हे अमर देवते ! आपके बाहु–बन्धन में किस मानवको स्थान मिलेगा ? हे देदीप्यमान देवी ! किसके लिए आपका आगमन हो रहा है ? २०

---

१ आ-अक्षणोः ॥
२ पोप्रुथद्भिः ॥
३ शवीरया ॥
४ समानयोजनः ॥
५ अघ्न्यस्य ॥
६ मक्षमं ॥

चित्रविचित्र वर्णकी किसी तुरंगी के समान सुशोभित दिखनेवाली हे प्रकाशमान उषादेवते ! हम, दूर अथवा निकट रहते हुए, वास्तव में, आपही का ध्यान करते रहते थे । २१

हे आकाशकन्या उषे, आप अपने सम्पूर्ण सामर्थ्य सहित इधरके लिए पधारिये, और हमारे लिए वैभव भी लेते आइये । २२ (३१)

अनुवाक ७.

सूक्त ३१.

ऋषि-हिरण्यस्तूप आंगिरस । देवता-अग्नि ॥

हे अग्निदेव ! पहले अंगिराऋषि और देव आप ही हैं । देवताओं के कल्याण-कारक मित्र भी आपही थे । देदीप्यमान शस्त्रों को धारण करनेवाले और ज्ञान-सामर्थ्य युक्त बुद्धिमान मरुद्गण आपही के आज्ञानुसार अवतीर्ण हुए । १

हे अग्निदेव ? सब से पहले और प्रमुख अंगिरा आपही है । आपका ज्ञान अतिशय है । देवताओं की पवित्र आज्ञाओंको आपही सुशोभित करते है । आप सर्व-व्यापी है । आपमें विलक्षण बुद्धिमत्ता है । [illegible] । सचमुच प्राणीमात्र और मनुष्य के हितके लिए आप कितनेही स्थानों में वास करते है । २

---

१ अश्वे ॥

२ दुहितर्दिवः ॥

३ अपसा ॥

४ द्विमाता ॥

हे अग्निदेव, आपही सब के पहले थे। आप अपने सामर्थ्यसहित विवस्वान और मातरिश्वा के लिए प्रकट हो। आप तो मूर्तिमान वैभवही है। होतृस्थान में जब सबने आपकी नियुक्ति की तब आपने वह कार्यभार सहन किया और सब श्रेष्ठ देवताओं को यज्ञ पहुँचाया। उसे देखकर आकाश और सम्पूर्ण पृथ्वी (आश्चर्यसे) कांपने लग गये। ३

हे अग्निदेव, मनुके लिए आपने द्युलोक में प्रवेश किया और सत्कृत्यों से प्रख्यात पुरूरवाके लिए आपने अत्यन्त प्रशंसनीय कार्य किये। जिस समय घर्षण क्रिया से आपके मातापिता की ओर से आपको प्रेरणा होती है उस समय ऋत्विज लोग आपको प्रथम पूर्व ओर और फिर पश्चिम ओर लिये फिरते हैं। ४

हे अग्निदेव, आपको हव्य अर्पण करने के लिए जो मनुष्य यज्ञ–चमस उठता है उसकी सम्पत्ति की आप वृद्धि करते हैं। आप अत्यन्त बलिष्ठ और कीर्तिमान् हैं। अग्ने, इस जगत् में जो आहुति दी जाती है उसका ज्ञान रखनेवाले ऋत्विज को आप सब मे पहले अखंड आयु अर्पण करते हुए इस जगत् में वास करते हैं। ५ (३२)

हे सर्वव्यापी अग्निदेव, जो मनुष्य पापमार्गका अवलम्बन करता है, उसे आप योग्य कर्ममें प्रवृत्त करते है। शूरोंके ही प्राप्त करने योग्य सम्पत्ति के लिए जब युद्ध होने लगता है तब आप थोडेही लोगों के हाथ मे अनेक शत्रुओं को मरवा डालते है। ६

हे अग्निदेव, आप उस मनुष्यकी दिन-प्रति-दिन कीर्ति बढ़ाते है। और उसे उत्तम अविनाशी पद पर आप चढ़ाते है। विद्वान् भक्तके लिए आपका अन्तः करण अत्यन्त उत्कंठित होता है और आप उसे इतनी समृद्धि तथा सौख्य अर्पण करते है कि जितनी उसे दोनों जन्मों के लिए बस होती है। ७

---

१ अरंकेर्ता ॥
२ अवाशय: ॥
३ अवाप्य: ॥
४ ऋतसाता ॥
५ तानूपान: ॥

(~~हे अग्निदेव, हम [illegible] के लिए आपका स्तवन करते है~~,) अतएव आप हमें कल्याणकारी कीर्ति अर्पण कीजिए; नवीन कर्मोंका आचरण कर के हम सांगोपांग आपका भजन कर्म करें। हे द्यावापृथ्वीयो, सब देवताओं सहित आप हमारी रक्षा करें। ८

हे निष्कलंक अग्निदेव, आप सब देवों में श्रेष्ठ है। माता पिता के बिलकुल निकट ही आपका निवास रहता है। आप हमारे लिए जागृत रहे। आप, जो सबके शरीर निर्माण करनेवाले हैं, अपनी भक्ति करनेवाले पर मनमें अत्यन्त प्रेम रखिये और जागरूक रहिये। आप प्रत्यक्ष कल्याण ही है। आप सब प्रकारका द्रव्य सर्वत्र बो रखते है। ९

हे अग्निदेव, आपका अन्तःकरण अत्यन्त दयाशील है। आप हमारे पिता है। हम आपके आस हैं, हे अजित देव, सैकड़ों, प्रायः हजारों सुखों से परिपूर्ण सम्पत्ति, आपकी ओर आपही आप चली आती है। आप अतिशय शूर और अपनी आज्ञाओं का परिपालन करा लेनेवाले है। १० (३३)

हे अग्निदेव, सारे संसारका जीवन आपही पर अवलम्बित है। सबकी आयुर्वृद्धि होने के लिए ही देवताओं ने प्रथम आपको उत्पन्न करके (~~मनुष्य का सेनापति बनाया~~) तथा जिस समय मेरे पिताको पुत्रप्राप्ति हुई उस समय मनुष्य मात्र को सज्ञान करने वाली इला भी आपने उत्पन्न की। ११

हे वन्दनीय अग्निदेव, आप अपनी सर्व संरक्षक शक्तियों के योगसे हमारा, और हमपर उपकार करनेवालोंका, प्रतिपालन कीजिए। आप अपने नियमानुसार, एक निमिष भी न भूलते हुए, जगत् की रक्षा करते हैं। हमारा यह कौटुम्बिक वैभव परम्परा से ऐसाही स्थिर रहने के लिए (~~आप हमारे लड़केबच्चों और गाई बैलों को संभालते रहते है~~)। १२

---

१ सनये ॥
२ ओपिवे ॥
३ अदाभ्य ॥
४ विश्पति ॥
५ पायुभिः ॥

हे अग्निदेव, यार्ग करनेवाले भक्त के आप, बिलकुल हृदय से सहायकारी हैं। और हे चार नेत्रों से विभूषित रहनेवाले देव, जो कभी किसीपर शस्त्र नहीं उठाता उसके लिए आप प्रेमसे उद्दीपित होते हैं। आप सबका पोषण करते हैं, आप के हाथ से किसीका भी नाश नहीं होता। (जो ~~स्तुति कर्त्ता आपको हवि अर्पण करता है वह चाहे जितना गरीब हो, आप उसकी स्तुति को हृदय पूर्वक स्वीकार करते~~ है। १३

हे अग्निदेव जो उपासक आपका अत्यन्त ~~स्तवन करता~~ है उसके लिये आप सब वैभव—वह वैभव जो अत्यन्त स्पृहणीय है,—सिद्ध कर रखते हैं। सब लोग कहते हैं कि आपका भक्त चाहे स्वयं अपना पोषण करने में भी सब प्रकार से असमर्थ हो, तथापि आप अत्यन्त प्रेमसे उसको संभालनेवाले पिताही बन जाते हैं। आपका ज्ञान तो अलौकिक ही है, तथापि आप इतने वत्सल हैं कि छोटे छोटे बच्चों को आप दिशा और उपदिशा सिखाते रहते हैं। १४

जैसे अच्छी तरह सजा हुआ कवच शूरों की रक्षा करता है वैसे ही पवित्र और सदाचारी पुरुष का आप सब प्रकार से परिपालन करते हैं। स्वादिष्ट भोजन तैयार करके जो अपने घरमें (अतिथियों को) सन्तुष्ट करता है और इस प्रकार जो प्राणि मात्र के लिए मानो कुछ अनुष्ठान ही करता है उसे श्रेष्ठता में स्वर्ग की भी उपमा भली लगती है। १५ (३४)

हे अग्निदेव, जिस कुमार्ग से हम दूर तक गये थे उसके लिए-उस पातक के लिये आप हमें क्षमा करें। आप हमारे आप्त, हमारे पिता, सोमरस अर्पण करनेवाले भक्तों के हितकर्त्ता सब के पोषणकरने वाले, और अज्ञ मानवको श्रेष्ठ ऋषि—पदवी तक पहुँचाने वाले है। १६

~~मनु, अंगिरस और ययाति के पास जिस प्रकार आप पहले जाते थे~~ उसी प्रकार हे पवित्र अग्निदेव, हे अंगिरस, आप हमारे सदन की ओर आइये, और दिव्यलोक के सब लोगों को भी साथ लेते आइये। उनको आसन पर बिठाइये और उनका प्रिय हव्य उन्हें अर्पण कीजिए। १७

---

१ यज्यवे ॥
२ स्पार्ह ॥
३ प्रयतदक्षिणं ॥
४ शराणि ॥
५ दैव्यं जनं ॥

(हे अग्निदेव, हमने अपने सामर्थ्य और बुद्धि का उपयोग करके यह जो स्तोत्र बनाया है उसके योग से आप आनन्दित हों और हमें शक्ति तथा उत्तम बुद्धिमत्ता प्रदान करें। हमें अत्यन्त स्पृहणीय वैभव की ओर ले जाने वाले आपही हैं।) १८(३५)

सूक्त ३२.

ऋषि हिरण्यस्तूप आंगिरस । देवता–इन्द्र ॥

मैंने यहां वज्रधारी इन्द्र के पराक्रम प्रेमपूर्वक गाये हैं । अखिल पराक्रम के कर्मों में पहला स्थान इन्हींको देना पड़ेगा । इन्हीं इन्द्रदेव ने अहि का वध किया, उदकों के लिए मार्ग निकाल दिया और पर्वतों के हृदय विदारण किये । १

त्वष्टा देव ने उन्हें वज्र तैयार कर दिया था। (उसे धारण करके) उन्हों ने, पर्वतों में दबाव जमा कर बैठे हुए अहि का वध किया। (उसके साथ) और वत्स के लिए जैसे गौवें रांभती हैं वैसे ही भारी शब्द करते हुए पानी के नद के नद बहने लगे और बड़े वेग से समुद्र में जा मिले। २

शूरता की तेजी में आने पर इन्द्रको सोमकी इच्छा हुई और तीन यज्ञों में उन्हों ने वह पान किया। उन्हीं उदार इन्द्र ने वज्र को अपना आयुध बनाकर सब अहियों में ज्येष्ठ अहि वृत्र का वध किया। ३

हे इन्द्र, जिस समय आपने सब अहियों से ज्येष्ठ अहि का वध किया और कपटकर्मों में प्रवीण रिपुओं के कपट व्यूहों का विध्वंस किया उस समय सूर्य, उषा और द्युलोक को जन्म प्राप्त हुआ और आपका हाथ पकड़नेवाला कोईभी शत्रु आपके लिए नहीं बचा। ४

---

१ अभि–वस्यः ॥
२ वक्षणाः॥
३ वाश्राः॥
४ प्रथमजाम ॥
५ मायिनाम ॥

वृत्र नामका अहि क्रूर अवश्य था, परन्तु वास्तव में उसकी क्रूरता उसके नामसेभी अधिक थी परन्तु इन्द्रने अपने अत्यन्त उग्र वज्रसे उसके बाहु काटकर उसे मार डाला। जिस प्रकार कुल्हाड़ी से किसी वृक्षकी डालें काट डाली जायं उसी प्रकार छिन्न विच्छिन्न होकर मरा हुआ अहि पृथ्वी पर गिर पड़ा। ५ (३६)

इस व्यर्थ अभिमान में आकर, कि हमारा प्रतिस्पर्धी कोई भी नहीं है, अहि ने महापराक्रमी, अजित, और अनेक शत्रुओं के लिए भी भारी इन्द्र का आह्वान किया। परन्तु उनके अत्यन्त उग्र शस्त्रों के सामने वह टिक नहीं सका। पर इन्द्रसे वह इतनी शत्रुता रखता था कि बड़े बड़े दुर्गों को भी उसने बिलकुल चूर चूर कर डाला। ६

हाथ और पैर टूट गये, तथापि अहि इन्द्र से युद्ध करता ही रहा। इन्द्रने उसकी पर्वतप्राय भुजाओं पर अपना वज्र चलाया। निस्सत्व हो जाने पर भी पराक्रमी पुरुष की ऐंठ दिखलानेवाला अहि अस्तव्यस्त हो छार छार होकर पृथ्वी पर गिर पड़ा। ७

पृथ्वीपर फैले हुए किसी महानदकी तरह जब कि वृत्र भूमिपर पड़ा हुआ था तब जलोंके प्रवाह धैर्य से उमड कर उसके शरीर पर से बहने लगे। अपने सामर्थ्य से जिन उदकों को वृत्र ने बन्द कर रखा था उन्हीं के पैरों पर वह मर कर गिर पड़ा! ८

~~वृत्र की माता उसके शरीर पर आड़ी गिर पड़ी~~। इन्द्रने अपना उग्र वज्र उसके पेटके नीचे से चलाया। अर्थात् माता ऊपर पड़ी हुई थी और उसके नीचे उसका पुत्र वृत्र पड़ा हुआ था। इस दशा में वह दानु ऐसी जान पड़ने लगी जैसे कोई धेनु अपने बछड़े को पेटके नीचे लिये हुए हो? ९

---

१ व्यंसम् ॥
२ तुविबाधम् ॥
३ वृष्णः ॥
४ पर्वतःश्रीः ॥
५ नीचावया ॥

हिन्दी, मराठी, गुजराती और अङ्गरेजी चार भाषाओं में अलग अलग प्रसिद्ध होनेवाला

वेदों का भाषांतर।

प्रति मास में ६४ पृष्ठ: ३२ पृष्ठ संहिता [स्वर और पदपाठ सहित]

* * ३२ पृष्ठ भाषान्तर। * *

वर्ष १] सितम्बर १९१२—श्रावण संवत् १९६८ [अंक ३

वार्षिक मूल्य डाकव्ययसहित ४ रु.

सम्पादक।

रामचंद्र विनायक पटवर्धन, बी. ए. एल् एल्. बी.
अच्युत बलवन्त कोल्हटकर, बी. ए. एल् एल्. बी.
दत्तो अप्पाजी तुळजापुरकर, बी. ए. एल् एल्. बी.

स्थाणुरयं भारहारः किलाभूत्।
अधीत्य वेदं न विजानाति योऽर्थम्।

यास्काचार्य

प्रकाशक—प्राणशंकर अमृतराम दीक्षित.

'श्रुतिबोध' ऑफिस, ४७, कालबादेवी रोड, बम्बई.

Printed by Pranshankar Amritram Dixit for the Proprietor, at the "Subodhini" Press, Bazargate Street, Fort, Bombay.

अंग्रेजी प्रवेश.

अंग्रेजी प्रवेश अथवा संभाषणकी रीतिसे अंग्रेजी सीखनेका नमूना। सीखनेवालोंके लिये बड़ी उपयोगी पुस्तक। इसमें संभाषण रीतिसे अंग्रेजी सीखनेका ढङ्ग अच्छी तरह टिप्पणी देकर दिखलाया गया है।

ज॰ वि॰ ओक एम. ए.
तळेगाव—दाभाडे,
जि॰ पुना.

अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् ।
वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः ॥१०॥३७॥
दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार ॥ ११ ॥
अश्व्यो वारो अभवस्तदिन्द्र सृके यत्त्वा प्रत्यहन्देव एकः ।
अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून् ॥१२॥
नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च ।
इन्द्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये ॥ १३ ॥
अहेर्यातारं कमपश्य इन्द्र हृदि यत्ते जघ्नुषो भीरगच्छत् ।
नव च यन्नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि ॥१४॥

अतिष्ठंतीनां । अनिऽवेशनानां । काष्ठानां । मध्ये । निऽहितं । शरीरं । वृत्रस्य । निण्यं । वि । चरंति । आपः । दीर्घं । तमः । आ । अशयत् । इंद्रऽशत्रुः ॥ १० ॥ ३७ ॥ दासऽपत्नीः । अहिऽगोपाः । अतिष्ठन् । निऽरुद्धाः । आपः । पणिना । इव । गावः । अपां । बिलं । अपिऽहितं । यत् । आसीत् । वृत्रं । जघन्वान् । अप । तत् । ववार ॥ ११ ॥ अश्व्यः । वारः । अभवः । तत् । इंद्र । सृके । यत् । त्वा । प्रतिऽअहन् । देवः । एकः । अजयः । गाः । अजयः । शूर । सोमं । अव । असृजः । सर्तवे । सप्त । सिंधून् ॥१२॥ न । अस्मै । विऽद्युत् । न । तन्यतुः । सिसेध । न । यां । मिहं । अकिरत् । ह्रादुनिं । च । इंद्रः । च । यत् । युयुधाते इति । अहिः । च । उत । अपरीभ्यः । मघऽवा । वि । जिग्ये ॥१३॥ अहेः । यातारं । कं । अपश्यः । इंद्र । हृदि । यत् । ते । जघ्नुषः । भीः । अगच्छत् । नव । च । यत् । नवतिं । च । स्रवंतीः । श्येनः । न । भीतः । अतरः । रजांसि ॥ १४ ॥

इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ॥१५॥३८॥२॥

॥ इति प्रथमाष्टके द्वितीयोऽध्यायः ॥ २ ॥

॥ अथ प्रथमाष्टके तृतीयोऽध्यायः ॥ ३ ॥

॥ ३३ ॥ १—१५ हिरण्यस्तूप आङ्गिरस ऋषिः ॥ इन्द्रो देवता ॥ छन्दः १, २, ४, ८, ९, १२, १३ निचृत् त्रिष्टुप् । ३, ६, १० त्रिष्टुप् । ५, ७, ११ विराट् त्रिष्टुप् । १४, १५ भुरिक् पंक्तिः ॥ स्वरः— १—१३ धैवतः । १४, १५ पञ्चमः ॥

(३३) एतायामोप गव्यन्त इन्द्रमस्माकं सु प्रमतिं वावृधाति ।
अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः ॥ १ ॥

इंद्रः । यातः । अवऽसितस्य । राजा । शमस्य । च । शृंगिणः । वज्रऽबाहुः । सः । इत् । ऊं इति । राजा । क्षयति । चर्षणीनां । अरान् । न । नेमिः । परि । ता । बभूव ॥ १५ ॥ ३८ ॥ २ ॥

॥ इति प्रथमाष्टके द्वितीयोऽध्यायः ॥ २ ॥

॥ अथ प्रथमाष्टके तृतीयोऽध्यायः ॥ ३ ॥

आ । इत । अयाम । उप । गव्यंतः । इंद्रं । अस्माकं । सु । प्रऽमतिं । ववृधाति ।
अनामृणः । कुवित् । आत् । अस्य । रायः । गवां । केतं । परं । आऽवर्जते । नः ॥ १ ॥

उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि ।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन् ॥ २ ॥
नि सर्वसेन इषुधीँरसक्त समर्यो गा अजति यस्य वष्टि ।
चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध ॥ ३ ॥
वधीर्हि दस्युं धनिनं घनेनँ एकश्चरन्नुपशाकेभिरिन्द्र ।
धनोरधि विषुणक्ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः ॥ ४ ॥
परा चिच्छीर्षा ववृजुस्त इन्द्रायज्वानो यज्वभिः स्पर्धमानाः ।
प्र यद्दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः ॥ ५ ॥ १ ॥
अयुयुत्सन्ननवद्यस्य सेनामयातयन्त क्षितयो नवग्वाः ।
वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिन्द्राच्चितयन्त आयन् ॥ ६ ॥

उप । इत् । अहं । धनऽदां । अप्रतिऽइतं । जुष्टां । न । श्येनः । वसतिं । पतामि । इंद्रं । नमस्यन् । उपऽमेभिः । अर्कैः । यः । स्तोतृऽभ्यः । हव्यः । अस्ति । यामन् ॥ २ ॥ नि । सर्वऽसेनः । इषुऽधीन् । असक्त । सं । अर्यः । गाः । अजति । यस्य । वष्टि । चोष्कूयमाणः । इंद्र । भूरि । वामं । मा । पणिः । भूः । अस्मत् । अधि । प्रऽवृद्ध ॥ ३ ॥ वधीः । हि । दस्युं । धनिनं । घनेन । एकः । चरन् । उपऽशाकेभिः । इंद्र । धनोः । अधि । विषुणक् । ते । वि । आयन् । अयज्वानः । सनकाः । प्रऽइतिं । ईयुः ॥ ४ ॥ परा । चित् । शीर्षा । ववृजुः । ते । इंद्र । अयज्वानः । यज्वऽभिः । स्पर्धमानाः । प्र । यत् । दिवः । हरिऽवः । स्थातः । उग्र । निः । अव्रतान् । अधमः । रोदस्योः ॥ ५ ॥ १ ॥ अयुयुत्सन् । अनवद्यस्य । सेनां । अयातयंत । क्षितयः । नवऽग्वाः । वृषऽयुधः । न । वध्रयः । निःऽअष्टाः । प्रवत्ऽभिः । इंद्रात् । चितयंतः । आयन् ॥ ६ ॥

त्वमेतान्रुदतो जक्षतश्चायोधयो रजस इन्द्र पारे ।
अवादहो दिव आ दस्युमुच्चा प्र सुन्वतः स्तुवतः शंसमावः ॥ ७ ॥
चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमानाः ।
न हिन्वानासस्तितिरुस्त इन्द्रं परि स्पशो अदधात्सूर्येण ॥ ८ ॥
परि यदिन्द्र रोदसी उभे अबुभोजीर्महिना विश्वतः सीम् ।
अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र ॥ ९ ॥
न ये दिवः पृथिव्या अन्तमापुर्न मायाभिर्धनदां पर्यभूवन् ।
युजं वज्रं वृषभश्चक्र इन्द्रो निर्ज्योतिषा तमसो गा अदुक्षत् ॥१०॥२॥
अनु स्वधामक्षरन्नापो अस्यावर्धत मध्य आ नाव्यानाम् ।
सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ॥ ११ ॥

त्वं । एतान् । रुदतः । जक्षतः । च । अयोधयः । रजसः । इंद्र । पारे ।
अव । अदहः । दिवः । आ । दस्युं । उच्चा । प्र । सुन्वतः । स्तुवतः । शंसं ।
आवः ॥ ७ ॥ चक्राणासः । परिऽनहं । पृथिव्याः । हिरण्येन । मणिना । शुंभमानाः ।
न । हिन्वानासः । तितिरुः । ते । इंद्रं । परि । स्पशः । अदधात् । सूर्येण ॥ ८ ॥
परि । यत् । इंद्र । रोदसी इति । उभे इति । अबुभोजीः । महिना । विश्वतः । सीं ।
अमन्यमानान् । अभि । मन्यमानैः । निः । ब्रह्मऽभिः । अधमः । दस्युं । इंद्र ॥ ९ ॥
न । ये । दिवः । पृथिव्याः । अंतं । आपुः । न । मायाभिः । धनऽदां । परिऽअभूवन् ।
युजं । वज्रं । वृषभः । चक्रे । इंद्रः । निः । ज्योतिषा । तमसः । गाः । अदुक्षत् ॥१०॥२॥
अनु । स्वधां । अक्षरन् । आपः । अस्य । अवर्धत । मध्ये । आ । नाव्यानां ।
सध्रीचीनेन । मनसा । तं । इंद्रः । ओजिष्ठेन । हन्मना । अहन् । अभि । द्यून् ॥११॥

न्यविध्यदिलीबिशस्य दृळ्हा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः ।
यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युम् ॥ १२ ॥
अभि सिध्मो अजिगादस्य शत्रून्वि तिग्मेन वृषभेणा पुरोऽभेत् ।
सं वज्रेणासृजद्वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः ॥ १३ ॥
आवः कुत्समिन्द्र यस्मिञ्चाकन्प्रावो युध्यन्तं वृषभं दशद्युम् ।
शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ ॥ १४ ॥
आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम् ।
ज्योक्चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः ॥१५॥३॥

नि । अविध्यत् । इलीबिशस्य । दृळ्हा । वि । शृंगिणं । अभिनत् । शुष्णं । इंद्रः । यावत् । तरः । मघऽवन् । यावत् । ओजः । वज्रेण । शत्रुं । अवधीः । पृतन्युं ॥ १२ ॥ अभि । सिध्मः । अजिगात् । अस्य । शत्रून् । वि । तिग्मेन । वृषभेण । पुरः । अभेत् । सं । वज्रेण । असृजत् । वृत्रं । इंद्रः । प्र । स्वां । मतिं । अतिरत् । शाशदानः ॥ १३ ॥ आवः । कुत्सं । इंद्र । यस्मिन् । चाकन् । प्र । आवः । युध्यंतं । वृषभं । दशऽद्युं । शफऽच्युतः । रेणुः । नक्षत । द्यां । उत् । श्वैत्रेयः । नृऽसह्याय । तस्थौ ॥ १४ ॥ आवः । शमं । वृषभं । तुग्र्यासु । क्षेत्रऽजेषे । मघऽवन् । श्वित्र्यं । गां । ज्योक् । चित् । अत्र । तस्थिऽवांसः । अक्रन् । शत्रुऽयतां । अधरा । वेदना । अकः ॥ १५ ॥ ३ ॥

॥ ३४ ॥ १–१२ हिरण्यस्तूप आङ्गिरस ऋषिः ॥ अश्विनौ देवते ॥ छन्दः—१. ६ विराड् जगती। २. ३. ७, ८ । निचृज्जगती । ५. १०. ११ जगती । ४ भुरिक् त्रिष्टुप् । १२ निचृत त्रिष्टुप् । ९ भुरिक् पंक्तिः ॥ स्वरः—१–३, ५–८. १०,११ निषादः ४. १२. ९ पञ्चमः ॥

(३४) त्रिश्चिन्नो अद्या भवतं नवेदसा विभुर्वां याम उत रातिरश्विना ।
युवोर्हि यन्त्रं हिम्येव वाससोऽभ्यायंसेन्या भवतं मनीषिभिः ॥ १ ॥

त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद्विदुः ।
त्रयः स्कम्भासः स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा ॥२॥

समाने अहन्त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम् ।
त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम् ॥३॥

त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतम् ।
त्रिर्नान्द्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम् ॥ ४ ॥

त्रिः । चित् । नः । अद्य । भवतं । नवेदसा । विऽभुः । वां । यामः । उत । रातिः । अश्विना । युवोः । हि । यंत्रं । हिम्याऽइव । वाससः । अभिऽआयंसेन्या । भवतं । मनीषिऽभिः ॥ १ ॥ त्रयः । पवयः । मधुऽवाहने । रथे । सोमस्य । वेनां । अनु । विश्वे । इत् । विदुः । त्रयः । स्कंभासः । स्कभितासः । आऽरभे । त्रिः । नक्तं । याथः । त्रिः । ऊं इति । अश्विना । दिवा ॥२॥ समाने । अहन् । त्रिः । अवद्यऽगोहना । त्रिः । अद्य । यज्ञं । मधुना । मिमिक्षतं । त्रिः । वाजऽवतीः । इषः । अश्विना । युवं । दोषाः । अस्मभ्यं । उषसः । च । पिन्वतं ॥ ३ ॥ त्रिः । वर्तिः । यातं । त्रिः । अनुऽव्रते । जने । त्रिः । सुप्रऽअव्ये । त्रेधाऽइव । शिक्षतं । त्रिः । नांद्यं । वहतं । अश्विना । युवं । त्रिः । पृक्षः । अस्मे इति । अक्षराऽइव । पिन्वतं ॥४॥

त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवताता त्रिरुतावतं धियः ।
त्रिः सौभगत्वं त्रिरुत श्रवांसि नस्त्रिष्ठं वां सूरे दुहिता रुहद्रथम् ॥५॥

त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरु दत्तमद्भ्यः ।
ओमानं शंयोर्ममकाय सूनवे त्रिधातु शर्म वहतं शुभस्पती ॥६॥४॥

त्रिर्नो अश्विना यजता दिवेदिवे परि त्रिधातु पृथिवीमशायतम् ।
तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतम् ॥७॥

त्रिरश्विना सिन्धुभिः सप्तमातृभिस्त्रय आहावास्त्रेधा हविष्कृतम् ।
तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितम् ॥८॥

क्व त्री चक्रा त्रिवृतो रथस्य क्व त्रयो वन्धुरो ये सनीळाः ।
कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः ॥९॥

त्रिः । नः । रयिं । वहतं । अश्विना । युवं । त्रिः । देवऽताता । त्रिः । उत । अवतं । धियः । त्रिः । सौभगऽत्वं । त्रिः । उत । श्रवांसि । नः । त्रिऽस्थं । वां । सूरे । दुहिता । आ । रुहत् । रथं ॥ ५ ॥ त्रिः । नः । अश्विना । दिव्यानि । भेषजा । त्रिः । पार्थिवानि । त्रिः । ऊं इति । दत्तं । अत्ऽभ्यः । ओमानं । शंऽयोः । ममकाय । सूनवे । त्रिऽधातु । शर्म । वहतं । शुभः । पती इति ॥ ६ ॥ ४ ॥ त्रिः । नः । अश्विना । यजता । दिवेऽदिवे । परि । त्रिऽधातु । पृथिवीं । अशायतं । तिस्रः । नासत्या । रथ्या । पराऽवतः । आत्माऽइव । वातः । स्वसराणि । गच्छतं ॥७॥ त्रिः । अश्विना । सिंधुऽभिः । सप्तमातृऽभिः । त्रयः । आऽहावाः । त्रेधा । हविः । कृतं । तिस्रः । पृथिवीः । उपरि । प्रवा । दिवः । नाकं । रक्षेथे इति । द्युऽभिः । अक्तुऽभिः । हितं ॥ ८ ॥ क्व । त्री । चक्रा । त्रिऽवृतः । रथस्य । क्व । त्रयः । वंधुरः । ये । सऽनीळाः । कदा । योगः । वाजिनः । रासभस्य । येन । यज्ञं । नासत्या । उपऽयाथः ॥ ९ ॥

आ नासत्या गच्छतं हूयते हविर्मध्वः पिबतं मधुपेभिरासभिः ।
युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवन्तमिष्यति ॥ १० ॥
आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥११॥
आ नो अश्विना त्रिवृता रथेनार्वाञ्चं रयिं वहतं सुवीरम् ।
शृण्वन्ता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ ॥१२॥५॥

॥ ३५॥ १—११ हिरण्यस्तूप आङ्गिरस ऋषिः ॥ देवताः १ अग्निर्मित्रावरुणौ रात्रिः सविता । २—११ सविता ॥ छन्दः—१ विराड् जगती । ९ निचृज्जगती । २, ५, १०, ११ विराट् त्रिष्टुप् । ३, ४, ६ त्रिष्टुप् । ७, ८ भुरिक् पङ्क्तिः ॥ स्वरः—१, ९ निषादः । २, ५, १०, ११, ३, ४, ६ धैवतः । ७, ८ पञ्चमः ॥

(३५) ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे ।
ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये ॥ १ ॥

आ । नासत्या । गच्छतं । हूयते । हविः । मध्वः । पिबतं । मधुऽपेभिः । आसऽभिः । युवोः । हि । पूर्वं । सविता । उषसः । रथं । ऋताय । चित्रं । घृतऽवन्तं । इष्यति ॥१०॥ आ । नासत्या । त्रिऽभिः । एकादशैः । इह । देवेभिः । यातं । मधुऽपेयं । अश्विना । प्र । आयुः । तारिष्टं । निः । रपांसि । मृक्षतं । सेधतं । द्वेषः । भवतं । सचाऽभुवा ॥ ११ ॥ आ । नः । अश्विना । त्रिऽवृता । रथेन । अर्वाञ्चं । रयिं । वहतं । सुऽवीरं । शृण्वन्ता । वां । अवसे । जोहवीमि । वृधे । च । नः । भवतं । वाजऽसातौ ॥ १२ ॥ ५ ॥

ह्वयामि । अग्निं । प्रथमं । स्वस्तये । ह्वयामि । मित्रावरुणौ । इह । अवसे । ह्वयामि । रात्रीं । जगतः । निऽवेशनीं । ह्वयामि । देवं । सवितारं । ऊतये ॥ १ ॥

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ २ ॥
याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्याम् ।
आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ॥३॥
अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम् ।
आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तविषीं दधानः॥४॥
वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहन्तः ।
शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः ॥ ५ ॥
तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट् ।
आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत् ॥ ६ ॥ ६॥

आ । कृष्णेन । रजसा । वर्तमानः । निऽवेशयन् । अमृतं । मर्त्यं । च । हिरण्ययेन । सविता । रथेन । आ । देवः । याति । भुवनानि । पश्यन् ॥२॥ याति । देवः । प्रऽवता । याति । उत्ऽवता । याति । शुभ्राभ्यां । यजतः । हरिऽभ्यां । आ । देवः । याति । सविता । पराऽवतः । अप । विश्वा । दुःऽइता । बाधमानः ॥३॥ अभिऽवृतं । कृशनैः । विश्वऽरूपं । हिरण्यऽशम्यं । यजतः । बृहंतं । आ । अस्थात् । रथं । सविता । चित्रऽभानुः । कृष्णा । रजांसि । तविषीं । दधानः ॥ ४ ॥ वि । जनान् । श्यावाः । शितिऽपादः । अख्यन् । रथं । हिरण्यऽप्रउगं । वहंतः । शश्वत् । विशः । सवितुः । दैव्यस्य । उपऽस्थे । विश्वा । भुवनानि । तस्थुः ॥ ५ ॥ तिस्रः । द्यावः । सवितुः । द्वौ । उपऽस्था । एका । यमस्य । भुवने । विराषाट् । आणिं । न । रथ्यं । अमृता । अधि । तस्थुः । इह । ब्रवीतु । यः । उं इति । तत् । चिकेतत् ॥ ६ ॥ ६ ॥

वि सुपर्णो अन्तरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः ।
क्वे३दानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥ ७ ॥

अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥ ८ ॥

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते ।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥ ९ ॥

हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥ १० ॥

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि
देव ॥ ११ ॥ ७ ॥ ७ ॥

वि । सुऽपर्णः । अंतरिक्षाणि । अख्यत् । गभीरऽवेपाः । असुरः । सुऽनीथः । क्व । इदानीं । सूर्यः । कः । चिकेत । कतमां । द्यां । रश्मिः । अस्य । आ । ततान ॥७॥ अष्टौ । वि । अख्यत् । ककुभः । पृथिव्याः । त्री । धन्व । योजना । सप्त । सिंधून् । हिरण्यऽअक्षः । सविता । देवः । आ । अगात् । दधत् । रत्ना । दाशुषे । वार्याणि ॥ ८ ॥ हिरण्यऽपाणिः । सविता । विऽचर्षणिः । उभे इति । द्यावापृथिवी इति । अंतः । ईयते । अप । अमीवां । बाधते । वेति । सूर्यं । अभि । कृष्णेन । रजसा । द्यां । ऋणोति ॥ ९ ॥ हिरण्यऽहस्तः । असुरः । सुऽनीथः । सुऽमृळीकः । स्वऽवान् । यातु । अर्वाङ् । अपऽसेधन् । रक्षसः । यातुऽधानान् । अस्थात् । देवः । प्रतिऽदोषं । गृणानः ॥ १० ॥ ये । ते । पंथाः । सवितरिति । पूर्व्यासः । अरेणवः । सुऽकृताः । अंतरिक्षे । तेभिः । नः । अद्य । पथिऽभिः । सुऽगेभिः । रक्ष । च । नः । अधि । च । ब्रूहि । देव ॥११॥७॥७॥

॥ अष्टमोऽनुवाकः ॥

कण्वो

॥ ३६ ॥ १-२० घौर ऋषिः ॥ १-२० अग्निर्देवता ॥ छन्दः-१, १२ भुरिगनुष्टुप्। २ निचृत्सतः पङ्क्तिः। ४ निचृत्पङ्क्तिः। १०, १४ निचृद्विष्टारपङ्क्तिः। १८ विष्टारपङ्क्तिः। २० सतः पङ्क्तिः। ३, ११ निचृत्पथ्या बृहती। ५, १६ निचृद्बृहती। ६ भुरिग् बृहती। ७ बृहती। ८ स्वराड् बृहती। ९ निचृदुपरिष्टाद्बृहती। १३ उपरिष्टाद्बृहती। १५ विराट् पथ्याबृहती। १७ विराडुपरिष्टाद्बृहती। १९ पथ्याबृहती ॥ स्वरः-१, १२ गान्धारः। २, ४, १०, १४, १८, २० पञ्चमः। ३, ११, ५, १६, ६-९, १३, १५, १७, १९ मध्यमः ॥

(३६) प्र वो यह्वं पुरूणां विशां देवयतीनाम्।
अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य ईळते ॥ १ ॥
जनासो अग्निं दधिरे सहोवृधं हविष्मन्तो विधेम ते।
स त्वं नो अद्य सुमना इहाविता भवा वाजेषु सन्त्य ॥ २ ॥
प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम्।
महस्ते सतो वि चरन्त्यर्चयो दिवि स्पृशन्ति भानवः ॥ ३ ॥
देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिन्धते।
विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥ ४ ॥

॥ अष्टमोऽनुवाकः ॥

प्र । वः । यह्वं । पुरूणां । विशां । देवऽयतीनां । अग्निं । सुऽउक्तेभिः । वचःऽभिः । ईमहे । यं । सीं । इत् । अन्ये । ईळते ॥ १ ॥ जनासः । अग्निं । दधिरे । सहःऽवृधं । हविष्मंतः । विधेम । ते । सः । त्वं । नः । अद्य । सुऽमनाः । इह । अविता । भव । वाजेषु । संत्य ॥ २ ॥ प्र । त्वा । दूतं । वृणीमहे । होतारं । विश्वऽवेदसं । महः । ते । सतः । वि । चरंति । अर्चयः । दिवि । स्पृशंति । भानवः ॥ ३ ॥ देवासः । त्वा । वरुणः । मित्रः । अर्यमा । सं । दूतं । प्रत्नं । इंधते । विश्वं । सः । अग्ने । जयति । त्वया । धनं । यः । ते । ददाश । मर्त्यः ॥ ४ ॥

मन्द्रो होता गृहपतिरग्ने दूतो विशामसि ।
त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ॥ ५ ॥८॥
त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः ।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या ॥ ६ ॥
तं घेमित्था नमस्विन उप स्वराजमासते ।
होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्रिधः ॥ ७ ॥
घ्नन्तो वृत्रमतरन्रोदसी अप उरु क्षयाय चक्रिरे ।
भुवत्कण्वे वृषा द्युम्न्याहुतः क्रन्ददश्वो गविष्टिषु ॥ ८ ॥
सं सीदस्व महाँ असि शोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥ ९ ॥
यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।
यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥ १० ॥९॥

मंद्रः । होता । गृहऽपतिः । अग्ने । दूतः । विशां । असि । त्वे इति । विश्वा । संऽगतानि । व्रता । ध्रुवा । यानि । देवाः । अकृण्वत ॥५॥८॥ त्वे इति । इत् । अग्ने । सुऽभगे । यविष्ठ्य । विश्वं । आ । हूयते । हविः । सः । त्वं । नः । अद्य । सुऽमनाः । उत । अपरं । यक्षि । देवान् । सुऽवीर्या ॥ ६ ॥ तं । घ । ईं । इत्था । नमस्विनः । उप । स्वऽराजं । आसते । होत्राभिः । अग्निं । मनुषः । सं । इंधते । तितिर्वांसः । अति । स्रिधः ॥७॥ घ्नंतः । वृत्रं । अतरन् । रोदसी इति । अपः । उरु । क्षयाय । चक्रिरे ।(भुवत् । कण्वे । वृषा । द्युम्नी । आऽहुतः)। क्रंदत् । अश्वः । गोऽइष्टिषु ॥८॥ सं । सीदस्व । महान् । असि । शोचस्व । देवऽवीतमः । वि । धूमं । अग्ने । अरुषं । मियेध्य । सृज । प्रऽशस्त । दर्शतं । ॥ ९ ॥ यं । त्वा । देवासः । मनवे । दधुः । इह । यजिष्ठं । हव्यऽवाहन ।(यं । कण्वः ।

यम॒ग्निं मेध्या॑तिथिः॒ कण्व॑ ई॒ध ऋ॒तादधि॑।
तस्य॒ प्रेषो॑ दीदियु॒स्तमि॒मा ऋच॒स्तम॒ग्निं व॑र्धयामसि ॥ ११ ॥
रा॒यस्पू॑र्धि स्वधा॒वोऽस्ति॒ हि तेऽग्ने॑ दे॒वेष्वाप्य॑म्।
त्वं वाज॑स्य॒ श्रुत्य॑स्य राजसि॒ स नो॑ मृळ म॒हाँ अ॑सि ॥ १२ ॥
ऊ॒र्ध्व ऊ॒ षु ण॑ ऊ॒तये॒ तिष्ठा॑ दे॒वो न स॑वि॒ता ।
ऊ॒र्ध्वो वाज॑स्य॒ सनि॑ता॒ यद॒ञ्जिभि॑र्वा॒घद्भि॑र्वि॒ह्वया॑महे ॥ १३ ॥
ऊ॒र्ध्वो नः॑ पा॒ह्यंह॑सो॒ नि के॒तुना॒ विश्वं॒ सम॒त्रिणं॑ दह ।
कृ॒धी न॑ ऊ॒र्ध्वाञ्च॒रथा॑य जी॒वसे॑ वि॒दा दे॒वेषु॑ नो॒ दुवः॑ ॥ १४ ॥
पा॒हि नो॑ अग्ने र॒क्षसः॑ पा॒हि धू॒र्तेरराव्णः॑ ।
पा॒हि रीष॑त उ॒त वा॒ जिघां॑सतो॒ बृह॑द्भानो॒ यवि॑ष्ठ्य ॥ १५ ॥ १० ॥

मेध्यंऽअतिथिः। धुनऽस्पृतं। यं। वृषा। यं। उपऽस्तुतः॥ १० ॥ ९ ॥ यं। अग्निं। मेध्यंऽअतिथिः। कण्वः। ईधे। ऋतात्। अधि। तस्य। प्र। इषः। दीदियुः। तं। इमाः। ऋचः। तं। अग्निं। वर्धयामसि ॥ ११ ॥ रायः। पूर्धि। स्वधाऽवः। अस्ति। हि। ते। अग्ने। देवेषु। आप्यं। त्वं। वाजस्य। श्रुत्यस्य। राजसि। सः। नः। मृळ। महान्। असि ॥ १२ ॥ ऊर्ध्वः। ऊं इति। सु। नः। ऊतये। तिष्ठ। देवः। न। सविता। ऊर्ध्वः। वाजस्य। सनिता। यत्। अंजिऽभिः। वाघत्ऽभिः। विऽह्वयामहे ॥ १३ ॥ ऊर्ध्वः। नः। पाहि। अंहसः। नि। केतुना। विश्वं। सं। अत्रिणं। दह। कृधि। नः। ऊर्ध्वान्। चरथाय। जीवसे। विदाः। देवेषु। नः। दुवः ॥ १४ ॥ पाहि। नः। अग्ने। रक्षसः। पाहि। धूर्तेः। अराव्णः। पाहि। रिषतः। उत। वा। जिघांसतः। बृहद्भानो इति बृहत्ऽभानो। यविष्ठ्य ॥ १५ ॥ १० ॥

घनेव विष्वग्वि जह्यराव्णस्तपुर्जम्भ यो अस्मध्रुक् ।
यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत ॥ १६ ॥

अग्निर्वव्ने सुवीर्यमग्निः कण्वाय सौभगम् ।
अग्निः प्रावन्मित्रोत मेध्यातिथिमग्निः साता उपस्तुतम् ॥ १७ ॥

अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे ।
अग्निर्नयन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः ॥ १८ ॥

नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥ १९ ॥

त्वेषासो अग्नेरमवन्तो अर्चयो भीमासो न प्रतीतये ।
रक्षस्विनः सदमिद्यातुमावतो विश्वं समत्रिणं दह ॥२०॥११॥

घनाऽइव । विष्वक् । वि । जहि । अराव्णः । तपुःऽजंभ । यः । अस्मऽध्रुक् । यः । मर्त्यः । शिशीते । अति । अक्तुऽभिः । मा । नः । सः । रिपुः । ईशत ॥ १६ ॥ अग्निः । वव्ने । सुऽवीर्यं । अग्निः । कण्वाय । सौभगं । अग्निः । प्र । आवत् । मित्रा । उत । मेध्यऽअतिथिं । अग्निः । साता । उपऽस्तुतं ॥ १७ ॥ अग्निना । तुर्वशं । यदुं । पराऽवतः । उग्रऽदेवं । हवामहे । अग्निः । नयत् । नवऽवास्त्वं । बृहत्ऽरथं । तुर्वीतिं । दस्यवे । सहः ॥ १८ ॥ नि । त्वां । अग्ने । मनुः । दधे । ज्योतिः । जनाय । शश्वते । दीदेथ । कण्वे । ऋतऽजातः । उक्षितः । यं । नमस्यंति । कृष्टयः ॥ १९ ॥ त्वेषासः । अग्नेः । अमऽवंतः । अर्चयः । भीमासः । न । प्रतिऽइतये । रक्षस्विनः । सदं । इत् । यातुऽमावतः । विश्वं । सं । अत्रिणं । दह ॥ २० ॥ ११ ॥

॥ ३७ ॥ १-१५ कण्वो घौर ऋषिः ॥ मरुतो देवताः ॥ छन्दः- १, २, ४, ६-८, १२ गायत्री । ३, ९, ११, १४, निचृद् गायत्री । ५ विराड् गायत्री । १०, १५ पिपीलिकामध्या निचृद्गायत्री १३ पादनिचृद्गायत्री ॥ षड्जः स्वरः ॥

(३७) क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम् ।
कण्वा अभि प्र गायत ॥ १ ॥

ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः ।
अजायन्त स्वभानवः ॥ २ ॥

इहेव शृण्व एषां कशा हस्तेषु यद्वदान् ।
नि यामञ्चित्रमृञ्जते ॥ ३ ॥

प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे ।
देवत्तं ब्रह्म गायत ॥ ४ ॥

प्र शंसा गोष्वघ्न्यं क्रीळं यच्छर्धो मारुतम् ।
जम्भे रसस्य वावृधे ॥ ५ ॥ १२ ॥

को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः ।
यत्सीमन्तं न धूनुथ ॥ ६ ॥

क्रीळं । वः । शर्धः । मारुतं । अनर्वाणं । रथेऽशुभं । कण्वाः । अभि । प्र । गायत ॥ १ ॥ ये । पृषतीभिः । ऋष्टिऽभिः । साकं । वाशीभिः । अंजिऽभिः । अजायंत । स्वऽभानवः ॥ २ ॥ इहऽइव । शृण्वे । एषां । कशाः । हस्तेषु । यत् । वदान् । नि । यामन् । चित्रं । ऋंजते ॥ ३ ॥ प्र । वः । शर्धाय । घृष्वये । त्वेषऽद्युम्नाय । शुष्मिणे । देवत्तं । ब्रह्म । गायत ॥ ४ ॥ प्र । शंस । गोषु । अघ्न्यं । क्रीळं । यत् । शर्धः । मारुतं । जंभे । रसस्य । ववृधे ॥ ५ ॥ १२ ॥ कः । वः । वर्षिष्ठः । आ । नरः । दिवः । च । ग्मः । च । धूतयः । यत् । सीं । अंतं । न । धूनुथ ॥ ६ ॥

नि वो यामाय मानुषो दध्र उग्राय मन्यवे ।
जिहीत पर्वतो गिरिः ॥ ७ ॥
येषामज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः ।
भिया यामेषु रेजते ॥ ८ ॥
स्थिरं हि जानमेषां वयो मातुर्निरेतवे ।
यत्सीमनु द्विता शवः ॥ ९ ॥
उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत ।
वाश्रा अभिज्ञु यातवे ॥ १० ॥ १३ ॥
त्यं चिद्घा दीर्घं पृथुं मिहो नपातममृध्रम् ।
प्र च्यावयन्ति यामभिः ॥ ११ ॥
मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन ।
गिरीँरचुच्यवीतन ॥ १२ ॥
यद्ध यान्ति मरुतः सं ह ब्रुवतेऽध्वन्ना ।
शृणोति कश्चिदेषाम् ॥ १३ ॥

नि । वः । यामाय । मानुषः । दध्रे । उग्राय । मन्यवे । जिहीत । पर्वतः । गिरिः ॥ ७॥ येषां । अज्मेषु । पृथिवी । जुजुर्वान्ऽइव । विश्पतिः । भिया । यामेषु । रेजते ॥ ८ ॥ स्थिरं । हि । जानं । एषां । वयः । मातुः । निःऽएतवे । यत् । सीं । अनु । द्विता । शवः ॥ ९ ॥ उत् । ऊं इति । त्ये । सूनवः । गिरः । काष्ठाः । अज्मेषु । अत्नत । वाश्राः । अभिऽज्ञु । यातवे ॥ १० ॥ १३ ॥ त्यं । चित् । घ । दीर्घं । पृथुं । मिहः । नपातं । अमृध्रं । प्र । च्यवयंति । यामभिः ॥ ११ ॥ मरुतः । यत् । ह । वः । बलं । जनान् । अचुच्यवीतन । गिरीन् । अचुच्यवीतन ॥ १२ ॥ यत् । ह । यांति । मरुतः । सं । ह । ब्रुवते । अध्वन् । आ । शृणोति । कः । चित् । एषां ॥ १३ ॥

प्र यात शीभमाशुभिः सन्ति कण्वेषु वो दुवः।
तत्रो षु मादयाध्वै ॥ १४ ॥

अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषाम्।
विश्वं चिदायुर्जीवसे ॥ १५ ॥ १४ ॥

॥ ३८ ॥ १-१५ कण्वो घौर ऋषिः॥ मरुतो देवता॥ छन्दः—१, ८, ११, १३, १५, ४, गायत्री। २, ३, ५, ९, १० निचृद्गायत्री। ३ पादनिचृद्गायत्री। ७, १२ पिपीलिका मध्या निचृत्। १४ यवमध्या विराड् गायत्री॥ षड्जः स्वरः॥

(३८) कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः।
दधिध्वे वृक्तबर्हिषः ॥ १ ॥

क्व नूनं कद्वो अर्थं गन्ता दिवो न पृथिव्याः।
क्व वो गावो न रण्यन्ति ॥ २ ॥

क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता।
को३विश्वानि सौभगा ॥ ३ ॥

प्र। यात। शीभं। आशुऽभिः। संति। कण्वेषु। वः। दुवः। तत्रो इति। सु। मादयाध्वै ॥१४॥ अस्ति। हि। स्म। मदाय। वः। स्मसि। स्म। वयं। एषां। विश्वं। चित्। आयुः। जीवसे ॥ १५ ॥ १४ ॥

कत्। ह। नूनं। कधऽप्रियः। पिता। पुत्रं। न। हस्तयोः। दधिध्वे। वृक्तऽबर्हिषः ॥१॥ क्व। नूनं। कत्। वः। अर्थं। गंत। दिवः। न। पृथिव्याः। क्व। वः। गावः। न। रण्यंति ॥२॥ क्व। वः। सुम्ना। नव्यांसि। मरुतः। क्व। सुविता। को३इति। विश्वानि। सौभगा॥ ३ ॥

यद्यूयं पृश्निमातरो मर्तासः स्यातन ।

स्तोता वो अमृतः स्यात् ॥ ४ ॥

मा वो मृगो न यवसे जरिता भूदजोष्यः ।

पथा यमस्य गादुप ॥ ५ ॥ १५ ॥

मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत् ।

पदीष्ट तृष्णया सह ॥ ६ ॥

सत्यं त्वेषा अमवन्तो धन्वञ्चिदा रुद्रियासः ।

मिहं कृण्वन्त्यवाताम् ॥ ७ ॥

वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति ।

यदेषां वृष्टिरसर्जि ॥ ८ ॥

दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन ।

यत्पृथिवीं व्युन्दन्ति ॥ ९ ॥

यत् । यूयं । पृश्निऽमातरः । मर्तासः । स्यातन । स्तोता । वः । अमृतः । स्यात् ॥ ४ ॥ मा । वः । मृगः । न । यवसे । जरिता । भूत् । अजोष्यः । पथा । यमस्य । गात् । उप ॥ ५ ॥ १५ ॥ मो इति । सु । नः । पराऽपरा । निःऽऋतिः । दुःऽहना । वधीत् । पदीष्ट । तृष्णया । सह ॥ ६ ॥ सत्यं । त्वेषाः । अमऽवंतः । धन्वन् । चित् । आ । रुद्रियासः । मिहं । कृण्वंति । अवातां ॥ ७ ॥ वाश्राऽइव । विऽद्युत् । मिमाति । वत्सं । न । माता । सिसक्ति । यत् । एषां । वृष्टिः । असर्जि ॥ ८ ॥ दिवा । चित् । तमः । कृण्वंति । पर्जन्येन । उदऽवाहेन । यत् । पृथिवीं । विऽउंदंति ॥ ९ ॥ अध । स्वनात् । मरुतां । विश्वं । आ । सद्म । पार्थिवं ।

अधं स्वनान्मरुतां विश्वमा सद्म पार्थिवम्।

अरेजन्त प्र मानुषाः ॥ १० ॥ १६ ॥

मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु ।

यातेमखिद्रयामभिः ॥ ११ ॥

स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम्।

सुसंस्कृता अभीशवः ॥ १२ ॥

अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम्।

अग्निं मित्रं न दर्शतम् ॥ १३ ॥

मिमीहि श्लोकमास्ये पर्जन्य इव ततनः ।

गाय गायत्रमुक्थ्यम् ॥ १४ ॥

वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम् ।

अस्मे वृद्धा असन्निह ॥ १५ ॥ १७ ॥

अरेजंत। प्र। मानुषाः ॥१०॥१६॥ मरुतः। वीळुपाणिऽभिः। चित्राः। रोधस्वतीः। अनु। यात। ईं। अखिद्रयामऽभिः ॥११॥ स्थिराः। वः। संतु। नेमयः। रथाः। अश्वासः। एषां। सुऽसंस्कृताः। अभीशवः ॥१२॥ अच्छ। वद। तना। गिरा। जरायै। ब्रह्मणः। पतिं। अग्निं। मित्रं। न। दर्शतं ॥१३॥ मिमीहि। श्लोकं। आस्ये। पर्जन्यःऽइव। ततनः। गाय। गायत्रं। उक्थ्यं ॥१४॥ वंदस्व। मारुतं। गणं। त्वेषं। पनस्युं। अर्किणं। अस्मे इति। वृद्धाः। असन्। इह ॥१५॥१७॥

॥ ३९ ॥ १—१० कण्वो घौर ऋषिः ॥ मरुतो देवता ॥ छन्दः—१, ५, ९, पथ्याबृहती ७ उपरिष्टाद्विराड् बृहती । २, ८, १०, विराट् सतः पङ्क्तिः । ४, ६, निचृत्सतः पङ्क्तिः । ३ अनुष्टुप् ॥ स्वरः—१, ५, ९, ७, मध्यमः । २, ८, १०, ४, ६, पञ्चमः । ३ गान्धारः ॥

(३०) प्र यदित्था परावतः शोचिर्न मानमस्यथ ।
कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः ॥ १ ॥

स्थिरा वः सन्त्वायुधा पराणुदे वीळू उत प्रतिष्कभे ।
युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ॥ २ ॥

परा ह यत्स्थिरं हथ नरो वर्तयथा गुरु ।
वि याथन वनिनः पृथिव्या व्याशाः पर्वतानाम् ॥ ३ ॥

नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः ।
युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे ॥ ४ ॥

प्र । यत् । इत्था । पराऽवतः । शोचिः । न । मानं । अस्यथ । कस्य । क्रत्वा । मरुतः । कस्य । वर्पसा । कं । याथ । कं । ह । धूतयः ॥१॥ स्थिरा । वः । सन्तु । आयुधा । पराऽनुदे । वीळु । उत । प्रतिऽस्कभे । युष्माकं । अस्तु । तविषी । पनीयसी । मा । मर्त्यस्य । मायिनः ॥२॥ परा । ह । यत् । स्थिरं । हथ । नरः । वर्तयथ । गुरु । वि । याथन । वनिनः । पृथिव्याः । वि । आशाः । पर्वतानां ॥३॥ नहि । वः । शत्रुः । विविदे । अधि । द्यवि । न । भूम्यां । रिशादसः । युष्माकं । अस्तु । तविषी । तना । युजा । रुद्रासः । नु । चित् । आऽधृषे ॥४॥ प्र । वेपयन्ति । पर्वतान् । वि ।

प्र वेपयन्ति पर्वतान्वि विञ्चन्ति वनस्पतीन् ।
प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा ॥ ५ ॥ १८ ॥
उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः ।
आ वो यामाय पृथिवी चिदश्रोदबीभयन्त मानुषाः ॥ ६ ॥
आ वो मक्षू तनाय कं रुद्रा अवो वृणीमहे ।
गन्ता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ॥ ७ ॥
युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते ।
वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः ॥ ८ ॥
असामि हि प्रयज्यवः कण्वं दद प्रचेतसः ।
असामिभिर्मरुत आ न ऊतिभिर्गन्ता वृष्टिं न विद्युतः ॥ ९ ॥

विचंति । वनस्पतीन् । प्रो इति । आरत । मरुतः । दुर्मदाःऽइव । देवासः । सर्वया । विशा ॥५॥१८॥ उपो इति । रथेषु । पृषतीः । अयुग्ध्वं । प्रष्टिः । वहति । रोहितः । आ । वः । यामाय । पृथिवी । चित् । अश्रोत् । अबीभयंत । मानुषाः ॥६॥ आ । वः । मक्षु । तनाय । कं । रुद्राः । अवः । वृणीमहे । गंत । नूनं । नः । अवसा । यथा । पुरा । इत्था । कण्वाय । बिभ्युषे ॥ ७ ॥ युष्माऽइषितः । मरुतः । मर्त्यऽइषितः । आ । यः । नः । अभ्वः । ईषते । वि । तं । युयोत । शवसा । वि । ओजसा । वि । युष्माकाभिः । ऊतिऽभिः ॥८॥ असामि । हि । प्रऽयज्यवः । कण्वं । दद । प्रऽचेतसः । असामिऽभिः । मरुतः । आ । नः । ऊतिऽभिः । गंत । वृष्टिं । न । विऽद्युतः ॥ ९ ॥

असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः ।
ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषम् ॥ १० ॥ १९ ॥

॥ ४० ॥ १-८ कण्वो घौर ऋषिः ॥ बृहस्पतिर्देवता ॥ छन्दः– १, ८ निचृदुपरिष्टाद्बृहती । २, ५ पथ्याबृहती । ३, ७ आर्चीत्रिष्टुप् । ४, ६ सतःपङ्क्तिर्निचृत्पङ्क्तिः ॥ स्वरः– १, २, ८, ५ मध्यमः । ३, ७ धैवतः । ४, ६ पञ्चमः ॥

(४०) उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥ १ ॥
त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते ।
सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके ॥ २ ॥
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ ३ ॥
यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः ।
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम् ॥ ४ ॥

असामि । ओजः । बिभृथ । सुऽदानवः । असामि । धूतयः । शवः । ऋषिऽद्विषे । मरुतः । परिऽमन्यवे । इषुं । न । सृजत । द्विषं ॥ १० ॥ १९ ॥

उत् । तिष्ठ । ब्रह्मणः । पते । देवऽयन्तः । त्वा । ईमहे । उप । प्र । यन्तु । मरुतः । सुऽदानवः । इन्द्र । प्राशूः । भव । सचा ॥ १ ॥ त्वां । इत् । हि । सहसः । पुत्र । मर्त्यः । उपऽब्रूते । धने । हिते । सुऽवीर्यं । मरुतः । आ । सुऽअश्व्यं । दधीत । यः । वः । आऽचके ॥ २ ॥ प्र । एतु । ब्रह्मणः । पतिः । प्र । देवी । एतु । सूनृता । अच्छ । वीरं । नर्यं । पङ्क्तिऽराधसं । देवाः । यज्ञं । नयन्तु । नः ॥ ३ ॥ यः । वाघते । ददाति । सूनरं । वसु । सः । धत्ते । अक्षिति । श्रवः । तस्यै । इळां । सुऽवीरां । आ । यजामहे । सुप्रऽतूर्तिं । अनेहसं ॥ ४ ॥ प्र । नूनं । ब्रह्मणः । पतिः ।

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥५॥२०॥
तमिद्वोचेमा विदथेषु शम्भुवं मन्त्रं देवा अनेहसम् ।
इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत् ॥ ६ ॥
को देवयन्तमश्नवज्जनं को वृक्तबर्हिषम् ।
प्रप्र दाश्वान्पस्त्याभिरस्थितान्तर्वावत्क्षयं दधे ॥ ७ ॥
उप क्षत्रं पृञ्चीत हन्ति राजभिर्भये चित्सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ॥ ८ ॥ २१ ॥

॥ ४१ ॥ १-९ कण्वो घौर ऋषिः ॥ देवता-१-३, ७-९ वरुणमित्रार्यमणः । ४-६ आदित्याः ॥
छन्दः-१, ४-५, ८ गायत्री । २-३, ६ विराड् गायत्री । ७, ९ निचृद्गायत्री ॥ १-९ षड्जः स्वरः ॥

(४१) यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा ।
नू चित्स दभ्यते जनः ॥ १ ॥

मंत्रं । वदति । उक्थ्यं । यस्मिन् । इंद्रः । वरुणः । मित्रः । अर्यमा । देवाः । ओकांसि । चक्रिरे ॥५॥२०॥ तं । इत् । वोचेम । विदथेषु । शंऽभुवं । मंत्रं । देवाः । अनेहसं । इमां । च । वाचं । प्रतिऽहर्यथ । नरः । विश्वा । इत् । वामा । वः । अश्नवत् ॥ ६ ॥ कः । देवऽयंतं । अश्नवत् । जनं । कः । वृक्तऽबर्हिषं । प्रऽप्र । दाश्वान् । पस्त्याभिः । अस्थित । अंतःऽवावत् । क्षयं । दधे ॥ ७ ॥ उप । क्षत्रं । पृंचीत । हंति । राजऽभिः । भये । चित् । सुऽक्षितिं । दधे । न । अस्य । वर्ता । न । तरुता । महाऽधने । न । अर्भे । अस्ति । वज्रिणः ॥ ८ ॥ २१ ॥

यं । रक्षंति । प्रऽचेतसः । वरुणः । मित्रः । अर्यमा । नु । चित् । सः । दभ्यते । जनः ॥ १ ॥

यं बाहुतेव पिप्रति पान्ति मर्त्यं रिषः ।
अरिष्टः सर्व एधते ॥ २ ॥
वि दुर्गा वि द्विषः पुरो घ्नन्ति राजान एषाम् ।
नयन्ति दुरिता तिरः ॥ ३ ॥
सुगः पन्था अनृक्षर आदित्यास ऋतं यते ।
नात्रावखादो अस्ति वः ॥ ४ ॥
यं यज्ञं नयथा नर आदित्या ऋजुना पथा ।
प्र वः स धीतये नशत् ॥५॥२२॥
स रत्नं मर्त्यो वसु विश्वं तोकमुत त्मना ।
अच्छा गच्छत्यस्तृतः ॥ ६ ॥
कथा राधाम सखायः स्तोमं मित्रस्यार्यम्णः ।
महि प्सरो वरुणस्य ॥ ७ ॥
मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम् ।
सुम्नैरिद्व आ विवासे ॥ ८ ॥

यं । बाहुताऽइव । पिप्रति । पांति । मर्त्यं । रिषः । अरिष्टः । सर्वः । एधते ॥ २ ॥ वि । दुःऽगा । वि । द्विषः । पुरः । घ्नंति । राजानः । एषां । नयंति । दुःऽइता । तिरः ॥३॥ सुऽगः । पंथाः । अनृक्षरः । आदित्यासः । ऋतं । यते । न । अत्र । अवऽखादः । अस्ति । वः ॥४॥ यं । यज्ञं । नयथ । नरः । आदित्याः । ऋजुना । पथा । प्र । वः । सः । धीतये । नशत् ॥ ५ ॥ २२ ॥ सः । रत्नं । मर्त्यः । वसु । विश्वं । तोकं । उत । त्मना । अच्छ । गच्छति । अस्तृतः ॥६॥ कथा । राधाम । सखायः । स्तोमं । मित्रस्य । अर्यम्णः । महि । प्सरः । वरुणस्य ॥ ७ ॥ मा । वः । घ्नंतं । मा । शपंतं । प्रति । वोचे । देवऽयंतं । सुम्नैः । इत् । वः । आ ।

चतुरश्चिद्ददमानाद्बिभीयादा निधातोः ।
न दुरुक्ताय स्पृहयेत् ॥ ९ ॥ २३ ॥

॥ ४२ ॥ १—१० कण्वो घौर ऋषिः ॥ पूषा देवता ॥ छन्दः—१, ९ निचृद्गायत्री । २, ३, ५—८, १० गायत्री । ४ विराड् गायत्री ॥ षड्जः स्वरः ॥

(४२) सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात् ।
सक्ष्वा देव प्र णस्पुरः ॥ १ ॥
यो नः पूषन्नघो वृको दुःशेव आदिदेशति ।
अप स्म तं पथो जहि ॥ २ ॥
अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम् ।
दूरमधि स्रुतेरज ॥ ३ ॥
त्वं तस्य द्वयाविनोऽघशंसस्य कस्य चित् ।
पदाभि तिष्ठ तपुषिम् ॥ ४ ॥
आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे ।
येन पितॄनचोदयः ॥ ५ ॥ २४ ॥

विवासे ॥ ८ ॥ चतुरः । चित् । ददमानात् । बिभीयात् । आ । निऽधातोः । न । दुःऽउक्ताय । स्पृहयेत् ॥ ९ ॥ २३ ॥

सं । पूषन् । अध्वनः । तिर । वि । अंहः । विऽमुचः । नपात् । सक्ष्व । देव । प्र । नः । पुरः ॥१॥ यः । नः । पूषन् । अघः । वृकः । दुःऽशेवः । आऽदिदेशति । अप । स्म । तं । पथः । जहि ॥२॥ अप । त्यं । परिऽपंथिनं । मुषीवाणं । हुरःऽचितं । दूरं । अधि । स्रुतेः । अज ॥३॥ त्वं । तस्य । द्वयाविनः । अघऽशंसस्य । कस्य । चित् । पदा । अभि । तिष्ठ । तपुषिं ॥ ४ ॥ आ । तत् । ते । दस्र । मंतुऽमः । पूषन् । अवः । वृणीमहे । येन । पितॄन् । अचोदयः ॥ ५ ॥ २४ ॥

अधा नो विश्वसौभग हिरण्यवाशीमत्तम ।

धनानि सुषणा कृधि ॥ ६ ॥

अति नः सश्चतो नय सुगा नः सुपथा कृणु ।

पूषन्निह क्रतुं विदः ॥ ७ ॥

अभि सूयवसं नय न नवज्वारो अध्वने ।

पूषन्निह क्रतुं विदः ॥ ८ ॥

शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम् ।

पूषन्निह क्रतुं विदः ॥ ९ ॥

न पूषणं मेथामसि सूक्तैरभि गृणीमसि ।

वसूनि दस्ममीमहे ॥ १० ॥ २५ ॥

॥ ४३ ॥ १—९ कण्वो घौर ऋषिः ॥ देवता—१, २, ४—६ रुद्रः । ३ मित्रावरुणौ । ७—९ सोमः ॥ छन्दः—१—४, ७, ८ गायत्री । ५ विराड्गायत्री । ६ पादनिचृद्गायत्री । ९ अनुष्टुप् ॥ स्वरः १—८ षड्जः । ९ गान्धारः ॥

(४३) कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे ।

वोचेम शंतमं हृदे ॥ १ ॥

अध । नः । विश्वऽसौभग । हिरण्यवाशीमत्ऽतम । धनानि । सुऽसना । कृधि ॥ ६ ॥ अति । नः । सश्चतः । नय । सुऽगा । नः । सुऽपथा । कृणु । पूषन् । इह । क्रतुम् । विदः ॥ ७ ॥ अभि । सुऽयवसम् । नय । न । नवऽज्वारः । अध्वने । पूषन् । इह । क्रतुम् । विदः ॥ ८ ॥ शग्धि । पूर्धि । प्र । यंसि । च । शिशीहि । प्रासि । उदरम् । पूषन् । इह । क्रतुम् । विदः ॥ ९ ॥ न । पूषणम् । मेथामसि । सुऽउक्तैः । अभि । गृणीमसि । वसूनि । दस्मम् । ईमहे ॥ १० ॥ २५ ॥

कत् । रुद्राय । प्रऽचेतसे । मीळ्हुःऽतमाय । तव्यसे । वोचेम । शम्ऽतमम् ।

यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे ।
यथा तोकाय रुद्रियम् ॥ २ ॥

यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति ।
यथा विश्वे सजोषसः ॥ ३ ॥

गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् ।
तच्छंयोः सुम्नमीमहे ॥ ४ ॥

यः शुक्र इव सूर्यो हिरण्यमिव रोचते ।
श्रेष्ठो देवानां वसुः ॥ ५ ॥ २६ ॥

शं नः करत्यर्वते सुगं मेषाय मेष्ये ।
नृभ्यो नारिभ्यो गवे ॥ ६ ॥

अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् ।
महि श्रवस्तुविनृम्णम् ॥ ७ ॥

मा नः सोमपरिबाधो मारातयो जुहुरन्त ।
आ न इन्दो वाजे भज ॥ ८ ॥

हृदे ॥ १ ॥ यथा । नः । अदितिः । करत् । पश्वे । नृऽभ्यः । यथा । गवे । यथा । तोकाय । रुद्रियं ॥ २ ॥ यथा । नः । मित्रः । वरुण । यथा । रुद्रः । चिकेतति । यथा । विश्वे । सऽजोषसः ॥ ३ ॥ गाथऽपतिं । मेधऽपतिं । रुद्रं । जलाषऽभेषजं । तत् । शंऽयोः । सुम्नं । ईमहे ॥ ४ ॥ यः । शुक्रःऽइव । सूर्यः । हिरण्यंऽइव । रोचते । श्रेष्ठः । देवानां । वसुः ॥ ५ ॥ २६ ॥ शं । नः । करति । अर्वते । सुऽगं । मेषाय । मेष्ये । नृऽभ्यः । नारिऽभ्यः । गवे ॥ ६ ॥ अस्मे इति । सोम । श्रियं । अधि । नि । धेहि । शतस्य । नृणां । महि । श्रवः । तुविऽनृम्णं ॥ ७ ॥ मा । नः । सोमऽपरिबाधः । मा । अरातयः । जुहुरंत । आ । नः । इंदो इति । वाजे । भज ॥ ८ ॥

याास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य ।
मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ॥ ९ ॥ २७ ॥ ८ ॥

॥ नवमोऽनुवाकः ॥

॥ ४४ ॥ १—१४ प्रस्कण्व ऋषिः ॥ देवता १—१४ अग्निः ॥ छन्दः—१, ७ उपरिष्टाद्विराड्बृहती । ३ निचृदुपरिष्टाद्बृहती । ५, ११ निचृत्पथ्याबृहती । १२ भुरिग्बृहती । १३ पथ्याबृहती । २, ४, ८, १४ विराट् सतः पंक्तिः । १० विराड्विस्तारपंक्तिः । ९ आर्षी त्रिष्टुप् ॥ स्वरः—१, ७, ३, ५, ११—१३ मध्यमः । २, ४, ६, ८, १४, १० पञ्चमः । ९ धैवतः ॥

(४४) अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य ।
आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥ १ ॥
जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम् ।
सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत् ॥ २ ॥
अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियम् ।
धूमकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियम् ॥ ३ ॥

याः । ते । प्रऽजाः । अमृतस्य । परस्मिन् । धामन् । ऋतस्य । मूर्धा । नाभा । सोम । वेनः । आऽभूषन्तीः । सोम । वेदः ॥ ९ ॥ २७ ॥ ८ ॥

॥ नवमोऽनुवाकः ॥

अग्ने । विवस्वत् । उषसः । चित्रं । राधः । अमर्त्य । आ । दाशुषे । जातऽवेदः । वह । त्वं । अद्य । देवान् । उषःऽबुधः ॥ १ ॥ जुष्टः । हि । दूतः । असि । हव्यऽवाहनः । अग्ने । रथीः । अध्वराणां । सऽजूः । अश्विऽभ्यां । उषसा । सुऽवीर्यं । अस्मे इति । धेहि । श्रवः । बृहत् ॥ २ ॥ अद्य । दूतं । वृणीमहे । वसुं । अग्निं । पुरुऽप्रियं । धूमऽकेतुं । भाःऽऋ-

श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं जनाय दाशुषे ।
देवाँ अच्छा यातवे जातवेदसमग्निमीळे व्युष्टिषु ॥ ४ ॥

स्तविष्यामि त्वामहं विश्वस्यामृत भोजन ।
अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन ॥ ५ ॥ २८ ॥

सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः ।
प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम् ॥ ६ ॥

होतारं विश्ववेदसं सं हि त्वा विश इन्धते ।
स आ वह पुरुहूत प्रचेतसोऽग्ने देवाँ इह द्रवत् ॥ ७ ॥

सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षपः ।
कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर ॥ ८ ॥

जीकं । विऽउष्टिषु । यज्ञानां । अध्वरऽश्रियं ॥ ३ ॥ श्रेष्ठं । यविष्ठं । अतिथिं । सुऽआहुतं । जुष्टं । जनाय । दाशुषे । देवान् । अच्छ । यातवे । जातऽवेदसं । अग्निं । ईळे । विऽउष्टिषु ॥ ४ ॥ स्तविष्यामि । त्वां । अहं । विश्वस्य । अमृत । भोजन । अग्ने । त्रातारं । अमृतं । मियेध्य । यजिष्ठं । हव्यऽवाहन ॥ ५ ॥ २८ ॥ सुऽशंसः । बोधि । गृणते । यविष्ठ्य । मधुजिह्वः । सुऽआहुतः । प्रस्कण्वस्य । प्रऽतिरन् । आयुः । जीवसे । नमस्य । दैव्यं । जनं ॥ ६ ॥ होतारं । विश्वऽवेदसं । सं । हि । त्वा । विशः । इंधते । सः । आ । वह । पुरुऽहूत । प्रऽचेतसः । अग्ने । देवान् । इह । द्रवत् ॥ ७ ॥ सवितारं । उषसं । अश्विना । भगं । अग्निं । विऽउष्टिषु । क्षपः । कण्वासः । त्वा । सुतऽसोमासः । इंधते । हव्यऽवाहं । सुऽअध्वर ॥ ८ ॥

पतिर्ह्यध्वराणामग्ने दूतो विशामसि ।
उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः ॥ ९ ॥

अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः ।
असि ग्रामेष्वविता पुरोहितोऽसि यज्ञेषु मानुषः ॥ १० ॥ २९ ॥

नि त्वा यज्ञस्य साधनमग्ने होतारमृत्विजम् ।
मनुष्वद्देव धीमहि प्रचेतसं जीरं दूतममर्त्यम् ॥ ११ ॥

यद्देवानां मित्रमहः पुरोहितोऽन्तरो यासि दूत्यम् ।
सिन्धोरिव प्रस्वनितास ऊर्मयोऽग्नेर्भ्राजन्ते अर्चयः ॥ १२ ॥

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ॥ १३ ॥

पतिः । हि । अध्वराणां । अग्ने । दूतः । विशां । असि । उषःऽबुधः । आ । वह । सोमऽपीतये । देवान् । अद्य । स्वःऽदृशः ॥ ९ ॥ अग्ने । पूर्वाः । अनु । उषसः । विभावसो इति विभाऽवसो । दीदेथ । विश्वऽदर्शतः । असि । ग्रामेषु । अविता । पुरःऽहितः । असि । यज्ञेषु । मानुषः ॥ १० ॥ २९ ॥ नि । त्वा । यज्ञस्य । साधनं । अग्ने । होतारं । ऋत्विजं । मनुष्वत् । देव । धीमहि । प्रऽचेतसं । जीरं । दूतं । अमर्त्यं ॥ ११ ॥ यत् । देवानां । मित्रऽमहः । पुरःऽहितः । अंतरः । यासि । दूत्यं । सिंधोःऽइव । प्रऽस्वनितासः । ऊर्मयः । अग्नेः । भ्राजंते । अर्चयः ॥ १२ ॥ श्रुधि । श्रुत्ऽकर्ण । वह्निऽभिः । देवैः । अग्ने । सयावऽभिः । आ । सीदंतु । बर्हिषि । मित्रः । अर्यमा । प्रातःऽ-

शृण्वन्तु स्तोमं मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः ।
पिबन्तु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः ॥ १४ ॥ ३० ॥

॥ ४५ ॥ १—१० प्रस्कण्वः काण्व ऋषिः ॥ १—१० अग्निर्देवा देवताः ॥ छन्दः—१ भुरिगुष्णिक् । ५ उष्णिक् । २, ३, ७, ८ अनुष्टुप् । ४ निचृदनुष्टुप् । ६, ९, १० विराडनुष्टुप् ॥ स्वरः—१, ५ ऋषभः । २—४, ६-१० गान्धारः ॥

(४५) त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत ।
यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥ १ ॥

श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ।
तान्रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वह ॥ २ ॥

प्रियमेधवदत्रिवज्जातवेदो विरूपवत् ।
अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम् ॥ ३ ॥

महिकेरव ऊतये प्रियमेधा अहूषत ।
राजन्तमध्वराणामग्निं शुक्रेण शोचिषा ॥ ४ ॥

यावानः । अध्वरं ॥ १३ ॥ शृण्वन्तु । स्तोमं । मरुतः । सुऽदानवः । अग्निऽजिह्वाः । ऋतऽवृधः । पिबन्तु । सोमं । वरुणः । धृतऽव्रतः । अश्विऽभ्यां । उषसा । सऽजूः ॥ १४ ॥ ३० ॥

त्वं । अग्ने । वसून् । इह । रुद्रान् । आदित्यान् । उत । यज । सुऽअध्वरं । जनं । मनुऽजातं । घृतऽप्रुषं ॥ १ ॥ श्रुष्टीऽवानः । हि । दाशुषे । देवाः । अग्ने । विऽचेतसः । तान् । रोहितऽअश्व । गिर्वणः । त्रयःऽत्रिंशतं । आ । वह ॥ २ ॥ प्रियमेधऽवत् । अत्रिऽवत् । जातऽवेदः । विरूपऽवत् । अंगिरस्वत् । महिऽव्रत । प्रस्कण्वस्य । श्रुधि । हवं ॥ ३ ॥ महिऽकेरवः । ऊतये । प्रियऽमेधाः । अहूषत । राजन्तं । अध्वराणां । अग्निं । शुक्रेण । शोचिषा ॥ ४ ॥

घृताहवन सन्त्येमा उ षु श्रुधी गिरः ।
याभिः कण्वस्य सूनवो हवन्तेऽवसे त्वा ॥ ५ ॥ ३१ ॥

त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः ।
शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ॥ ६ ॥

नि त्वा होतारमृत्विजं दधिरे वसुवित्तमम् ।
श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु ॥ ७ ॥

आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः ।
बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे ॥ ८ ॥

प्रातर्याव्णः सहस्कृत सोमपेयाय सन्त्य ।
इहाद्य दैव्यं जनं बर्हिरा सादया वसो ॥ ९ ॥

अर्वाञ्चं दैव्यं जनमग्ने यक्ष्व सहूतिभिः ।
अयं सोमः सुदानवस्तं पात तिरोअह्न्यम् ॥ १० ॥ ३२ ॥

घृतऽआहवन । सन्त्य । इमाः । ऊं इति । सु । श्रुधि । गिरः । याभिः । कण्वस्य । सूनवः । हवन्ते । अवसे । त्वा ॥ ५ ॥ ३१ ॥ त्वां । चित्रश्रवःऽतम । हवन्ते । विक्षु । जन्तवः । शोचिःऽकेशं । पुरुऽप्रिय । अग्ने । हव्याय । वोळ्हवे ॥ ६ ॥ नि । त्वा । होतारं । ऋत्विजं । दधिरे । वसुवित्ऽतमं । श्रुत्ऽकर्णं । सप्रथःऽतमं । विप्राः । अग्ने । दिविष्टिषु ॥ ७ ॥ आ । त्वा । विप्राः । अचुच्यवुः । सुतऽसोमाः । अभि । प्रयः । बृहत् । भाः । बिभ्रतः । हविः । अग्ने । मर्ताय । दाशुषे ॥ ८ ॥ प्रातःऽयाव्नः । सहःऽकृत । सोमऽपेयाय । सन्त्य । इह । अद्य । दैव्यं । जनं । बर्हिः । आ । सादय । वसो इति ॥ ९ ॥ अर्वाञ्चं । दैव्यं । जनं । अग्ने । यक्ष्व । सहूतिऽभिः । अयं । सोमः । सुऽदानवः । तं । पात । तिरःऽअह्न्यं ॥ १० ॥ ३२ ॥

वृत्रका शरीर ऐसे जलप्रवाहों में डूब गया था जिन्हें कभी रुकावट और विश्रान्ति नहीं थी। उसके शरीर पर जलके प्रवाह आनन्दपूर्वक बहते थे और वह इन्द्र शत्रु बड़े अंधकार में जा पड़ा था, १० (३७)

अहि ने जिन जलों को प्रतिबन्ध में रखा था और इस कारण जो जल उस दुष्ट के दास हुए थे वे, पणि की प्रतिबन्ध में रखी हुई गौओं की तरह बन्दिवान हो गये थे। उदकों के निवासस्थान, जो पहले बन्द हो गये थे, इन्द्र ने वृत्र को मार कर, खोल दिये। ११

हे इन्द्र, आपही एक श्रेष्ठ देवता हैं। जिस समय आपके आयुध पर अहि ने प्रहार किया उस समय, अश्व के लिए तैयार किये हुए कवच की तरह आपने उसकी कुछ परवा नहीं की। आपने गौओं को प्राप्त कर लिया; हे शूर आपने सोमरस भी प्राप्त कर लिया और सप्त नदियों का प्रवाह जारी करने के लिए आपने उन्हें बन्धमुक्त किया। १२

विद्युत्प्रयोग अथवा गर्जना, इन दोनों में से एक का भी वृत्र के लिए कोई उपयोग नहीं हुआ। तथा उन्हों ने जो पर्जन्य वृष्टि की और जो वज्र चलाये उनका भी उसके लिए कोई उपयोग नहीं हुआ। जिस समय इन्द्र और अहि का युद्ध हुआ उस समय उन्हीं दान शूर इन्द्र ने चिरकालीक विजय सम्पादन किया। १३

हे इन्द्र, जब कि वृत्र को मारने के बाद आपके हृदय में भय ने प्रवेश किया तब ऐसा कौन आपको देख पड़ा, जो वृत्रवध का बदला आपसे ले सकता हो? क्योंकि जैसे कोई भयचकित श्येन पक्षी (फर फर) आकाश में उड़ जाता है उसी प्रकार आप (जल्दीसे) (निन्यानवे नदियां लांघते हुए पार निकल गये) १४

---

१ निण्यम् ॥
२ बिलम् ॥
३ सर्तवे ॥
४ मिहम् ॥
५ अतरः ॥

इन्द्र सम्पूर्ण चराचर सृष्टिके स्वामी हैं। जो प्राणी शृंगयुक्त हैं और जो निरुपद्रवी हैं उन दोनोंपर उनकी सत्ता है। उनके बाहु वज्रके समान हैं; सब मानवोंके राजा वही हैं। जिस प्रकार रथचक्रकी दौड़ पहियेके आरोंको घेर लेती है उसी प्रकार इन्द्रने यह सब वेष्टित कर लिया है। १५ (३८)

॥ दूसरा अध्याय समाप्त ॥

तिसरा अध्याय.

सूक्त ३३.

ऋषि—हिरण्यस्तूप आंगिरस। देवता—इन्द्र।

आइये, गोधनकी इच्छासे हम इन्द्रके पास चलें। वही हमारी बुद्धिमत्ताकी अत्यन्त वृद्धि करते हैं। वे अमर हैं। क्या वे वैभव और गोधन प्राप्त करनेका मुख्य साधन हमें बतला देंगे? १

---

१ वर्षणानाम ॥

२ गव्यन्तः ॥

जिस प्रकार श्येनपक्षी अपने मन के रहने की जगह की ओर उड़जाता है (उसी प्रकार, मार्गमें उत्तमोत्तम स्तोत्रोंसे इन्द्रकी वन्दना करते हुए, मैंने उसके पास गमन किया)। ये इन्द्र सम्पत्ति देनेवाले, शत्रुओंसे कभी हार न जानेवाले और भक्तोंद्वारा अर्चन करने योग्य हैं। २

अपनी सब सेना साथ में लेकर इन्होंने बाण के तरकश (पीठ पर) बांधे हैं। ये बहुत श्रेष्ठ हैं। जिसे उनकी इच्छा होती है उसे देने के लिए वे उसके पास गाड़ ले जाते हैं। हे अत्यन्त श्रेष्ठ इन्द्र, अनेक प्रकारकी उत्कृष्ट सम्पत्ति लेकर आइये और हमारे लिए कृपणता न धारण कीजिए। ३

हे इन्द्र, यद्यपि आप अपने अनुचरों सहित चले थे तथापि घन के समान अपने शस्त्रसे आप अकेले ही सम्पत्तिमान दस्युका वध कर डाला ! वे चारों ओर से आपके धनुष पर एकदम टूट पड़े तथापि उन्हीं सनकों का ही नाश हुआ। आपका यजन करना उन्हें कभी मालूम ही न था। ४

हे उग्र इन्द्र, आपकी स्थिरता बखानने योग्य है और आपके अश्व पीतावर्ण के हैं। जब आपने, अपनी आज्ञा न माननेवाले दुष्टों को अन्तरिक्ष, पृथिवी और स्वर्ग से निकाल दिया तब उन्होंने अपने मस्तक (लज्जासे) पीछे फेर लिये। वे स्वयं तो आपका यजन कभी करते न थे; किन्तु अन्य यजन करनेवाले लोगों से स्पर्धा अवश्य किया करते थे। ५ (१)

इन्द्र, जो सर्वतोपरि दोषरहित है, उनकी सेना से भी इन्होंने युद्ध मचाया ! नवग्वों ने खड़े होकर इन्द्रको उत्तेजना दी। सामर्थ्यवान पुरुषोंसे लड़नेमें निर्बल लोगों की जैसी दुर्गति होती है वैसी ही जब उनकी भी दशा हो गई तब उन्हें इन्द्र की शक्ति का पूरा परिचय मिला और वे (जो मार्ग उन्हें सूझ पड़े उन) मार्गों से भग गये। ६

---

१ धनदाम ॥
२ समर्यः ॥
३ विषुणक ॥
४ हरिवः ॥
५ अनवद्यस्य ॥

उनके हँसने या रोने की कुछ भी परवा न करते हुए, हे इन्द्र, आपने उनसे युद्ध किया और उन्हें रजोलोक के बाहर निकाल दिया। दस्यु जब उच्च द्युलोक में था तब आपने उसे दग्ध किया और जिसने, आपके लिए सोमरस तैयार करके (आपका स्तवन किया उसके स्तोत्रका आपने स्वीकार किया।) ७

सुवर्ण भूषणों से सज्जित होकर उन्होंने सम्पूर्ण पृथ्वी का परिवेष्टन किया। उन्होंने बहुतसा अपना पराक्रम प्रकट किया, तथापि वे इन्द्रका पराभव नहीं कर सके। उनके दूतों को इन्द्रने सूर्य के द्वारा हतवीर्य किया। ८

हे इन्द्र, जिस समय आपने, अपने सामर्थ्य से पृथ्वी और स्वर्ग पर, सब प्रकारसे, अपनी सत्ता प्रस्थापित की उस समय आपने अपना अपमान करनेवालों का अपने भक्तों के द्वारा पराभव करवाया और अपने तीव्र शस्त्रों से दस्यु को पराजित किया। ९

स्वर्ग और पृथ्वीका जिन्होंने अन्त लगाया वे भी अपने कपटजालों से धन दाता इन्द्रको नहीं घेर सके। सामर्थ्यवान इन्द्रने अपने वज्र को ही अपना सहायक माना और अपने तेज के योग से धेनुओं को अंधकार से निकाला। १० (२)

इन्द्रने जो मार्ग निकाल दिया उस मार्ग से जल के प्रवाह बहने लगे। परन्तु वृत्र ने, ऐसी महानदी में पैठकर, विशालरूप धारण किया, जिसमें नौका भी चल सकती है। फिर इन्द्रने वृत्र के वध में ही अपना पूरा ध्यान लगाया और उसे सदा के लिए पृथ्वी में मिला दिया। ११

---

१ अदहः ॥
२ स्वधाः ॥
३ महिना ॥
४ वृषभः ॥
५ धृनु ॥

इलीबिशा के दुर्गम दुर्ग आपने ढहा दिये और शृंगयुक्त शुष्ण का आपने विदारण किया। आपके साथ जिस शत्रु ने युद्ध किया उसी का आपने, अपने सम्पूर्ण सामर्थ्य और वेग का उपयोग करके, वज्र से वध किया। १२

उनका सहायक वज्र उनके शत्रुओंको ताक कर चला। अपने तीव्र शस्त्रों से उन्होंने शत्रुओं के नगर ढहा दिये। इन्द्रने अपने वज्रको वृत्रसे मिला दिया और उसका संहार करके अपने मन का हौसला पूरा किया। १३

(हे इन्द्र, जिस कुत्सपर आपका अत्यन्त प्रेम था उसकी आपने रक्षा की और वीर्यशाली दशद्यु जब युद्धमें भिड़ा था तब उसकी सहायता करने को आप दौड़े। घोड़ों की टापों से उड़ी हुई धूल आकाशतक पहुंची, सूर्य को भी ऐसी अस्पष्टता प्राप्त हुई कि जिससे लोग फिर उसकी सत्ता को स्वीकार कर सकें।) १४

तुग्रियों के समुदाय में आपने उसके शान्तस्वभाव वाले वृषभोंकी रक्षा की और जब कि भूमि—सम्पादन की ईर्ष्या से युद्ध हो रहा था तब, हे उदार इन्द्र, आपने उसकी धेनुओंको सम्हाला। यहां बहुत कालपर्यन्त जमकर जिन्हों ने शत्रुताका बर्ताव किया उन अपने रिपुओं को आपने अत्यन्त अमंगल वेदना सहन कराई। १५ (३)

---

१ एतन्युम ॥

२ शाशदानः ॥

३ वृषभम् ॥

४ ज्योक ॥

सूक्त ३४.

ऋषि—हिरण्यस्तूप आङ्गिरस : देवता अश्विन ॥

हे सर्वज्ञ अश्विनो, आज आप तीनोंबार हमारे ही हूजिये । आपकी गति¹ सर्वत्र है । आपकी दानशूरता भी चारों ओर प्रसिद्ध है । जिस प्रकार वस्त्र और जाड़े की रात का अत्यन्त निकट सम्बन्ध रहता है उसी प्रकार आप दोनों एक दूसरे से संलग्न हैं । मुझ भक्त के आप वश हूजिये । १

यह सब को विदित हो है कि आप के जिस रथ के द्वारा मधुररस प्राप्त होता है उसके तीन पहिये हैं और वह सोम के मार्ग में गमन करता है । उस रथ का तोल सम्हालने के लिए उस पर तीन स्तम्भ खड़े किये गये हैं । हे अश्विनो, आप तीन बार रात को और तीन ही बार दिन को परिभ्रमण करते हैं । २

एक ही दिन में तीन बार आप (भक्तों के) पातक नष्ट करते है । आज आप तीन बार हमारे यज्ञ पर माधुर्य की वर्षा कीजिए । हे अश्विनो, आप (प्रतिदिन) सुप्रभात और संध्या के समय, हम पर ऐसे कृपा प्रसाद की रेल-पेल करते रहिए कि जिससे हमें सामर्थ्य प्राप्त हो । ३

आप तीन बार अपने निवासस्थान की ओर जाइये: तीन बार आप अपने आज्ञापालक भक्तों की ओर गमन कीजिए । और ऐसा कीजिए कि, जिसमें जो पुरुष अत्यन्त रक्षा करने योग्य है, उन्हें मानो, तीन बार से, तीन ही प्रकार की कोई शिक्षा मिलती हो । हे अश्विनो, आप हमें तीन बार ऐसा वैभव अर्पण कीजिए कि जिससे हमारे मन को आनन्द हो । और हमारे पोषण का ऐसा उत्तम प्रबन्ध कीजिए कि सब लोग कहने लगें कि, " हमारा ऐसा अटल सौभाग्य है । " ४

१ विभुः ॥
२ पवयः ॥
३ अवद्यगोहना ॥
४ पृक्षः ॥

हे अश्विनो, तीन बार सम्पत्ति लेकर हमारे पास आइये: जब कि तीन बार देवों का यजन हो रहा हो तब आप हमारे सद्विचारों को तथा सौभाग्य और सत्कीर्ति को भी तीन बार बढ़ाइये। (आकाश की) दुहिता ने आप के त्रिचक्री रथ में स्वर्ग में आरोहण किया था। ५

हे अश्विनो, स्वर्ग, पृथ्वी और उदक, तीनों से प्राप्त की हुई, तीनों प्रकार की, औषधें तीन तीन बार हमें दीजिए। कल्याण कारी सम्पत्ति के आप अधिपति हैं, और हमें कल्याण की इच्छा है: अतएव अपने तीनों महातत्वों से हमारे पुत्र को निर्भय कीजिए और, साथ ही, उस पर अपनी कृपादृष्टि भी रखिये। ६ (४)

हे अश्विनो, प्रति दिन तीन बार आपका यजन करना ठीक है। तीनों महातत्व साथ लेकर, आपने पृथिवी के चारों ओर विश्रान्ति ली है। हे सत्यस्वरूप अश्विनो, आप अत्यन्त दूर प्रदेश से रथ पर बैठ कर आइये, और जिस प्रकार प्राणवायु शरीर में प्रवेश करता है उसी प्रकार आप अपने तीन निवासस्थानों को गमन कीजिए। ७

हे अश्विनो, सप्तजननी के समान शोभा देनेवाली (सप्त) नदियों के साथ आप यहां आइये। यहां तीन यज्ञपात्र तैयार हैं और तीन प्रकारका हव्य बना रक्खा है। पृथिवी के तीन प्रदेश हैं। आप स्वर्ग के ऊपर परिभ्रमण करके स्थिर अन्तरिक्ष की रात दिन रक्षा करते रहते हैं। ८

आपके त्रिकोणाकृति रथ के तीन चक्र कहां हैं ? जिस पर रथवान के बैठने की उत्तम जगह बनी हुई है उस तुम्हारे रथ के बन्धुरें कहां हैं ? हे सत्यस्वरूप अश्विनो, जिस पर आरूढ़ होकर आप यज्ञ में पधारते हैं उस शक्तिवान रासभ को आप कब जोतेंगे ? ९

१ त्रिवृत् ॥
२ शुभस्पती ॥
३ त्रिधातुः ॥
४ आहावा ॥
५ वंधुरः ॥ (पिंजरोंमें मिले हुए जो तीन खंड दण्ड लगे रहते हैं.)

हे सत्यस्वरूप अश्विनो, इधर आइये । यह हव्य आपको अर्पण किया जाता है । आपका मुख मधुपान करने के लिए तैयार ही रहता है; अतएव आप स्वमुख से मधुर सोमरस पान कीजिए । आपका अवर्णनीय और घृतसमृद्ध रथ सविता देव, उषा के भी पहले, हमारे यज्ञ में भेज देते हैं । १०

हे सत्यस्वरूप अश्विनो तेंतीस देवों को साथ लेकर इस मधुर पेय के लिए आइये । हमारी आयु की वृद्धि कीजिए, पातकों का क्षालन कीजिए, हमारे शत्रुओंका निरोध कीजिये और हमें सदा अपने समागमका लाभ दीजिए । ११

हे अश्विनो, अपने त्रिकोणाकृति रथके द्वारा, वीर्यवान सन्ततिसे युक्त, सम्पत्ति हमारे पास ले आइये । आप हमारी प्रार्थना सुननेके लिए तैयार ही हैं; अतएव अपनी रक्षाके लिए हम आपको बार बार पुकारते हैं । जब पराक्रम के योग से सम्पत्ति प्राप्त होनेका सम्भव हो तब आप ऐसा कीजिए कि जिससे हमारे वैभवमें वृद्धि हो । १२ (५)

सूक्त ३५.

ऋषि-हिरण्यस्तूप आंगिरस । देवता-अग्नि मित्र वरुण, रात्रि, सविता । २-११ सविता ॥

यत्कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥६॥
युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा ।
नम्या यदिन्द्र सख्या परावति निबर्हयो नमुचिं नाम मायिनम् ॥७॥
त्वं करञ्जमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्तनी ।
त्वं शता वङ्गृदस्याभिनत्पुरोऽनानुदः परिषूता ऋजिश्वना ॥८॥

एभिः । द्युऽभिः । सुऽमनाः । एभिः । इंदुऽभिः । निःऽरुंधानः । अमतिं । गोभिः । अश्विना । इंद्रेण । दस्युं । दरयंत इंदुऽभिः । युतऽद्वेषसः । सं । इषा । रभेमहि । ॥ ४ ॥ सं । इंद्र । राया । सं । इषा । रभेमहि । सं । वाजेभिः । पुरुऽचंद्रैः । अभिद्युऽभिः । सं । देव्या । प्रऽमत्या । वीरऽशुष्मया । गोऽअग्रया । अश्वऽवत्या । रभेमहि ॥ ५ ॥ १५ ॥ ते । त्वा । मदाः । अमदन् । तानि । वृष्ण्या । ते । सोमासः । वृत्रऽहत्येषु । सत्ऽपते । यत् । कारवे । दश । वृत्राणि । अप्रति । बर्हिष्मते । नि । सहस्राणि । बर्हयः ॥ ६ ॥ युधा । युधं । उप । घ । इत् । एषि । धृष्णुऽया । पुरा । पुरं । सं । इदं । हंसि । ओजसा । नम्या । यत् । इंद्र । सख्या । पराऽवति निऽबर्हयः । नमुचिं । नाम । मायिनं ॥ ७ ॥ त्वं । करंजं । उत । पर्णयं । वधीः । तेजिष्ठया । अतिथिऽग्वस्य । वर्तनी । त्वं । शता । वंगृदस्य । अभिनत् । पुरः । अनानुऽदः । परिऽसूताः । ऋजिश्वना ॥ ८ ॥ त्वं । एतान् ।

त्वमेताञ्जनराज्ञो द्विर्दशाबन्धुना सुश्रवसोपजग्मुषः ।
षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक् ॥ ९ ॥
त्वमाविथ सुश्रवसं तवोतिभिस्तव त्रामभिरिन्द्र तूर्वयाणम् ।
त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरन्धनायः ॥ १० ॥
य उदृचीन्द्र देवगोपाः सखायस्ते शिवतमा असाम ।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥११॥१६॥

॥ ५४ ॥ १-११ सव्य आङ्गिरस ऋषिः ॥ इन्द्रो देवता ॥ छन्द- जगती, त्रिष्टुप्

(५४) मा नो अस्मिन्मघवन्पृत्स्वंहसि नहि ते अन्तः शवसः परीणशे ।
अक्रन्दयो नद्यो रोरुवद्वना कथा न क्षोणीर्भियसा समारत ॥१॥
अर्चा शक्राय शाकिने शचीवते शृण्वन्तमिन्द्रं महयन्नभि ष्टुहि ।
यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृञ्जते ॥ २ ॥

जनऽराज्ञः । द्विः । दश । अबंधुना । सुऽश्रवसा । उपऽजग्मुषः । षष्टिं । सहस्रा । नवतिं । नव । श्रुतः । नि । चक्रेण । रथ्या । दुःऽपदा । अवृणक् ॥ ९ ॥ त्वं । आविथ । सुऽश्रवसं । तव । ऊतिऽभिः । तव । त्रामऽभिः । इंद्र । तूर्वयाणं । त्वं । अस्मै । कुत्सं । अतिथिऽग्वं । आयुं । महे । राज्ञे । यूने । अरंधनायः । ॥ १० ॥ ये । उत्ऽऋचि । इंद्र । देवऽगोपाः । सखायः । ते । शिवऽतमाः । असाम त्वां । स्तोषाम । त्वया । सुवीराः । द्राघीयः । आयुः । प्रऽतरं । दधानाः । ॥ ११ ॥ १६ ॥

मा । नः । अस्मिन् । मघऽवन् । पृत्ऽसु । अंहसि । नहि ते । अंतः । शवसः । परिऽनशे । अक्रंदयः । नद्यः । रोरुवत् वना । कथा । न । क्षोणीः । भियसा । सं । आरत ॥ १ ॥ अर्च । शक्राय । शाकिने । शचीऽवते । शृण्वंतं । इंद्रं । महयन् । अभि । स्तुहि । यः । धृष्णुना । शवसा । रोदसी इति । उभेइति । वृषा । वृषऽत्वा । वृषभः । निऽऋंजते ॥ २ ॥

अर्चा दिवे बृहते शूष्यं वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः।
बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः ॥३॥
त्वं दिवो बृहतः सानु कोपयोऽव त्मना धृषता शंबरं भिनत्।
यन्मायिनो व्रन्दिनो मन्दिना धृषच्छितां गभस्तिमशनिं पृतन्यसि ॥४॥
नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद्व्रन्दिनो रोरुवद्वना।
प्राचीनेन मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परि ॥५॥ १७ ॥
त्वमाविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतक्रतो।
त्वं रथमेतशं कृत्व्ये धने त्वं पुरो नवतिं दंभयो नव ॥ ६ ॥
स घा राजा सत्पतिः शूशुवज्जनो रातहव्यः प्रति यः शासमिन्वति।
उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः ॥७॥

अर्च । दिवे । बृहते । शूष्यं । वचः । स्वऽक्षत्रं । यस्य । धृषतः । धृषत् । मनः । बृहत्ऽश्रवाः । असुरः । बर्हणा । कृतः । पुरः । हरिऽभ्यां । वृषभः । रथः । हि । सः ॥ ३ ॥ त्वं । दिवः । बृहतः । सानु । कोपयः । अव । त्मना । धृषता । शंबरं । भिनत् । यत् । मायिनः । व्रंदिनः । मंदिना । धृषत् । शितां । गभस्तिं । अशनिं । पृतन्यसि ॥ ४ ॥ नि । यत् । वृणक्षि । श्वसनस्य । मूर्धनि । शुष्णस्य । चित् । व्रंदिनः । रोरुवत् । वना । प्राचीनेन । मनसा । बर्हणाऽवता । यत् । अद्य । चित् । कृणवः । कः । त्वा । परि ॥ ५ ॥ १७ ॥ त्वं । आविथ । नर्यं । तुर्वशं । यदुं । त्वं । तुर्वीतिं । वय्यं । शतक्रतो इति शतऽक्रतो । त्वं । रथं । एतशं । कृत्व्ये । धने । त्वं । पुरः । नवतिं । दंभयः । नव ॥ ६ ॥ सः । घ । राजा । सत्ऽपतिः । शूशुवत् । जनः । रातऽहव्यः । प्रति । यः । शासं । इन्वति । उक्था । वा । यः । अभिऽगृणाति । राधसा । दानुः । अस्मै । उपरा । पिन्वते । दिवः ॥ ७ ॥ असमं । क्षत्रं । असमा ।

असमं क्षत्रमसमा मनीषा प्रसोमपा अपसा सन्तु नेमे ।
ये त इन्द्र ददुषो वर्धयन्ति महि क्षत्रं स्थविरं वृष्ण्यं च ॥ ८ ॥
तुभ्येदेते बहुला अद्रिदुग्धाश्चमूषदश्चमसा इन्द्रपानाः ।
व्यश्नुहि तर्पया काममेषामथा मनो वसुदेयाय कृष्व ॥ ९ ॥
अपामतिष्ठद्धरुणह्वरं तमोऽन्तर्वृत्रस्य जठरेषु पर्वतः ।
अभीमिन्द्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते ॥१०॥
स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषाळिन्द्र तव्यम् ।
रक्षा च नो मघोनः पाहि सूरीन्राये च नः स्वपत्या इषे धाः ॥११॥१८॥

॥ ५५ ॥ १–८ सव्य आङ्गिरस ऋषिः ॥ इन्द्रो देवता ॥ छन्दः–जगती

(५५) दिवश्चिदस्य वरिमा वि पप्रथ इन्द्रं न मह्ना पृथिवी चन प्रति ।
भीमस्तुविष्माञ्चर्षणिभ्य आतपः शिशीते वज्रं तेजसे न वंसगः ॥१॥

मनीषा । प्र । सोमऽपाः । अपसा । संतु । नेमे । ये । ते । इंद्र । ददुषः । वर्धयंति । महि । क्षत्रं । स्थविरं । वृष्ण्यं । च ॥ ८ ॥ तुभ्यं । इत् । एते । बहुलाः । अद्रिऽदुग्धाः । चमूऽसदः । चमसाः । इंद्रऽपानाः । वि । अश्नुहि । तर्पय । कामं । एषां । अथ । मनः । वसुऽदेयाय । कृष्व ॥ ९ ॥ अपां । अतिष्ठत् । धरुणऽह्वरं । तमः । अंतः । वृत्रस्य । जठरेषु । पर्वतः । अभि । ईं । इंद्रः । नद्यः । वव्रिणा । हिताः । विश्वाः । अनुऽस्थाः । प्रवणेषु । जिघ्नते ॥ १० ॥ सः । शेऽवृधं । अधि । धाः । द्युम्नं । अस्मे इति । महि । क्षत्रं । जनाषाट् । इंद्र । तव्यं । रक्ष । च । नः । मघोनः । पाहि । सूरीन् । राये । च । नः । सुऽअपत्ये । इषे । धाः ॥११॥१८॥

दिवः । चित् । अस्य । वरिमा । वि । पप्रथे । इंद्रं । न । मह्ना । पृथिवी । चन । प्रति । भीमः । तुविष्मान् । चर्षणिऽभ्यः । आऽतपः । शिशीते । वज्रं । तेजसे । न । वंसगः ॥ १ ॥

सो अर्णवो न नद्यः समुद्रियः प्रति गृभ्णाति विश्रिता वरीमभिः।
इन्द्रः सोमस्य पीतये वृषायते सनात्स युध्म ओजसा पनस्यते ॥२॥
त्वं तमिन्द्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि।
प्र वीर्येण देवताति चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः ॥ ३ ॥
स इद्वने नमस्युभिर्वचस्यते चारु जनेषु प्रब्रुवाण इन्द्रियम्।
वृषा छन्दुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति ॥ ४ ॥
स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः।
अधा चन श्रद्दधति त्विषीमत इन्द्राय वज्रं निघनिघ्नते वधम्॥५॥१९॥
स हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधान ओजसा विनाशयन्।
ज्योतींषि कृण्वन्नवृकाणि यज्यवेऽव सुक्रतुः सर्तवा अपः सृजत् ॥ ६ ॥

सः। अर्णवः। न। नद्यः। समुद्रियः। प्रति। गृभ्णाति। विऽश्रिताः। वरीमऽभिः। इंद्रः। सोमस्य। पीतये। वृषऽयते। सनात्। सः। युध्मः। ओजसा। पनस्यते ॥ २ ॥ त्वं। तं। इंद्र। पर्वतं। न। भोजसे। महः। नृम्णस्य। धर्मणां। इरज्यसि। प्र। वीर्येण। देवता। अति। चेकिते। विश्वस्मै। उग्रः। कर्मणे। पुरःऽहितः ॥३॥ सः। इत्। वने। नमस्युऽभिः। वचस्यते। चारु। जनेषु। प्रऽब्रुवाणः। इंद्रियं। वृषा। छंदुः। भवति। हर्यतः। वृषा। क्षेमेण। धेनां। मघऽवा। यत्। इन्वति ॥ ४ ॥ सः। इत्। महानि। संऽइथानि। मज्मना। कृणोति। युध्मः। ओजसा। जनेभ्यः। अध। चन। श्रत्। दधति। त्विषिऽमते। इंद्राय। वज्रं। निऽघनिघ्नते ॥ ५ ॥ १९ ॥ सः। हि। श्रवस्युः। सदनानि। कृत्रिमा। क्ष्मया। वृधानः। ओजसा। विऽनाशयन्। ज्योतींषि। कृण्वन्। अवृकाणि। यज्यवे। अव। सुऽक्रतुः। सर्तवै। अपः। सृजत्। ॥ ६ ॥

दानाय मनः सोमपावन्नस्तु तेऽर्वाञ्चा हरी वन्दनश्रुदा कृधि ।
यमिष्ठासः सारथयो य इन्द्र ते न त्वा केता आ दभ्नुवन्ति भूर्णयः ॥७॥
अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे ।
आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः ॥८॥ ॥२०॥

॥ ५६ ॥ १-६ सव्य आङ्गिरस ऋषिः ॥ इन्द्रो देवता ॥ जगती—छन्दः ॥

॥ ५६ ॥ एष प्र पूर्वीरव तस्य चम्रिषोऽत्यो न योषामुदयंस्त भुर्वणिः ।
दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोगमृभ्वसम् ॥ १ ॥
तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः ।
पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा ॥ २ ॥
स तुर्वणिर्महाँ अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः ।
येन शुष्णं मायिनमायसो मदे दुध्र आभूषु रामयन्नि दामनि ॥ ३ ॥
देवी यदि तविषी त्वावृधोतय इन्द्रं सिषक्त्युषसं न सूर्यः ।
यो धृष्णुना शवसा बाधते तम इयर्ति रेणुं बृहदर्हरिष्वणिः ॥ ४ ॥

दानाय । मनः । सोमऽपावन् । अस्तु । ते । अर्वाञ्चा । हरी इति । वन्दनऽश्रुत् । आ । कृधि । यमिष्ठासः । सारथयः । ये । इन्द्र । ते । न । त्वा । केताः । आ । दभ्नुवन्ति । भूर्णयः ॥ ७ ॥ अप्रऽक्षितम् । वसु । बिभर्षि । हस्तयोः । अषाळ्हम् । सहः । तन्वि । श्रुतः । दधे । आऽवृतासः । अवतासः । न । कर्तृऽभिः । तनूषु । ते । क्रतवः । इन्द्र । भूरयः ॥ ८ ॥ २० ॥

एषः । प्र । पूर्वीः । अव । तस्य । चम्रिषः । अत्यः । न । योषाम् । उत् । अयंस्त । भुर्वणिः । दक्षम् । महे । पाययते । हिरण्ययम् । रथम् । आऽवृत्य । हरिऽयोगम् । ऋभ्वसम् ॥ १ ॥ तम् । गूर्तयः । नेमन्ऽइषः । परीणसः । समुद्रम् । न । सम्ऽचरणे । सनिष्यवः । पतिम् । दक्षस्य । विदथस्य । नु । सहः । गिरिम् । न । वेनाः । अधि । रोह । तेजसा ॥ २ ॥ सः । तुर्वणिः । महान् । अरेणु । पौंस्ये । गिरेः । भृष्टिः । न । भ्राजते । तुजा । शवः । येन । शुष्णम् । मायिनम् । आयसः । मदे । दुध्रः । आभूषु । रमयत् । नि । दामनि ॥ ३ ॥ देवी । यदि । तविषी । त्वाऽवृधा । ऊतये । इन्द्रम् । सिसक्ति । उषसम् । न । सूर्यः । यः । धृष्णुना । शवसा । बाधते । तमः । इयर्ति । रेणुम् । बृहत् । अर्हरिऽस्वनिः ॥ ४ ॥

वि यत्तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा ।
स्वर्मीळ्हे यन्मद इन्द्र हर्ष्याहन्वृत्रं निरपामौब्जो अर्णवम् ॥ ५ ॥
त्वं दिवो धरुणं धिष ओजसा पृथिव्या इन्द्र सदनेषु माहिनः ।
त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्याऽरुजः ॥६॥२१॥

॥ ५७ ॥ १-६ सव्य आङ्गिरस ऋषिः ॥ इन्द्रो देवता ॥ जगती छन्दः ॥

॥ ५७ ॥ प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे ।
अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम् ॥ १ ॥
अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः ।
यत्पर्वते न समशीत हर्यत इन्द्रस्य वज्रः श्नथिता हिरण्ययः ॥ २ ॥
अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे ।
यस्य धाम श्रवसे नामेन्द्रियं ज्योतिरकारि हरितो नायसे ॥ ३ ॥
इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
नहि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति नो हर्य तद्वचः ॥ ४ ॥

वि । यत् । तिरः । धरुणं । अच्युतं । रजः । अतिस्थिपः । दिवः । आताँसु । बर्हणा । स्वःऽमीळ्हे । यत् । मदे । इंद्र । हर्ष्या । अहन् । वृत्रं । निः । अपां । औब्जः । अर्णवं । ॥ ५ ॥ त्वं । दिवः । धरुणं । धिषे । ओजसा । पृथिव्याः । इंद्र । सदनेषु । माहिनः । त्वं । सुतस्य । मदे । अरिणाः । अपः । वि । वृत्रस्य । समया । पाष्या । अरुजः ॥ ६ ॥ २१ ॥ प्र । मंहिष्ठाय । बृहते । बृहत्ऽरये । सत्यऽशुष्माय । तवसे । मतिं । भरे । अपांऽइव । प्रवणे । यस्य । दुःऽधरं । राधः । विश्वऽआयु । शवसे । अपऽवृतं ॥१॥ अध । ते । विश्वं । अनु । ह । असत् । इष्टये । आपः । निम्नाऽइव । सवना । हविष्मतः । यत् । पर्वते । न । संऽअशीत । हर्यतः । इंद्रस्य । वज्रः । श्नथिता । हिरण्ययः ॥२॥ अस्मै । भीमाय । नमसा । सं । अध्वरे । उषः । न । शुभ्रे । आ । भर । पनीयसे । यस्य । धाम । श्रवसे । नाम । इंद्रियं । ज्योतिः । आकारि । हरितः । न । अयसे ॥ ३ ॥ इमे । ते । इंद्र । ते । वयं । पुरुऽस्तुत । ये । त्वा । आऽरभ्य । चरामसि । प्रभुवसो । इति । प्रभुऽवसो । नहि । त्वत् । अन्यः । गिर्वणः । गिरः । सघत् । क्षोणीःऽइव । प्रति । नः । हर्य । तत् । वचः ॥ ४ ॥ भूरि । ते । इंद्र । वीर्यं । तव । स्मसि ।

भूरि त इन्द्र वीर्यं तव स्मस्यस्य स्तोतुर्मघवन्काममा पृण ।
अनु ते द्यौर्बृहती वीर्यं मम इयं च ते पृथिवी नेम ओजसे ॥ ५ ॥
त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन्पर्वशश्चकर्तिथ ।
अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥६॥२२॥

॥ एकादशोऽनुवाकः ॥

॥ ५८ ॥ १-९ नोधा गौतम ऋषिः ॥ अग्निर्देवता ॥ छन्दः जगती ॥

(५८) नू चित्सहोजा अमृतो नि तुन्दते होता यद्दूतो अभवद्विवस्वतः ।
वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति॥१॥
आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति ।
अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचिक्रदत् ॥ २ ॥
क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळमर्त्यः ।
रथो न विक्ष्वृञ्जसान आयुषु व्यानुषग्वार्या देव ऋण्वति ॥ ३ ॥
वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः ।
तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर ॥ ४ ॥

अस्य । स्तोतुः । मघऽवन् । कामं । आ । पृण । अनु । ते । द्यौः । बृहती । वीर्यं । मम । इयं । च । ते । पृथिवी । नेमे । ओजसे ॥ ५ ॥ त्वं । तं । इन्द्र । पर्वतं । महां । उरुं । वज्रेण । वज्रिन् । पर्वऽशः । चकर्तिथ । अव । असृजः । निऽवृताः । सर्तवै । अपः । सत्रा । विश्वं । दधिषे । केवलं । सहः ॥६॥ २२ ॥

नु । चित् । सहःऽजाः । अमृतः । नि । तुंदते । होता । यत् । दूतः । अभवत् । विवस्वतः । वि । साधिष्ठेभिः । पथिऽभिः । रजः । ममे । आ । देवऽताता । हविषा । विवासति ॥ १ ॥ आ । स्वं । अद्म । युवमानः । अजरः । तृषु । अविष्यन् । अतसेषु । तिष्ठति । अत्यः । न । पृष्ठं । प्रुषितस्य । रोचते । दिवः । न । सानु । स्तनयन् । अचिक्रदत् ॥२॥ क्राणाः । रुद्रेभिः । वसुऽभिः । पुरःऽहितः । होता । निऽसत्तः । रयिषाट् । अमर्त्यः । रथः । न । विक्षु । ऋंजसानः । आयुषु । वि । आनुषक् । वार्या । देवः । ऋण्वति । ३ ॥ वि । वातऽजूतः । अतसेषु । तिष्ठते । वृथा । जुहूभिः । सृण्या । तुविऽस्वनिः । तृषु । यत् । अग्ने । वनिनः । वृषऽयसे । कृष्णं । ते । एम । रुशत्ऽऊर्मे । अजर ॥ ४ ॥

तपुर्जम्भो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः ।
अभिव्रजन्नक्षितं पाजसा रजः स्थातुश्चरथं भयते पतत्रिणः ॥ ५ ॥ २३ ॥
दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः ।
होतारमग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्याय जन्मने ॥ ६ ॥
होतारं सप्त जुह्वो यजिष्ठं यं वाघतो वृणते अध्वरेषु ।
अग्निं विश्वेषामरतिं वसूनां सपर्यामि प्रयसा यामि रत्नम् ॥ ७ ॥
अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ ।
अग्ने गृणन्तमंहस उरुष्योर्जो नपात्पूर्भिरायसीभिः ॥ ८ ॥
भवा वरूथं गृणते विभावो भवा मघवन्मघवद्भ्यः शर्म ।
उरुष्याग्ने अंहसो गृणन्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ९ ॥ २४ ॥

॥ ५९ ॥ १-७ नोधा गौतम ऋषिः ॥ अग्निर्वैश्वानरो देवता ॥ त्रिष्टुप् छन्दः ॥

(५९) वया इदग्ने अग्नयस्ते अन्ये त्वे विश्वे अमृता मादयन्ते ।
वैश्वानर नाभिरसि क्षितीनां स्थूणेव जनाँ उपमिद्ययन्थ ॥ १ ॥

तपुःऽजंभः । वने । आ । वातऽचोदितः । यूथे । न । सह्वान् । अव । वाति । वंसगः । अभिऽव्रजन् । अक्षितं । पाजसा । रजः । स्थातुः । चरथं । भयते । पतत्रिणः । ॥ ५ ॥ २३ ॥ दधुः । त्वा । भृगवः । मानुषेषु । आ । रयिं । न । चारुं । सुऽहवं । जनेभ्यः । होतारं । अग्ने । अतिथिं । वरेण्यं । मित्रं । न । शेवं । दिव्याय । जन्मने ॥ ६ ॥ होतारं । सप्त । जुह्वः । यजिष्ठं । यं । वाघतः । वृणते । अध्वरेषु । अग्निं । विश्वेषां । अरतिं । वसूनां । सपर्यामि । प्रयसा । यामि । रत्नं ॥ ७ ॥ अच्छिद्रा । सूनोइति । सहसः । नः । अद्य । स्तोतृऽभ्यः । मित्रऽमहः । शर्म । यच्छ । अग्ने । गृणंतं । अंहसः । उरुष्य । ऊर्जः । नपात् । पूःऽभिः । आयसीभिः ॥ ८ ॥ भव । वरूथं । गृणते । विभाऽवः । भव । मघऽवन् । मघवत्ऽभ्यः । शर्म । उरुष्य । अग्ने । अंहसः । गृणंतं । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ ९ ॥ २४ ॥

वयाः । इत् । अग्ने । अग्नयः । ते । अन्ये । त्वेइति । विश्वे । अमृताः । मादयंते । वैश्वानर । नाभिः । असि । क्षितीनां । स्थूणाऽइव । जनान् । उपऽमित् । ययंथ । ॥ १ ॥ मूर्धा । दिवः । नाभिः । अग्निः । पृथिव्याः । अथ । अभवत् । अरतिः ।

मूर्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः ।
तं त्वा देवासोऽजनयन्त देवं वैश्वानर ज्योतिरिदार्याय ॥ २ ॥
आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्ना वसूनि ।
या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा ॥ ३ ॥
बृहती इव सूनवे रोदसी गिरो होता मनुष्यो॒ न दक्षः ।
स्वर्वते सत्यशुष्माय पूर्वीर्वैश्वानराय नृतमाय यह्वीः ॥ ४ ॥
दिवश्चित्ते बृहतो जातवेदो वैश्वानर प्र रिरिचे महित्वम् ।
राजा कृष्टीनामसि मानुषीणां युधा देवेभ्यो वरिवश्चकर्थ ॥ ५ ॥
प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते ।
वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शम्बरं भेत् ॥ ६ ॥
वैश्वानरो महिम्ना विश्वकृष्टिर्भरद्वाजेषु यजतो विभावा ।
शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान् ॥ ७ ॥ २५ ॥

॥ ६० ॥ १-५ नोधा गौतम-ऋषिः ॥ अग्निर्देवता ॥ त्रिष्टुप्-छन्दः ॥

(६०) वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थम् ।
द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा ॥ १ ॥

रोदस्योः । तं । त्वा । देवासः । अजनयंत । देवं । वैश्वानर । ज्योतिः । इत् । आर्याय ॥ २ ॥ आ । सूर्ये । न । रश्मयः । ध्रुवासः । वैश्वानरे । दधिरे । अग्ना । वसूनि । या । पर्वतेषु । ओषधीषु । अप्ऽसु । या । मानुषेषु । असि । तस्य । राजा ॥ ३ ॥ बृहती । इवेति । बृहतीऽइव । सूनवे । रोदसी इति । गिरः । होता । मनुष्यः । न । दक्षः । स्वःऽवते । सत्यऽशुष्माय । पूर्वीः । वैश्वानराय । नृऽतमाय । यह्वीः ॥ ४ ॥ दिवः । चित् । ते । बृहतः । जातऽवेदः । वैश्वानर । प्र । रिरिचे । महिऽत्वं । राजा । कृष्टीनां । असि । मानुषीणां । युधा । देवेभ्यः । वरिवः । चकर्थ ॥ ५ ॥ प्र । नु । महिऽत्वं । वृषभस्य । वोचं । यं । पूरवः । वृत्रऽहनं । सचंते । वैश्वानरः । दस्युं । अग्निः । जघन्वान् । अधूनोत् । काष्ठाः । अव । शंबरं । भेत् ॥ ६ ॥ वैश्वानरः । महिम्ना । विश्वऽकृष्टिः । भरत्ऽवाजेषु । यजतः । विभाऽवा । शातऽवनेये । शतिनीभिः । अग्निः । पुरुऽनीथे । जरते । सूनृताऽवान् ॥ ७ ॥ २५ ॥

वह्निं । यशसं । विदथस्य । केतुं । सुप्रऽअव्यं । दूतं । सद्यःऽअर्थं । द्विऽजन्मानं । रयिंऽइव । प्रऽशस्तं । रातिं । भरत् । भृगवे । मातरिश्वा ॥ १ ॥

अस्य शासुरुभयासः सचन्ते हविष्मन्त उशिजो ये च मर्ताः ।
दिवश्चित्पूर्वो न्यसादि होतापृच्छ्यो विश्पतिर्विक्षु वेधाः ॥ २ ॥
तं नव्यसी हृद आ जायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः ।
यमृत्विजो वृजने मानुषासः प्रयस्वन्त आयवो जीजनन्त ॥ ३ ॥
उशिक्पावको वसुर्मानुषेषु वरेण्यो होताधायि विक्षु ।
दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणाम् ॥ ४ ॥
तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमासः ।
आशुं न वाजम्भरं मर्जयन्तः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ५ ॥ २६ ॥

॥ ६१ ॥ १-१६ नोधा गौतम ऋषिः ॥ इन्द्रो देवता ॥ त्रिष्टुप् छन्दः ॥

(६१) अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय ।
ऋचीषमायाध्रिगव ओहमिन्द्राय ब्रह्माणि राततमा ॥ १ ॥
अस्मा इदु प्रय इव प्र यंसि भराम्याङ्गूषं बाधे सुवृक्ति ।
इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त ॥ २ ॥

अस्य । शासुः । उभयासः । सचन्ते । हविष्मन्तः । उशिजः । ये । च । मर्ताः । दिवः । चित् । पूर्वः । नि । असादि । होता । आऽपृच्छ्यः । विश्पतिः । विक्षु । वेधाः ॥ २ ॥ तं । नव्यसी । हृदः । आ । जायमानं । अस्मत् । सुऽकीर्तिः । मधुऽजिह्वं । अश्याः । यं । ऋत्विजः । वृजने । मानुषासः । प्रयस्वन्तः । आयवः । जीजनन्त ॥ ३ ॥ उशिक् । पावकः । वसुः मानुषेषु । वरेण्यः । होता । अधायि । विक्षु । दमूनाः । गृहऽपतिः । दमे । आ । अग्निः । भुवत् । रयिऽपतिः । रयीणां ॥ ४ ॥ तं । त्वा । वयं । पतिं । अग्ने । रयीणां । प्र । शंसामः । मतिऽभिः । गोतमासः । आशुम् । न । वाजम्ऽभरम् । मर्जयन्तः । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ ५ ॥ २६ ॥

अस्मै । इत् । ऊं इति । प्र । तवसे । तुराय । प्रयः । न । हर्मि । स्तोमम् । माहिनाय । ऋचीषमाय अध्रिऽगवे । ओहम् । इन्द्राय । ब्रह्माणि । राततमा ॥ १ ॥ अस्मै । इत । ऊं इति । प्रयः ऽइव । प्र । यंसि । भरामि । आङ्गूषम् । बाधे । सुऽवृक्ति । इन्द्राय । हृदा । मनसा । मनीषा । प्रत्नाय । पत्ये । धियः । मर्जयन्त ॥ २ ॥ अस्मै । इत् । ऊं इति । त्यम् । उपऽमम् । स्वःऽसाम् । भरामि । आङ्गूषम् । आस्येन । मंहिष्ठम् । अच्छोक्तिऽभिः । मतीनाम् । सुवृक्तिऽभिः । सूरिम् ।

अस्मा इदु त्यमुपमं स्वर्षां भराम्याङ्गूषमास्येन ।
मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ॥ ३ ॥
अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय ।
गिरश्च गिर्वाहसे सुवृक्तीन्द्राय विश्वमिन्वं मेधिराय ॥ ४ ॥
अस्मा इदु सप्तिमिव श्रवस्येन्द्रायार्कं जुह्वा३ समञ्जे ।
वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम् ॥ ५ ॥ २७ ॥
अस्मा इदु त्वष्टा तक्षद्वज्रं स्वपस्तमं स्वर्यं१ रणाय ।
वृत्रस्य चिद्विदद्येन मर्म तुजन्नीशानस्तुजता कियेधाः ॥ ६ ॥
अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना ।
मुषायद्विष्णुः पचतं सहीयान्विध्यद्वराहं तिरो अद्रिमस्ता ॥ ७ ॥
अस्मा इदु ग्नाश्चिद्देवपत्नीरिन्द्रायार्कमहिहत्य ऊवुः ।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि ष्टः ॥ ८ ॥
अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात् ।
स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥ ९ ॥

वावृधध्यै ॥ ३ ॥ अस्मै । इत् । ऊम । इति स्तोमम । सम । हिनोमि । रथम । न । तष्टाऽइव । तत्ऽसिनाय । गिरः । च । गिरः । च । गिर्वाहसे । सुऽवृक्ति । इन्द्राय । विश्वमऽइन्वम । मेधिराय ॥ ४ ॥ अस्मै । इत । ऊं । इति । सप्तिमऽइव । श्रवस्या । इन्द्राय । अर्कम । जुह्वा । सम । अञ्जे । वीरम् । दानऽओकसम् । वन्दध्यै । पुराम । गूर्तऽश्रवसम् । दर्माणम् ॥ ५ ॥ २७ ॥ अस्मै । इत । ऊम् इति । त्वष्टा । तक्षत । वज्रम् । स्वपःऽतमम । स्वर्यम । रणाय । वृत्रस्य चित । विदत । येन । मर्म । तुजन । ईशानः । तुजता । कियेधाः ॥ ६ ॥ अस्य । इत । ऊम । इति । मातुः । सवनेषु । सद्यः । महः । पितुम् । पपिऽवान् । चारु । अन्ना । मुषायत् । विष्णुः । पचतम । सहीयान । विध्यत् । वराहम् । तिरः । अद्रिम । अस्ता ॥ ७ ॥ अस्मै । इत । ऊम इति । ग्नाः । चित् । देवऽपत्नीः । इन्द्राय । अर्कम । अहिऽहत्ये । ऊवुरित्यूवुः । परि । द्यावापृथिवी । इति । जभ्रे । उर्वी इति । न । अस्य । ते इति । महिमानम् । परि । स्तइतिस्तः ॥ ८ ॥ अस्य इत । एव । प्र । रिरिचे । महिऽत्वम् । दिवः । पृथिव्याः । परि । अन्तरिक्षात । स्वऽराट् । इन्द्रः । दमे । आ । विश्वऽगूर्तः । सुऽअरिः अमत्रः । ववक्षे । रणाय ॥ ९ ॥

अस्येदेव शवसा शुषन्तं वि वृश्चद्वज्रेण वृत्रमिन्द्रः ।
गा न व्राणा अवनीरमुञ्चदभि श्रवो दावने सचेताः ॥ १० ॥ २८ ॥
अस्येदु त्वेषसा रन्त सिन्धवः परि यद्वज्रेण सीमयच्छत् ।
ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः ॥ ११ ॥
अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः ।
गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥ १२ ॥
अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः ।
युधे यदिष्णान आयुधान्यृघायमाणो निरिणाति शत्रून् ॥ १३ ॥
अस्येदु भिया गिरयश्च दृळ्हा द्यावा च भूमा जनुषस्तुजेते ।
उपो वेनस्य जोगुवान ओणिं सद्यो भुवद्वीर्याय नोधाः ॥ १४ ॥
अस्मा इदु त्यदनु दाय्येषामेको यद्वव्ने भूरेरीशानः ।
प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः ॥ १५ ॥
एवा ते हारियोजना सुवृक्तीन्द्र ब्रह्माणि गोतमासो अक्रन् ।
ऐषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १६ ॥ २९ ॥

अस्य । इत् । एव । शवसा । शुषन्तम् । वि । वृश्चत् । वज्रेण । वृत्रम् । इन्द्रः । गाः । न । व्राणाः । अवनीः । अमुञ्चत् । अभि । श्रवः । दावने । सऽचेताः ॥ १० ॥ २८ ॥ अस्य । इत् । ऊम् इति । त्वेषसा । रन्त । सिन्धवः । परि । यत् । वज्रेण । सीम् । अयच्छत् । ईशानऽकृत् । दाशुषे । दशस्यन् । तुर्वीतये । गाधम् । तुर्वणिः । करिति कः ॥ ११ ॥ अस्मै । इत् । ऊम् इति । प्र । भर । तूतुजानः । वृत्राय । वज्रम् । ईशानः । कियेधाः । गोः । न । पर्व । वि । रद । तिरश्चा । इष्यन् । अर्णांसि । अपाम् । चरध्यै ॥ १२ ॥ अस्य । इत् । ऊम् इति । प्र । ब्रूहि । पूर्व्याणि । तुरस्य । कर्माणि । नव्यः । उक्थैः । युधे । यत् । इष्णानः । आयुधानि । ऋघायमाणः । निऽरिणाति । शत्रून् ॥ १३ ॥ अस्य । इत् । ऊम् इति । भिया । गिरयः । च । दृळ्हाः । द्यावा । च । भूम । जनुषः । तुजेते इति । उपो इति । वेनस्य । जोगुवानः । ओणिम् । सद्यः । भुवत् । वीर्याय । नोधाः ॥ १४ ॥ अस्मै । इत् । ऊम् इति । त्यत् । अनु । दायि । एषाम् । एकः । यत् । वव्ने । भूरेः । ईशानः । प्र । एतशम् । सूर्ये । पस्पृधानम् । सौवश्व्ये । सुस्विम् । आवत् । इन्द्रः ॥ १५ ॥ एव । ते । हारिऽयोजन । सुऽवृक्ति । इन्द्र । ब्रह्माणि । गोतमासः । अक्रन् । आ । एषु । विश्वऽपेशसम् । धियम् । धाः । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ १६ ॥ २९ ॥

सूक्त ४६.

ऋषि- प्रस्कण्व काण्व; देवता- अश्विन ॥

वह अपूर्व तेजोयुक्त उषादेवी, जो द्युलोकों को प्रिय है, अपना प्रकाश डाल रही है। हे अश्विनो, मैं हृदयसे आपकी स्तुति करता हूं। १

ये अश्विनीदेव सुन्दर हैं। सिन्धु उनकी जननी है। जब हम वेगवान पुरुषोंसे इनकी तुलना करते हैं तब जान पड़ता है कि ये अपने वेगसे मनको भी पीछे कर देते हैं। ये हृदयपूर्वक (भक्तों को) धन अर्पण करते हैं। २

आपके उन अश्वोंके योगसे, जो वेगसे दौड़नेमें मानों पक्षी ही हैं, जब आपका रथ सदासे उड़ता जाता है उस समय अति पुरातन स्वर्गलोकमें भी आपके स्तोत्र गाये जाते हैं। ३

ये सर्वसंचारी और सर्वतृप्तीकारक (सूर्य) देव, कि जिनपर उदकोंका प्रेम है और जिनसे पानीके बादल उत्पन्न होते हैं, आपको हवियोंसे सन्तुष्ट करते हैं। ४

हे स्तुतिप्रिय और सत्यस्वरूप अश्विनीदेवताओं! (सोमरस) आपके मनके कपाट खोलता है। अतएव, आप मनमानी रीतिसे सोमरस पान कीजिए। ५ (३३)

---

१ अपूर्व्या ॥

२ मनोतरा ॥

३ विभिः ॥

४ कुटस्य ॥

५ धृष्णुया ॥

अहो अश्विनो, आप हमें अपनी उस कृपा का लाभ करा दीजिए कि जो उज्ज्वल प्रकाश डालकर हमें अंधकार से निकाले। ६

आप यहां पधारिये, ताकि आपकी कृपारूपी नौका में बैठकर हम (दुःखसागर) से पार हो सकें। हे अश्विनो आप अपना रथ जोतिये। ७

जब कि नदियों के किनारे से आप गमन करते हैं तब आपका रथ ही, स्वर्गलोक में भी विस्तीर्ण, आपकी नौका होती है। आपके लिए भक्तिपूर्वक हमने यहां सोमरस तैयार कर रखे हैं। ८

हे कण्वो ! स्वर्ग के प्रदेश में आल्हाददायक तेज भर रहा है और नदियों के निवासस्थान में तेजःपुंज वैभव दृग्गोचर हो रहा है। अतएव, (हे अश्विनो,) आप अपने दिव्य देह भला कौनसी जगह ले जाइयेगा ? ९

यह देखिये, चारों ओर अपने रश्मि फेंकने के लिए प्रभा सज्ज हुई है। और यह देखिये, इधर सूर्य (उदय हुआ)। यह कांचन की ही प्रतिमा है। कृष्णवर्ण (अग्नि ने भी) अपनी जिव्हा बाहर निकालकर अपनी दीप्ति प्रकट की है। १०

हमें दुःखसे पार लगाने के लिए धर्मनीति का मार्ग स्पष्ट देख पड़ने लगा है और—स्वर्ग की वह प्रभा दृष्टि पड़ने लगी है। ११

---

१ रम्भाथाम ॥

२ तीर्थं ॥

३ वाव्रिम ॥

४ अम्भिनः ॥

५ सूनिः ॥

सोमपानमें आनन्द होते ही जो अश्विनदेव भक्तोंको भरपूर वैभव देते हैं उनके उस कृपा प्रसादका स्तोतृजन सदा बखान करते रहता है। १२

जिस प्रकार (पहले) आप मनुकी भेटको गये थे उसी प्रकार हमारी प्रार्थनाओंसे और सोमरसपान से प्रेरित होकर, विवस्वत के लिए अपना तेज प्रकट करते हुए हमारे कल्याणकर्ता आप यहां आइये। १३

आपके परिभ्रमण करते समय आपके मार्गके अनुरोधसे उषाने भी अपना मार्ग क्रमण आरम्भ किया। रातमें किये हुए यागकर्म आपको बहुत अच्छे लगते हैं। १४

हे अश्विनो, आप दोनों अपनी अखण्ड कृपासे हमें सौख्य अर्पण कीजिए और दोनों सोमरस का पान कीजिए। १५ (३५)

चौथा अध्याय

सूक्त ४७.

ऋषि-प्रस्कण्व काण्व, देवता-अश्विन ॥

नीतिधर्म-परिपालनमें आनन्द माननेवाले हे अश्विनीदेवताओ, यह अत्यन्त माधुर्ययुक्त सोमरस आपके लिए निकाल रखा गया है। वह कलका ही तैयार किया हुआ है:—उसका पान कीजिए और अपने भक्तोंके लिए उत्तम सम्पत्तिका भाण्डार भर रखिये। १

- - - -

१ जरिता ॥

२ शम्भू ॥

३ श्रियम ॥

४ अस्त्रिधिपाभिः ॥

हे अश्विनो, जिस आपके रथमें तीन बन्धुर हैं, जो त्रिकोणाकृति है और जो देखनेमें सुन्दर है उस अपने रथमें बैठकर यहां आइये । (इस यज्ञमें कण्व आपकी स्तुति करते हैं । उनकी पुकार आप श्रवण कीजिए) २

न्यायनीतिके उत्तेजना देनेवाले हे अश्विनीदेवताओ, इस अत्यन्त मधुर सोमरस का पान कीजिये और हे मरूपवान देवो, अपने रथ के द्वारा बहुतसी सम्पत्ति ले आकर भक्तजनोंके पास पधारिये । ३

इस रीतिसे बिछे हुए दर्भासनपर, कि जिसपर आप दोनों एकदम बैठ सकेंगे, आरूढ होकर हे सर्वज्ञ देवो, आप हमारे यज्ञको माधुर्य से परिप्लुत कीजिए । हे अश्विनो, ये तेजस्वीपन से सुशोभित होनेवाले कण्व सोमरस तैयार करके आपको निमन्त्रण दे रहे हैं । ४

हे अश्विनो, आपने जिस (अपनी कृपा के सामर्थ्यसे कण्वकी रक्षा की उसी सामर्थ्यसे युक्त होकर हमारी भी रक्षा कीजिए) क्योंकि आप सम्पूर्ण मंगलताके स्वामी और न्यायनीति को उत्तेजना देनेवाले हैं । ५ । १ ।

अहो सुन्दर अश्विन देवो, जो कि आप सुदास के लिए सम्पत्ति ले आये, इस लिए अपने रथके द्वारा (हमारे लिए भी) जीवन-सामर्थ्य ले आइये । जिसे बहुत लोग ताकते रहते हैं वही वैभव हमें अर्पण कीजिए । फिर उसे आप चाहे महासागरसे लावें, चाहे स्वर्गके आसपासवाले प्रदेश से लावें । ६

---

१ सुपेशसा ॥
२ दाश्वांसम् ॥
३ त्रिषधस्थे ॥
४ अभिष्टिभिः ॥
५ पृक्ष ॥

हे सत्यस्वरूप अश्विनदेवताओ, आप तुर्वश के समीप रहिए अथवा बहुत दूर रहिए। वहां से, अपने सुन्दर रथ में बैठकर यहां आइये और आते समय सूर्य के किरणों को भी साथ लेते आइये। ७

आपके अश्व, जो यज्ञ के लिए लतासम्भूत हैं, आपको हमारे हव्यों की ओर ले आवें। अहो शूरो, जो सदाचारी भक्त आपको प्रेम से हव्य अर्पण करता है उसे पूर्ण समृद्धि प्रदान करके आप इस कुशासन पर विराजमान हूजिए। ८

हे सत्यस्वरूप अश्विनी देवताओ, सूर्य को भी आच्छादित करदेनेवाले अपने रथ में बैठकर इधर आइये। जब जब आपको मधुर सोमरस पान करने की इच्छा होती है तब तब आप सदा इसी रथ के द्वारा अपने भक्तों के लिए सोमरस लाते रहते हैं। ९

अनेक वैभवों से सम्पन्न अश्विनीदेवोंको हम स्तुतिस्तोत्र गाकर अपनी ओर पाचारण करते हैं। (हे अश्विनो, आपने अपने प्रिय कण्वों के सदन में जाकर सचमुच सदा सोमपान किया है) १० (८)

सूक्त ४८.

ऋषि प्रस्कण्व, देवता—उषः ॥

हे द्युलोक–दुहिते उषादेवी, आप अपनी अत्यन्त सुन्दर कान्ति के साथ यहां हमारे लिए सुप्रकाशित हूजिए। हे देदीप्यमान देवी, आप दानशूर हैं, अतएव विपुल सम्पत्ति और वैभव साथ लेकर (यहां प्रकाश फैलाइये)। १

---

१ सुव्रता ॥
२ इषम् ॥
३ सूर्यत्वचा ॥
४ पपथुः ॥
५ दास्वती ॥

ये उषा अश्व, धेनु, और इस विश्वके उत्तम उत्तम सौख्य अपने साथ लेकर (जगती-तलपर) प्रकाश फैलाने के लिए (आकाश में) उतर कर आई हैं। हे उषे, आप मेरे साथ मधुर सम्भाषण कीजिए और श्रीमन्त पुरुषोंके पास जितना धन होता है उतना धन हमें अर्पण कीजिए। २

उषाने अपना प्रकाश फैलाया है और वह ऐसाही अपना प्रकाश फैलावेगी। (सायंकालके कारण ठहरजानेवाली गाड़ियोंको) आगे जाने के लिए यही प्रेरणा करती है; क्योंकि जिस तरह (समुद्रपर्यटन के लिए जानेवाले) साहसी लोग समुद्र की ओर दृष्टि लगाकर बैठते हैं उसी तरह सम्पूर्ण रथ उषाके आगमन की प्रतीक्षा करते हुए बैठे रहते हैं। ३

आपका आगमन होनेपर जो विद्वान लोग दानकर्म करनेके लिए अपने मनकी प्रवृत्ति करते हैं उनका यश, यह कण्व—कुलका श्रेष्ठ पुरुष कण्व, इस यज्ञमें (बड़े सन्मानसे) गाता रहता है। ४

किसी सुन्दर स्त्री की तरह यह उषा विलास करती हुई और सम्पूर्ण दुरितोंको नाश करती हुई आ रही है। जिनके पैर हैं उन प्राणियो को यह चलाने लगती है और जिनके पंख हैं उन जीवोंको यह अन्तरिक्ष में उड़ने के लिए प्रवृत्त करती है। ५ (३)

जो उद्योगशील हैं और जिन्हें धन कमानेकी इच्छा है उन्हें वह अपने अपने काममें प्रवृत्त करती है। इस उदार देवीको विश्रान्ति की बिलकुलही आवश्यकता नहीं जान पडती। जहां यह उत्साह—वर्धन करनेवाली उषादेवी प्रकाशमान हुई कि बस, जिसे उड़नेका सामर्थ्य है, ऐसा एक भी पक्षी (घोंसले में) बैठा नहीं रहता। ६

---

१ स्यन्दन्त ॥

२ जीरा ॥

३ वृजनम ॥

४ ओदती ॥

सूर्य के उदयस्थान से भी आगेवाले दूरके प्रदेशसे यह अपने (अश्व) जोत लाई है। यह परोपकारी उषा सौ रथों में बैठकर मनुष्यों के पास आती है।   ७

इसका दर्शन होते ही सम्पूर्ण जगत् ने इसे प्रणाम किया है। यह उपकारी उषा (सबको) प्रकाश देती है। द्युलोक की इस उदार कन्याने सम्पूर्ण द्वेषकारक और बाधक जीवों का उन्मूलन करडाला है।   ८

हे द्युलोककन्ये उषादेवी, हमारे यज्ञकर्म शुरू होने के लिए यहां अपना प्रकाश फैलाकर और हमें अतिशय सौख्य का लाभ कराकर अपने आल्हाददायक किरणोंसे यहां प्रकट हूजिए।   ९

हे सुखदायिनी देवी, जब आप अपना प्रकाश फैलाती हैं तब जान पड़ता है कि, आपसे विश्वको, अपना प्राण--अपना चैतन्य--मिल गया। हे उज्वल और अलौकिक उदारता प्रकट करनेवाली देवी, आप अपने बड़े रथ में बैठकर आइये और हमारी पुकार सुनिये।   १० (४)

हे उषादेवी, अपने शरीर में ऐसा सामर्थ्य लाइये कि जिस पर सम्पूर्ण मनुष्यों को आश्चर्य हो। उस सामर्थ्य के द्वारा, हमारा कल्याण करनेवाले देवताओं को, जो उपासक आपका स्तवन करते हैं उनके यज्ञों के समीप ले आइये   ११

---

१ सुभगा ॥

२ सुभः ॥

३ चन्द्रेण ॥

४ चित्रामघे ॥

५ वन्हयः ॥

हे उषादेवी, सम्पूर्ण देवताओंको अन्तरिक्ष से, सोमपानके लिए, यहां ले आइये, और, हे उषे, हमारे शरीरमें ऐसा सामर्थ्य लाइये कि जिसके द्वारा हम अपना वीर्य दिखला सकें, जिसकी बहुत प्रशंसा हो और जिसके कारण हम धेनुओं और अश्वोंका लाभ कर सकें ! १२

यह उषा, कि जिसके उज्ज्वल और कल्याणकारक किरण देख पड़ने लगे हैं, हमको प्रयास न पड़ते हुए ऐसी उत्तम प्रकारकी सम्पत्ति अर्पण करें कि जिसे सब लोग चाहते हों । १३

जिन प्राचीन ऋषियों ने, हे श्रेष्ठ उषादेवी, अपनी रक्षाके लिए आपको पाचारण किया (उनकी पूजा की आप पात्र हुई) हे उज्ज्वल कान्तिसे (युक्त रहनेवाली) उषा, आप हमपर अपनी कृपा कीजिये और हमारे स्तोत्रों पर अपनी प्रशंसाबुद्धि व्यक्त कीजिए । १४

हे उषादेवी, जो कि आज आपने अपने तेजसे स्वर्गके द्वार खोल दिये हैं, इस लिए, हे देवी, ऐसा कीजिये कि जिससे हमें ऐसा विशाल मन्दिर मिले कि, जहां शत्रुओं का भय न हो, और हमारे विषय में ऐसी कृपा रखिये कि जिससे हमें धेनु प्राप्त हों । १५

हे सामर्थ्यवान श्रेष्ठ उषादेवी, हमें अखिल प्रकारकी सम्पत्तियोंसे, समृद्धि-योंसे, सर्वत्र फैलनेवाले कीर्तिवैभवसे और बलसे परिपूर्ण कर दीजिए । १६ (५)

---

१ उक्थम ॥

२ रुशतः ॥

३ अभिगृणीहि ॥

४ अस्मकम ॥

५ विश्वंपशसा ॥

सूक्त ४९.

ऋषि-प्रस्कण्व काण्व; देवता—उषा ।

हे उषादेवि, देदीप्यमान द्युलोक के ऊपरवाले भागकी ओरसे, अपनी कल्याण-प्रद कान्तिसे (विभूषित होकर) यहां आइये । आपके रक्तवर्ण अश्व, सोमरस अर्पण करनेवाले भक्त के भवन की ओर आपको ले आवें । १

हे उषादेवी, जिस सुखदायक और सुन्दर रथपर आप विराजमान हुई हैं उसके द्वारा आकर, हे द्युलोक कन्ये, उत्तम कीर्ति की इच्छा करनेवाले इन मनुष्यों की रक्षा कीजिये । २

हे देदीप्यमान देवि, द्युलोक के आसपासवाले भागोंमें आपका आगमन होते ही, उड़नेवाले पक्षी, तथा द्विपाद और चतुष्पाद प्राणी, बाहर निकलने के लिए तैयार हुए । ३

जो कि आप अपने किरणों से प्रकाश फैलाकर सम्पूर्ण जगत को प्रकाशमय कर डालती हैं उन्हीं आपकी (हे उषे, कण्वों ने, सम्पत्ति की इच्छा धारण करके, स्तोत्रोंके द्वारा, पुकार की है) ४ (६)

सूक्त ५०.

ऋषि-प्रस्कण्व काण्व; देवता-सूर्य ।

उस सर्वज्ञ सूर्य को उसके रश्मि यहां ले आ रहे हैं, ताकि सबको उसका दर्शन हो जाय । १

---

१ अरुणप्सवः ॥

२ ऋतून् ॥

३ रोचनम ॥

इस सर्वदर्शी सूर्य को देखकर नक्षत्र, रातके साथ, चोरों की तरह भागते हैं। २

जब यह सम्पूर्ण लोकों पर प्रकाश फैलाने के लिए आता है तब अग्नि की तरह तेजस्वी इसके उज्ज्वल रश्मि दिखाई देते हैं। ३

हे सूर्य, आप प्रकाश देनेवाले, सब में अत्यन्त सुन्दर और सर्व-संचारी हैं। इस अखिल जगत् पर प्रकाश फैलाकर आप उसमें उज्ज्वलता लाते हैं। ४

देवसमुदाय, मनुष्य. (किंबहुना) सम्पूर्ण विश्व के सामने आप स्पष्ट रीती से प्रकाशमान होते हैं, ताकि आपका प्रकाश सब को दिखाई दे। ५ (७)

इस के द्वारा हे वरुण, हे जगत् को पावन करनेवाले देव. आप सब लोगों का भार सहन करनेवाले इस जगत की ओर, अपने नेत्रों से देख सकते हैं। ६

हे सूर्य, आप, सब प्राणिमात्र का निरीक्षण करते हुए, और रात्रि के द्वारा दिनका मापन करते हुए, द्युलोकपर, तथा विस्तीर्ण रजोलोकपर, आगमन करते हैं। ७

---

१ तायवः ॥

२ तरणिः ॥

३ प्रत्यङ् ॥

४ भुरण्यन्तम ॥

५ मिमानः ॥

हे सर्व निरीक्षक सूर्यदेव, आपके केश[1] दीप्तिमय हैं; आपको सात रक्तवर्ण अश्व रथ के द्वारा लाते रहते हैं। ८

जो (रथ के अगले भाग में जुटाये जाने के कारण) [illegible] हुए से भासते हैं। ऐसे सात घोड़े[2] सूर्यने अपने रथ में जुटाये हैं; वे रथ का जुआं आपही आप गर्दन पर लेनेवाले हैं; अतएव उन्हें सज्ज करके वह बाहर प्रयाण करता है। ९

हम उस उत्तम तेज को ढूँढते हुए, कि जो सम्पूर्ण अंधकार पर अपनी प्रबलता प्रकट कर सकता है, इस उत्कृष्ट ज्योति की ओर—सूर्य की ओर—आये। यह देव सम्पूर्ण देवों[3] में श्रेष्ठ है। १०

स्वमित्रों[4] को आनन्द देनेवाले हे सूर्य, आज (यहां) उदय होकर और इस ऊपर देख पड़नेवाले आकाश पर आरोहण करके मेरा हृद्रोग और कॉवॅल नष्ट कीजिए। ११

हम अपने कॉवॅल तोते पर और रोपणा का नामक पक्षियों पर छोड़ते[6] हैं। अथवा हम ऐसा करते हैं कि जिससे हमारे कॉवॅल हारिद्रव पक्षियों पर चले जायँगे। १२

अपने सम्पूर्ण सामर्थ्य से सज्ज होकर, मेरे शत्रुओंको मेरे शरण में आने के लिए बाध्य करता हुआ, यह आदित्य यहां उदय हुआ है। मैं शत्रु के पंजे[7] में कभी न जाऊं। १३ (८)

---

१ शोचिष्केशं ॥
२ शुन्ध्युवः ॥
३ देवत्रा ॥
४ मित्रमहः ॥
५ हरिमाणम ॥
६ दध्मसि ॥
७ रन्धम ॥

अनुवाक १०

सूक्त ५१.

ऋषि सव्य आंगिरस; देवता–इन्द्र ॥

उस मेषरूपधारी इन्द्र को स्तुति से सन्तुष्ट करो । इसे (संकट के समय) अनेकों ने पाचारण किया है. इसके स्तोत्र सर्वत्र गाये जाते हैं और यह सम्पत्ति का महोदधि है । मानवोंके कल्याणार्थ किये हुए जिसके कार्य, जहां जाइये वहीं, किरणों के समान ही दृग्गोचर होते हैं उस अत्यन्त उदार और प्रज्ञाशाली इन्द्र को अर्चा करो । १

सामर्थ्यवान ऋभु, (भक्तों की) रक्षा करने में सब प्रकार से समर्थ, अन्तरिक्ष में व्याप्त रहनेवाले, (अखिल) सामर्थ्यों से युक्त और (शत्रुओं के) आनन्द में विघ्न डालनेवाले इन्द्रके पास, माहात्म्यभूत होकर, आये । इस अत्यन्त पराक्रमी इन्द्र को उनके उत्तेजनाप्रद शब्दोंने स्फूर्ति चढ़ाई । २

(जहां धेनुओं को बन्दकर रखा था वह किला आपने अंगिरस के लिए खोल दिया और सैकड़ों दरवाजों से आपने अत्रि के लिए मार्ग ढूंढ निकाला । वावसान के युद्ध में अपना वज्र (शत्रुसमुदाय में) नचाते हुए आपने विमद को धनधान्य अर्पण किया ।) ३

---

१ मावुषा: ॥

२ मदच्युतम् ॥

३ शतदुरेषु ॥

आपने उदक के ऊपरका आवरण निकाल डाला और पर्वतों में पैठकर विपुल सम्पत्ति हस्तगत कर ली। हे इन्द्र जब आपने अपने सामर्थ्यसे वृत्र—अहि को मार डाला तब आपने इस रीतीसे द्युलोक में सूर्यकी स्थापना की कि जिससे वह अच्छी तरहसे सबको दिखाई दे। ४

युक्ति प्रयुक्तियों के बल पर आपने कपटी शत्रुओं को खूब ही छकाया; तथा जो लोग आपकी हँसी[1] करने के लिए आपको हवि अर्पण करनेका ढोंग करते उनको भी आपने अपनी युद्धप्रणालीसे जीत लिया। मानवों के कल्याणकी इच्छा धारण करने वाले (हे इन्द्र)(आपने पिप्रुके पुरोंका विध्वंस किया, और दस्यु जब मारने को आये तब ऋजिश्वान की आपने रक्षा की) ५ (६)

(शुष्ण जब मारने को दौड़ा तब आपने कुत्स की रक्षा की और अतिथिग्व का पक्ष लेकर आपने शम्बर को चूरचूर कर डाला। अर्बुद के समान बड़ा होनेपर भी आप उस पर पैर रखकर खड़े हो गये। दस्युओं का हनन करने के लिए ही आप पुरातन काल मे जन्म लेने आये हैं।) ६

आप में सम्पूर्ण सामर्थ्य पूर्णतया सुस्थापित हुआ है; सोमपान के लिए आपके आनन्द में उल्लास आता रहता है। भुजाओं पर रखे हुए आपके वज्र की (सब को) पहचान है। (उसे लेकर) आप शत्रु के अखिल सामर्थ्यों का विदारण कीजिए। ७

१ शुभी ॥

२ हन्येषु ॥

३ हर्षते ॥

(आर्य कौन है और दस्यु कौन है,) यह अच्छी तरह पहचान रखिये और जो आपकी आज्ञा पालनेवाले नहीं हैं उनका शासन करके उन्हें अपने उपासकों के शरणमें आनेके लिये बाध्य कीजिये। आप सामर्थ्यवान हैं। अपने भक्तोंको आप (उत्कर्षपर) पहुँचाइये। आपके सर्व पराक्रम यज्ञमें (गाते समय मुझे आनन्द देते हैं। ८

जो इन्द्र की आज्ञा मानते हैं उनके आगे, आज्ञा न मानने वाले लोगों को नम्र होनेके लिये, बाध्य करके इन्द्र भक्तों की ओर से अभक्तिनों का नाश कराते रहते हैं। वम्र आपका स्तवन करता रहा; इसी लिये वह अपने शत्रु की एकत्रित की हुई सम्पत्ति का विध्वंस कर सका। यह उसका शत्रु पहले ही से बहुत बलवान हो गया था, तिस परभी उसका बल बढ़ ही रह था और वह स्वर्गतक जा भिड़ा था। ९

उशन ने आपनी शक्ति के योग से जो सामर्थ्य आपके लिए निर्माण किया उसमें इतना बल है कि वह द्युलोक और भूलोक दोनों के लिए भारी हो रहा है। मानवों के हित करने की बुद्धि रखने वाले (हे इन्द्र,) अपने को स्वयं रथ में जुटा लेने वाले वायु के अश्वों ने, सर्वत्र भरे रहनेवाले आपको, विपुल कीर्ति प्राप्त करा दी है। १०। १०।

जिस समय उशनाकाव्या के सहित इन्द्र संन्तुष्ट हुए उस समय, गेंट से टेढ़े टेढ़े चलनेवाले अश्वों में से अत्यन्त उत्कृष्ट अश्वों पर, उन्होंने आरोहण किया। उस प्रतापी देवता ने प्रवाहरूप से जलों को बिलकुल छोड कर उन्हें शीघ्र गति दी और-शुष्ण के दृढ़ दुर्ग का उन्हों ने विदारण किया। ११

---

१ शाकी ॥

२ अनामुवः ॥

३ वृमणः ॥

४ वंकुतराः ॥

सामर्थ्यवान् पुरुष जिसका पान करते हैं उस सोमरस का आस्वाद लेते हुए आप रथ पर आरूढ़ होते हैं। शार्यात के सोमरस के चमस तैयार हैं। इससे आपको भी बड़ा आनन्द होता है। हे इन्द्र, (हमारे) तैयार किये हुए सोमरस के विषय में जैसे जैसे आपकी प्रीति[1] बढ़ती जाती है वैसे वैसे आप द्युलोक में आप ही आप कीर्ति के पात्र होते जाते हैं। १२

(हे इन्द्र, आपके स्तोत्र गानेवाले और आपको सोमरस अर्पण करनेवाले वृद्ध कक्षिवान को आपने कोमल वयवाली वृचया अर्पण की) हे बुद्धिसामर्थ्यवान देव, वृषणश्व की कन्या मेना भी आपही बने। आपके ये सब कार्य यज्ञ में गाने योग्य हैं। १३

विपत्काल में सदाचारी लोगों ने इन्द्र का ही आश्रय किया है। जैसे दरवाजे का खम्भ नहीं टलता(वैसेही पंजों के कुल में इन्द्र की पूजा कभी रुक नहीं सकती) धेनु, रथ और वित्त से प्रीति रखनेवाले और दानकर्म में शूर एक इन्द्र ही सारे वैभवों के स्वामी हैं। १४

सामर्थ्यवान, स्वतेज से युक्त, सत्यकार्य में बलका विनियोग करनेवाले और शक्तिसम्पन्न(इन्द्रके सन्मानार्थ हमने यह नम्र स्तुति गाई है) हे इन्द्र, हम अपने यहां के सब पराक्रमी पुरुष और विद्वान् लोगों के सहित इस संकट के समय में आपकी कृपा का आधार मान कर रहें। १५ (११)

---

१ वाकनः ॥

२ अभीम् ॥

३ निरेके ॥

सूक्त ५२.

ऋषि-सव्य आंगिरस; देवता इन्द्र ॥

(प्रकाश को प्राप्त कर लेनेवाले मेष की अच्छी तरह अर्चना करो। सैकड़ों स्तोतें एकत्र बैठकर इसीकी कीर्ति गाते रहते हैं जिस प्रकार किसी जोशीले घोड़े को, यज्ञ के लिए जानेवाले रथ में, (जुटाने के लिए प्रयत्न पूर्वक) खींच कर लाना होता है उसी प्रकार इन्द्र को, अपनी रक्षा के लिए, हम, सुन्दर स्तोत्रों के द्वारा, खींच-लाने में समर्थ हों)। १

जिस समय हवियों से सन्तुष्ट होकर इन्द्र ने, नदियों का मार्ग खोलते हुए, जलों को प्रतिबन्ध करनेवाले वृत्र का वध किया उस समय, अपने ही सामर्थ्य से (परिवेष्टित होकर) और कठिन भूभाग पर रहनेवाले पर्वत की तरह स्थिर रह कर, हजारों प्रकार से भक्तों की रक्षा करनेवाले इन्द्र अधिकाधिक बड़े ही होते गये। २

शत्रुओं में शत्रु की तरह रहनेवाले, और (गाड़के) रेत की तरह दिखनेवाले (इस अन्तरिक्ष में) व्याप्त हो रहनेवाले इन्द्र का मुख्य निवासस्थान आल्हाददायक प्रकाश में है और विद्वान लोगोंने (सोमरस अर्पण करके) उनका आनन्द बढ़ाया है। मनमें बहुत तत्परता रख कर, परम उदार इन्द्राको मै आह्वाहन करता हूं। अन्न की समृद्धि करनेवाले वही हैं। ३

यज्ञगृह में आसनपर विराजमान होनेवाले जिन के उत्साही सेवक जिन्हें द्युलोक में, समुद्र की तरह सोमरस से भर डालते हैं उन्हीं इन्द्र के समीप, उनके सामर्थ्यवान, किसी के प्रतिरोध की परवा न करनेवाले, और सरलाकृति सहायक, वृत्रवध के अवसर पर खड़े थे। ४

---

१ स्वार्विदम ॥
२ सहस्रमूतिः ॥
३ उरिषु ॥
४ अद्भुतप्सवः ॥

जिस समय सोमरस से उत्साह परिप्लुत होनेवाले वज्रधर इन्द्र ने त्रिता की भांति बल के आसपास के दुर्ग तोड़ डाले उस समय हर्ष के आवेश में युद्ध करनेवाले उस देव के सहायक, पर्जन्यवृष्टि को प्रतिबन्ध करनेवाले उस (वृत्र) पर इस प्रकार टूट पड़े जैसे नदियां ढालू जगह से वेग के साथ दौड़ते जाती हैं। १ (१२)

हे इन्द्र, जिस समय आपने, पराजय करने में दुष्कर वृत्र की ठुड्डी के नीचे अपना वज्र फेंक कर मारा उस समय आपका तेज आपके चारों ओर फैल गया, आपके सामर्थ्य का प्रकाश पड़ा और उदकों को प्रतिबन्ध करनेवाला (वृत्र) रजोलोक के तल पर मर कर गिर पड़ा. ६

जो स्तोत्र आपकी महती बढ़ाते हैं वे इस प्रकार आपकी ओर दौड़ते आते हैं जैसे उदक के प्रवाह किसी दह की ओर दौड़ते हुए जाते हैं। त्वष्टा ने ही आपके लिए उपयोगी आपका सामर्थ्य बढ़ाया और ऐसा वज्र आपके लिए तैयार किया जो शत्रुओं का पराभव करने में समर्थ है। ७

हे सामर्थ्य परिप्लुत रहनेवाले इन्द्रदेव ! मानवों के हित के लिए उदकों के बहने का मार्ग खोलने के लिए आपने अपने अश्वों के द्वारा वृत्र का वध किया। आपने अपनी भुजाओं पर लोह का बना हुआ वज्र धारण किया और सूर्यदेव की द्युलोक में इस रीति से स्थापना की कि जिससे वह सब की दृष्टि पड़े। ८

जिस समय मनुष्यों ने डर से आपका प्रभावशाली, आपही आप आल्हाद उत्पन्न करनेवाला, दीर्घ और स्वर्गलोक तक प्रवेश करनेवाला स्तोत्र गाया, जिस समय मनुष्यों के हित के लिए युद्ध में प्रवृत्त होनेवाले, स्वर्ग में सदा शूरों का सहवास करनेवाले और इन्द्र के साह्यभूत होनेवाले मरुतों ने इन्द्र को प्रोत्साहन दिया, ९

और जिस समय, हे इन्द्र, द्युलोक और भूलोक दोनों में पीड़ा उत्पन्न करनेवाले वृत्र का शिर, सोमरस की आनन्ददायक स्फूर्ति में, आपके वज्रने अपने सामर्थ्य से, काट डाला, उस समय, भय के कारण बलिष्ठ स्वर्गलोक भी, उस अहि की गर्जना से थर थर कांपने लगा। १० (१३)

यदि सचमुच, हे इन्द्र ! पृथिवी दसगुनी बड़ी हो जायगी और मनुष्य की आयु चिरकाल तक टिकनेवाली हो जायगी, तभी हे उदार (देव,) आपका विख्यात सामर्थ्य, शक्ति और पराक्रम के विषय में, द्युलोक में समा सकेगा। ११

मन में अत्यन्त उत्साह रखनेवाले हे इन्द्र, जो कि आप अपने ही पराक्रम से अपनी रक्षा करने में समर्थ हैं वही आपने रजोलोक और आकाश के उस पार (रहकर) इस पृथिवी को अपने सामर्थ्य के मापने का माप ही बनाया है। आप उदक और प्रकाश को व्याप्त करके द्युलोक में भी प्रवेश करते हैं। १२

आपने इस पृथिवी को माप डाला है और जिसमें अति उच्च योग्यता के शूर पुरुष हैं ऐसे विशाल (स्वर्गलोक) के आप स्वामी हो बैठे हैं। आपने अपने सामर्थ्य से सब अन्तरिक्ष व्याप्त कर डाला है। सचमुच आपके समान इस जगत् में दूसरा और कोई भी नहीं। १३

जिनकी व्यापकता की बराबरी द्युलोक अथवा भूलोक दोनों नहीं कर सके और अन्तरिक्ष की नदियां भी जिनका अन्त नहीं पा सकीं, तथा सोमरस के आनन्द के आवेश में, उदकों का प्रतिबन्ध करनेवाले वृत्र से युद्ध करते समय भी (जिनका पूर्ण ज्ञान किसी को भी नहीं हुआ) उन्हीं आपने अकेले, आत्म-व्यतिरिक्त सम्पूर्ण जगत् को, अपने वश में कर रखा है। १४

हे इन्द्र, जिस समय आपने अपने तीक्ष्ण शस्त्र से वृत्र के मुखपर वार किया उस समय, उस युद्ध के प्रसंग में, मरुतों ने आपकी पूजा की और सब देवताओं ने आपको प्रोत्साहन दिया। १५ (१४)

सूक्त ५३.

ऋषि—सव्य आंगिरस; देवता—इन्द्र ॥

(इन प्रभु इन्द्र को सम्बोधन करके हम स्तोत्र गाने को बैठते हैं। विवस्वान् के भवन में हम उन्हें स्तुति अर्पण करते हैं। सोते सोते (जैसे किसी को) कोई द्रव्य ला दे, वैसे ही उन्होंने हमें सम्पत्ति प्रदान की है। (ऐसे) धनदाता की कोई कभी बुरी स्तुति नहीं करते।) १

आप अश्व, धेनु और धान्य देनेवाले हैं। सब सम्पत्ति के स्वामी और प्रभु आपही है। पुरातन काल से आप मानवों के मार्गदर्शक है; आपने किसी की आशा को कभी भंग नहीं किया; आप अपने मित्रों के (प्राणप्रिय) मित्र हैं; आप के ऐसे बड़े होने के कारण हम आप के सन्मानार्थ यह स्तोत्र गाते हैं। २

हे ज्ञानसामर्थ्ययुक्त इन्द्र, हे अनेक महन् कार्य करनेवाले और अत्यन्त दीप्तिशाली देव, यह जो वैभव आसपास प्रकाशमान हो रहा है वह आपहीका हैं। इस लिए, शत्रुको पराभूत करनेवाले हे इन्द्र, वह हमें ला दीजिए। आप अपने भक्ति करनेवाले स्तोता का मनोरथ भग्न न होने दीजिए। ३

इन (यज्ञ की) अग्निज्वालाओं से और इस सोमरस के बिन्दुओं से मन में सन्तुष्ट होकर आप धेनु और अश्व हमें देकर हमारी दरिद्रता नष्ट कीजिए। सोमरस अर्पण कर के इन्द्र के हाथ से दस्युओं का वध कराकर हम शत्रुओं से बिलकुल निर्मुक्त होंगे और धन धान्य से समृद्ध बनेंगे। ४

हम सम्पत्ति से, धान्यसंचय से, और अनेक तरह से आनन्दकारक और तेजस्विता से युक्त सामर्थ्य से सुसमृद्ध होंगे। तथा जिसके कारण हमारे यहां के शूर पुरुषों का बल दृष्टि पड़ेगा और जिससे गौओंका लाभ प्रमुख है तथा अश्व भी मिल सकते हैं, ऐसी आपकी दिव्य कृपा भी हमें प्राप्त होगी। ५ (१५)

वृत्रवध के मौके पर, हे सज्जनों के नायक (इन्द्र), उन आनन्दकारक पेयों से, उन उत्साहवर्धक हवियों से, और उन सोमरसों से, आपको (अवश्य ही) नवीन आवेश आया। क्योंकि (उसके जोर में) आपने किसी के प्रतिरोध की परवा न करते हुए, आपके लिए दर्भासन लगा कर आप की कीर्ति गानेवाले भक्तों के लिए दस हजार वृत्रोंको काट डाला। ६

जिस समय हे इन्द्र, आपने अपने प्राणप्रिय भक्त नमी को साथ ले कर नमुचि नामक कपटी (राक्षस को) अत्यन्त दूर प्रदेश में जाकर काट डाला· उस समय, (रणसंग्राम में) बड़े आवेश से घुसनेवाले आपको युद्ध के पिछे युद्ध करना पड़ा और अपने सामर्थ्य से आप पुरों के पीछे पुरों का विध्वंस करने लगे। ७

अतिथिग्व के अत्यन्त तेजस्वी चक्र के द्वारा आपने करंज और पर्णय का वध किया। ऋजिश्वान के घेरे हुए वृंगद के सौ पुर आपने उध्वस्त कर डाले। आपके दातृत्व से (सचमुच) किसी की बराबरी नहीं की जा सकती। ८

आप सत्कीर्तियोंसे मंडित हैं। जिस समय सुश्रवस को असहाय देखकर बीस राजाओंने उस पर चढ़ाई की उस समय एक ऐसा रथचक्र लेकर, कि जिसके सामने कोई टिक नहीं सकता था, आपने उनका (साथही) उनके साठ हजार निन्नानवे लोगों का उच्छेद कर डाला। ९

हे इन्द्र, आपने अपने कृपाछत्र से सुश्रवस की रक्षा की और अपनी सहायता देकर तुर्वयाण का बचाव किया। आपने इस श्रेष्ठ और तरुण नृपति के सामने कुत्स, अतिथिग्व, और आयुको शरण आनेके लिए बाध्य किया। १०

हम सब देवताओं की रक्षा में रहनेवाले हैं। हम को आप अपना प्राणप्रिय भक्त बनाकर अब आगे भी सौख्य में ही रखिये। अत्यन्त दीर्घ और चिरकालिक आयु का भोग करते हुए, अपनी कृपा से प्राप्त हुए हमारे यहां के शूर मनुष्यों के सहित, अपना स्तवन करते हुए हमें बैठने दीजिए। ११ (१६)

सूक्त ५४.

ऋषि—सव्य आङ्गिरस; देवता—इन्द्र ॥

हे उदार देव, इस युद्धमें, ऐसे कठिन अवसर में, हमें न छोड़िये। सचमुच आपके सामर्थ्य का अन्त लगाना असम्भव है। आपने अपनी गर्जना करते ही नदियों और वृक्षों को जोर से चिल्लाने के लिए बाध्य किया। (ऐसी दशा में) आपके डर से भला मनुष्य क्यों नहीं एकत्र हो सकते? १

सामर्थ्यवान पराक्रमी और बलवान इन्द्रकी अर्चा करो (भक्तों की पुकार) सुनने के लिए तैयार रहनेवाले (इन्द्र का गौरव करके उनका स्तवन करो) शक्तिसामर्थ्य युक्त इन्द्र अपनी दृढ़ शक्ति और वीर्य के द्वारा द्युलोक और भूलोक दोनों को भूषित करते हैं। २

जिस शूर के अन्तःकरण में अपने सामर्थ्य के विषय में विश्वास है और साहस की ओर जिसकी प्रवृत्ति है उस देदीप्यमान और श्रेष्ठ (इन्द्र को) सम्बोधन कर के कोई प्रभावशाली स्तोत्र पढ़ो। उस की कीर्ति विशाल है, वह शत्रुओं का नाश करनेवाला है, वह पराक्रमी है, वह हरिद्वर्ण अश्व रथ के आगे जुटाता है। वह सामर्थ्यवान है और (भक्तों की ओर जानेवाला) वह (मानों) रथ ही है। ३

जिस समय हाथ में दृढ़ता से पकड़े हुए तीक्ष्ण वज्र से आपने, आनन्द देनेवाले सोमरस के योग से स्फूर्ति चढ़ने के कारण, कपटी (राक्षसों की) दस्यु से युद्ध किया उस समय विस्तीर्ण द्युलोक का शिखर भी आपने हिला डाला और अपने वज्र के प्रहार से शंबर का शरीर विदीर्ण किया। ४

जब कि वृक्षों को रुलाकर शुष्ण की भी सेना को आपने वायु के शिखर पर ले जाकर काट डाला और जब कि अपने उत्साही मन की प्रवृत्ति (ऐसेही पराक्रम की ओर) रख कर अब भी आप (ऐसे पराक्रम) दिखलाते रहते हैं तब फिर आपसे अधिक श्रेष्ठ और कौन है? ५ (१७)

(आपने नर्य, तुर्वश और यदु की रक्षा की। हे सामर्थ्यवान (इन्द्र) आप ने वय्य तुर्वीति की भी रक्षा की। संग्राम का प्रसंग आने पर आपने रथ और एतश की रक्षा की और (शत्रुओं के) निन्नानवे पुर ढहा दिये।) ६

इन्द्रको हव्य अर्पण करके जो उनके अनुशासन पर चलता है वह सज्जनों में प्रमुख मनुष्य, राजा बन कर, अभिवृद्धि को प्राप्त होता है। अथवा जो सन्तोषदायक हव्य अर्पण कर के उनको सम्बोधन कर के स्तोत्र पढ़ता है उसके लिए ऊपर से, द्युलोक से, विपुल (धन की) वृष्टि होती है।) ७

आपके बल की सीमा नहीं, आप की बुद्धिमत्ता की भी सीमा नहीं। जो सोमपान करनेवाले आप के उपासक, आप के, जो दान कर्म में प्रवीण हैं, श्रेष्ठ सामर्थ्य की और विशाल शक्ति की बड़ाई गाते हैं वे अपने सत्कृत्यों से अभिवृद्धि को प्राप्त होते हैं। ८

पाषाण के बने हुए उलूखल में डालकर निचोये हुए, पात्र में भर रखे हुए और (हे इन्द्र,) आपके पान करने के ही हेतु से तैयार किये हुए ये सोमरस के अनेक चमस आप ही के लिए रखे हुए हैं। आप उनका पान कीजिए, इन के विषय में आपकी जितनी वांछा हो उतनी सब तृप्त कर लीजिए और हमें सम्पत्ति देने में अपने मन की प्रवृत्ति कीजिए। ९

अंधकार, उदकों के प्रवाह को बन्द करके, बैठा था और पर्वत भी वृत्र के जठर में था। परन्तु इन्द्र ने उन (जलों को) प्रतिबन्ध करनेवाले राक्षस की रोकी हुई नदियों के लिए मार्ग निकाल दिया, ताकि वे सब अवरुद्ध प्रदेश से, एक की तरह दूसरी, दूसरी की तरह तिसरी बहने लगें। १०

तो अब हमें हे इन्द्र, ऐसा वैभव अर्पण कीजिए कि जिस से हमारा सौख्य बढ़े, और लोगों की अपेक्षा बढ़ा चढ़ा हुआ विपुल शौर्य तथा बल भी हमें दिजिए। हे औदार्यशालि देव, हमारी रक्षा, और हमारे यहां के विद्वान् लोगों का भी परिपालन कीजिए और हमें ऐसा वैभव तथा समृद्धि दीजिए कि जिसमें उत्तम सन्तति का भी समावेश हो। ११ (१८)

सूक्त ५५.

ऋषि—सव्य आंगिरस; देवता-इन्द्र।

इसकी श्रेष्ठता द्युलोक से भी अधिक है। पृथ्वी भी अपनी बड़ाई में इन्द्र की बराबरी नहीं कर सकती। यह (शत्रुओं को) भीतिप्रद, सामर्थ्यवान और मानवों के लिए अपना प्रताप दिखलानेवाला है और, कोई वृषभ जैसे (अपने सींगों में तीक्ष्णता लाने के लिए) उन्हें पैनाता है वैसे ही अपना वज्र अधिक तीक्ष्ण होने के लिए वह उसकी धार तेज करता है। १

समुद्र में निवास करके, किसी महासागर की तरह, अपने आश्रय में आनेवाली सब नदियों का, वह अपने श्रेष्ठ सामर्थ्य के द्वारा स्वीकार करता है, सोमपान करने की इच्छा से वह किसी वृषभ की भांति अपनी शक्ति प्रदर्शित करता है। अपने (अलौकिक) बल के कारण यह योद्धा सनातन काल से स्तवन का पात्र हुआ है। २

हे इन्द्र ! उस पर्वत को मानो ग्रस लेने के लिए ही आप अत्यन्त पौरुष और पराक्रम अपने लिए प्राप्त कर लेते हैं; (सब अद्भुत कृत्यों में ये उग्र (इन्द्र) अगुआपन लेते हैं और अपने सामर्थ्य में सब देवताओं को पीछे कर देते हैं। ३

सब लोगों में अपने कल्याणप्रद सामर्थ्य की प्रसिद्ध करनेवाले सिर्फ इन्द्र की ही नमस्कृति पूर्वक स्तुति होती रहती है। जिस समय हव्य अर्पण करनेवाला भक्त अपने कल्याण की इच्छा से (इन्द्र की) स्तुति में प्रवृत्त होता है उस समय पराक्रमी इन्द्र उस पर सन्तुष्ट होते हैं, उसके आगे वे अपना रमणीयत्व प्रकट करते हैं। ४

यही योद्धा अपने बल और सामर्थ्य के द्वारा जनहित के लिए बड़े बड़े युद्ध करता है, और इसी लिए, तेजस्वी तथा घातक वज्रसे शत्रुओं पर बार बार प्रहार करनेवाले इन्द्र पर (सब लोग) श्रद्धा रखते हैं। ५ (१९)

सचमुच कीर्ति की इच्छा रखनेवाले इस सामर्थ्यवान इन्द्रने, पृथिवी की तरह विशाल रूप धारण करके, अपने पराक्रम से (शत्रुओं के) बनाये हुए भवनों का विध्वंस करके और यजन करनेवाले भक्तों के लिए (आकाशस्थ) ज्योतियों को संकटसे विमुक्त करके जलों के प्रवाहों को बन्धमुक्त किया ताकि वे फिर बहने लगें। ६

हे सोमपान करनेवाले इन्द्र ! आपका मन हमारे विषय में दातृत्व बुद्धि धारण करे और हमारी नम्र स्तुति सुननेवाले हे देव, आप अपने पीतवर्ण अश्व हमारी ओर घुमाइये। हे इन्द्र, आपके सारथी आपके अश्वों को वश में रखने में अत्यन्त कुशल हैं और इस लिए आपके अश्व चाहे जितने चपल हों, वे आपको इधर उधर नहीं ले जाते। ७

हे इन्द्र, आप विख्यात हैं; आप ऐसा वैभव अपने हाथ में रखते हैं जिसका कभी विनाश नहीं। आपने ऐसा सामर्थ्य अपने शरीर में धारण किया है जो शत्रुओं को बढ़ने नहीं देता। कर्तृत्ववान् पुरुष जिसके आसपास खड़े हैं ऐसे कुएं की तरह शोभित होनेवाली आपकी अनेक शक्तियां, हे इन्द्र ! आपके शरीर में निवास कर रही हैं। ८ (२०)

सूक्त ५६.

ऋषि–सव्य आंगिरस; देवता–इन्द्र ।

जिस प्रकार कोई तुरग तुरगी के लिए उत्सुक होता है उसी प्रकार, इस उपासक ने चमसों में जो सोमरस भरपूर भर रखा है उसे पीने के लिए, यह उतावली से उत्सुक हुआ है। जिस में पीतवर्ण अश्व जुटे हुए हैं ऐसा अपना बड़ा रथ इधर को घुमाकर यह इन्द्र महत्कार्य के लिए अत्यन्त आवश्यक सामर्थ्य-दायक सोमरस पान करता है। १

जिस प्रकार प्रवास के लिए जाते समय धनार्जनेच्छु (साहसी) लोगों की समुद्र पर भीड़ लगती है उसी प्रकार हव्य बनाकर तैयार कर रखे हुए स्तोत्र जनों की इसके आसपास भीड़ लगती है। जिस प्रकार ये सुन्दर युवतियां (अर्थात् उषा) पर्वत पर आरूढ़ हुई हैं उसी प्रकार (हे देव,) आप इस सामर्थ्याधिपति (सूर्य) को पर्वत पर संस्थापित कीजिए; क्यों कि यह यज्ञ का केवल बल ही है। २

वह शत्रुओं का नाश करनेवाला और श्रेष्ठ है। उसका अत्यन्त शुद्ध बल अपने सामर्थ्य से प्रत्येक युद्ध में गिरि शिखर की भांति चमकता रहता है। इस बल के द्वारा इस अजित देव ने, (सोम रस के कारण उत्पन्न हुए) आनन्द के वेग में, अपना लोहेका वज्र ले कर, कपटी शुष्ण का (पराभव किया और उसे) शृंखलाबद्ध कर के कारागृह में डाल दिया। ३

जिस समय तू ही लुटपन से बढ़ाई हुई शक्तिरूपी देवी, जैसे सूर्य उषा पर आसक्त होता है वैसेही, स्वसंरक्षणार्थ इन्द्र का आश्रय करती है उस समय अपने प्रतापी सामर्थ्य से अंधकार का नाश करने वाला यह देव जयघोष करते हुए सारी मलिनता को दूर कर देता है। ४

जिस समय आपने अपने सामर्थ्य से द्युलोक की सीमा पर रजो—लोककी दृढ़ता और सुस्थिरता से संस्थापना की और जब (सोमरस से उत्पन्न हुए) हर्ष के वेग में आपने बड़े आवेश से युद्ध में वृत्र का वध किया तब आपके हाथ से उदक का संचय बन्धमुक्त हुआ। इन्द्र, आप श्रेष्ठ हैं; आप पृथ्वी के प्रदेश में अपने सामर्थ्य से आकाश के बालक को ले आते हैं। सोमरस के कारण उत्पन्न होनेवाले हर्ष के वेग में आपने उदकों के लिए मार्ग खोल दिया और वृत्र के पत्थरवाले घेरे का उच्छेद कर डाला। ५ (२१)

सूक्त ५७

ऋषि-सव्य आंगिरस; देवता-इन्द्र ॥

अत्यन्त उदार, श्रेष्ठ, अत्यन्त वैभवशाली, सत्य, सामर्थ्यवान् और पराक्रम के पुतलेही (इस देव) को प्रसन्न करने के लिए मैं स्तुति अर्पण करता हूं। जिस प्रकार, ढालू जमीन की ओर जो पानी फूट जाता है वह किसी प्रतिबन्ध को भी न मानते हुए सर्वत्र फैल जाता है उसी प्रकार, इसके सर्वत्र दृग्गोचर होनेवाले और अखंड जारी रहनेवाले कृपाप्रसाद के कपाट (भक्तों के शरीर में) सामर्थ्य लाने के लिए सदैव खुले रहते हैं। १

जिस समय सुवर्णमय, सुन्दर परन्तु प्राणघातक, वज्र पर्वत पर फेकने की तरह (वृत्र के शरीर पर जा गिरा उस समय सम्पूर्ण विश्व आपकी पूजा करने में प्रवृत्त हुआ और ढालू जमिन की ओर जैसे पानीका प्रवाह) सरासर बहता जाता है (उसी प्रकार भक्तों के हव्य बराबर आपकी ओर आने लगे)। २

जिसके तेज, नाम, बल और प्रकाश की चारों ओर प्रशंसा होने के लिए आपने उन्हें सर्वत्र प्रसृत होने में, इन्द्र के पीतवर्ण अश्वों का भांति ही, प्रवृत्त किया उस भीतिप्रद परन्तु स्तुतिस्तोत्र गाने योग्य इन्द्रको, उषा की भांति, कान्तिमान दिख पड़नेवाली हे युवति, । इस यज्ञ में, नमस्कृति अर्पण करके ले आइये। ३

अनेकों ने जिनकी स्तुति की ऐसे हे वैभवशाली इन्द्र, हम सब प्रकार से आप ही के हैं; क्योंकि आपका आश्रय करके हम इस जगत् में सुखपूर्वक रहते हैं। हे स्तुति-प्रिय देव, आपके अतिरिक्त अन्य किसी कों भी स्तुति नहीं प्राप्त होती; इस लिए जिस प्रकार पृथ्वी (जीव मात्र को) जगह देती है वैसे ही आप भी हमारे स्तोत्रों का स्वीकार कीजिए। ४

हे इन्द्र ! आप का बल विपुल है; हम आप ही के है। आप अपने इस भक्तकी इच्छा पूर्ण कीजिए। इस विशाल द्युलोकने आपके सामर्थ्य से अपने सामर्थ्य की तुलना कर देखी है और यह पृथ्वी भी आप के पराक्रम के सामने नम्र हो गई है। ५

हे वज्रधारी इन्द्र, आपने अपने वज्र से उस बड़े और विशाल पर्वत के टुकड़े टुकड़े कर डाले। रोक डाले हुए जल-प्रवाह फिर जारी होने के लिए आप ही मार्ग निकाल दिया। सचमुच जितना कुछ सामर्थ्य है, सब आप ही अकेले धारण करते हैं। ६ (२२)

अनुवाक ११

सूक्त ५८.

ऋषि–नोधा गौतम; देवता–अग्नि ।

यह (देवताओं को) हव्य पहुंचानेवाला अग्नि विवस्वान का दूत हुआ है। इसी लिए यह सामर्थ्य से जन्म लेनेवाला अमर्त्य देव कभी थक नहीं जाता। वह उत्तम मार्गों से रजोलोक का आक्रमण करता है और यज्ञ में (देवताओं को) हव्य अर्पण करके उनका आदरातिथ्य करता है। १

यह जरा–भय–रहित अग्नि देव अपने अन्न को सत्वर और आतुरता से स्वीकार करके काष्ठ में (प्रज्वलित होकर) रहता है। जब इसको घृत अर्पण किया जाता है तब उसका पृष्ठ भाग किसी (ताजे तवाने) अश्व की भांति प्रफुल्लित देख पड़ता है। इसने मानो स्वर्ग के भी सिर तक प्रतिशब्द उत्पन्न करते हुए गर्जना की है। २

जो कर्तृत्वशालि है, रुद्र और वसु ने जिसे प्रमुखता दी है जिसने वैभव जित लाया है और जिसे मृत्युभय नहीं है ऐसा यह हविर्दाता (अग्नि) (यहां) आकर विराजमान हुआ है। यह देव इस जगत में रहनेवाले सब मनुष्यों में प्रतिष्ठा प्राप्त करके किसी रथ की तरह बराबर सम्पत्ति ले आता रहता है। ३

वायुसे प्रेरित होते ही यह बड़ी गर्जना करके अपनी जिव्हारूप लपट साथ लिये हुए काष्ठ समुदाय में सहज रीति से जा बैठता है। ज्वलउज्वालाओं से परिवेष्टित और वार्धक्य पीड़ा से निर्मुक्त रहनेवाले हे अग्निदेव, जब आप काष्ठ समुदाय में अपना सामर्थ्य एकदम प्रकट करते हैं तब आपका मार्ग (धुए से) काला हो जाता है। ४

यह अग्नि, जिसकी दंष्ट्रा ज्वालामय है, वायु से प्रेरित होकर जब काष्ठ समुदाय में प्रवेश करता है तब, कोई शक्तिमान वृषभ जैसे अपने समूह में निर्भय संचार करता है वैसे ही, यह संचार करने लगता है। जब यह अविनाशी रजोलोक से अपने सामर्थ्य के द्वारा गमन करता है तब सम्पूर्ण चराचर सृष्टी को इस पक्षिराज का भय मालूम होने लगता है। ५ (२३)

सम्पत्ति की तरह सुन्दर रहनेवाले, सब लोगों को पुकारने में सुलभ लगनेवाले, और दिव्य लोक के पुरुषों को मित्र की भांति सुखदायक होनेवाले हे श्रेष्ठ हविर्दाता अग्निदेव, जब आप भृगुओं के अतिथि हुए तब उन्होंने मानव समुदाय में आपको सन्मान से जगह दी। ६

(भक्तों को) सब सम्पति अर्पण करनेवाले अग्निका मैं हवियों से पूजन करता हूं और इस कारण मुझे उत्कृष्ट सम्पति भी प्राप्त होती है। यह अग्नि (देवों को) हव्य पहुंचानेवाला है; इस लिए हव्य अर्पण करनेवाले सप्त ऋत्विज (सदा) यह इच्छा करते रहते हैं कि इस यज्ञार्ह अग्नि का यज्ञ में आगमन हो। ७

सामर्थ्य से जन्म पानेवाले और स्वामित्रों को आनन्द देनेवाले हे अग्निदेव, जो भक्त आपका स्तवन करते हैं उन्हें आज आप अक्षय सुख प्राप्त करा दें। हे शक्ति-पुत्र अग्ने, जो आपकी स्तुति गाते हैं उन सेवकों के लिए लोहे के नगर बनाकर आप संकट से उनकी रक्षा कीजिए। ८

हे दीप्तिमान अग्निदेव, आप स्तुति करनेवाले अपने भक्तों के कवच बन जाय; हे उदार देव, जो आपको हव्य अर्पण करते हैं उनके आप प्रत्यक्ष कल्याण ही हो जाय। अग्ने, आप अपने स्तोतृजनों की संकट से रक्षा करते ही रहते हैं; अतएव असंख्य स्तुति-स्तोत्रों से मंडित यह (अग्निदेव) प्रातःसमय शीघ्र ही (हमारे यज्ञ की ओर) पधारे। ९ (२४)

सूक्त ५९.

ऋषि-नोधा गौतम; ॥ देवता-अग्नि वैश्वानर ॥

हे अग्निदेव, अन्य सम्पूर्ण अग्नि आपकी शाखा हैं। सम्पूर्ण अमर (देवता) आपही में अत्यन्त सन्तोष पाते हैं। सम्पूर्ण विश्व के विषय में मित्रता धारण करनेवाले हे अग्निदेव, आप सम्पूर्ण पृथ्वी के मध्यबिन्दु (केन्द्र) हैं। १

अग्नि द्युलोक का मस्तक और पृथिवी की नाभि है; इसके सिवाय यह द्युलोक और भूलोक का अधिपति हुआ है। सम्पूर्ण विश्वके विषय में मित्रता धारण करनेवाले हे अग्निदेव, आप ऐसे श्रेष्ठ देव हैं, इसी कारण आपको देवताओं ने इस हेतु से निर्माण किया है, ताकि आप आर्यजनों की (मार्गदर्शक) ज्योति ही हों। २

जिस प्रकार सूर्य में निरन्तर रश्मियों का वास रहता है उसी प्रकार सम्पूर्ण विश्व के विषय में मित्रता धारण करनेवाले इस अग्नि में सब वैभव संस्थापित हुए हैं। जिन द्रव्यनिधियों का पर्वतों, वनस्पतियों अथवा मर्त्यलोक में निवास रहता है उन सब के आप अकेले ही राजा हैं ३

मानो इस उदार अग्नि के लिए ही द्युलोक और भूलोक इतने विस्तीर्ण हो गये हैं। इस प्रकाशमान सत्यबल से युक्त, सम्पूर्ण विश्व के विषय में मित्रभाव धारण करनेवाले और सब शूरों में श्रेष्ठ (अग्निदेव को) यह उपासक, किसी प्रज्ञावान पुरुष की तरह, बड़े बड़े असंख्य स्तोत्र अर्पण कर रहा है। ४

सम्पूर्ण विश्व के विषय में मित्रता धारण करनेवाले हे सर्वज्ञ अग्निदेव, आपकी महिमा इस विस्तीर्ण द्युलोक से भी अधिक है। आप सम्पूर्ण मानव समुदाय के राजा हैं। राक्षसों से युद्ध करके आपने देवताओं को सुरक्षित कर दिया। ५

वृत्र का वध करनेवाले जिस (अग्नि) का आश्रय सब लोग ढूँढते हैं उस सामर्थ्यवान देवकी महिमा (इस स्तोत्र में) मैंने गाई है। सम्पूर्ण विश्व के विषय में मित्रता रखनेवाले इस अग्निने दस्युओं का वध करके (उदकों के मार्ग का) प्रतिबन्ध नष्ट किया और शम्बर को छिन्नविच्छिन्न कर डाला। ६

सम्पूर्ण विश्व के विषय में मित्रता धारण करनेवाला और अपने सामर्थ्य से सर्वत्र वास करनेवाला यह पूज्य और दीप्तिमान अग्नि भारद्वाज कुल के पुरुषों में (आकर विराजमान हुआ है।) जिसकी वाणी मधुर परन्तु सत्यपरिप्लुत है उसी अग्नि की, शातवनेय और पुरुणीथ के यज्ञ में, सैकड़ों स्तोत्रों से स्तुति हुई है। ७ (२५)

सूक्त ६०.

ऋषि–नोधा गौतम ॥ देवता अग्नि ॥

जो (हमारा हव्य देवता ओं तक) पहुँचानेवाला है, वह मूर्तिमान कीर्ति ही है, यज्ञ की जो केवल ध्वजा ही है, जो यज्ञगृह में अत्यन्त रखने योग्य है, जो हमारा दूत बनकर देवताओं के पास तुरंत ही गमन करता है, जो दो बार जन्मता है, उत्कर्ष की भांति जो प्रशंसनीय है और जो केवल वैभव की मूर्ति ही है, ऐसे उस अग्नि को भृगुओं के लिए मातरिश्वा ले आया । १

हव्य ग्रहण करने के लिए उत्सुक होनेवाले (जो देव) और जो मर्त्यलोक के (मानव हैं वे) इस प्रकार उभयलोक इसकी आज्ञा मान्य करते रहते हैं (सम्पूर्ण लोगों के लिए) जो सन्मानपूर्वक सत्कार करने योग्य है, जो सम्पूर्ण मानवों में उनका राजा बन कर रहता है और जिसका कर्तृत्व विलक्षण है वही यह हविर्दाता सूर्योदय के पूर्व ही यहां आकर स्थानापन्न हुआ है । २

जिसे उसकी उपासना करनेवाले इस जगत् के मानव अपने संकटसमय में हवियों से प्रज्वलित करते आये हैं उसी (भक्तों के) हृदय में प्रकट होनेवाले और मधुर भाषण करनेवाले अग्नि को, हमारा यह हृदय–पूर्वक गाया हुआ नवीन स्तोत्र, जा मिले । ३

(हवियों के लिए) उत्सुकता रखनेवाला (सम्पूर्ण जगत को) पावन करनेवाला और जो (मानो) प्रत्यक्ष वैभवही है उसी हविर्दाता अग्नि की यहां इन मर्त्य–मानवों के समुदाय में स्थापना की गई है । अपने भक्तों के गृह में निवास करनेवाले और गृह में गृहाधिपति कहलाकर शोभनेवाले इस अग्नि ही की ओर सम्पूर्ण सम्पत्तियों की प्रभुता आज तक (निर्बाध रूप से) रहती आई है । ४

हे अग्निदेव, अश्व की पीठ पर जैसे (कोई साईस) हाथ फिराता है उसी प्रकार आप, जो सामर्थ्य प्राप्त करा देनेवाले हैं, (उन पर वायु झुलाते हुए हम गौतम–कुलोत्पन्न (आप के भक्त), सर्व सम्पत्तियों के स्वामी आप की, अनेक स्तोत्रों के द्वारा, स्तुति करते हैं । स्तुति स्तोत्र ही इन अग्निदेव का वैभव है । ये प्रातःकाल शीघ्रही यहां पधारें) । ५ (२६)

सूक्त ६१.

ऋषि–नोधा गोतम ॥ देवता इन्द्र ॥

प्रबल, वेगवान और श्रेष्ठ (इन्द्र को) सम्बोधन करके ही मैं यह हव्य तथा यह स्तवन अर्पण करता हूं । मैं उस स्तवनीय और निर्विघ्न रीति से संचार करनेवाले इन्द्र का ध्यान कर के ऐसी स्तुति (गाता हूं) कि जो उसे अर्पण करने योग्य है और ऐसे स्तोत्र गाता हूं कि जो आजतक उसके सन्मानार्थ रचे हुए स्तोत्रों में उत्कृष्ट है । १

सचमुच इस देवता को मानों मैं हव्य ही अर्पण कर रहा हूं । इस (शत्रु) विनाशक देवता को मैं एक सुन्दर स्तवन अर्पण करता हूं । इन्द्र जो (इस विश्व का) पुरातन प्रभु है उसके प्रीत्यर्थ (विद्वान उपासकोंने) अपना अन्तःकरण, मन, बुद्धि लगा कर (अनेकानेक) स्तोत्र गाये हैं । २

सचमुच जिसकी उपमा दूसरे स्तोत्रों को दी जानी चाहिए और जो प्रकाश का लाभ करा देनेवाला है वही स्तोत्र मैं उस (इन्द्र) की प्रसन्नता के लिए ही गाता हूं । उस अत्यन्त उदार और प्रज्ञाशाली देव का माहात्म्य मैं अपनी मनमानी सुन्दर स्तुतियों से वर्णन करना चाहता हूं । ३

जिस मनुष्य को रथ की आवश्यकता होती है उसके पास जैसे कोई बढ़ई रथ तैयार करके भेजता है उसी प्रकार सचमुच इस (इन्द्र के पास) मैं अपनी स्तुति भेजता हूं । उसी प्रकार सुन्दर सुन्दर स्तवन और ऐसा (एक स्तोत्र) जो सर्वत्र स्वीकार किया जायगा, भक्तों के स्तवनों का स्वीकार करनेवाले इस इन्द्रके पास मैं भेज देता हूं । ४

जैसे कोई अश्व सजाकर तैयार करते हैं वैसे ही मैं सचमुच, कीर्ति प्राप्त करने की इच्छा रखकर, स्ववाणी से इन्द्र के प्रीत्यर्थ एक स्तोत्र भली प्रकार से सजाता हूं । उसके द्वारा, मेरी यह इच्छा है कि, वीर्यशाली, सर्व दानशूरता के आगर, (शत्रुओं के) पुरों का विध्वंस करनेवाले और–जिनकी कीर्ति सर्वत्र गाते रहते हैं उन इन्द्र को अपनी प्रणति अर्पण की जाय । ५ (२७)

शत्रु पर) प्रहार करनेवाले जिस वज्र से शत्रुओं का संहार करते हुए इस बलशाली विश्वाधिपतिने वृत्र के मर्मस्थल ही की खबर ली वह उज्ज्वल और वधकर्म के लिए अत्यन्त उपयोगी वज्र सचमुच इस (इन्द्र के प्रीत्यर्थ ही त्वष्टा देव ने तैयार कर दिया । ६

सचमुच अपनी माता के किये हुए याग में ही इसने एकदम उत्कृष्ट पेय पान किया और हवियों का उत्कृष्ट (आस्वाद लिया) बलवान विष्णु भी (इसके लिए) ऐसे हवि हरण कर लाया जिनकी पाकसिद्धि उत्तम हुई थी। (उनका भोजन करके) अस्त्रविद्या में प्रवीण देवने,(उस कुमार के शरीर पर अपना तिरछा वज्र फेंककर, उसे छिन्न-भिन्न कर डाला)। ७

अहि का वध करनेवाले(इस इन्द्रकी प्रसन्नता के लिए ही स्त्रियों ने भी—स्वयं देवपत्नियों ने—एक सुन्दर स्तोत्र रचा) विस्तीर्ण द्युलोक और भूलोक का उसने आकलन किया है । परन्तु हां, उनकी महिमा आकलन करने का सामर्थ्य उनके शरीर में नहीं है ७

सचमुच इसकी महिमा द्युलोक भूलोक और अन्तरिक्ष, इन सब से भी अधिक है । स्वतेज से विराजमान होनेवाले इन्द्र का घर घर स्तवन होता रहता है । यह सामर्थ्यवान इन्द्र (शत्रुओं से लड़ने के लिए) उच्च घोष करके (एकदम) बढ़ गया । ८

जगत का शोषण करनेवाले वृत्र को इन्द्रने स्वसामर्थ्य से वज्र लेकर छिन्नभिन्न कर डाला । अपनी कीर्ति फैलाने के लिए दानकर्म की ओर मन की प्रवृत्ति रखनेवाले इस इन्द्र ने, धेनु की तरह प्रतिबन्ध में पड़े हुए जल प्रवाह के लिए मार्ग खोल दिया । १० (२८)

जिस समय अपने वज्र से उस (वृत्र को) जीता उस समय, यह उस सामर्थ्य का प्रताप ! कि नदियां आनन्द से दौड़ने लगीं । सम्पूर्ण विश्वपर आधिपत्य स्थापन करनेवाले और, हवि अर्पण करनेवाले भक्तों के विषय में दातृत्व बुद्धि धारण करनेवाले, और (शत्रुओं का) संहार करनेवाले इन्द्र ने ही तुर्वीति के लिए पानी को उतार दिया । ११

आप जगत् के प्रभु और सामर्थ्यवान् हैं, अतएव इस वृत्र पर निशाना लगा कर सत्वर वज्र फेंकिये। उदकों के प्रवाहों को पुनः प्रवाहित करने के लिए इन में गति उत्पन्न कीजिए और इस (वृत्र के शरीर की) प्रत्येक संधि पर आड़े वार कर के, किसी बैल की देह की संधियों की तरह, उनका विदारण कीजिए। १२

सचमुच वेग से (शत्रु पर टूट) पड़नेवाले इस देवता के, पुरातन काल से लेकर, पराक्रम गाने लगो। स्तुतियों के द्वारा यह शरण जाने योग्य है, क्योंकि लड़ाई करने के लिए अपने आयुध बढ़ा कर और [शत्रुओं को] मार कर वह उनका सत्यानाश कर डालता है। १३

सचमुच इसके जगत में अवतीर्ण होते ही इसके डर से अत्यन्त स्थिर प्रत्यक्ष पर्वत तक—यही क्यों, किन्तु भूलोक और द्युलोक भी कांपने लगते हैं। [इस सुन्दर देव के भक्त संरक्षण—सामर्थ्य की प्रशंसा करनेवाला नोधा एकाएक बहुतसा पराक्रम कर दिखलाने लगा। १४

सचमुच यह इन्द्र, जो विपुल (सम्पत्ति का) अकेला ही मालिक है, इन सकल वस्तुओं में से जिस जिस वस्तु की इच्छा करता गया वह वह उसे अर्पण होती गई। जब सूर्य से एतशा की यह स्पर्धा हुई, कि अश्व पर अच्छा बैठनेवाला कौन है, तब एतशा चूं कि सोमरस के उत्तम हवि अर्पण करनेवाला इन्द्र का भक्त था, इस कारण उसने एतशा की रक्षा की। १५

हे पीतवर्ण अश्वोंपर आरोहण करनेवाले इन्द्र, इस प्रकार गौतमों ने ये स्तोत्र इतनी सुन्दर रीति से, सचमुच आप ही के प्रीत्यर्थ बनाये हैं। इन स्तोत्रों पर आप सब प्रकार से कृपादृष्टि रखिये। स्तुति स्तोत्रों के वैभव से परिपूर्ण यह [इन्द्र] हमारे यहां प्रातःकाल शीघ्र ही आगमन करे। १६ (२९)

हिन्दी, मराठी, गुजराती और अङ्ग्रेजी चार
भाषाओं में अलग अलग प्रसिद्ध होनेवाला

वेदों का भाषांतर ।

प्रति मास में ६४ पृष्ठ; ३२ पृष्ठ संहिता [स्वर और पदपाठ सहित]
* * ३२ पृष्ठ भाषान्तर । * *

वर्ष १] || नवम्बर १९१२. | [संख्या ५

वार्षिक मूल्य डाकव्ययसहित रु. ४

हिन्दी

श्रुतिबोध.

सम्पादक,

रामचंद्र विनायक पटवर्धन, बी. ए. एल्. एल्. बी.
अच्युत बलवंत कोल्हटकर, बी. ए. एल्. एल्. बी.
दत्तो आप्पाजी तुळजापुरकर, बी. ए. एल्. एल्. बी.

स्थाणुरयं भारहारः किलाभूत् ।
अधीत्य वेदं न विजानाति योऽर्थम् ॥

[illegible]

'श्रुतिबोध' ऑफिस, ४७, कालकादेवी रोड, बम्बई.

प्रति अंकका मूल्य आठ आने.

इन्द्र. वृत्र-वृत्रमाता.

INDRA. VRITRA-VRITRA'S MOTHER.

मण्डल १, सूक्त ३२, ऋचा ९, पृष्ठ ६०.

Mandal 1, Sukta 32, Verse 9, Page 60.

॥ अथ प्रथमाष्टके पञ्चमोऽध्यायः ॥ ५ ॥

॥ ६२ ॥ गौतमो नोधा ऋषिः ॥ इन्द्रो देवता ॥ त्रिष्टुप् छन्दः ॥

(६२) प्र मन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत् ।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥ १ ॥
प्र वो महे महि नमो भरध्वमाङ्गूष्यं शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् ॥ २ ॥
इन्द्रस्याङ्गिरसां चेष्टौ विदत्सरमा तनयाय धासिम् ।
बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशन्त नरः ॥ ३ ॥
स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३नवग्वैः ।
सरण्युभिः फलिगमिन्द्र शक्र वलं रवेण दरयो दशग्वैः ॥ ४ ॥

॥ अथ प्रथमाष्टके पञ्चमोऽध्यायः ॥ ५ ॥

प्र । मन्महे । शवसानाय । शूषं । आंगूषं । गिर्वणसे । अंगिरस्वत् ।
सुवृक्तिऽभिः । स्तुवते । ऋग्मियाय । अर्चाम । अर्कं । नरे । विऽश्रुताय ॥ १ ॥
प्र । वः । महे । महि । नमः भरध्वं । आंगूष्यं । शवसानाय । साम । येन । नः ।
पूर्वे । पितरः । पदऽज्ञाः । अर्चंतः । अंगिरसः । गाः । अविंदन ॥ २ ॥ इंद्रस्य ।
अंगिरसां । च । इष्टौ । विदत् । सरमा । तनयाय । धासिं । बृहस्पतिः । भिनत् ।
अद्रिं । विदत् । गाः । सं । उस्रियाभिः । वावशंत । नरः ॥ ३ ॥ सः ।
सुऽस्तुभा । सः । स्तुभा । सप्त । विप्रैः । स्वरेण । अद्रिं । स्वर्यः । नवऽग्वैः ।
सरण्युऽभिः । फलिऽगं । इंद्र । शक्र । वलं । रवेण । दरयः । दशऽग्वैः ॥ ४ ॥

गृणानो अङ्गिरोभिर्दस्म वि वंरुषसा सूर्येण गोभिरन्धः ।
वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः ॥ ५ ॥ १ ॥

तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः ।
उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्यश्चतस्रः ॥ ६ ॥
द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः ।
भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः ॥ ७ ॥
सनाद्दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः ।
कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या ॥ ८ ॥
सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः ।
आमासु विद्दधिषे पक्वमन्तः पयः कृष्णासु रुशद्रोहिणीषु ॥ ९ ॥

गृणानः । अंगिरःऽभिः । दस्म । वि । वः । उषसा । सूर्येण । गोभिः । अंधः । वि । भूम्याः । अप्रथयः । इंद्र । सानु । दिवः । रजः । उपरं । अस्तभायः ॥ ५ ॥ १ ॥ तत् । ऊं इति । प्रयक्षऽतमं । अस्य । कर्म । दस्मस्य । चारुऽतमं । अस्ति । दंसः । उपऽह्वरे । यत् । उपराः । अपिन्वत् । मधुऽअर्णसः । नद्यः । चतस्रः ॥ ६ ॥ द्विता । वि । वव्रे । सनऽजा । सनीळे इति सऽनीळे । अयास्यः । स्तवमानेभिः । अर्कैः । भगः । न । मेने इति । परमे । विऽओमन् । अधारयत् । रोदसी इति । सुऽदंसाः ॥ ७ ॥ सनात् । दिवं । परि । भूम । विरूपे इति विऽरूपे । पुनःऽभुवा । युवती इति । स्वेभिः । एवैः । कृष्णेभिः । अक्ता । उषाः । रुशत्ऽभिः । वपुःऽभिः । आ । चरतः । अन्याऽअन्या ॥ ८ ॥ सनेमि । सख्यं । सुऽअपस्यमानः । सूनुः । दाधार । शवसा । सुऽदंसाः । आमासु । चित् । दधिषे । पक्वं । अंतरिति । पयः । कृष्णासु । रुशत् । रोहिणीषु ॥ ९ ॥

सनात्सनीळा अवनीरवाता व्रता रक्षन्ते अमृताः सहोभिः ।
पुरू सहस्रा जनयो न पत्नीर्दुवस्यन्ति स्वसारो अह्रयाणम् ॥ १० ॥ २ ॥

सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दस्म दद्रुः ।
पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन्मनीषाः ॥ ११ ॥
सनादेव तव रायो गभस्तौ न क्षीयन्ते नोप दस्यन्ति दस्म ।
द्युमाँ असि क्रतुमाँ इन्द्र धीरः शिक्षा शचीवस्तव नः शचीभिः ॥ १२ ॥
सनायते गोतम इन्द्र नव्यमतक्षद्ब्रह्म हरियोजनाय ।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १३ ॥३ ॥

॥ ६३ ॥ गौतमो नोधा ऋषिः ॥ इन्द्रो देवता ॥ त्रिष्टुप् छन्दः ॥

(६३) त्वं महाँ इन्द्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे धाः ।
यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळ्हासः किरणा नैजन् ॥ १ ॥

सनात् । सऽनीळाः । अवनीः । अवाताः । व्रता । रक्षंते । अमृताः । सहःऽभिः । पुरु । सहस्रा । जनयः । न । पत्नीः । दुवस्यंति । स्वसारः । अह्रयाणं ॥ १० ॥ २ ॥

सनाऽयुवः । नमसा । नव्यः । अर्कैः । वसुऽयवः । मतयः । दस्म । दद्रुः । पतिं । न । पत्नीः । उशतीः । उशंतं । स्पृशंति । त्वा । शवसाऽवन् । मनीषाः ॥ ११ ॥ सनात् । एव । तव । रायः । गभस्तौ । न । क्षीयंते । न । उप । दस्यंति । दस्म । द्युऽमान् । असि । क्रतुऽमान् । इंद्र । धीरः । शिक्ष । शचीऽवः । तव । नः । शचीभिः ॥ १२ ॥ सनाऽयते । गोतमः । इंद्र । नव्यं । अतक्षत् । ब्रह्म । हरिऽयोजनाय । सुऽनीथाय । नः । शवसान । नोधाः प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ १३ ॥ ३ ॥

त्वं । महान् । इंद्र । यः । ह । शुष्मैः । द्यावा । जज्ञानः । पृथिवी इति । अमे । धाः । यत् । ह । ते । विश्वा । गिरयः । चित् । अभ्वा । भिया । दृळ्हासः । किरणाः । न । एजन् ॥ १ ॥

आ यद्धरी इन्द्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात् ।
येनाविहर्यतक्रतो अमित्रान्पुर इष्णासि पुरुहूत पूर्वीः ॥ २ ॥
त्वं सत्य इन्द्र धृष्णुरेतान्त्वमृभुक्षा नर्यस्त्वं षाट् ।
त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन् ॥ ३ ॥
त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद्वज्रिन्वृषकर्मन्नुभ्नाः ।
यद्ध शूर वृषमणः पराचैर्वि दस्यूँर्योनावकृतो वृथाषाट् ॥ ४ ॥
त्वं ह त्यदिन्द्रारिषण्यन्दृळ्हस्य चिन्मर्तानामजुष्टौ ।
व्यस्मदा काष्ठा अर्वते वर्घनेव वज्रिञ्छ्नथिह्यमित्रान् ॥ ५ ॥ ४ ॥
त्वां ह त्यदिन्द्रार्णसातौ स्वर्मीळ्हे नर आजा हवन्ते ।
तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ॥ ६ ॥

आ । यत् । हरी इति । इंद्र । विऽव्रता । वेः । आ । ते । वज्रं । जरिता । बाह्वोः । धात् । येन । अविहर्यतक्रतो इत्यविहर्यतऽक्रतो । अमित्रान् । पुरः । इष्णासि । पुरुऽहूत । पूर्वीः ॥ २ ॥ त्वं । सत्यः । इंद्र । धृष्णुः । एतान् । त्वं । ऋभुक्षाः । नर्यः । त्वं । षाट् । त्वं । शुष्णं । वृजने । पृक्षे । आणौ । यूने । कुत्साय । द्युऽमते । सचा । अहन् ॥ ३ ॥ त्वं । ह । त्यत् । इंद्र । चोदीः । सखा । वृत्रं । यत् । वज्रिन् । वृषऽकर्मन् । उभ्नाः । यत् । ह । शूर । वृषऽमनः । पराचैः । वि । दस्यून् । योनौ । अकृतः । वृथाषाट् ॥ ४ ॥ त्वं । ह । त्यत् । इंद्र । अरिषण्यन् । दृळ्हस्य । चित् । मर्तानां । अजुष्टौ । वि । अस्मत् । आ । काष्ठाः । अर्वते । वः । घनाऽइव । वज्रिन् । श्नथिहि । अमित्रान् ॥ ५ ॥ ४ ॥ त्वां । ह । त्यत् । इंद्र । अर्णऽसातौ । स्वःऽमीळ्हे । नरः । आजा । हवंते । तव । स्वधाऽवः । इयं । आ । सऽमर्य । ऊतिः । वाजेषु । अतसाय्या । भूत् ॥ ६ ॥

त्वं ह त्यदिन्द्र सप्त युध्यन्पुरो वज्रिन्पुरुकुत्साय दर्दः ।
बर्हिर्न यत्सुदासे वृथा वर्गंहो राजन्वरिवः पूरवे कः ॥ ७ ॥
त्वं त्यां न इन्द्र देव चित्रामिषमापो न पीपयः परिज्मन् ।
यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै ॥ ८ ॥
(अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता) नमसा हरिभ्याम् ।
सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ९ ॥ ५ ॥

॥ ६४ ॥ गोतमो नोधा ऋषिः ॥ मरुतो देवता ॥ पञ्चदशी त्रिष्टुप्, शिष्टा जगत्यः ॥

(६४) वृष्णे शर्धाय सुमखाय वेधसे नोधः सुवृक्तिं प्र भरा मरुद्भ्यः ।
अपो न धीरो मनसा सुहस्त्यो गिरः समञ्जे विदथेष्वाभुवः ॥ १ ॥

त्वं । ह । त्यत् । इंद्र । सप्त । युध्यन् । पुरः । वज्रिन् । पुरुऽकुत्साय । दर्दरिति दर्दः । बर्हिः । न । यत् । सुऽदासे । वृथा । वर्क् । अंहोः । राजन् । वरिवः । पूरवे । करिति कः ॥ ७ ॥ त्वं । त्यां । नः । इंद्र । देव । चित्रां । इषं । आपः । न । पीपयः । परिऽज्मन । ययां । शूर । प्रति । अस्मभ्यं । यंसि । त्मनं । ऊर्जं । न । विश्वधं । क्षरध्यै ॥ ८ ॥ अकारि । ते । इंद्र । गोतमेभिः । ब्रह्माणि । आऽउक्ता । नमसा । हरिऽभ्यां । सुऽपेशसं । वाजं । आ । भर । नः । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ ९ ॥ ५ ॥

वृष्णे । शर्धाय । सुऽमखाय । वेधसे । नोधः । सुऽवृक्तिं । प्र । भर । मरुत्ऽभ्यः । अपः । न । धीरः । मनसा । सुऽहस्त्यः । गिरः । सं । अंजे । विदथेषु । आऽभुवः ॥ १ ॥

ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः ।
पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः ॥ २ ॥
युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव ।
दृळ्हा चिद्विश्वा भुवनानि पार्थिवा प्र च्यावयन्ति दिव्यानि मज्मना ॥ ३ ॥
चित्रैरञ्जिभिर्वपुषे व्यञ्जते वक्षःसु रुक्माँ अधि येतिरे शुभे ।
अंसेष्वेषां नि मिमृक्षुरृष्टयः साकं जज्ञिरे स्वधया दिवो नरः ॥ ४ ॥
ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिरक्रत ।
दुहन्त्यूधर्दिव्यानि धूतयो भूमिं पिन्वन्ति पयसा परिज्रयः ॥ ५ ॥ ६ ॥

पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।
अत्यं न मिहे वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितम् ॥ ६ ॥

ते । जज्ञिरे । दिवः । ऋष्वासः । उक्षणः । रुद्रस्य । मर्याः । असुराः । अरेपसः । पावकासः । शुचयः । सूर्याःऽइव । सत्वानः । न । द्रप्सिनः । घोरऽवर्पसः ॥ २ ॥ युवानः । रुद्राः । अजराः । अभोक्ऽहनः । ववक्षुः । अध्रिऽगावः । पर्वताःऽइव । दृळ्हा । चित् । विश्वा । भुवनानि । पार्थिवा । प्र । च्यवयंति । दिव्यानि । मज्मना ॥ ३ ॥ चित्रैः । अंजिऽभिः । वपुषे । वि । अंजते । वक्षःऽसु । रुक्मान् । अधि । येतिरे । शुभे । अंसेषु । एषां । नि । मिमृक्षुः । ऋष्टयः । साकं । जज्ञिरे । स्वधया । दिवः । नरः ॥ ४ ॥ ईशानऽकृतः । धुनयः । रिशादसः । वातान् । विऽद्युतः । तविषीभिः । अक्रत । दुहंति । ऊधः । दिव्यानि । धूतयः । भूमिं । पिन्वंति । पयसा । परिऽज्रयः ॥ ५ ॥ ६ ॥ पिन्वंति । अपः । मरुतः । सुऽदानवः । पयः । घृतऽवत् । विदथेषु । आऽभुवः । अत्यं । न । मिहे । वि । नयंति । वाजिनं । उत्सं । दुहंति । स्तनयंतं । अक्षितं ॥ ६ ॥

महिषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो रघुष्यदः ।
मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वम् ॥ ७ ॥
सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो विश्ववेदसः ।
क्षपो जिन्वन्तः पृषतीभिर्ऋष्टिभिः समित्सबाधः शवसाहिमन्यवः ॥ ८ ॥
रोदसी आ वदता गणश्रियो नृषाचः शूराः शवसाहिमन्यवः ।
आ वन्धुरेष्वमतिर्न दर्शता विद्युन्न तस्थौ मरुतो रथेषु वः ॥ ९ ॥
विश्ववेदसो रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः ।
अस्तार इषुं दधिरे गभस्त्योरनन्तशुष्मा वृषखादयो नरः ॥ १० ॥ ७ ॥
हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आपथ्यो न पर्वतान् ।
मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः ॥ ११ ॥

महिषासः । मायिनः । चित्रऽभानवः । गिरयः । न । स्वऽतवसः । रघुऽस्यदः । मृगाःऽइव । हस्तिनः । खादथ । वना । यत् । आरुणीषु । तविषीः । अयुग्ध्वं ॥ ७ ॥ सिंहाःऽइव । नानदति । प्रऽचेतसः । पिशाःऽइव । सुऽपिशः । विश्वऽवेदसः । क्षपः । जिन्वंतः । पृषतीभिः । ऋष्टिऽभिः । सं । इत् । सऽबाधः । शवसा । अहिऽमन्यवः ॥ ८ ॥ रोदसी इति । आ । वदत । गणऽश्रियः । नृऽसाचः । शूराः । शवसा । अहिऽमन्यवः । आ । वंधुरेषु । अमतिः । न । दर्शता । विऽद्युत् । न । तस्थौ । मरुतः । रथेषु । वः ॥ ९ ॥ विश्वऽवेदसः । रयिऽभिः । संऽओकसः । संऽमिश्लासः । तविषीभिः । विऽरप्शिनः । अस्तारः । इषुं । दधिरे । गभस्त्योः । अनंतऽशुष्माः । वृषऽखादयः । नरः ॥ १० ॥ हिरण्ययेभिः । पविऽभिः । पयःऽवृधः । उत् । जिघ्नंते । आऽपथ्यः । न । पर्वतान् । मखाः । अयासः । स्वऽसृतः । ध्रुवऽच्युतः । दुध्रऽकृतः । मरुतः । भ्राजत्ऽऋष्टयः ॥ ११ ॥

घृषुं पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।
रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥ १२ ॥
प्र नू स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत ।
अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति ॥ १३ ॥
चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन ।
धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ॥ १४ ॥
नू ष्ठिरं मरुतो वीरवन्तमृतीषाहं रयिमस्मासु धत्त ।
सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १५ ॥८॥ ११ ॥

घृषुं । पावकं । वनिनं । विऽचर्षणिं । रुद्रस्य । सूनुं । हवसा । गृणीमसि । रजःऽतुरं । तवसं । मारुतं । गणं । ऋजीषिणं । वृषणं । सश्चत । श्रिये ॥ १२ ॥ प्र । नु । सः । मर्तः । शवसा । जनान् । अति । तस्थौ । वः । ऊती । मरुतः । यं । आवत । अर्वत्ऽभिः । वाजं । भरते । धना । नृऽभिः । आऽपृच्छ्यं । क्रतुं । आ । क्षेति । पुष्यति ॥ १३ ॥ चर्कृत्यं । मरुतः । पृत्ऽसु । दुस्तरं । द्युऽमन्तं । शुष्मं । मघवत्ऽसु । धत्तन । धनऽस्पृतं । उक्थ्यं । विश्वऽचर्षणिं । तोकं । पुष्येम । तनयं । शतं । हिमाः ॥ १४ ॥ नु । स्थिरं । मरुतः । वीरऽवन्तं । ऋतिऽसहं । रयिं । अस्मासु । धत्त । सहस्रिणं । शतिनं । शूशुऽवांसं । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ १५ ॥ ८ ॥ ११ ॥

॥ द्वादशोऽनुवाकः ॥

६५ ॥ शक्तिपुत्रः पराशर ऋषिः ॥ अग्निर्देवता ॥ द्विपदा विराट् छन्दः ॥

॥ ६५ ॥ पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तम् ।
सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन्विश्वे यजत्राः ॥ १ ॥
ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिर्द्यौर्न भूम ।
वर्धन्तीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातम् ॥ २ ॥
पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शंभु ।
अत्यो नाज्मन्त्सर्गप्रतक्तः सिन्धुर्न क्षोदः क ईं वराते ॥ ३ ॥
जामिः सिन्धूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति ।
यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥ ४ ॥
श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत् ।
सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः ॥ ५ ॥ ९ ॥

पश्वा । न । तायुं । गुहा । चतंतं । नमः । युजानं । नमः । वहंतं । सऽजोषाः । धीराः । पदैः । अनु । ग्मन । उप । त्वा । सीदन् । विश्वे । यजत्राः ॥ १ ॥ ऋतस्य । देवाः । अनु । व्रता । गुः । भुवत् । परिष्टिः । द्यौः । न । भूम । वर्धंति । ईं । आपः । पन्वा । सुऽशिश्विं । ऋतस्य । योना । गर्भे । सुऽजातं ॥ २ ॥ पुष्टिः । न । रण्वा । क्षितिः । न । पृथ्वी । गिरिः । न । भुज्म । क्षोदः । न । शंऽभु । अत्यः । न । अज्मन् । सर्गऽप्रतक्तः । सिंधुः । न । क्षोदः । कः । ईं । वराते ॥ ३ ॥ जामिः । सिंधूनां । भ्राताऽइव । स्वस्रां । इभ्यान् । न । राजा । वनानि । अत्ति । यत् । वातऽजूतः । वना । वि । अस्थात् । अग्निः । ह । दाति । रोम । पृथिव्याः ॥४॥ श्वसिति । अप्ऽसु । हंसः । न । सीदन् । क्रत्वा । चेतिष्ठः । विशां । उषःऽभुत् । सोमः । न । वेधाः । ऋतऽप्रजातः । पशुः । न । शिश्वा । विऽभुः । दूरेऽभाः ॥ ५ ॥ ९ ॥

॥ ६६ ॥ शक्तिपुत्रः पराशर ऋषिः ॥ अग्निर्देवता ॥ द्विपदा विराट् छन्दः ॥

॥ ६६ ॥ रयिर्न चित्रा सूरो न संदृगायुर्न प्राणो नित्यो न सूनुः ।
तक्वा न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा ॥ १ ॥
दाधार क्षेममोको न रण्वो यवो न पक्वो जेता जनानाम् ।
ऋषिर्न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो दधाति ॥ २ ॥
दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै ।
चित्रो यदभ्राट् श्वेतो न विक्षु रथो न रुक्मी त्वेषः समत्सु ॥ ३ ॥
सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका ।
यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम् ॥ ४ ॥
तं वश्चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम् ।
सिन्धुर्न क्षोदः प्र नीचीरैनोन्नवन्त गावः स्वर्दृशीके ॥ ५ ॥ १० ॥

रयिः । न । चित्रा । सूरः । न । संऽदृक् । आयुः । न । प्राणः । नित्यः । न । सूनुः ।
तक्वा । न । भूर्णिः । वना । सिसक्ति । पयः । न । धेनुः । शुचिः । विभाऽवा ॥ १ ॥
दाधार । क्षेमं । ओकः । न । रण्वः । यवः । न । पक्वः । जेता । जनानां । ऋषिः । न ।
स्तुभ्वा । विक्षु । प्रऽशस्तः । वाजी । न । प्रीतः । वयः । दधाति ॥ २ ॥ दुरोकऽशोचिः ।
क्रतुः । न । नित्यः । जायाऽइव । योनौ । अरं । विश्वस्मै । चित्रः । यत् । अभ्राट् ।
श्वेतः । न । विक्षु । रथः । न । रुक्मी । त्वेषः । समत्ऽसु ॥ ३ ॥ सेनाऽइव ।
सृष्टा । अमं । दधाति । अस्तुः । न । दिद्युत् । त्वेषऽप्रतीका । यमः । ह । जातः । यमः ।
जनिऽत्वं । जारः । कनीनां । पतिः । जनीनां ॥ ४ ॥ तं । वः । चराथा । वयं ।
वसत्या । अस्तं । न । गावः । नक्षन्ते । इद्धं । सिन्धुः । न । क्षोदः । प्र । नीचीः ।
ऐनोत् । नवन्त । गावः । स्वः । दृशीके ॥ ५ ॥ १० ॥

॥ ६७ ॥ शक्तिपुत्रः पराशर ऋषिः ॥ अग्निर्देवता ॥ द्विपदा विराट् छन्दः ॥

॥ ६७ ॥ वनेषु जायुर्मर्तेषु मित्रो वृणीते श्रुष्टिं राजेवाजुर्यम् ।
क्षेमो न साधुः क्रतुर्न भद्रो भुवत्स्वाधीर्होता हव्यवाट् ॥ १ ॥
हस्ते दधानो नृम्णा विश्वान्यमे देवान्धाद्गुहा निषीदन् ।
विदन्तीमत्र नरो धियंधा हृदा यत्तष्टान्मन्त्राँ अशंसन् ॥ २ ॥
अजो न क्षां दाधार पृथिवीं तस्तम्भ द्यां मन्त्रेभिः सत्यैः ।
प्रिया पदानि पश्वो नि पाहि विश्वायुरग्ने गुहा गुहं गाः ॥ ३ ॥
य ईं चिकेत गुहा भवन्तमा यः ससाद धारामृतस्य ।
वि ये चृतन्त्यृता सपन्त आदिद्वसूनि प्र ववाचास्मै ॥ ४ ॥
वि यो वीरुत्सु रोधन्महित्वोत प्रजा उत प्रसूष्वन्तः ।
चित्तिरपां दमे विश्वायुः सद्मेव धीराः संमाय चक्रुः ॥ ५ ॥ ११ ॥

वनेषु । जायुः । मर्तेषु । मित्रः । वृणीते । श्रुष्टिं । राजाऽइव । अजुर्यं । क्षेमः । न । साधुः । क्रतुः । न । भद्रः । भुवत् । सुऽआधीः । होता । हव्यऽवाट् ॥ १ ॥ हस्ते । दधानः । नृम्णा । विश्वानि । अमे । देवान् । धात् । गुहा । निऽसीदन् । विदंति । ईं । अत्र । नरः । धियंऽधाः । हृदा । यत् । तष्टान् । मंत्रान् । अशंसन् ॥ २ ॥ अजः । न । क्षां । दाधार । पृथिवीं । तस्तंभ । द्यां । मंत्रेभिः । सत्यैः । प्रिया । पदानि । पश्वः । नि । पाहि । विश्वऽआयुः । अग्ने । गुहा । गुहं । गाः ॥ ३ ॥ यः । ईं । चिकेत । गुहा । भवंतं । आ । यः । ससाद । धारां । ऋतस्य । वि । ये । चृतंति । ऋता । सपंतः । आत् । इत् । वसूनि । प्र । ववाच । अस्मै ॥ ४ ॥ वि । यः । वीरुत्ऽसु । रोधत् । महिऽत्वा । उत । प्रऽजाः । उत । प्रऽसूषु । अंतरिति । चित्तिः । अपां । दमे । विश्वऽआयुः । सद्मऽइव । धीराः । संऽमाय । चक्रुः ॥ ५ ॥ ११ ॥

॥ ६८ ॥ शाक्तिपुत्रः पराशर ऋषिः ॥ अग्निर्देवता ॥ द्विपदा विराट् छन्दः ॥

॥ ६८ ॥ श्रीणन्नुप स्थाद्दिवं भुरण्युः स्थातुश्चरथमक्तून्व्यूर्णोत् ।
परि यदेषामेको विश्वेषां भुवद्देवो देवानां महित्वा ॥ १ ॥
आदित्ते विश्वे क्रतुं जुषन्त शुष्काद्यद्देव जीवो जनिष्ठाः ।
भजन्त विश्वे देवत्वं नाम ऋतं सपन्तो अमृतमेवैः ॥ २ ॥
ऋतस्य प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः ।
यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकित्वान्रयिं दयस्व ॥ ३ ॥
होता निषत्तो मनोरपत्ये स चिन्न्वासां पती रयीणां ।
इच्छन्त रेतो मिथस्तनूषु सं जानत स्वैर्दक्षैरमूराः ॥ ४ ॥
पितुर्न पुत्राः क्रतुं जुषन्त श्रोषन्ये अस्य शासं तुरासः ।
वि राय और्णोद्दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः ॥ ५ ॥ १२ ॥

श्रीणन् । उप । स्थात् । दिवं । भुरण्युः । स्थातुः । चरथं । अक्तून् । वि । ऊर्णोत् । परि । यत् । एषां । एकः । विश्वेषां । भुवत् । देवः । देवानां । महिऽत्वा ॥ १ ॥ आत् । इत् । ते । विश्वे । क्रतुं । जुषंत । शुष्कात् । यत् । देव । जीवः । जनिष्ठाः । भजंत । विश्वे । देवऽत्वं । नाम । ऋतं । सपंतः । अमृतं । एवैः ॥ २ ॥ ऋतस्य । प्रेषाः । ऋतस्य । धीतिः । विश्वऽआयुः । विश्वे । अपांसि । चक्रुः । यः । तुभ्यं । दाशात् । यः । वा । ते । शिक्षात् । तस्मै । चिकित्वान् । रयिं । दयस्व ॥ ३ ॥ होता । निऽसत्तः । मनोः । अपत्ये । सः । चित् । नु । आसां । पतिः । रयीणां । इच्छंत । रेतः । मिथः । तनूषु । सं । जानत । स्वैः । दक्षैः । अमूराः ॥ ४ ॥ पितुः । न । पुत्राः । क्रतुं । जुषंत । श्रोषन् । ये । अस्य । शासं । तुरासः । वि । रायः । और्णोत् । दुरः । पुरुऽक्षुः । पिपेश । नाकं । स्तृभिः । दमूनाः ॥ ५ ॥ १२ ॥

॥ ६९ ॥ शक्तिपुत्रः पराशर ऋषिः ॥ अग्निर्देवता ॥ द्विपदा विराट् छन्दः ॥

॥६९॥ शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः ।
परि प्रजातः क्रत्वा बभूथ भुवो देवानां पिता पुत्रः सन् ॥ १ ॥
वेधा अदृप्तो अग्निर्विजानन्नूधर्न गोनां स्वाद्मा पितूनाम् ।
जने न शेव आहूर्यः सन्मध्ये निषत्तो रण्वो दुरोणे ॥ २ ॥
पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत् ।
विशो यदह्वे नृभिः सनीळा अग्निर्देवत्वा विश्वान्यश्याः ॥ ३ ॥
नकिष्ट एता व्रता मिनन्ति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ ।
तत्तु ते दंसो यदहन्त्समानैर्नृभिर्यद्युक्तो विवे रपांसि ॥ ४ ॥
उषो न जारो विभावोस्रः संज्ञातरूपश्चिकेतदस्मै ।
त्मना वहन्तो दुरो व्यृण्वन्नवन्त विश्वे स्वर्दृशीके ॥ ५ ॥ १३ ॥

शुक्रः । शुशुक्वान् । उषः । न । जारः । पप्रा । समीची इति सम्ऽईची । दिवः । न । ज्योतिः । परि । प्रऽजातः । क्रत्वा । बभूथ । भुवः । देवानां । पिता । पुत्रः । सन् ॥ १ ॥ वेधा । अदृप्तः । अग्निः । विऽजानन् । ऊधः । न । गोनां । स्वाद्म । पितूनां । जने । न । शेवः । आऽहूर्यः । सन् । मध्ये । निऽसत्तः । रण्वः । दुरोणे ॥ २ ॥ पुत्रः । न । जातः । रण्वः । दुरोणे । वाजी । न । प्रीतः । विशः । वि । तारीत् । विशः । यत् । अह्वे । नृऽभिः । सऽनीळाः । अग्निः । देवऽत्वा । विश्वानि । अश्याः ॥ ३ ॥ नकिः । ते । एता । व्रता । मिनंति । नृऽभ्यः । यत् । एभ्यः । श्रुष्टिं । चकर्थ । तत् । तु । ते । दंसः । यत् । अहन् । समानैः । नृऽभिः । यत् । युक्तः । विवेः । रपांसि ॥ ४ ॥ उषः । न । जारः । विभाऽवा । उस्रः । संज्ञातऽरूपः । चिकेतत् । अस्मै । त्मना । वहंत । दुरः वि । ऋण्वन् । नवंत । विश्वे । स्वः । दृशीके ॥५॥१३॥

॥ ७० ॥ शक्तिपुत्रः पराशर ऋषिः ॥ अग्निर्देवता ॥ द्विपदा विराट् छन्दः ॥

॥ ७० ॥ वनेम पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः ।
आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म ॥ १ ॥
गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथाम् ।
अद्रौ चिदस्मा अन्तर्दुरोणे विशां न विश्वो अमृतः स्वाधीः ॥ २ ॥
स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः ।
एता चिकित्वो भूमा नि पाहि देवानां जन्म मर्तांश्च विद्वान् ॥ ३ ॥
वर्धान्यं पूर्वीः क्षपो विरूपाः स्थातुश्च रथमृतप्रवीतम् ।
अराधि होता स्वर्निषत्तः कृण्वन्विश्वान्यपांसि सत्या ॥ ४ ॥
गोषु प्रशस्तिं वनेषु धिषे भरन्त विश्वे बलिं स्वर्णः ।
वि त्वा नरः पुरुत्रा सपर्यन्पितुर्न जिव्रेर्वि वेदो भरन्त ॥ ५ ॥
साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु ॥ ६ ॥ १४ ॥

वनेम । पूर्वीः । अर्यः । मनीषा । अग्निः । सुऽशोकः । विश्वानि । अश्याः । आ । दैव्यानि । व्रता । चिकित्वान् । आ । मानुषस्य । जनस्य । जन्म ॥ १ ॥ गर्भः । यः । अपां । गर्भः । वनानां । गर्भः । च । स्थातां । गर्भः । चरथां । अद्रौ । चित् । अस्मै । अंतः । दुरोणे । विशां । न । विश्वः । अमृतः । सुऽआधीः ॥ २ ॥ सः । हि । क्षपाऽवान् । अग्निः । रयीणां । दाशत् । यः । अस्मै । अरं । सुऽउक्तैः । एता । चिकित्वः । भूम । नि । पाहि । देवानां । जन्म । मर्तान् । च । विद्वान् ॥ ३ ॥ वर्धान् । यं । पूर्वीः । क्षपः । विऽरूपाः । स्थातुः । च । रथं । ऋतऽप्रवीतं । अराधि । होता । स्वः । निऽसत्तः । कृण्वन् । विश्वानि । अपांसि । सत्या ॥ ४ ॥ गोषु । प्रऽशस्ति । वनेषु । धिषे । भरंत । विश्वे । बलिं । स्वः । नः । वि । त्वा । नरः । पुरुऽत्रा । सपर्यन् । पितुः । न । जिव्रेः । वि । वेदः । भरंत ॥ ५ ॥ साधुः । न । गृध्नुः । अस्ताऽइव । शूरः । याताऽइव । भीमः । त्वेषः । समत्ऽसु ॥ ६ ॥ १४ ॥

॥ ७१ ॥ शक्तिपुत्रः पराशर ऋषिः ॥ अग्निर्देवता ॥ त्रिष्टुप् छन्दः ॥

॥ ७१ ॥ उप प्र जिन्वन्नुशतीरुशन्तं पतिं न नित्यं जनयः सनीळाः ।
स्वसारः श्यावीमरुषीमजुष्रञ्चित्रमुच्छन्तीमुषसं न गावः ॥ १ ॥
वीळु चिद्दृळ्हा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण ।
चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः ॥ २ ॥
दधन्नृतं धनयन्नस्य धीतिमादिदर्यो दिधिष्वो३ विभृत्राः ।
अतृष्यन्तीरपसो यन्त्यच्छा देवाञ्जन्म प्रयसा वर्धयन्तीः ॥ ३ ॥
मथीद्यदीं विभृतो मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत् ।
आदीं राज्ञे न सहीयसे सचा सन्ना दूत्यं१ भृगवाणो विवाय ॥ ४ ॥
महे यत्पित्र ईं रसं दिवे करव त्सरत्पृशन्यश्चिकित्वान् ।
सृजदस्ता धृषता दिद्युमस्मै स्वायां देवो दुहितरि त्विषिं धात् ॥ ५ ॥ १५ ॥

उप । प्र । जिन्वन् । उशतीः । उशन्तं । पतिं । न । नित्यं । जनयः । सऽनीळाः । स्वसारः । श्यावीं । अरुषीं । अजुष्रन् । चित्रं । उच्छन्तीं । उषसं । न । गावः ॥ १ ॥ वीळु । चित् । दृळ्हा । पितरः । नः । उक्थैः । अद्रिं । रुजन् । अङ्गिरसः । रवेण । चक्रुः । दिवः । बृहतः । गातुं । अस्मे इति । अहः । स्वः । विविदुः । केतुं । उस्राः ॥ २ ॥ दधन् । ऋतं । धनयन् । अस्य । धीतिं । आत् । इत् । अर्यः । दिधिष्वः । विऽभृत्राः । अतृष्यन्तीः । अपसः । यन्ति । अच्छ । देवान् । जन्म । प्रयसा । वर्धयन्तीः ॥ ३ ॥ मथीत् । यत् । ईं । विऽभृतः । मातरिश्वा । गृहेऽगृहे । श्येतः । जेन्यः । भूत् । आत् । ईं । राज्ञे । न । सहीयसे । सचा । सन् । आ । दूत्यं । भृगवाणः । विवाय ॥ ४ ॥ महे । यत् । पित्रे । ईं । रसं । दिवे । करः । अव । त्सरत् । पृशन्यः । चिकित्वान् । सृजत् । अस्ता । धृषता । दिद्युं । अस्मै । स्वायां । देवः । दुहितरि । त्विषिं । धात् ॥ ५ ॥ १५ ॥

स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो अनु द्यून् ।
वर्धो अग्ने वयो अस्य द्विबर्हा यासद्राया सरथं यं जुनासि ॥ ६ ॥
अग्निं विश्वा अभि पृक्षः सचन्ते समुद्रं न स्रवतः सप्त यह्वीः ।
न जामिभिर्वि चिकिते वयो नो विदा देवेषु प्रमतिं चिकित्वान् ॥ ७ ॥
आ यदिषे नृपतिं तेज आनद् शुचि रेतो निषिक्तं द्यौरभीके ।
अग्निः शर्धमनवद्यं युवानं स्वाध्यं जनयत्सूदयच्च ॥ ८ ॥
मनो न योऽध्वनः सद्य एत्येकः सत्रा सूरो वस्व ईशे ।
राजाना मित्रावरुणा सुपाणी गोषु प्रियममृतं रक्षमाणा ॥ ९ ॥
मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन् ।
नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि ॥ १० ॥ १६ ॥

स्वे । आ । यः । तुभ्यं । दमे । आ । विऽभाति । नमः । वा । दाशात् । उशतः । अनु । द्यून् । वर्धो इति । अग्ने । वयः । अस्य । द्विऽबर्हाः । यासत् । राया । सऽरथं । यं । जुनासि ॥ ६ ॥ अग्निं । विश्वाः । अभि । पृक्षः । सचंते । समुद्रं । न । स्रवतः । सप्त । यह्वीः । न । जामिऽभिः । वि । चिकिते । वयः । नः । विदाः । देवेषु । प्रऽमतिं । चिकित्वान् ॥ ७ ॥ आ । यत् । इषे । नृऽपतिं । तेजः । आनद् । शुचि । रेतः । निऽसिक्तं । द्यौः । अभीके । अग्निः । शर्धं । अनवद्यं । युवानं । सुऽआध्यं । जनयत् । सूदयत् । च ॥ ८ ॥ मनः । न । यः । अध्वनः । सद्यः । एति । एकः । सत्रा । सूरः । वस्वः । ईशे । राजाना । मित्रावरुणा । सुपाणी इति सुऽपाणी । गोषु । प्रियं । अमृतं । रक्षमाणा ॥ ९ ॥ मा । नः । अग्ने । सख्या । पित्र्याणि । प्र । मर्षिष्ठाः । अभि । विदुः । कविः । सन् । नभः । न । रूपं । जरिमा । मिनाति । पुरा । तस्याः । अभिऽशस्तेः । अधि । इहि ॥ १० ॥ १६ ॥

॥ ७२ ॥ शक्तिपुत्रः पराशर ऋषिः ॥ अग्निर्देवता ॥ त्रिष्टुप् छन्दः ॥

॥ ७२ ॥ नि काव्या॑ वे॒धसः॒ शश्व॑तस्क॒र्हस्ते॒ दधा॑नो॒ नर्या॑ पु॒रूणि॑ ।
अ॒ग्निर्भु॑वद्रयि॒पती॑ रयी॒णां स॒त्रा च॑क्रा॒णो अ॒मृता॑नि॒ विश्वा॑ ॥ १ ॥
अ॒स्मे व॒त्सं परि॒ षन्तं॒ न वि॑न्दन्नि॒च्छन्तो॒ विश्वे॑ अ॒मृता॒ अमू॑राः ।
श्र॒म॒युवः॑ पद॒व्यो॑ धियं॒धास्त॒स्थुः प॒दे प॑र॒मे चार्व॒ग्नेः ॥ २ ॥
ति॒स्रो यद॑ग्ने श॒रद॒स्त्वामिच्छुचिं॑ घृ॒तेन॒ शुच॑यः सप॒र्यान् ।
नामा॑नि चिद्दधिरे य॒ज्ञिया॒न्यसू॑दयन्त त॒न्वः॑ सु॒जाताः॑ ॥ ३ ॥
आ रोद॑सी बृह॒ती वेवि॑दानाः॒ प्र रु॒द्रिया॑ जभ्रिरे य॒ज्ञिया॑सः ।
वि॒दन्मर्तो॑ ने॒मधि॑ता चिकि॒त्वान॒ग्निं प॒दे प॑र॒मे त॑स्थि॒वांस॑म् ॥ ४ ॥
सं॒जा॒ना॒ना उप॑ सीदन्नभि॒ज्ञु पत्नी॑वन्तो नम॒स्यं॑ नमस्यन् ।
रि॒रि॒क्वांस॑स्त॒न्वः॑ कृण्वत॒ स्वाः सखा॒ सख्यु॑र्नि॒मिषि॒ रक्ष॑माणाः ॥५॥ १७॥

नि । काव्या॑ । वे॒धसः॑ । शश्व॑तः । क॒रिति॑ कः । हस्ते॑ । दधा॑नः । नर्या॑ । पु॒रूणि॑ ।
अ॒ग्निः । भु॒व॒त् । र॒यि॒ऽपतिः॑ । र॒यी॒णाम् । स॒त्रा । च॒क्रा॒णः । अ॒मृता॑नि । विश्वा॑ ॥ १ ॥
अ॒स्मे इति॑ । व॒त्सम् । परि॑ । सन्त॑म् । न । वि॒न्द॒न् । इ॒च्छन्तः॑ । विश्वे॑ । अ॒मृताः॑ । अमू॑राः ।
श्र॒म॒ऽयुवः॑ । प॒द॒ऽव्यः॑ । धि॒य॒म्ऽधाः । त॒स्थुः । प॒दे । प॒र॒मे । चारु॑ । अ॒ग्नेः ॥ २ ॥ ति॒स्रः ।
यत् । अ॒ग्ने॒ । श॒रदः॑ । त्वाम् । इत् । शुचि॑म् । घृ॒तेन॑ । शुच॑यः । स॒प॒र्यान् । नामा॑नि ।
चि॒त् । द॒धि॒रे॒ । य॒ज्ञिया॑नि । असू॑दयन्त । त॒न्वः॑ । सु॒ऽजाताः॑ ॥ ३ ॥ आ । रोद॑सी॒ इति॑ ।
बृ॒ह॒ती इति॑ । वेवि॑दानाः । प्र । रु॒द्रियाः॑ । ज॒भ्रि॒रे॒ । य॒ज्ञिया॑सः । वि॒दत् । मर्तः॑ ।
ने॒मऽधि॑ता । चि॒कि॒त्वान् । अ॒ग्निम् । प॒दे । प॒र॒मे । त॒स्थि॒ऽवांस॑म् ॥ ४ ॥ स॒म्ऽजा॒ना॒नाः ।
उप॑ । सी॒द॒न् । अ॒भि॒ऽज्ञु । पत्नी॑ऽवन्तः । न॒म॒स्य॑म् । न॒म॒स्य॒न्निति॑ नमस्यन् । रि॒रि॒क्वांसः॑ ।
त॒न्वः॑ । कृ॒ण्व॒त॒ । स्वाः । सखा॑ । सख्युः॑ । नि॒ऽमिषि॑ । रक्ष॑माणाः ॥ ५ ॥ १७ ॥

त्रिः सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञियासः ।
तेभी रक्षन्ते अमृतं सजोषाः पशूञ्च स्थातॄञ्चरथं च पाहि ॥ ६ ॥
विद्वाँ अग्ने वयुनानि क्षितीनां व्यानुषक् शुरुधो जीवसे धाः ।
अन्तर्विद्वाँ अध्वनो देवयानानतन्द्रो दूतो अभवो हविर्वाट् ॥ ७ ॥
स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्यृतज्ञा अजानन् ।
विदद्गव्यं सरमा दृळ्हमूर्वं येना नु कं मानुषी भोजते विट् ॥ ८ ॥
आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुम् ।
मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः ॥ ९ ॥
अधि श्रियं नि दधुश्चारुमस्मिन्दिवो यदक्षी अमृता अकृण्वन् ।
अध क्षरन्ति सिन्धवो न सृष्टाः प्र नीचीरग्ने अरुषीरजानन् ॥ १० ॥ १८ ॥

त्रिः । सप्त । यत् । गुह्यानि । त्वे इति । इत् । पदा । अविदन् । निऽहिता । यज्ञियासः । तेभिः । रक्षन्ते । अमृतं । सऽजोषाः । पशून् । च । स्थातॄन् । चरथं । च । पाहि ॥ ६ ॥ विद्वान् । अग्ने । वयुनानि । क्षितीनां । वि । आनुषक् । शुरुधः । जीवसे । धाः । अंतःऽविद्वान् । अध्वनः । देवऽयानान् । अतंद्रः । दूतः । अभवः । हविःऽवाट् ॥ ७ ॥ सुऽआध्यः । दिवः । आ । सप्त । यह्वीः । रायः । दुरः । वि । ऋतऽज्ञाः । अजानन् । विदत् । गव्यं । सरमा । दृळ्हं । ऊर्वं । येन । नु । कं । मानुषी । भोजते । विट् ॥ ८ ॥ आ । ये । विश्वा । सुऽअपत्यानि । तस्थुः । कृण्वानासः । अमृतऽत्वाय । गातुं । मह्ना । महत्ऽभिः । पृथिवी । वि । तस्थे । माता । पुत्रैः । अदितिः । धायसे । वेरिति वेः ॥ ९ ॥ अधि । श्रियं । नि । दधुः । चारुं । अस्मिन् । दिवः । यत् । अक्षी इति । अमृताः । अकृण्वन् । अध । क्षरंति । सिंधवः । न । सृष्टाः । प्र । नीचीः । अग्ने । अरुषीः । अजानन् ॥ १० ॥ १८ ॥

॥ ७३ ॥ शक्तिपुत्रः पराशर ऋषिः ॥ अग्निर्देवता ॥ त्रिष्टुप् छन्दः ॥

॥ ७३ ॥ र॒यिर्न यः पि॑तृवि॒त्तो व॑यो॒धाः सु॒प्रणी॑तिश्चिकि॒तुषो॒ न शासुः॑ ।
स्यो॒न॒शीरति॑थि॒र्न प्री॑णा॒नो होते॑व॒ सद्म॑ विध॒तो वि ता॑रीत् ॥ १ ॥
दे॒वो न यः स॑वि॒ता स॒त्यम॑न्मा॒ क्रत्वा॑ नि॒पाति॑ वृ॒जना॑नि॒ विश्वा॑ ।
पु॒रु॒प्र॒श॒स्तो अ॒मति॒र्न स॒त्य आ॒त्मेव॒ शेवो॑ दिधि॒षाय्यो॑ भूत् ॥ २ ॥
दे॒वो न यः पृ॑थि॒वीं वि॒श्वधा॑या उप॒क्षेति॑ हि॒तमि॑त्रो॒ न राजा॑ ।
पु॒रः॒सदः॑ शर्म॒सदो॒ न वी॒रा अ॑नव॒द्या पति॑जुष्टेव॒ नारी॑ ॥ ३ ॥
तं त्वा॒ नरो॒ दम॒ आ नित्य॑मि॒द्धमग्ने॒ सच॑न्त क्षि॒तिषु॑ ध्रु॒वासु॑ ।
अधि॑ द्यु॒म्नं नि द॑धु॒र्भूर्य॑स्मि॒न्भवा॑ वि॒श्वायु॑र्ध॒रुणो॑ रयी॒णाम् ॥ ४ ॥
वि पृक्षो॑ अग्ने म॒घवा॑नो अश्यु॒र्वि सू॒रयो॒ दद॑तो॒ विश्व॒मायुः॑ ।
स॒नेम॒ वाजं॑ समि॒थेष्व॒र्यो भा॒गं दे॒वेषु॒ श्रव॑से॒ दधा॑नाः ॥ ५ ॥ १९ ॥

र॒यिः । न । यः । पि॒तृ॒ऽवि॒त्तः । व॒यः॒ऽधाः । सु॒ऽप्रनी॑तिः । चि॒कि॒तुषः॑ । न । शासुः॑ । स्यो॒न॒ऽशीः । अति॑थिः । न । प्री॒णा॒नः । होता॑ऽइव । सद्म॑ । वि॒ध॒तः । वि । ता॒री॒त् ॥ १ ॥ दे॒वः । न । यः । स॒वि॒ता । स॒त्यऽम॑न्मा । क्रत्वा॑ । नि॒ऽपा॒ति । वृ॒जना॑नि । विश्वा॑ । पु॒रु॒ऽप्र॒श॒स्तः । अ॒मतिः॑ । न । स॒त्यः । आ॒त्माऽइ॑व । शेवः॑ । दि॒धि॒षाय्यः॑ । भू॒त् ॥ २ ॥ दे॒वः । न । यः । पृ॒थि॒वीं । वि॒श्वऽधा॑याः । उ॒प॒ऽक्षेति॑ । हि॒तऽमि॑त्रः । न । राजा॑ । पु॒रः॒ऽसदः॑ । श॒र्म॒ऽसदः॑ । न । वी॒राः । अ॒न॒व॒द्या । पति॑ऽजुष्टाऽइव । नारी॑ ॥ ३ ॥ तं । त्वा॒ । नरः॑ । दमे॑ । आ । नित्यं॑ । इ॒द्धं । अग्ने॑ । सचं॑त । क्षि॒तिषु॑ । ध्रु॒वासु॑ । अधि॑ । द्यु॒म्नं । नि । द॒धुः॒ । भूरि॑ । अ॒स्मि॒न् । भव॑ । वि॒श्वऽआ॑युः । ध॒रुणः॑ । र॒यी॒णां ॥ ४ ॥ वि । पृक्षः॑ । अ॒ग्ने॒ । म॒घऽवा॑नः । अ॒श्युः॒ । वि । सू॒रयः॑ । दद॑तः । विश्वं॑ । आयुः॑ । स॒नेम॑ । वाजं॑ । स॒म्ऽइ॒थेषु॑ । अ॒र्यः । भा॒गं । दे॒वेषु॑ । श्रव॑से । दधा॑नाः ॥ ५ ॥ १९ ॥

ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः पीपयन्त द्युभक्ताः ।
परावतः सुमतिं भिक्षमाणा वि सिन्धवः समया सस्रुरद्रिम् ॥ ६ ॥
त्वे अग्ने सुमतिं भिक्षमाणा दिवि श्रवो दधिरे यज्ञियासः ।
नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णमरुणं च सं धुः ॥ ७ ॥
यान्राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च ।
छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान्रोदसी अन्तरिक्षम् ॥ ८ ॥
अर्वद्भिरग्ने अर्वतो नृभिर्नॄन्वीरैर्वीरान्वनुयामा त्वोताः ।
ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः ॥ ९ ॥
एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च ।
शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः ॥ १० ॥ २० ॥ १२ ॥

ऋतस्यं । हि । धेनवंः । वावशानाः । स्मत्ऽऊध्नीः । पीपयंत । द्युऽभक्ताः । पराऽवतः । सुऽमतिं । भिक्षमाणाः । वि । सिंधवः । समया । सस्रुः । अद्रिं ॥ ६ ॥ त्वे इतिं । अग्ने । सुऽमतिं । भिक्षमाणाः । दिवि । श्रवः । दधिरे । यज्ञियासः । नक्ता । च । चक्रुः । उषसा । विरूपे इति विऽरूपे । कृष्णं । च । वर्णं । अरुणं । च । सं । धुरितिं धुः ॥ ७ ॥ यान् । राये । मर्तान् । सुसूदः । अग्ने । ते । स्याम । मघऽवानः । वयं । च । छायाऽइव । विश्वं । भुवनं । सिसक्षि । आपप्रिऽवान् । रोदसी इतिं । अंतरिक्षं ॥ ८ ॥ अर्वत्ऽभिः । अग्ने । अर्वतः । नृभिः । नॄन् । वीरैः । वीरान् । वनुयाम । त्वाऽऊताः । ईशानासः । पितृऽवित्तस्य । रायः । वि । सूरयः । शतऽहिमाः । नः । अश्युः ॥ ९ ॥ एता । ते । अग्ने । उचथानि । वेधः । जुष्टानि । संतु । मनसे । हृदे । च । शकेम । रायः । सुऽधुरः । यमं । ते । अधि । श्रवः । देवऽभक्तं । दधानाः ॥ १० ॥ १२ ॥ २० ॥

॥ त्रयोदशोऽनुवाकः ॥

॥ ७४ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ अग्निर्देवता ॥ गायत्री छन्दः ॥

॥ ७४ ॥ उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये ।
आरे अस्मे च शृण्वते ॥ १ ॥

यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु ।
अरक्षद्दाशुषे गयम् ॥ २ ॥

उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि ।
धनंजयो रणेरणे ॥ ३ ॥

यस्य दूतो असि क्षये वेषि हव्यानि वीतये ।
दस्मत्कृणोष्यध्वरम् ॥ ४ ॥

तमित्सुहव्यमङ्गिरः सुदेवं सहसो यहो ।
जना आहुः सुबर्हिषम् ॥ ५ ॥ २१ ॥

आ च वहासि ताँ इह देवाँ उप प्रशस्तये ।
हव्या सुश्चन्द्र वीतये ॥ ६ ॥

उपऽप्रयंतः । अध्वरं । मंत्रं । वोचेम । अग्नये । आरे । अस्मे इति । च । शृण्वते ॥ १ ॥ यः । स्नीहितीषु । पूर्व्यः । संऽजग्मानासु । कृष्टिषु । अरक्षत् । दाशुषे । गयं ॥ २ ॥ उत । ब्रुवंतु । जंतवः । उत् । अग्निः । वृत्रऽहा । अजनि । धनंऽजयः । रणेऽरणे ॥ ३ ॥ यस्य । दूतः । असि । क्षये । वेषि । हव्यानि । वीतये । दस्मत् । कृणोषि । अध्वरं ॥ ४ ॥ तं । इत् । सुऽहव्यं । अंगिरः । सुऽदेवं । सहसः । यहो इति । जनाः । आहुः । सुऽबर्हिषं ॥ ५ ॥ २१ ॥

आ । च । वहासि । तान् । इह । देवान् । उप । प्रऽशस्तये । हव्या । सुऽचंद्र । वीतये ॥ ६ ॥

न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन ।

यदग्ने यासि दूत्यम् ॥ ७ ॥

त्वोतो वाज्यह्रयोऽभि पूर्वस्मादपरः ।

प्र दाश्वाँ अग्ने अस्थात् ॥ ८ ॥

उत द्युमत्सुवीर्यं बृहदग्ने विवाससि ।

देवेभ्यो देव दाशुषे ॥ ९ ॥ २२ ॥

॥ ७५ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ अग्निर्देवता ॥ गायत्री छन्दः ॥

॥ ७५ ॥ जुषस्व सप्रथस्तमं वचो देवप्सरस्तमम् ।

हव्या जुह्वान आसनि ॥ १ ॥

अथा ते अङ्गिरस्तमाग्ने वेधस्तम प्रियम् ।

वोचेम ब्रह्म सानसि ॥ २ ॥

न । योः । उपब्दिः । अश्व्यः । शृण्वे । रथस्य । कत् । चन । यत् । अग्ने । यासि । दूत्यं ॥ ७ ॥ त्वाऽऊतः । वाजी । अह्रयः । अभि । पूर्वस्मात् । अपरः । प्र । दाश्वान् । अग्ने । अस्थात् ॥ ८ ॥ उत । द्युऽमत् । सुऽवीर्यं । बृहत् । अग्ने । विवाससि । देवेभ्यः । देव । दाशुषे ॥ ९ ॥ २२ ॥

जुषस्व । सप्रथःऽतमं । वचः । देवप्सरःऽतमं । हव्या । जुह्वानः । आसनि ॥ १ ॥ अथ । ते । अंगिरःऽतम । अग्ने । वेधःऽतम । प्रियं । वोचेम । ब्रह्म । सानसि ॥ २ ॥

कस्ते जामिर्जनानामग्ने को दाश्वध्वरः ।
को ह कस्मिन्नसि श्रितः ॥ ३ ॥
त्वं जामिर्जनानामग्ने मित्रो असि प्रियः ।
सखा सखिभ्य ईड्यः ॥ ४ ॥
यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत् ।
अग्ने यक्षि स्वं दमम् ॥ ५ ॥ २३ ॥

॥ ७६ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ अग्निर्देवता ॥ त्रिष्टुप् छन्दः ॥

॥ ७६ ॥ का त उपेतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा ।
को वा यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम ॥ १ ॥
एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः ।
अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान् ॥ २ ॥

कः । ते । जामिः । जनानां । अग्ने । कः । दाशुऽअध्वरः । कः । ह । कस्मिन् । असि । श्रितः ॥ ३ ॥ त्वं । जामिः । जनानां अग्ने । मित्रः । असि । प्रियः । सखा । सखिऽभ्यः । ईड्यः ॥ ४ ॥ यज । नः । मित्रावरुणा । यज । देवान् । ऋतं । बृहत् । अग्ने । यक्षि । स्वं । दमं ॥ ५ ॥ २३ ॥

का । ते । उपऽइतिः । मनसः । वराय । भुवत् । अग्ने । शंऽतमा । का । मनीषा । कः । वा । यज्ञैः । परि । दक्षं । ते । आप । केन । वा । ते । मनसा । दाशेम ॥ १ ॥ आ । इहि । अग्ने । इह । होता । नि । सीद । अदब्धः । सु । पुरःऽएता । भव । नः । अवतां । त्वा । रोदसी इति । विश्वमिन्वे इति विश्वंऽइन्वे । यज । महे । सौमनसाय । देवान् ॥ २ ॥

प्र सु विश्वान्रक्षसो धक्ष्यग्ने भवा यज्ञानामभिशस्तिपावा ।
अथा वह सोमपतिं हरिभ्यामातिथ्यमस्मै चकृमा सुदाव्ने ॥ ३ ॥
प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः ।
वेषि होत्रमुत पोत्रं यजत्र बोधि प्रयन्तर्जनितर्वसूनाम् ॥ ४ ॥
यथा विप्रस्य मनुषो हविर्भिर्देवाँ अयजः कविभिः कविः सन् ।
एवा होतः सत्यतर त्वमद्याग्ने मन्द्रया जुह्वा यजस्व ॥ ५ ॥ २४ ॥

॥ ७७ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ अग्निर्देवता ॥ त्रिष्टुप् छन्दः ॥

॥ ७७ ॥ कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ।
यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान् ॥ १ ॥
यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कृणुध्वम् ।
अग्निर्यद्वेर्मर्ताय देवान्त्स चा बोधाति मनसा यजाति ॥ २ ॥

प्र । सु । विश्वान् । रक्षसः । धक्षि । अग्ने । भव । यज्ञानां । अभिशस्तिऽपावा । अथ । आ । वह । सोमऽपतिं । हरिऽभ्यां । आतिथ्यं । अस्मै । चकृम । सुऽदाव्ने ॥ ३ ॥ प्रजाऽवता । वचसा । वह्निः । आसा । आ । च । हुवे । नि । च । सत्सि । इह । देवैः । वेषि । होत्रं । उत । पोत्रं । यजत्र । बोधि । प्रऽयंतः । जनितः । वसूनां ॥ ४ ॥ यथा । विप्रस्य । मनुषः । हविःऽभिः । देवान् । अयजः । कविऽभिः । कविः । सन् । एव । होतरिति । सत्यऽतर । त्वं । अद्य । अग्ने । मंद्रया । जुह्वा । यजस्व ॥ ५ ॥ २४ ॥

कथा । दाशेम । अग्नये । का । अस्मै । देवऽजुष्टा । उच्यते । भामिने । गीः । यः । मर्त्येषु । अमृतः । ऋतऽवा । होता । यजिष्ठः । इत् । कृणोति । देवान् ॥ १ ॥ यः । अध्वरेषु । शंऽतमः । ऋतऽवा । होता । तं । ऊं इति । नमःऽभिः । आ । कृणुध्वं । अग्निः । यत् । वेः । मर्ताय । देवान् । सः । च । बोधाति । मनसा । यजाति ॥ २ ॥

स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः ।
तं मेधेषु प्रथमं देवयन्तीर्विश उप ब्रुवते दस्ममारीः ॥ ३ ॥
स नो नृणां नृतमो रिशादा अग्निर्गिरोऽवसा वेतु धीतिम् ।
तना च ये मघवानः शविष्ठा वाजप्रसूता इषयन्त मन्म ॥ ४ ॥
एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः ।
स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा चिकित्वान् ॥ ५ ॥ २५ ॥

॥ ७८ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ अग्निर्देवता गायत्री छन्दः ॥

॥ ७८ ॥ अभि त्वा गोतमा गिरा जातवेदो विचर्षणे ।
द्युम्नैरभि प्र णोनुमः ॥ १ ॥
तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति ।
द्युम्नैरभि प्र णोनुमः ॥ २ ॥

सः । हि । क्रतुः । सः । मर्यः । सः । साधुः । मित्रः । न । भूत् । अद्भुतस्य । रथीः । तं । मेधेषु । प्रथमं । देवऽयंतीः । विशः । उप । ब्रुवते । दस्मं । आरीः ॥३॥ सः । नः । नृणां । नृऽतमः । रिशादाः । अग्निः । गिरः । अवसा । वेतु । धीतिं । तना । च । ये । मघऽवानः । शविष्ठाः । वाजऽप्रसूताः । इषयंत । मन्म ॥ ४ ॥ एव । अग्निः । गोतमेभिः । ऋतऽवा । विप्रेभिः । अस्तोष्ट । जातऽवेदाः । सः । एषु । द्युम्नं । पीपयत् । सः । वाजं । सः । पुष्टिं । याति । जोषं । आ । चिकित्वान् ॥५॥२५॥ अभि । त्वा । गोतमाः । गिरा । जातऽवेदः । विऽचर्षणे । द्युम्नैः । अभि । प्र । नोनुमः ॥ १ ॥ तं । ऊं इति । त्वा । गोतमः । गिरा । रायःऽकामः । दुवस्यति । द्युम्नैः । अभि । प्र । नोनुमः ॥ २ ॥

तमु॑ त्वा वाज॒सात॑मम॒ङ्गिर॒स्वद्ध॑वामहे । द्यु॒म्नैर॒भि प्र णो॑नुमः ॥ ३ ॥
तमु॑ त्वा वृत्र॒हन्त॑मं॒ यो दस्यूँ॑रवधू॒नुषे॑ द्यु॒म्नैर॒भि प्र णो॑नुमः ॥ ४ ॥
अवो॑चाम॒ रहू॑गणा अ॒ग्नये॒ मधु॑मद्वचः । द्यु॒म्नैर॒भि प्र णो॑नुमः ॥ ५ ॥ २६ ॥

॥ ७९ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ अग्निर्देवता ॥ आद्यस्तृचस्त्रैष्टुभः द्वितीय औष्णिहः शिष्टानां गायत्री छन्दः ॥

॥ ७९ ॥ हिर॑ण्यकेशो॒ रज॑सो विसा॒रेऽहि॒र्धुनि॒र्वात॑ इव॒ ध्रजी॑मान् ।
शुचि॑भ्राजा उ॒षसो॒ नवे॑दा॒ यश॑स्वतीरप॒स्युवो॒ न स॒त्याः ॥ १ ॥
आ ते॑ सुप॒र्णा अ॑मिनन्तँ॒ एवैः॑ कृ॒ष्णो नो॑नाव वृष॒भो यदी॒दम् ।
शि॒वाभि॒र्न स्मय॑माना॒भि॒रागा॒त्पत॑न्ति॒ मिहः॑ स्त॒नय॑न्त्य॒भ्रा ॥ २ ॥
यदी॑मृ॒तस्य॒ पय॑सा॒ पिया॑नो॒ नय॑न्नृ॒तस्य॑ प॒थिभी॒ रजि॑ष्ठैः ।
अ॒र्य॒मा मि॒त्रो वरु॑णः॒ परि॑ज्मा॒ त्वचं॑ पृञ्च॒न्त्युप॑रस्य॒ योनौ॑ ॥ ३ ॥

तं । ऊं इति॑ । त्वा॒ । वा॒ज॒ऽसात॑मं । अ॒ङ्गि॒र॒स्वत् । ह॒वा॒म॒हे॒ । द्यु॒म्नैः । अ॒भि । प्र । नो॒नु॒मः॒ ॥ ३ ॥ तं । ऊं इति॑ । त्वा॒ । वृ॒त्र॒हन्ऽत॑मं । यः । दस्यू॑न् । अ॒व॒ऽधू॒नु॒षे । द्यु॒म्नैः । अ॒भि । प्र । नो॒नु॒मः॒ ॥ ४ ॥ अवो॑चाम । रहू॑गणाः । अ॒ग्नये॑ । मधु॑ऽमत् । वचः॑ । द्यु॒म्नैः । अ॒भि । प्र । नो॒नु॒मः॒ ॥ ५ ॥ २६ ॥

हिर॑ण्यऽकेशः । रज॑सः । वि॒ऽसा॒रे । अहिः॑ । धुनिः॑ । वातः॑ऽइव । ध्रजी॑मान् । शुचि॑ऽभ्राजाः । उ॒षसः॑ । नवे॑दाः । यश॑स्वतीः । अ॒प॒स्युवः॑ । न । स॒त्याः ॥ १ ॥ आ । ते॒ । सु॒ऽप॒र्णाः । अ॒मि॒नं॒त॒ । एवैः॑ । कृ॒ष्णः । नो॒नाव॒ । वृ॒ष॒भः । यदि॑ । इ॒दं । शि॒वाभिः॑ । न । स्मय॑मानाभिः । आ । अ॒गा॒त् । पतं॑ति । मिहः॑ । स्त॒नयं॑ति । अ॒भ्रा ॥ २ ॥ यत् । ई॒ । ऋ॒तस्य॑ । पय॑सा । पिया॑नः । नय॑न् । ऋ॒तस्य॑ । प॒थिऽभिः॑ । रजि॑ष्ठैः । अ॒र्य॒मा । मि॒त्रः । वरु॑णः । परि॑ऽज्मा । त्वचं॑ । पृ॒ञ्च॒ति॒ । उप॑रस्य । योनौ॑ ॥ ३ ॥

अग्ने वाजस्य गोमत ईशानः सहसो यहो ।

अस्मे धेहि जातवेदो महि श्रवः ॥ ४ ॥

स इधानो वसुष्कविरग्निरीळेन्यो गिरा ।

रेवदस्मभ्यं पुर्वणीक दीदिहि ॥ ५ ॥

क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः ।

स तिग्मजम्भ रक्षसो दह प्रति ॥ ६ ॥ २७ ॥

अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि ।

विश्वासु धीषु वन्द्य ॥ ७ ॥

आ नो अग्ने रयिं भर सत्रासाहं वरेण्यं ।

विश्वासु पृत्सु दुष्टरम् ॥ ८ ॥

अग्ने । वाजस्य । गोऽमतः । ईशानः । सहसः । यहो इति । अस्मे इति । धेहि । जातऽवेदः । महि । श्रवः ॥ ४ ॥ सः । इधानः । वसुः । कविः । अग्निः । ईळेन्यः । गिरा । रेवत् । अस्मभ्यं । पुरुऽअनीक । दीदिहि ॥ ५ ॥ क्षपः । राजन् । उत । त्मना । अग्ने । वस्तोः । उत । उषसः । सः । तिग्मऽजंभ । रक्षसः । दह । प्रति ॥ ६ ॥ २७ ॥

अव । नः । अग्ने । ऊतिऽभिः । गायत्रस्य । प्रऽभर्मणि । विश्वासु । धीषु । वंद्य ॥ ७ ॥ आ । नः । अग्ने । रयिं । भर । सत्राऽसहं । वरेण्यं । विश्वासु । पृत्ऽसु । दुस्तरं ॥ ८ ॥

आ नो॑ अग्ने सुचेतुना॑ र॒यिं वि॒श्वायु॑पोषसम् ।
मा॒र्डी॒कं धे॑हि जी॒वसे॑ ॥ ९ ॥

प्र पू॒तास्ति॒ग्मशो॑चिषे॒ वाचो॑ गोतमा॒ग्नये॑ ।
भर॑स्व सुम्न॒युर्गिरः॑ ॥ १० ॥

यो नो॑ अग्नेऽभि॒दास॒त्यन्ति॑ दू॒रे प॑दी॒ष्ट सः ।
अ॒स्माक॒मिद्वृ॒धे भ॑व ॥ ११ ॥

स॒ह॒स्रा॒क्षो विच॑र्षणिर॒ग्नी रक्षां॑सि सेधति ।
होता॑ गृणीत उ॒क्थ्यः॑ ॥ १२ ॥ २८ ॥

दस्यु (राक्षस) को निकाल देनेवाले और वृत्र का वध करनेवाले अग्नि को हवि अर्पण करके हम बार बार नमस्कार करते हैं। ४

हमने रहूगणपुत्रोंने-अग्नि के लिये सुन्दर स्तोत्र गाया है। उनको हवि अर्पण कर के हम बार बार नमस्कार करते हैं। ५ (२६)

सूक्त ७९.

॥ ७९ ॥ ऋषि-रहूगणपुत्र गोतम । देवता-अग्नि ॥

अग्नि के केश सुवर्णमय हैं। जब यह रजोलोक के विस्तीर्ण[1] प्रदेश में रहता है तब यह साप की तरह (लोगों को) डराता है और वायु की तरह जोरसे[2] गर्जना करता है। आपकी ज्वाला बडी तेज रहती है। उषा की उत्पत्ति का कारण[3] आपही है। इस लिये वे यशस्वी और सत्यवती उषा आपकी दासी बनकर आपपर प्रेम करती हैं। १

अग्निरूपी पक्षी के बड़े बड़े पंखों से (रश्मि) (सब चीजोंका) नाश होने लगा; । और काले रंगका बैल (मेघ) बड़े जोरसे गर्जना करने लगा। वह मेघरूपी बैल अपने साथ कल्याण करनेवाली और हांसनेवाली विद्युत् को भी ले आया। जिसके कारण मेघ बरसने लगे। (जिसके साथ विद्युत् नहीं है ऐसे) मेघ केवल गर्जनाही करते हैं (बरसते नहीं)। २

सत्य धर्म से वर्ताव करनेवाले और सन्मार्ग को[4] जाननेवाले भक्तों के उदकों का अथवा हवियों का जब अग्नि स्वीकार करता है तब अर्यमा, मित्र और वरुण चारों ओर घुमकर आकाश में ही मेघरूपी चमडे में पानी भर देते हैं। ३

---

३ वाजसातमं तं त्वा अंगिरस्वत् हवामहे. द्युम्नैः अभि प्र णोनुमः।

४ यः दस्यून् अवधूनुषे तं त्वा वृत्रहन्तमं द्युम्नैः अभि प्र णोनुमः।

५ रहूगणाः अग्नये मधुमत् वचः अवोचाम द्युम्नैः अभि प्र णोनुमः।

१ रजसः विसारे[1] हिरण्यकेशः ध्रजीमान्[2] वातः इव धुनिः अहिः शुचिभ्राजाः, यशस्वतीः सत्याः अपस्युव न, उषसः नवेदाः[3]।

२ ते सुपर्णाः एवैः आ अमिनन्त. कृष्णः वृषभः नोनाव यदि इदं, स्मयमानाभिः शिवाभिः न आ अगात. मिहः पतन्ति अभ्रा स्तनयन्ति।

३ ऋतस्य रजिष्ठैः[4] पथिभिः नयन् यत् ईं ऋतस्य पयसा पियानः, अर्यमा मित्रः परिज्मा वरुणः उपरस्य योनौ त्वचं पृञ्चन्ति।

हे अग्नि, आप शक्ति के पुत्र हैं; आप गौओं के स्वामी हैं। हे सर्वज्ञ देव, आप हम को वैभव और धन अर्पण कीजिये। ४

(हे अग्नि,) आप देदिप्यमान, दयालु, धनवान् और सर्वज्ञ हैं। आप स्तुति के योग्य हैं। अनेक सेवकों[5] पर अधिकार चलानेवाले, हे अग्निदेव, आप इस तरह प्रकाशित हूजिये जिस से हमें बहुत धन मिले। ५

हे तीक्ष्ण-दंष्ट्र अग्निदेव, रात्रि और प्रातःकाल के समय आप अपने[6] ज्वालाओं से राक्षसोंका नाश कीजिये। ६ (२७)

हे अग्निदेव, आपकी स्तुति सब स्तोत्रों में गायी जाती है। इसलिये आप वन्दनीय हैं। हम गायत्री स्तोत्र आपको अर्पण[7] करते हैं। इस लिये आप हमारी रक्षा कीजिये। ७

हे अग्नि, हमें ऐसा वैभव और धन दीजिये जो हमेशा के लिये हमारे पास रहे और जो, हमारे शत्रु, किसी युद्धमें[8] छिन नहीं सकते। ८

---

४ सहसः यहो अग्ने, गोपतः वाजस्य ईशान. जातवेदः अस्मे महि श्रवः धेहि।

५ सः अग्निः इधानः, वसुः, कविः, गिरा ईळेन्यः पुर्वणीक[5] अस्मभ्यं रेवत् दीदिहि।

६ उत क्षपः उत उषसः वस्तो. तिग्मजम्भ राजन् अग्ने त्मना[6] रक्षसः प्रति दह।

७ विश्वासु धीषु वन्द्य अग्ने गायत्रस्य प्रभर्मणि[7] ऊतिभिः नः अव।

८ अग्ने, सत्रासहं, वरेण्यं, विश्वासु पृत्सु[8] दुष्टरं रयिं नः आ भर।

हे अग्निदेव, हमारी कुशलताका विचार करके, आप हमें ऐसा धन दीजिये जिससे हमें सुख[1] होवे और जिससे हमारा जन्मतक पोषण होवे। ९

धनकी[10] इच्छा करनेवाले, हे गोतम, प्रखर ज्वाला से युक्त अग्नि को शुद्ध अन्तःकरण से पवित्र स्तुति और स्तोत्र अर्पण कीजिये। १०

हे अग्निदेव, जो कोई हमारा शत्रु—पास हो अथवा दूर हो—हमें सताता है, उसका आप नाश कीजिये। और आप हमारा ही वैभव बढ़ाइये। ११

हे सहस्रनयन अग्नि, सब जगह घूमकर हमारे शत्रु जो राक्षस हैं उनको आप निकाल[11] देते हैं। स्तवन करनेके योग्य और हवि देनेके योग्य जो अग्नि आप हमारे साथ बातचीत कीजिये। १२ (२८)

सूक्त ८०.

॥ ८० ॥ ऋषि–रहूगणपुत्र गौतम । देवता–इन्द्र ॥

(हे इन्द्र,) आपको सन्तुष्ट करनेके लिये उत्तेजित करनेवाला सोमरस तैयार किया गया। हे बलवान् और वज्रधारी देव, अपना साम्राज्य स्थापित करने की इच्छा से आपने पृथ्वीपर से अही राक्षस को निकाल[1] दिया। १

---

९ अग्ने, नः जीवसे विश्वायुपोषसं मार्डीकं[1] रयिं आ धेहि।

१० गोतम, सुम्नयुः[10] तिग्मशोचिषे अग्नये पूताः वाचः गिरः प्र भरस्व।

११ अग्ने, यः अन्ति दूरे नः अभिदासति सः पदीष्ट अस्माकं इत् वृधे भव।

१२ सहस्राक्षः विचर्षणिः अग्निः रक्षांसि सेधति[11] उक्थ्यः होता गृणीते।

१ इत्था हि मदे सोमे इन्द्रः ब्रह्मा वर्धनं चकार शविष्ठ वज्रिन्, स्वराज्यं अनु अर्चन् ओजसा पृथिव्याः अहिं निः शशाः[1]।

वह श्येनपक्षी[१] सोमरसको ले आया। निचोड़कर वह उत्साह-वर्धक सोमरस तैयार किया गया। उससे आपको स्फूर्ति उत्पन्न हुई और अपना साम्राज्य स्थापित करने के लिये आपने वृत्रको पानी के बाहर निकाल कर मार डाला। २

हे इन्द्र, आगे चलिये; चढ़ाई करो; पराक्रम दिखलाइये; आपके वज्रको कोई रोकनेवाला नहीं है; आपका सामर्थ्य बहुत बड़ा है; और अपना साम्राज्य स्थापित करने के लिये आपने वृत्रको मार डाला और जलोंको उसके हाथसे छुड़ा लिया। ३

हे इन्द्र, भूलोक और द्युलोकसे आपने वृत्रको निकाल दिया। अब आप (नीचे पृथ्वीपर) जलोंको छोड़ दीजिये जिसपर सब प्राणियों का जीवन[२] अवलम्बित है और जिन जलोंका मरुद्देव साथ देनेवाले हैं। ४

निजका साम्राज्य स्थापित करनेके हेतु पृथ्वी को हिलानेवाले वृत्रका सिर, गुस्सेमें[१] आकर इन्द्रने वज्र से काट डाला और जलों को[४] मुक्त करके उनमें गति उत्पन्न की और वे बहने लगे। ५ (२९)

---

२ सः श्येनाभृतः[१] सुतः वृषा मदः सोमः त्वा अमदत् येन, वज्रिन्, स्वराज्यं अनु अर्चन् ओजसा वृत्रं अद्भ्यः निः जघन्थ, पृथिव्याः निः शशाः।

३ प्रेहि, अभीहि, धृष्णुहि, ते वज्रः न नियंसते इन्द्र ते शवः नृम्णं हि स्वराज्यं अनु अर्चन् वृत्रं हनः अपः जयाः।

४ इन्द्र, वृत्रं भूम्याः निः दिवः निः अधि जघन्थ. स्वराज्यं अनु अर्चन् इमाः जीवधन्याः[२] मरुत्वतीः अपः अवसृज।

५ स्वराज्यं अनु अर्चन् इन्द्रः सर्माय[४] अपः चोदयन् हीळितः[१] अभिक्रम्य वज्रेण दोधतः वृत्रस्य सानुं अव जिघ्नते।

सौ जगह जुड़ा हुआ वज्र अपने हाथमें लेकर इन्द्र वृत्रका सिर तोड़ डालता है। अपना साम्राज्य स्थापित करनेके लिये इन्द्र अपने भक्तों के हाथों से सन्तुष्ट होकर उनको धन[1] देकर उनकी उन्नति करता है। ६

हे शस्त्र-अस्त्र पास रखनेवाले इन्द्र, हे वज्रधारी इन्द्र, आपके सामर्थ्य का कोई नाश नहीं कर सकता है। अपना साम्राज्य स्थापित करने के हेतु आपने बड़े कुशलता से और युक्तियुक्ति से उन दुष्ट पशु (राक्षस) ओंका नाश कर डाला। ७

आपका वज्र नव्वे महानदियों की रक्षा करने के लिये तैयार था। आपका बाहुबल बड़ा श्रेष्ठ है। इस लिये आप अपना साम्राज्य स्थापित करते हैं। आपके बाहुबलसे लोगों को लाभ होता है। ८

हजारों मनुष्य एकत्रित होकर इन्द्रकी पूजा करनी चाहिये। सैकड़ों मनुष्योंने आपका स्तुतिस्तोत्र गाया है। इन्द्र के लिये अब एक उत्कृष्ट स्तोत्र तैयार है। इन्द्र अब साम्राज्य स्थापित करने की इच्छा करता है। ९

---

६ शतपर्वणा वज्रेण सानौ अधि नि जिघ्नते अन्धसः मन्दानः, स्वराज्यं अनु अर्चन्, इन्द्रः सखिभ्यः गातुं इच्छति।

७ अद्रिवः वज्रिन् इन्द्र, यत् ह स्वराज्यं अनु अर्चन् त्वं मायया त्यं मायिनं मृगं अवधीः अनुत्तं वीर्यं तुभ्यं इत्।

८ नवतिं नाव्याः अनु ते वज्रासः वि अस्थिरन् इन्द्र, स्वराज्यं अनु अर्चन् ते वीर्यं महत्, ते बाह्वोः बलं हितम्।

९ सहस्रं साकं अर्चत, विंशतिः परि स्तोभत शता एनं अनु नोनवुः, स्वराज्यं अनु अर्चन् इन्द्राय ब्रह्म उद्यतम्।

इन्द्रने वृत्रके सामर्थ्यका नाश किया । इन्द्रके बलके सामने वृत्रके बलका कुछ नहीं चला । यह बड़ी वीरताकी बात है कि इन्द्रने वृत्रको मार डालकर जलोंको उनके प्रतिबन्ध से छुड़ा लिया । जिसका साम्राज्य स्थापित करनेकी आपकी बड़ी इच्छा थी ।   १० (३०)

हे इन्द्र, जब आप गुस्सेमें आते हैं तब दोनों भू और द्युलोक डरके मारे कांपने लगते हैं । अपना साम्राज्य स्थापित करनेके लिये आपने मरुत् गणों के सहायता से वृत्रको मार डाला ।   ११

वृत्रने पृथ्वीको हिलाया और बड़ी गर्जना की; तथापि इन्द्र बिलकुलही नहीं डरा । बल्कि अपना साम्राज्य स्थापित करनेके हेतु इन्द्रका पैनेदार लोहेका वज्र वृत्रके सिरपर गिर पड़ा ।   १२

जब इन्द्रका वज्र वृत्रके सिरपर गिर पड़ा तब इन्द्रकी वीरता द्युलोकमें भी मालूम हुई । इस तरह पराक्रम करके वृत्रको मार डालके इन्द्रने अपना साम्राज्य स्थापित किया । १३

---

१० इन्द्रः वृत्रस्य तविषीं निः अहन्, सहसा सहः तत् अस्य पौंस्यं महत् यत् स्वराज्यं अनु अर्चन् वृत्रं अवधीत्, अपः सृजन् ।

११ यत्, वज्रिन् इन्द्र, स्वराज्यं अनु अर्चन्, मरुत्वान् वृत्रं यत् ओजसा अवधीः, तव मन्यवे इमे मही चित् भियसा वेपेते ।

१२ वृत्रः इन्द्र न वेपसा न तन्यता इन्द्रं बिभीषयन्, स्वराज्यं अनु अर्चन्, सहस्रभृष्टिः आयसः वज्रः एनं अभि आयत ।

१३ यत् वृत्रं तव अशनिं च वज्रेण समयोधयः, इन्द्र, स्वराज्यं अनु अर्चन्, अहिं जिघांसतः ते शव दिवि बद्बधे" ।

हे वज्रधारी इन्द्र, जब आप गर्जना[11] करते हैं तब स्थिर और अस्थिर चीजें भी कांपने लगती हैं। केवल इतना ही नहीं; बल्कि साम्राज्य स्थापित करनेवाले इन्द्रको गुस्सेमें देखकर त्वष्टा देव भी डरके मारे कांपने लगता है। १४

इन्द्र से किसीका भी बल अधिक नहीं है। आपके बलको कोई रोक नहीं सकता। जिनका साम्राज्य स्थापित करने के लिये सब देवों ने अपना बल और स्फूर्ति इन्द्र को अर्पण कर दी। १५

अथर्वा, सब मनुष्योंका पिता मनु और दध्यङ्ने इन्द्र के लिये जो स्तुतिस्तोत्र गाये वे सब[12] साम्राज्य स्थापित करने की इच्छा करनेवाले इन्द्र को जा पहुंचे। १६ (३१) (४)

---

१४ अद्रिवः स्थाः यत् जगत् च ते अभिष्टने[11] रेजते इन्द्र, स्वराज्यं अनु अर्चन् तव मन्यवे त्वष्टा चित् भिया वेविज्यते।

१५ इन्द्रं यात् नहि अधीमसि नु वीर्या परः कः? स्वराज्यं अनु अर्चन् तस्मिन् देवाः नृम्णं उत क्रतुं ओजांसि संदधुः।

१६ अथर्वा, मनुः पिता, दध्यङ् यां धियं अत्नत, उक्था[12] ब्रह्माणि, स्वराज्यं अनु अर्चन् तस्मिन् इन्द्रे पूर्वथा सं अग्मत।

Printed at Vaidya Brothers' Press, Thakurdwar, Bombay No. 2 & published at Shrutibodh Office 47 Kalbadevi Road, Bombay, by Gajanan Bhaskar Vaidya.

हिन्दी, मराठी, गुजराती और अङ्गरेजी चार
भाषाओं में अलग अलग प्रसिद्ध होनेवाला

वेदों का भाषांतर ।

प्रति मास में ६४ पृष्ठ, ३२ पृष्ठ संहिता [स्वर और पदपाठ सहित]
* * ३२ पृष्ठ भाषान्तर । * *

वर्ष १] दिसम्बर १९१२ [संख्या ६

वार्षिक मूल्य डाकव्ययसहित रु. ४

हिन्दी श्रुतिबोध.

सम्पादक,

रामचंद्र विनायक पटवर्धन, बी. ए. एल् एल्. बी.
अच्युत बलवंत कोल्हटकर, बी. ए. एल् एल्. बी.
दुर्गा अप्पाजी तुळजापुरकर, बी. ए. एल् एल्. बी.

स्थाणुरयं भारहारः किलाभूत् ।
अधीत्य वेदं न विजानाति योऽर्थम् ॥

यास्काचार्य.

'श्रुतिबोध' ऑफिस, ४७, फाकलैंड रोड, बम्बई.

प्रति अंकका मूल्य आठ आने.

॥ अथ प्रथमाष्टके षष्ठोऽध्यायः ॥ ६ ॥

॥ ८१. ॥ राहूगणपुत्रो गोतम ऋषिः ॥ इन्द्रो देवता ॥ पङ्क्तिश्छन्दः ॥

॥ ८१ ॥ इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥ १ ॥
असि हि वीर सेन्योऽसि भूरि पराददिः ।
असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥ २ ॥
यदुदीरत आजयो धृष्णवे धीयते धना ।
युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इन्द्र वसौ दधः ॥ ३ ॥
क्रत्वा महाँ अनुष्वधं भीम आ वावृधे शवः ।
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवान्दधे हस्तयोर्वज्रमायसम् ॥ ४ ॥
आ पप्रौ पार्थिवं रजो बद्बधे रोचना दिवि ।
न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ ॥ ५ ॥ १ ॥

॥ अथ प्रथमाष्टके षष्ठोऽध्यायः ॥ ६ ॥

इंद्रः । मदाय । ववृधे । शवसे । वृत्रऽहा । नृऽभिः । तं । इत् । महत्ऽसु । आजिषु । उत । ईं । अर्भे । हवामहे । सः । वाजेषु । प्र । नः । अविषत् ॥ १ ॥ असि । हि । वीर । सेन्यः । असि । भूरि । पराऽददिः । असि । दभ्रस्य । चित् । वृधः । यजमानाय । शिक्षसि । सुन्वते । भूरि । ते । वसु ॥ २ ॥ यत् । उत्ऽईरते । आजयः । धृष्णवे । धीयते । धना । युक्ष्व । मदऽच्युता । हरी इति । कं । हनः । कं । वसौ । दधः । अस्मान् । इंद्र । वसौ । दधः ॥ ३ ॥ क्रत्वा । महान् । अनुऽस्वधं । भीमः । आ । ववृधे । शवः । श्रिये । ऋष्वः । उपाकयोः । नि । शिप्री । हरिऽवान् । दधे । हस्तयोः । वज्रं । आयसं ॥ ४ ॥ आ । पप्रौ । पार्थिवं । रजः । बद्बधे । रोचना । दिवि । न । त्वाऽवान् । इंद्र । कः । चन । न । जातः । न । जनिष्यते । अति । विश्वं । ववक्षिथ ॥ ५ ॥ १ ॥

यो अर्यो मर्तभोजनं परादर्दाति दाशुषे ।
इन्द्रो अस्मभ्यं शिक्षतु वि भंजा भूरि ते वसु भक्षीय तव राधसः ॥ ६ ॥
मदेमदे हि नो ददिर्यूथा गवामृजुक्रतुः ।
सं गृभाय पुरू शताभयाहस्त्या वसु शिशीहि राय आ भर ॥ ७ ॥
मादयस्व सुते सचा शवसे शूर राधसे ।
विद्मा हि त्वा पुरूवसुमुप कामान्त्ससृज्महेऽथा नोऽविता भव ॥ ८ ॥
एते त इन्द्र जन्तवो विश्वं पुष्यन्ति वार्यम् ।
अन्तर्हि ख्यो जनानामर्यो वेदो अदाशुषां तेषां नो वेद आ भर ॥ ९ ॥ २ ॥

॥ ८२ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ इन्द्रो देवता ॥ अन्त्या जगती ॥ शिष्टाः पंक्तयः ॥

॥ ८२ ॥ उपो षु शृणुही गिरो मघवन्मातथा इव ।
यदा नः सूनृतावतः कर आदर्थयास इद्योजा न्विन्द्र ते हरी ॥ १ ॥

यः । अर्यः । मर्तऽभोजनं । पराऽददाति । दाशुषे । इंद्रः । अस्मभ्यं । शिक्षतु । वि । भज । भूरि । ते । वसु । भक्षीय । तव । राधसः ॥ ६ ॥ मदेऽमदे । हि । नः । ददिः । यूथा । गवां । ऋजुऽक्रतुः । सं । गृभाय । पुरु । शता । उभयाहस्त्या । वसु । शिशीहि । रायः । आ । भर ॥ ७ ॥ मादयस्व । सुते । सचा । शवसे । शूर । राधसे । विद्म । हि । त्वा । पुरुऽवसुं । उप । कामान् । ससृज्महे । अथ । नः । अविता । भव ॥ ८ ॥ एते । ते । इंद्र । जंतवः । विश्वं । पुष्यंति । वार्यं । अंतः । हि । ख्यः । जनानां । अर्यः । वेदः । अदाशुषां । तेषां । नः । वेदः । आ । भर ॥ ९ ॥ २ ॥

उपो इति । सु । शृणुहि । गिरः । मघऽवन् । मा । अतथाःऽइव । यदा । नः । सूनृताऽवतः । करः । आत् । अर्थयासे । इत् । योज । नु । इंद्र । ते । हरी इति ॥ १ ॥

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥ २ ॥
सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि ।
प्र नूनं पूर्णवन्धुरः स्तुतो याहि वशाँ अनु योजा न्विन्द्र ते हरी ॥ ३ ॥
स घा तं वृषणं रथमधि तिष्ठाति गोविदम् ।
यः पात्रं हारियोजनं पूर्णमिन्द्र चिकेतति योजा न्विन्द्र ते हरी ॥ ४ ॥
युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो ।
तेन जायामुप प्रियां मन्दानो याह्यन्धसो योजा न्विन्द्र ते हरी ॥ ५ ॥
युनज्मि ते ब्रह्मणा केशिना हरी उप प्र याहि दधिषे गभस्त्योः ।
उत्त्वा सुतासो रभसा अमन्दिषुः पूषण्वान्वज्रिन्त्समु पत्न्यामदः ॥ ६ ॥ ३ ॥

अक्षन् । अमीमदंत । हि । अवं । प्रियाः । अधूषत । अस्तोषत । स्वऽभानवः । विप्राः । नविष्ठया । मती । योजं । नु । इंद्र । ते । हरी इति ॥ २ ॥ सुऽसंदृशं । त्वा । वयं । मघंऽवन् । वंदिषीमहि । प्र । नूनं । पूर्णऽवंधुरः । स्तुतः । याहि । वशान् । अनु । योजं । नु । इंद्र । ते । हरी इति ॥ ३ ॥ सः । घ । तं । वृषणं । रथं । अधि । तिष्ठाति । गोऽविदं । यः । पात्रं । हारिऽयोजनं । पूर्णं । इंद्र । चिकेतति । योजं । नु । इंद्र । ते । हरी इति ॥ ४ ॥ युक्तः । ते । अस्तु । दक्षिणः । उत । सव्यः । शतक्रतो इति शतऽक्रतो । तेनं । जायां । उपं । प्रियां । मंदानः । याहि । अंधसः । योजं । नु । इंद्र । ते । हरी इति ॥ ५ ॥ युनज्मि । ते । ब्रह्मणा । केशिनां । हरी इति । उपं । प्र । याहि । दधिषे । गभस्त्योः । उत् । त्वा । सुतासः । रभसाः । अमंदिषुः । पूषण्ऽवान् । वज्रिन् । सं । ऊं इति । पत्न्या । अमदः ॥ ६ ॥ ३ ॥

॥ ८३. ॥ रहूगणपुत्रो गोतम ऋषिः ॥ इन्द्रो देवता ॥ जगती छन्दः ॥

॥८३॥ अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिन्द्र मर्त्यस्तवोतिभिः ।
तमित्पृणक्षि वसुना भवीयसा सिन्धुमापो यथाभितो विचेतसः ॥ १ ॥
आपो न देवीरुप यन्ति होत्रियमवः पश्यन्ति विततं यथा रजः ।
प्राचैर्देवासः प्र णयन्ति देवयुं ब्रह्मप्रियं जोषयन्ते वरा इव ॥ २ ॥
अधि द्वयोरदधा उक्थ्यं वचो यतस्रुचा मिथुना या सपर्यतः ।
असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते ॥ ३ ॥
आदङ्गिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया ।
सर्वं पणेः समविन्दन्त भोजनमश्वावन्तं गोमन्तमा पशुं नरः ॥ ४ ॥
यज्ञैरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि ।
आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे ॥ ५ ॥

अश्वऽवति । प्रथमः । गोषु । गच्छति । सुप्रऽअवीः । इन्द्र । मर्त्यः । तव । ऊतिऽभिः । तं । इत् । पृणक्षि । वसुना । भवीयसा । सिंधुं । आपः । यथा । अभितः । विऽचेतसः ॥ १ ॥ आपः । न । देवीः । उप । यंति । होत्रियं । अवः । पश्यंति । विऽततं । यथा । रजः । प्राचैः । देवासः । प्र । नयंति । देवऽयुं । ब्रह्मऽप्रियं । जोषयंते । वराःऽइव ॥ २ ॥ अधि । द्वयोः । अदधाः । उक्थ्यं । वचः । यतऽस्रुचा । मिथुना । या । सपर्यतः । असंऽयत्तः । व्रते । ते । क्षेति । पुष्यंति । भद्रा । शक्तिः । यजमानाय । सुन्वते ॥ ३ ॥ आत् । अंगिराः । प्रथमं । दधिरे । वयः । इद्धऽअग्नयः । शम्या । ये । सुऽकृत्यया । सर्वं । पणेः । सं । अविंदंत । भोजनं । अश्वऽवंतं । गोमंतं । आ । पशुं । नरः ॥ ४ ॥ यज्ञैः । अथर्वा । प्रथमः । पथः । तते । ततः । सूर्यः । व्रतऽपाः । वेनः । आ । अजनि । आ । गाः । आजत् । उशना । काव्यः । सचा । यमस्य । जातं । अमृतं । यजामहे ॥ ५ ॥

बर्हिर्वा यत्स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि ।
ग्रावा यत्र वदति कारुरुक्थ्यस्तस्येदिन्द्रो अभिपित्वेषु रण्यति ॥ ६ ॥ ४ ॥

॥ ८४ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ इन्द्रो देवता ॥ आदितः षट् अनुष्टुभः ॥

॥ ८४ ॥ असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥ १ ॥
इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् ।
ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥ २ ॥
आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी ।
अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥ ३ ॥
इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ ४ ॥
इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन ।
सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥ ५ ॥ ५ ॥

बर्हिः । वा । यत् । सुऽअपत्याय । वृज्यते । अर्कः । वा । श्लोकं । आऽघोषते । दिवि । ग्रावा । यत्र । वदति । कारुः । उक्थ्यः । तस्य । इत् । इंद्रः । अभिऽपित्वेषु । रण्यति ॥ ६ ॥ ४ ॥

असावि । सोमः । इंद्र । ते । शविष्ठ । धृष्णो इति । आ । गहि । आ । त्वा । पृणक्तु । इंद्रियं । रजः । सूर्यः । न । रश्मिऽभिः ॥ १ ॥ इंद्रं । इत् । हरी इति । वहतः । अप्रतिधृष्टऽशवसं । ऋषीणां । च । स्तुतीः । उप । यज्ञं । च । मानुषाणां ॥ २ ॥ आ । तिष्ठ । वृत्रऽहन् । रथं । युक्ता । ते । ब्रह्मणा । हरी इति । अर्वाचीनं । सु । ते । मनः । ग्रावा । कृणोतु । वग्नुना ॥ ३ ॥ इमं । इंद्र । सुतं । पिब । ज्येष्ठं । अमर्त्यं । मदं । शुक्रस्य । त्वा । अभि । अक्षरन् । धाराः । ऋतस्य । सदने ॥ ४ ॥ इंद्राय । नूनं । अर्चत । उक्थानि । च । ब्रवीतन । सुताः । अमत्सुः । इंदवः । ज्येष्ठं । नमस्यत । सहः ॥ ५ ॥ ५ ॥

नकिष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे ।

नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे ॥ ६ ॥

य एक इद्विदयते वसु मर्ताय दाशुषे ।

ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ ७ ॥

कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत् ।

कदा नः शुश्रवद्गिर इन्द्रो अङ्ग ॥ ८ ॥

यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति ।

उग्रं तत्पत्यते शव इन्द्रो अङ्ग ॥ ९ ॥

स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ।

या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यम् ॥ १० ॥ ६ ॥

नकिः । त्वत् । रथिऽतरः । हरी इति । यत् । इंद्र । यच्छसे । नकिः । त्वा । अनु । मज्मना । नकिः । सुऽअश्वः । आनशे ॥ ६ ॥ यः । एकः । इत् । विऽदयते । वसु । मर्ताय । दाशुषे । ईशानः । अप्रतिऽस्कुतः । इंद्रः । अंग ॥ ७ ॥ कदा । मर्तं । अराधसं । पदा । क्षुंपंऽइव । स्फुरत् । कदा । नः । शुश्रवत् । गिरः । इंद्रः । अंग ॥ ८ ॥ यः । चित् । हि । त्वा । बहुऽभ्यः । आ । सुतऽवान् । आऽविवासति । उग्रं । तत् । पत्यते । शवः । इंद्रः । अंग ॥ ९ ॥ स्वादोः । इत्था । विषुऽवतः । मध्वः । पिबंति । गौर्यः । याः । इंद्रेण । सऽयावरीः । वृष्णा । मदंति । शोभसे । वस्वीः । अनु । स्वऽराज्यं ॥ १० ॥ ६ ॥

ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ॥ ११ ॥
ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥ १२ ॥
इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥ १३ ॥
इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् । तद्विदच्छर्यणावति ॥ १४ ॥
अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥ १५ ॥ ७ ॥
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥ १६ ॥
क ईषते तुज्यते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति ।
कस्तोकाय क इभायोत रायेऽधि ब्रवत्तन्वे३ को जनाय ॥ १७ ॥

ताः । अस्य । पृशनऽयुवः । सोमं । श्रीणंति । पृश्नयः । प्रियाः । इंद्रस्य । धेनवः । वज्रं । हिन्वंति । सायकं । वस्वीः । अनु । स्वऽराज्यं ॥ ११ ॥ ताः । अस्य । नमसा । सहः । सपर्यंति । प्रऽचेतसः । व्रतानि । अस्य । सश्चिरे । पुरूणि । पूर्वऽचित्तये । वस्वीः । अनु । स्वऽराज्यं ॥ १२ ॥ इंद्रः । दधीचः । अस्थऽभिः । वृत्राणि । अप्रतिऽस्कुतः । जघान । नवतीः । नव ॥ १३ ॥ इच्छन् । अश्वस्य । यत् । शिरः । पर्वतेषु । अपऽश्रितं । तत् । विदत् । शर्यणाऽवति ॥ १४ ॥ अत्र । अह । गोः । अमन्वत । नाम । त्वष्टुः । अपीच्यं । इत्था । चंद्रमसः । गृहे ॥ १५ ॥ ७ ॥

कः । अद्य । युंक्ते । धुरि । गाः । ऋतस्य । शिमीऽवतः । भामिनः । दुःऽहृणायून् । आसन्ऽइषून् । हृत्सुऽअसः । मयःऽभून् । यः । एषां । भृत्यां । ऋणधत् । सः । जीवात् ॥ १६ ॥ कः । ईषते । तुज्यते । कः । बिभाय । कः । मंसते । संतं । इंद्रं । कः । अंति । कः । तोकाय । कः । इभाय । उत । राये । अधि । ब्रवत् । तन्वे । कः । जनाय ॥ १७ ॥

को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः ।
कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः ॥ १८ ॥
त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम् ।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ १९ ॥
मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदा चना दभन् ।
विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥ २० ॥ ८ ॥ १३ ॥

॥ चतुर्दशोऽनुवाकः ॥

॥ ८५ ॥ रहूगणपुत्रो गोतम ऋषिः । मरुतो देवता ॥ पञ्चमी, द्वादश्यौ । त्रिष्टुभौ । शिष्टा जगत्यः

॥ ८५ ॥ प्र ये शुम्भन्ते जनयो न सप्तयो यामन्रुद्रस्य सूनवः सुदंससः ।
रोदसी हि मरुतश्चक्रिरे वृधे मदन्ति वीरा विदथेषु घृष्वयः ॥ १ ॥
त उक्षितासो महिमानमाशत दिवि रुद्रासो अधि चक्रिरे सदः ।
अर्चन्तो अर्कं जनयन्त इन्द्रियमधि श्रियो दधिरे पृश्निमातरः ॥ २ ॥

कः । अग्निं । ईट्टे । हविषा । घृतेन । स्रुचा । यजाते । ऋतुऽभिः । ध्रुवेभिः । कस्मै । देवाः । आ । वहान् । आशु । होम । कः । मंसते । वीतिऽहोत्रः । सुऽदेवः ॥ १८ ॥ त्वं । अंग । प्र । शंसिषः । देवः । शविष्ठ । मर्त्यं । न । त्वत् । अन्यः । मघऽवन् । अस्ति । मर्डिता । इंद्र । ब्रवीमि । ते । वचः ॥ १९ ॥ मा । ते । राधांसि । मा । ते । ऊतयः । वसो इति । अस्मान् । कदा । चन । दभन् । विश्वा । च । नः । उपऽमिमीहि । मानुष । वसूनि । चर्षणिऽभ्यः । आ ॥ २० ॥ ८ ॥

प्र । ये । शुंभंते । जनयः । न । सप्तयः । यामन् । रुद्रस्य । सूनवः । सुऽदंससः । रोदसी इति । हि । मरुतः । चक्रिरे । वृधे । मदंति । वीराः । विदथेषु । घृष्वयः ॥ १ ॥ ते । उक्षितासः । महिमानं । आशत । दिवि । रुद्रासः । अधि । चक्रिरे । सदः । अर्चंतः । अर्कं । जनयंतः । इंद्रियं । अधि । श्रियः । दधिरे । पृश्निऽमातरः ॥ २ ॥

गोमातरो यच्छुभयन्ते अञ्जिभिस्तनूषु शुभ्रा दधिरे विरुक्मतः ।
बाधन्ते विश्वमभिमातिनमप वर्त्मान्येषामनु रीयते घृतम् ॥ ३ ॥
वि ये भ्राजन्ते सुमखास ऋष्टिभिः प्रच्यावयन्तो अच्युता चिदोजसा ।
मनोजुवो यन्मरुतो रथेष्वा वृषव्रातासः पृषतीरयुग्ध्वम् ॥ ४ ॥
प्र यद्रथेषु पृषतीरयुग्ध्वं वाजे अद्रिं मरुतो रंहयन्तः ।
उतारुषस्य वि ष्यन्ति धाराश्चर्मेवोदभिर्व्युन्दन्ति भूम ॥ ५ ॥
आ वो वहन्तु सप्तयो रघुष्यदो रघुपत्वानः प्र जिगात बाहुभिः ।
सीदता बर्हिरुरु वः सदस्कृतं मादयध्वं मरुतो मध्वो अन्धसः ॥ ६ ॥ ९॥
तेऽवर्धन्त स्वतवसो महित्वना नाकं तस्थुरुरु चक्रिरे सदः ।
विष्णुर्यद्धावद्वृषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये ॥ ७ ॥

गोऽमातरः । यत् । शुभयन्ते । अञ्जिऽभिः । तनूषु । शुभ्राः । दधिरे । विरुक्मतः । बाधन्ते । विश्वं । अभिऽमातिनं । अप । वर्त्मानि । एषां । अनु । रीयते । घृतं ॥ ३ ॥ वि । ये । भ्राजन्ते । सुऽमखासः । ऋष्टिऽभिः । प्रऽच्यवयन्तः । अच्युता । चित् । ओजसा । मनःऽजुवः । यत् । मरुतः । रथेषु । आ । वृषऽव्रातासः । पृषतीः । अयुग्ध्वं ॥ ४ ॥ प्र । यत् । रथेषु । पृषतीः । अयुग्ध्वं । वाजे । अद्रिं । मरुतः । रंहयन्तः । उत । अरुषस्य । वि । स्यन्ति । धाराः । चर्मऽइव । उदऽभिः । वि । उन्दन्ति । भूम ॥ ५ ॥ आ । वः । वहन्तु । सप्तयः । रघुऽस्यदः । रघुऽपत्वानः । प्र । जिगात । बाहुऽभिः । सीदत । आ । बर्हिः । उरु । वः । सदः । कृतं । मादयध्वं । मरुतः । मध्वः । अन्धसः ॥ ६ ॥ ९ ॥

ते । अवर्धन्त । स्वऽतवसः । महिऽत्वना । आ । नाकं । तस्थुः । उरु । चक्रिरे । सदः । विष्णुः । यत् । ह । आवत् । वृषणं । मदऽच्युतं । वयः । न । सीदन् । अधि । बर्हिषि । प्रिये ॥ ७ ॥

शूरा इवेद्युयुधयो न जग्मयः श्रवस्यवो न पृतनासु येतिरे ।
भयन्ते विश्वा भुवना मरुद्भ्यो राजान इव त्वेषसंदृशो नरः ॥ ८ ॥
त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत् ।
धत्त इन्द्रो नर्यपांसि कर्तवेऽहन्वृत्रं निरपामौब्जदर्णवम् ॥ ९ ॥
ऊर्ध्वं नुनुद्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि पर्वतम् ।
धमन्तो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे ॥ १० ॥
जिह्मं नुनुद्रेऽवतं तया दिशासिञ्चन्नुत्सं गोतमाय तृष्णजे ।
आ गच्छन्तीमवसा चित्रभानवः कामं विप्रस्य तर्पयन्त धामभिः ॥ ११ ॥
या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि ।
अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरम् ॥ १२ ॥ १० ॥

शूराःऽइव । इत् । युयुधयः । न । जग्मयः । श्रवस्यवः । न । पृतनासु । येतिरे । भयंते । विश्वा । भुवना । मरुत्ऽभ्यः । राजानःऽइव । त्वेषऽसंदृशः । नरः ॥ ८ ॥ त्वष्टा । यत् । वज्रं । सुऽकृतं । हिरण्ययं । सहस्रऽभृष्टिं । सुऽअपाः । अवर्तयत् । धत्ते । इंद्रः । नरि । अपांसि । कर्तवे । अहन् । वृत्रं । निः । अपां । औब्जत् । अर्णवं ॥ ९ ॥ ऊर्ध्वं । नुनुद्रे । अवतं । ते । ओजसा । दादृहाणं । चित् । बिभिदुः । वि । पर्वतं । धमंतः । वाणं । मरुतः । सुऽदानवः । मदे । सोमस्य । रण्यानि । चक्रिरे ॥ १० ॥ जिह्मं । नुनुद्रे । अवतं । तया । दिशा । असिंचन् । उत्सं । गोतमाय । तृष्णऽजे । आ । गच्छंति । ईं । अवसा । चित्रऽभानवः । कामं । विप्रस्य । तर्पयंत । धामऽभिः ॥ ११ ॥ या । वः । शर्म । शशमानाय । संति । त्रिऽधातूनि । दाशुषे । यच्छत । अधि । अस्मभ्यं । तानि । मरुतः । वि । यंत । रयिं । नः । धत्त । वृषणः । सुऽवीरं ॥ १२ ॥ १० ॥

॥ ८६ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ मरुतो देवता ॥ गायत्री छन्दः ॥

॥ ८६ ॥ मरुतो यस्य हि क्षये पाथा दिवो विमहसः ।
स सुगोपातमो जनः ॥ १ ॥
यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनाम् ।
मरुतः शृणुता हवम् ॥ २ ॥
उत वा यस्य वाजिनोऽनु विप्रमतक्षत ।
स गन्ता गोमति व्रजे ॥ ३ ॥
अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु ।
उक्थं मदश्च शस्यते ॥ ४ ॥
अस्य श्रोषन्त्वा भुवो विश्वा यश्चर्षणीरभि ।
सूरं चित्सस्रुषीरिषः ॥ ५ ॥ ११ ॥

मरुतः । यस्य । हि । क्षये । पाथ । दिवः । विऽमहस । सः । सुऽगोपातमः । जनः ॥ १ ॥ यज्ञैः । वा । यज्ञऽवाहसः । विप्रस्य । वा । मतीनां । मरुतः । शृणुत । हवं ॥ २ ॥ उत । वा । यस्य । वाजिनः । अनु । विप्रं । अतक्षत । सः । गंता । गोऽमति । व्रजे ॥ ३ ॥ अस्य । वीरस्य । बर्हिषि । सुतः । सोमः । दिविष्टिषु । उक्थं । मदः । च । शस्यते ॥ ४ ॥ अस्य । श्रोषंतु । आ । भुवः । विश्वाः । यः । चर्षणीः । अभि । सूरं । चित् । सस्रुषीः । इषः ॥ ५ ॥ ११ ॥

पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम् ।

अवोभिश्चर्षणीनाम् ॥ ६ ॥

सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः ।

यस्य प्रयांसि पर्षथ ॥ ७ ॥

शशमानस्य वा नरः स्वेदस्य सत्यशवसः ।

विदा कामस्य वेनतः ॥ ८ ॥

यूयं तत्सत्यशवस आविष्कर्त महित्वना ।

विध्यता विद्युता रक्षः ॥ ९ ॥

गूहता गुह्यं तमो वि यात विश्वमत्रिणम् ।

ज्योतिष्कर्ता यदुश्मसि ॥ १० ॥ १२ ॥

पूर्वीभिः । हि । ददाशिम । शरत्ऽभिः । मरुतः । वयं । अवःऽभिः । चर्षणीनां ॥ ६ ॥ सुऽभगः । सः । प्रऽयज्यवः । मरुतः । अस्तु । मर्त्यः । यस्य । प्रयांसि । पर्षथ ॥ ७ ॥ शशमानस्य । वा । नरः । स्वेदस्य । सत्यऽशवसः । विद । कामस्य । वेनतः ॥ ८ ॥ यूयं । तत् । सत्यऽशवसः । आविः । कर्त । महिऽत्वना । विध्यत । विऽद्युता । रक्षः ॥ ९ ॥ गूहत । गुह्यं । तमः । वि । यात । विश्वं । अत्रिणं । ज्योतिः । कर्त । यत् । उश्मसि ॥ १० ॥ १२ ॥

॥ ८७. ॥ रहूगणपुत्रो गोतम ऋषिः ॥ मरुतो देवता ॥ जगती छन्दः ॥

॥ ८७ ॥ प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः ।
जुष्टतमासो नृतमासो अञ्जिभिर्व्यानज्रे के चिदुस्रा इव स्तृभिः ॥ १ ॥
उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चित्पथा ।
श्चोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ॥ २ ॥
प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे ।
ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः ॥ ३ ॥
स हि स्वसृत्पृषदश्वो युवा गणो३ऽया ईशानस्तविषीभिरावृतः ।
असि सत्य ऋणयावानेद्योऽस्या धियः प्राविताथा वृषा गणः ॥ ४ ॥
पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा ।
यदीमिन्द्रं शम्यृक्वाण आशतादिन्नामानि यज्ञियानि दधिरे ॥ ५ ॥

प्रऽत्वक्षसः । प्रऽतवसः । विऽरप्शिनः । अनानताः । अविथुराः । ऋजीषिणः । जुष्टऽतमासः । नृऽतमासः । अञ्जिऽभिः । वि । आनज्रे । के । चित् । उस्राःऽइव । स्तृऽभिः ॥ १ ॥ उपऽह्वरेषु । यत् । अचिध्वं । ययिं । वयःऽइव । मरुतः । केन । चित् । पथा । श्चोतंति । कोशाः । उप । वः । रथेषु । आ । घृतं । उक्षत । मधुऽवर्णं । अर्चते ॥ २ ॥ प्र । एषां । अज्मेषु । विथुराऽइव । रेजते । भूमिः । यामेषु । यत् । ह । युंजते । शुभे । ते । क्रीळयः । धुनयः । भ्राजत्ऽऋष्टयः । स्वयं । महिऽत्वं । पनयंत । धूतयः ॥ ३ ॥ सः । हि । स्वऽसृत् । पृषत्ऽअश्वः । युवा । गणः । अया । ईशानः । तविषीभिः । आऽवृतः । असि । सत्यः । ऋणऽयावा । अनेद्यः । अस्याः । धियः । प्रऽअविता । अथ । वृषा । गणः ॥ ४ ॥ पितुः । प्रत्नस्य । जन्मना । वदामसि । सोमस्य । जिह्वा । प्र । जिगाति । चक्षसा । यत् । ईं । इंद्रं । शमि । ऋक्वाणः । आशत । आत् । इत् । नामानि । यज्ञियानि । दधिरे ॥ ५ ॥

श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।
ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥ ६ ॥ १३ ॥

॥ ८८ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ मरुतो देवता ॥ प्रस्तारपंक्ती । छन्दः ॥

॥ ८८ ॥ आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः ।
आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥ १ ॥
तेऽरुणेभिर्वरमा पिशङ्गैः शुभे कं यान्ति रथतूर्भिरश्वैः ।
रुक्मो न चित्रः स्वधितीवान्पव्या रथस्य जङ्घनन्त भूम ॥ २ ॥
श्रिये कं वो अधि तनूषु वाशीर्मेधा वना न कृणवन्त ऊर्ध्वा ।
युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयन्ते अद्रिम् ॥ ३ ॥
अहानि गृध्राः पर्या व आगुरिमां धियं वार्कार्यां च देवीम् ।
ब्रह्म कृण्वन्तो गोतमासो अर्कैरूर्ध्वं नुनुद्र उत्सधिं पिबध्यै ॥ ४ ॥

श्रियसे । कं । भानुऽभिः । सं । मिमिक्षिरे । ते । रश्मिऽभिः । ते । ऋक्वऽभिः । सुऽखादयः । ते । वाशीऽमंतः । इष्मिणः । अभीरवः । विद्रे । प्रियस्य । मारुतस्य धाम्नः ॥ ६ ॥ १३ ॥

आ । विद्युन्मत्ऽभिः । मरुतः । सुऽअर्कैः । रथेभिः । यात । ऋष्टिमत्ऽभिः । अश्वऽपर्णैः । आ । वर्षिष्ठया । नः । इषा । वयः । न । पप्तत । सुऽमायाः ॥ १ ॥
ते । अरुणेभिः । वरं । आ । पिशंगैः । शुभे । कं । यांति । रथतूःऽभिः । अश्वैः । रुक्मः । न । चित्रः । स्वधितिवान् । पव्या । रथस्य । जंघनंत । भूम ॥ २ ॥
श्रिये । कं । वः । अधि । तनूषु । वाशीः । मेधा । वना । न । कृणवंते । ऊर्ध्वा । युष्मभ्यं । कं । मरुतः । सुजाताः । तुविऽद्युम्नासः । धनयंते । अद्रिं ॥ ३ ॥
अहानि । गृध्राः । परि । आ । वः । आ । अगुः । इमां । धियं । वार्कार्यां । च । देवीं । ब्रह्म । कृण्वंतः । गोतमासः । अर्कैः । ऊर्ध्वं । नुनुद्रे । उत्सऽधिं । पिबध्यै ॥ ४ ॥

एतत्त्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः ।
पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतो वराहून् ॥ ५ ॥
एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी ।
अस्तोभयद्वृथासामनु स्वधां गभस्त्योः ॥ ६ ॥ १४ ॥

॥ ८९. ॥ रहूगणपुत्रो गोतम ऋषिः ॥ विश्वे देवा देवताः ॥ जगती छन्दः ॥

॥८९॥ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥ १ ॥
देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ॥ २ ॥
तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ ३ ॥

एतत् । त्यत् । न । योजनं । अचेति । सस्वः । ह । यत् । मरुतः । गोतमः । वः । पश्यन् । हिरण्यऽचक्रान् । अयःऽदंष्ट्रान् । विऽधावतः । वराहून् ॥ ५ ॥ एषा । स्या । वः । मरुतः । अनुऽभर्त्री । प्रति । स्तोभति । वाघतः । न । वाणी । अस्तोभयत् । वृथा । आसां । अनु । स्वधा । गभस्त्योः ॥ ६ ॥ १४ ॥

आ । नः । भद्राः । क्रतवः । यन्तु । विश्वतः । अदब्धासः । अपरिऽइतासः । उत्ऽभिदः । देवाः । नः । यथा । सदं । इत् । वृधे । असन् । अप्रऽआयुवः । रक्षितारः । दिवेऽदिवे ॥ १ ॥ देवानां । भद्रा । सुऽमतिः । ऋजुऽयतां । देवानां । रातिः । अभि । नः । नि । वर्ततां । देवानां । सख्यं । उप । सेदिम । वयं । देवाः । नः । आयुः । प्र । तिरंतु । जीवसे ॥ २ ॥ तान् । पूर्वया । निऽविदा । हूमहे । वयं । भगं । मित्रं । अदितिं । दक्षं । अस्रिधं । अर्यमणं । वरुणं । सोमं । अश्विना । सरस्वती । नः । सुऽभगा । मयः । करत् ॥ ३ ॥

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥ ४ ॥
तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ५ ॥ १५ ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ६ ॥
पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥ ७ ॥
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ ८ ॥

तत् । नः । वातः । मयःऽभु । वातु । भेषजं । तत् । माता । पृथिवी । तत् । पिता । द्यौः । तत् । ग्रावाणः । सोमऽसुतः । मयःऽभुवः । तत् । अश्विना । शृणुतं । धिष्ण्या । युवं ॥ ४ ॥ तं । ईशानं । जगतः । तस्थुषः । पतिं । धियंऽजिन्वं । अवसे । हूमहे । वयं । पूषा । नः । यथा । वेदसा । असत् । वृधे । रक्षिता । पायुः । अदब्धः । स्वस्तये ॥ ५ ॥ १५ ॥

स्वस्ति । नः । इंद्रः । वृद्धऽश्रवाः । स्वस्ति । नः । पूषा । विश्वऽवेदाः । स्वस्ति । नः । तार्क्ष्यः । अरिष्टऽनेमिः । स्वस्ति । नः । बृहस्पतिः । दधातु ॥ ६ ॥ पृषत्ऽअश्वाः । मरुतः । पृश्निऽमातरः । शुभंऽयावानः । विदथेषु । जग्मयः । अग्निऽजिह्वाः । मनवः । सूरऽचक्षसः । विश्वे । नः । देवाः । अवसा । आ । गमन् । इह ॥ ७ ॥ भद्रं । कर्णेभिः । शृणुयाम । देवाः । भद्रं । पश्येम । अक्षऽभिः । यजत्राः । स्थिरैः । अंगैः । तुष्टुऽवांसः । तनूभिः । वि । अशेम । देवऽहितं । यत् । आयुः ॥ ८ ॥

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ ९ ॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥ १० ॥ १६ ॥

॥ ९० ॥ रहूगणपुत्रो गोतम ऋषिः ॥ विश्वेदेवा देवता ॥ गायत्री अन्त्यानुष्टुप् छन्दः ॥

॥ ९० ॥ ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् ।
अर्यमा देवैः सजोषाः ॥ १ ॥
ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः ।
व्रता रक्षन्ते विश्वाहा ॥ २ ॥
ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः ।
बाधमाना अप द्विषः ॥ ३ ॥

शतं । इत् । नु । शरदः । अन्ति । देवाः । यत्र । नः । चक्र । जरसं । तनूनां । पुत्रासः । यत्र । पितरः । भवन्ति । मा । नः । मध्या । रिरिषत । आयुः । गन्तोः ॥ ९ ॥ अदितिः । द्यौः । अदितिः । अन्तरिक्षं । अदितिः । माता । सः । पिता । सः । पुत्रः । विश्वे । देवाः । अदितिः । पञ्च । जनाः । अदितिः । जातं । अदितिः । जनिऽत्वं ॥ १० ॥ १६ ॥

ऋजुऽनीती । नः । वरुणः । मित्रः । नयतु । विद्वान् । अर्यमा । देवैः । सऽजोषाः ॥ १ ॥ ते । हि । वस्वः । वसवानाः । ते । अप्रऽमूराः । महःऽभिः । व्रता । रक्षन्ते । विश्वाहा ॥ २ ॥ ते । अस्मभ्यं । शर्म । यंसन् । अमृताः । मर्त्येभ्यः । बाधमानाः । अप । द्विषः ॥ ३ ॥

वि नः॑ प॒थः सु॑वि॒ताय॑ चि॒यन्त्विन्द्रो॑ म॒रुतः॑ ।

पू॒षा भगो॒ वन्द्या॑सः ॥ ४ ॥

उ॒त नो॒ धियो॒ गोअ॑ग्राः॒ पूष॒न्विष्ण॒वेव॑यावः ।

कर्ता॑ नः स्वस्ति॒मतः॑ ॥ ५ ॥ १७ ॥

मधु॒ वाता॑ ऋताय॒ते मधु॑ क्षरन्ति॒ सिन्ध॑वः ।

माध्वी॑र्नः स॒न्त्वोष॑धीः ॥ ६ ॥

मधु॒ नक्त॑मु॒तोषसो॒ मधु॑म॒त्पार्थि॑वं॒ रजः॑ ।

मधु॒ द्यौर॑स्तु नः पि॒ता ॥ ७ ॥

मधु॑मान्नो॒ वन॒स्पति॒र्मधु॑माँ अस्तु॒ सूर्यः॑ ।

माध्वी॒र्गावो॑ भवन्तु नः ॥ ८ ॥

शं नो॑ मि॒त्रः शं वरु॑णः॒ शं नो॑ भवत्वर्य॒मा ।

शं न॒ इन्द्रो॒ बृह॒स्पतिः॒ शं नो॒ विष्णु॑रुरुक्र॒मः ॥ ९ ॥ १८ ॥

वि । नः॒ । प॒थः । सु॒वि॒ताय॑ । चि॒यंतु॑ । इंद्रः॑ । म॒रुतः॑ । पू॒षा । भगः॑ । वंद्या॑सः ॥ ४ ॥ उ॒त । नः॒ । धियः॑ । गोऽअ॑ग्राः । पूष॑न् । विष्णो॒ इति॑ । एव॑ऽयावः । कर्त॑ । नः॒ । स्व॒स्तिऽमतः॑ ॥ ५ ॥ १७ ॥ मधु॑ । वाताः॑ । ऋ॒त॒ऽय॒ते । मधु॑ । क्ष॒रं॒ति॒ । सिंध॑वः । माध्वीः॑ । नः॒ । सं॒तु॒ । ओष॑धीः ॥ ६ ॥ मधु॑ । नक्त॑ । उ॒त । उ॒षसः॑ । मधु॑ऽमत् । पार्थि॑वं । रजः॑ । मधु॑ । द्यौः । अ॒स्तु॒ । नः॒ । पि॒ता ॥ ७ ॥ मधु॑ऽमान् । नः॒ । वन॒स्पतिः॑ । मधु॑ऽमान् । अ॒स्तु॒ । सूर्यः॑ । माध्वीः॑ । गावः॑ । भ॒वं॒तु॒ । नः॒ ॥ ८ ॥ शं । नः॒ । मि॒त्रः । शं । वरु॑णः । शं । नः॒ । भ॒व॒तु॒ । अ॒र्य॒मा । शं । नः॒ । इंद्रः॑ । बृह॒स्पतिः॑ । शं । नः॒ । विष्णुः॑ । उ॒रु॒ऽक्र॒मः ॥ ९ ॥ १८ ॥

॥ ९१. ॥ रहूगणपुत्रो गोतम ऋषिः ॥ सोमो देवता ॥ गायत्री छन्दः ॥

॥ ९१ ॥ त्वं सोम प्र चिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥ १ ॥
त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः ।
त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ॥ २ ॥
राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥ ३ ॥
या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेळन्राजन्त्सोम प्रति हव्या गृभाय ॥ ४ ॥
त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा ।
त्वं भद्रो असि क्रतुः ॥ ५ ॥ १९ ॥

त्वं । सोम । प्र । चिकितः । मनीषा । त्वं । रजिष्ठं । अनु । नेषि । पंथां । तव । प्रऽनीती । पितरः । नः । इंदो इति । देवेषु । रत्नं । अभजंत । धीराः ॥ १ ॥ त्वं । सोम । क्रतुऽभिः । सुऽक्रतुः । भूः । त्वं । दक्षैः । सुऽदक्षः । विश्वऽवेदाः । त्वं । वृषा । वृषऽत्वेभिः । महिऽत्वा । द्युम्नेभिः । द्युम्नी । अभवः । नृऽचक्षाः ॥ २ ॥ राज्ञः । नु । ते । वरुणस्य । व्रतानि । बृहत् । गभीरं । तव । सोम । धाम । शुचिः । त्वं । असि । प्रियः । न । मित्रः । दक्षाय्यः । अर्यमाऽइव । असि । सोम ॥ ३ ॥ या । ते । धामानि । दिवि । या । पृथिव्यां । या । पर्वतेषु । ओषधीषु । अप्ऽसु । तेभिः । नः । विश्वैः । सुऽमनाः । अहेळन् । राजन् । सोम । प्रति । हव्या । गृभाय ॥ ४ ॥ त्वं । सोम । असि । सत्ऽपतिः । त्वं । राजा । उत । वृत्रऽहा । त्वं । भद्रः । असि । क्रतुः ॥ ५ ॥ १९ ॥

त्वं च सोम नो वशो जीवातुं न मरामहे ।

प्रियस्तोत्रो वनस्पतिः ॥ ६ ॥

त्वं सोम महे भगं त्वं यून ऋतायते ।

दक्षं दधासि जीवसे ॥ ७ ॥

त्वं नः सोम विश्वतो रक्षा राजन्नघायतः ।

न रिष्येत्त्वावतः सखा ॥ ८ ॥

सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे ।

ताभिर्नोऽविता भव ॥ ९ ॥

इमं यज्ञमिदं वचो जुजुषाण उपागहि ।

सोम त्वं नो वृधे भव ॥ १० ॥ ॥ २० ॥

त्वं । च । सोम । नः । वशः । जीवातुं । न । मरामहे । प्रियऽस्तोत्रः । वनस्पतिः ॥ ६ ॥ त्वं । सोम । महे । भगं । त्वं । यूने । ऋतऽयते । दक्षं । दधासि । जीवसे ॥ ७ ॥ त्वं । नः । सोम । विश्वतः । रक्ष । राजन् । अघ-ऽयतः । न । रिष्येत् । त्वाऽवतः । सखा ॥ ८ ॥ सोम । याः । ते । मयःऽभुवः । ऊतयः । संति । दाशुषे । ताभिः । नः । अविता । भव ॥ ९ ॥ इमं । यज्ञं । इदं । वचः । जुजुषाणः । उपऽआगहि । सोम । त्वं । नः । वृधे । भव ॥ १० ॥ २० ॥

सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः ।
सुमृळीको न आ विश ॥ ११ ॥

गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः ।
सुमित्रः सोम नो भव ॥ १२ ॥

सोम रारन्धि नो हृदि गावो न यवसेष्वा ।
मर्य इव स्व ओक्ये ॥ १३ ॥

यः सोम सख्ये तव रारणद्देव मर्त्यः ।
तं दक्षः सचते कविः ॥ १४ ॥

उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः ।
सखा सुशेव एधि नः ॥ १५ ॥ २१ ॥

सोम । गीःऽभिः । त्वा । वयं । वर्धयामः । वचःऽविदः । सुऽमृळीकः । नः । आ । विश ॥ ११ ॥ गयऽस्फानः । अमीवऽहा । वसुऽवित् । पुष्टिऽवर्धनः । सुऽमित्रः । सोम । नः । भव ॥ १२ ॥ सोम । ररन्धि । नः । हृदि । गावः । न । यवसेषु । आ । मर्यःऽइव । स्वे । ओक्ये ॥ १३ ॥ यः । सोम । सख्ये । तव । ररणत् । देव । मर्त्यः । तं । दक्षः । सचते । कविः ॥ १४ ॥ उरुष्य । नः । अभिऽशस्तेः । सोम । नि । पाहि । अंहसः । सखा । सुऽशेवः । एधि । नः ॥ १५ ॥ २१ ॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।
भवा वाजस्य संगथे ॥ १६ ॥
आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः ।
भवा नः सुश्रवस्तमः सखा वृधे ॥ १७ ॥
सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥ १८ ॥
या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् ॥ १९ ॥
सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥ २० ॥ २२ ॥

आ । प्यायस्व । सं । एतु । ते । विश्वतः । सोम । वृष्ण्यं । भव । वाजस्य । संऽगथे ॥ १६ ॥ आ । प्यायस्व । मदिन्ऽतम । सोम । विश्वेभिः । अंशुऽभिः । भव । नः । सुश्रवःऽतमः । सखा । वृधे ॥ १७ ॥ सं । ते । पयांसि । सं । ऊं इति । यन्तु । वाजाः । सं । वृष्ण्यानि । अभिमातिऽसहः । आऽप्यायमानः । अमृताय । सोम । दिवि । श्रवांसि । उत्ऽतमानि । धिष्व ॥ १८ ॥ या ते । धामानि । हविषा । यजन्ति । ता । ते । विश्वा । परिऽभूः । अस्तु । यज्ञं । गयऽस्फानः । प्रऽतरणः । सुऽवीरः । अवीरऽहा । प्र । चर । सोम । दुर्यान् ॥ १९ ॥ सोमः । धेनुं । सोमः । अर्वन्तं । आशुं । सोमः । वीरं । कर्मण्यं । ददाति । सदन्यं । विदथ्यं । सभेयं । पितृऽश्रवणं । यः । ददाशत् । अस्मै ॥ २० ॥ २२ ॥

अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥ २१ ॥
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमा ततन्थोर्व१ न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ २२ ॥
देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥ २३ ॥ २३ ॥

॥ ९२ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ उषा देवता ॥ जगती छन्दः ॥

॥ ९२ ॥ एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते ।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः ॥ १ ॥

अषाळ्हं । युत्ऽसु । पृतनासु । पप्रिं । स्वःऽसां । अप्सां । वृजनस्य । गोपां ।
भरेषुऽजां । सुऽक्षितिं । सुऽश्रवसं । जयंतं । त्वां । अनु । मदेम । सोम ॥ २१ ॥
त्वं । इमाः । ओषधीः । सोम । विश्वाः । त्वं । अपः । अजनयः । त्वं । गाः ।
त्वं । आ । ततंथ । उरु । अंतरिक्षं । त्वं । ज्योतिषा । वि । तमः । ववर्थ
॥ २२ ॥ देवेन । नः । मनसा । देव । सोम । रायः । भागं । सहसाऽवन् ।
अभि । युध्य । मा । त्वा । आ । तनत् । ईशिषे । वीर्यस्य । उभयेभ्यः । प्र ।
चिकित्स । गोऽइष्टौ ॥ २३ ॥ २३ ॥

एताः । ऊं इति । त्याः । उषसः । केतुं । अक्रत । पूर्वे । अर्धे । रजसः ।
भानुं । अंजते । निःऽकृण्वानाः । आयुधानिऽइव । धृष्णवः । प्रति । गावः ।
अरुषीः । यंति । मातरः ॥ १ ॥

उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।
अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः ॥ २ ॥
अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः ।
इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥ ३ ॥
अधि पेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहम् ।
ज्योतिर्विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्युषा आवर्तमः ॥ ४ ॥
प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णमभ्वम् ।
स्वरुं न पेशो विदथेष्वञ्जञ्चित्रं दिवो दुहिता भानुमश्रेत् ॥ ५ ॥ २४ ॥
अतारिष्म तमसस्पारमस्योषा उच्छन्ती वयुना कृणोति ।
श्रिये छन्दो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः ॥ ६ ॥

उत् । अपप्तन् । अरुणाः । भानवः । वृथा । सुऽआयुजः । अरुषीः । गाः । अयुक्षत । अक्रन् । उषसः । वयुनानि । पूर्वऽथा । रुशंतं । भानुं । अरुषीः । अशिश्रयुः ॥ २ ॥ अर्चंति । नारीः । अपसः । न । विष्टिऽभिः । समानेन । योजनेन । आ । पराऽवतः । इषं । वहंतीः । सुऽकृते । सुऽदानवे । विश्वा । इत् । अह । यजमानाय । सुन्वते ॥ ३ ॥ अधि । पेशांसि । वपते । नृतूःऽइव । अप । ऊर्णुते । वक्षः । उस्राऽइव । बर्जहं । ज्योतिः । विश्वस्मै । भुवनाय । कृण्वती । गावः । न । व्रजं । वि । उषाः । आवरित्यावः । तमः ॥ ४ ॥ प्रति । अर्चिः । रुशत् । अस्याः । अदर्शि । वि । तिष्ठते । बाधते । कृष्णं । अभ्वं । स्वरुं । न । पेशः । विदथेषु । अंजन् । चित्रं । दिवः । दुहिता । भानुं । अश्रेत् ॥ ५ ॥ २४ ॥ अतारिष्म । तमसः । पारं । अस्य । उषाः । उच्छंती । वयुना । कृणोति । श्रिये । छंदः । न । स्मयते । विऽभाती । सुऽप्रतीका । सौमनसाय । अजीगरिति ॥ ६ ॥

भास्वती नेत्री सूनृतानां दिवः स्तवे दुहिता गोतमेभिः ।
प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि वाजान् ॥ ७ ॥
उषस्तमश्यां यशसं सुवीरं दासप्रवर्गं रयिमश्वबुध्यम् ।
सुदंससा श्रवसा या विभासि वाजप्रसूता सुभगे बृहन्तम् ॥ ८ ॥
विश्वानि देवी भुवनाभिचक्ष्या प्रतीची चक्षुरुर्विया वि भाति ।
विश्वं जीवं चरसे बोधयन्ती विश्वस्य वाचमविदन्मनायोः ॥ ९ ॥
पुनःपुनर्जायमाना पुराणी समानं वर्णमभि शुम्भमाना ।
श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयन्त्यायुः ॥ १० ॥ २९ ॥
व्यूर्ण्वती दिवो अन्ताँ अबोध्यप स्वसारं सनुतर्युयोति ।
प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥ ११ ॥

भास्वती । नेत्री । सूनृतानां । दिवः । स्तवे । दुहिता । गोतमेभिः । प्रजाऽवतः ।
नृऽवतः । अश्वऽबुध्यान् । उषः । गोऽअग्रान् । उप । मासि । वाजान् ॥ ७ ॥
उषः । तं । अश्यां । यशसं । सुऽवीरं । दासऽप्रवर्गं । रयिं । अश्वऽबुध्यं । सुऽदंससा । श्रवसा । या । विऽभासि । वाजऽप्रसूता । सुऽभगे । बृहंतं ॥ ८ ॥
विश्वानि । देवी । भुवना । अभिऽचक्ष्य । प्रतीची । चक्षुः । उर्विया । वि । भाति ।
विश्वं । जीवं । चरसे । बोधयंती । विश्वस्य । वाचं । अविदत् । मनायोः ॥ ९ ॥
पुनःऽपुनः । जायमाना । पुराणी । समानं । वर्णं । अभि । शुंभमाना । श्वघ्नीऽइव ।
कृत्नुः । विजः । आऽमिनाना । मर्तस्य । देवी । जरयंती । आयुः ॥ १० ॥ २९ ॥
विऽऊर्ण्वती । दिवः । अंतान् । अबोधि । अप । स्वसारं । सनुतः । युयोति ।
प्रऽमिनती । मनुष्या । युगानि । योषा । जारस्य । चक्षसा । वि । भाति ॥ ११ ॥

पशून्न चित्रा सुभगा प्रथाना सिन्धुर्न क्षोद उर्विया व्यश्वैत् ।
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना ॥ १२ ॥
उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति ।
येन तोकं च तनयं च धामहे ॥ १३ ॥
उषो अद्येह गोमत्यश्वावति विभावरि ।
रेवदस्मे व्युच्छ सूनृतावति ॥ १४ ॥
युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः ।
अथा नो विश्वा सौभगान्या वह ॥ १५ ॥ २६ ॥
अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत् ।
अर्वाग्रथं समनसा नि यच्छतम् ॥ १६ ॥

पशून् । न । चित्रा । सुऽभगा । प्रथाना । सिंधुः । न । क्षोदः । उर्विया । वि । अश्वैत् । अमिनती । दैव्यानि । व्रतानि । सूर्यस्य । चेति । रश्मिऽभिः । दृशाना ॥ १२ ॥ उषः । तत् । चित्रं । आ । भर । अस्मभ्यं । वाजिनीऽवति । येन । तोकं । च । तनयं । च । धामहे ॥ १३ ॥ उषः । अद्य । इह । गोऽमति । अश्वऽवति । विभाऽवरि । रेवत् । अस्मे इति । वि । उच्छ । सूनृताऽवति ॥ १४ ॥ युक्ष्व । हि । वाजिनीऽवति । अश्वान् । अद्य । अरुणान् । उषः । अथ । नः । विश्वा । सौभगानि । आ । वह ॥ १५ ॥ २६ ॥ अश्विना । वर्तिः । अस्मत् । आ । गोऽमत् । दस्रा । हिरण्यऽवत् । अर्वाक् । रथं । सऽमनसा । नि । यच्छतं ॥ १६ ॥

यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः ।

आ न ऊर्जं वहतमश्विना युवम् ॥ १७ ॥

एह देवा मयोभुवा दस्रा हिरण्यवर्तनी ।

उषर्बुधो वहन्तु सोमपीतये ॥ १८ ॥ २७ ॥

॥ ९३ ॥ रहूगणपुत्रो गोतम ऋषिः ॥ अग्नीषोमौ देवता ॥ आद्यस्तृच आनुष्टुभः ।

॥ ९३ ॥ अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम् ।

प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥ १ ॥

अग्नीषोमा यो अद्य वामिदं वचः सपर्यति ।

तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यम् ॥ २ ॥

अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम् ।

स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत् ॥ ३ ॥

यौ । इत्था । श्लोकं । आ । दिवः । ज्योतिः । जनाय । चक्रथुः । आ । नः । ऊर्जं । वहतं । अश्विना । युवं ॥ १७ ॥ आ । इह । देवा । मयःऽभुवा । दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी । उषःऽबुधः । वहंतु । सोमऽपीतये ॥ १८ ॥ २७ ॥

अग्नीषोमौ । इमं । सु । मे । शृणुतं । वृषणा । हवं । प्रति । सुऽउक्तानि । हर्यतं । भवतं । दाशुषे । मयः ॥ १ ॥ अग्नीषोमा । यः । अद्य । वां । इदं । वचः । सपर्यति । तस्मै । धत्तं । सुऽवीर्यं । गवां । पोषं । सुऽअश्व्यं ॥ २ ॥ अग्नीषोमा । यः । आऽहुतिं । यः । वां । दाशात् । हविःऽकृतिं । सः । प्रऽजया । सुऽवीर्यं । विश्वं । आयुः । वि । अश्नवत् ॥ ३ ॥

अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिं गाः ।
अवातिरतं बृसयस्य शेषोऽविन्दतं ज्योतिरेकं बहुभ्यः ॥ ४ ॥
युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् ।
युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान् ॥ ५ ॥
आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः ।
अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम् ॥ ६ ॥ २८ ॥
अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथाम् ।
सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥ ७ ॥
यो अग्नीषोमा हविषा सपर्याद्देवद्रीचा मनसा यो घृतेन ।
तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतम् ॥ ८ ॥

अग्नीषोमा । चेति । तत् । वीर्यं । वां । यत् । अमुष्णीतं । अवसं । पणिं । गाः । अवं । अतिरतं । बृसयस्य । शेषः । अविन्दतं । ज्योतिः । एकं । बहुऽभ्यः ॥ ४ ॥ युवं । एतानि । दिवि । रोचनानि । अग्निः । च । सोम । सक्रतू इति सऽक्रतू । अधत्तं । युवं । सिन्धून् । अभिऽशस्तेः । अवद्यात् । अग्नीषोमौ । अमुञ्चतं । गृभीतान् ॥ ५ ॥ आ । अन्यं । दिवः । मातरिश्वा । जभार । अमथ्नात् । अन्यं । परि । श्येनः । अद्रेः । अग्नीषोमा । ब्रह्मणा । ववृधाना । उरुं । यज्ञाय । चक्रथुः । ऊं इति । लोकं ॥ ६ ॥ २८ ॥ अग्नीषोमा । हविषः । प्रऽस्थितस्य । वीतं । हर्यतं । वृषणा । जुषेथां । सुऽशर्माणा । सुऽअवसा । हि । भूतं । अथ । धत्तं । यजमानाय । शं । योः ॥ ७ ॥ यः । अग्नीषोमा । हविषा । सपर्यात् । देवद्रीचा । मनसा । यः । घृतेन । तस्य । व्रतं । रक्षतं । पातं । अंहसः । विशे । जनाय । महि । शर्म । यच्छतं ॥ ८ ॥

अग्नीषोमा सवेदसा सहूती वनतं गिरः ।

सं देवत्रा बभूवथुः ॥ ९ ॥

अग्नीषोमावनेन वां यो वां घृतेन दाशति ।

तस्मै दीदयतं बृहत् ॥ १० ॥

अग्नीषोमाविमानि नो युवं हव्या जुजोषतम् ।

आ यातमुप नः सचा ॥ ११ ॥

अग्नीषोमा पिपृतमर्वतो न आ प्यायन्तामुस्रिया हव्यसूदः ।
अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमन्तम् ॥१२॥२९॥१४॥

॥ पञ्चदशोऽनुवाकः ॥

॥ ९४ ॥ ऋषिः-कुत्स आङ्गिरसः ॥ देवता-अग्नि छन्दः-जगति, त्रिष्टुप् ।

॥ ९४ ॥ इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥ १ ॥

अग्नीषोमा । सऽवेदसा । सहूती इति सऽहूती । वनतं । गिरः । सं । देवऽत्रा । बभूवथुः ॥ ९ ॥ अग्नीषोमौ । अनेन । वां । यः । वां । घृतेन । दाशति । तस्मै । दीदयतं । बृहत् ॥ १० ॥ अग्नीषोमौ । इमानि । नः । युवं । हव्या । जुजोषतं । आ । यातं । उप । नः । सचा ॥ ११ ॥ अग्नीषोमा । पिपृतं । अर्वतः । नः । आ । प्यायंता । उस्रियाः । हव्यऽसूदः । अस्मे इति । बलानि । मघवत्ऽसु । धत्तं । कृणुतं । नः । अध्वरं । श्रुष्टिऽमंतं ॥ १२ ॥ २९ ॥ १४ ॥

इमं । स्तोमं । अर्हते । जातऽवेदसे । रथंऽइव । सं । महेम । मनीषया । भद्रा । हि । नः । प्रऽमतिः । अस्य । संऽसदि । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ १ ॥

यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यम् ।
स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव ॥ २ ॥
शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।
त्वमादित्याँ आ वह तान्ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव ॥ ३ ॥
भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥ ४ ॥
विशां गोपा अस्य चरन्ति जन्तवो द्विपच्च यदुत चतुष्पदक्तुभिः ।
चित्रः प्रकेत उषसो महाँ अस्यग्ने सख्ये मा रिषामा वयं तव ॥ ५ ॥ ३० ॥
त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः ।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव ॥ ६ ॥

यस्मै । त्वं । आऽयजसे । सः । साधति । अनर्वा । क्षेति । दधते । सुऽवीर्यं । सः । तूताव । न । एनं । अश्नोति । अंहतिः । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ २ ॥ शकेम । त्वा । संऽइधं । साधय । धियः । त्वे इति । देवाः । हविः । अदंति । आऽहुतं । त्वं । आदित्यान् । आ । वह । तान् । हि । उश्मसि । अग्ने । सख्ये । मा रिषाम । वयं । तव ॥ ३ ॥ भराम । इध्मं । कृणवाम । हवींषि । ते । चितयंतः । पर्वणाऽपर्वणा । वयं । जीवातवे । प्रऽतरं । साधय । धियः । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ ४ ॥ विशां । गोपाः । अस्य । चरंति । जंतवः । द्विऽपत् । च । यत् । उत । चतुःऽपत् । अक्तुऽभिः । चित्रः । प्रऽकेतः । उषसः । महान् । असि । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ ५ ॥ ३० ॥ त्वं । अध्वर्युः । उत । होता । असि । पूर्व्यः । प्रऽशास्ता । पोता । जनुषा । पुरःऽहितः । विश्वा । विद्वान् । आर्त्विज्या । धीर । पुष्यसि । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ ६ ॥

यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे ।
राज्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव ॥ ७ ॥
पूर्वो देवा भवतु सुन्वतो रथोऽस्माकं शंसो अभ्यस्तु दूढ्यः ।
तदा जानीतोत पुष्यता वचोऽग्ने सख्ये मा रिषामा वयं तव ॥ ८ ॥
वधैर्दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अन्ति वा के चिदत्रिणः ।
अथा यज्ञाय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव ॥ ९ ॥
यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः ।
आदिन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव ॥ १० ॥ ३१ ॥
अध स्वनादुत बिभ्युः पतत्रिणो द्रप्सा यत्ते यवसादो व्यस्थिरन् ।
सुगं तत्ते तावकेभ्यो रथेभ्योऽग्ने सख्ये मा रिषामा वयं तव ॥ ११ ॥

यः । विश्वतः । सुऽप्रतीकः । सऽदृङ् । असि । दूरे । चित् । सन् । तळित्ऽइव । अति । रोचसे । राज्याः । चित् । अंधः । अति । देव । पश्यसि । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ ७ ॥ पूर्वः । देवाः । भवतु । सुन्वतः । रथः । अस्माकं । शंसः । अभि । अस्तु । दुःऽध्यः । तत् । आ । जानीत । उत । पुष्यत । वचः । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ ८ ॥ वधैः । दुःऽशंसान् । अप । दुःऽध्यः । जहि । दूरे । वा । ये । अंति । वा । के । चित् । अत्रिणः । अथ । यज्ञाय । गृणते । सुऽगं । कृधि । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ ९ ॥ यत् । अयुक्थाः । अरुषा । रोहिता । रथे । वातऽजूता । वृषभस्यऽइव । ते । रवः । आत् । इन्वसि । वनिनः । धूमऽकेतुना । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ १० ॥ ३१ ॥ अध । स्वनात् । उत । बिभ्युः । पतत्रिणः । द्रप्साः । यत् । ते । यवसऽअदः । वि । अस्थिरन् । सुऽगं । तत् । ते । तावकेभ्यः । रथेभ्यः । अग्ने । सख्ये । मा । रिषाम । वयं तव ॥ ११ ॥

अयं मित्रस्य वरुणस्य धायसेऽवयातां मरुतां हेळो अद्भुतः ।
मृळा सु नो भूत्वेषां मनः पुनरग्ने सख्ये मा रिषामा वयं तव ॥ १२ ॥
देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे ।
शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव ॥ १३ ॥
तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः ।
दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मा रिषामा वयं तव ॥ १४ ॥
यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता ।
यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम ॥ १५ ॥
स त्वमग्ने सौभगत्वस्य विद्वानस्माकमायुः प्र तिरेह देव ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ १६ ॥ ३२ ॥ ६ ॥

अयं । मित्रस्य । वरुणस्य । धायसे । अवऽयातां । मरुतां । हेळः । अद्भुतः । मृळ । सु । नः । भूतु । एषां । मनः । पुनः । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ १२ ॥ देवः । देवानां । असि । मित्रः । अद्भुतः । वसुः । वसूनां । असि । चारुः । अध्वरे । शर्मन् । स्याम । तव । सप्रथःऽतमे । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ १३ ॥ तत् । ते । भद्रं । यत् । संऽइद्धः । स्वे । दमे । सोमऽआहुतः । जरसे । मृळयत्ऽतमः । दधासि । रत्नं । द्रविणं । च । दाशुषे । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ १४ ॥ यस्मै । त्वं । सुऽद्रविणः । ददाशः । अनागाःऽत्वं । अदिते । सर्वऽताता । यं । भद्रेण । शवसा । चोदयासि । प्रजाऽवता । राधसा । ते । स्याम ॥ १५ ॥ सः । त्वं । अग्ने । सौभगऽत्वस्य । विद्वान् । अस्माकं । आयुः । प्र । तिर । इह । देव । तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ १६ ॥ ३२ ॥ ॥ ६ ॥

इति प्रथमाष्टके षष्ठोऽध्यायः ॥ ६ ॥

अध्याय ६.

सूक्त ८१.

॥ ८१ ॥ ऋषि–रहूगणपुत्र गोतम । देवता–इन्द्र ॥

वृत्र का वध करनेवाले इन्द्रको आनन्दित और उत्साहित करनेके लिये मनुष्य उसकी स्तुति करता है। जिस समय लड़ाई उपस्थित होती है उस समय हम इन्द्र को पुकारते हैं और उनका सहारा लेते हैं। छोटी लड़ाई में भी हम उनको बुलाते हैं। वीरता के काम में आपने हमारी रक्षा[1] की है। १

हे शूर पुरुष, सचमुच, आपही सेना के नेता हैं। अनेक तरह से (भक्तों को) (वैभव) अर्पण करनेवाले आपही हैं। संसारमें जो छोटा[2] (दीन) मनुष्य है उसकी भी आप उन्नति करते हैं। जो भक्त आपको सोमरस अर्पण करता है उसको आप बहुत धन–जो आपके पास है–देते हैं और उसको ज्ञानी बनानेवाले आपही हैं। २

स दक्षाणां दक्षपतिर्बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः ॥ ६ ॥
उद्यंयमीति सवितेव बाहू उभे सिचौ यतते भीम ऋञ्जन् ।
उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति ॥ ७ ॥
त्वेषं रूपं कृणुत उत्तरं यत्संपृञ्चानः सदने गोभिरद्भिः ।
कविर्बुध्नं परि मर्मृज्यते धीः सा देवताता समितिर्बभूव ॥ ८ ॥
उरु ते ज्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम ।
विश्वेभिरग्ने स्वयशोभिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान् ॥ ९ ॥

आविःऽत्यः । वर्धते । चारुः । आसु । जिह्मानां । ऊर्ध्वः । स्वऽयशाः । उपऽस्थे । उभे इति ।
त्वष्टुः । बिभ्यतुः । जायमानात् । प्रतीची इति । सिंहं । प्रति । जोषयेते इति ॥५॥
उभे इति । भद्रे इति । जोषयेते इति । न । मेने इति । गावः । न । वाश्राः ।
उप । तस्थुः । एवैः । सः । दक्षाणां । दक्षऽपतिः । बभूव । अंजंति । यं ।
दक्षिणतः । हविःऽभिः ॥ ६ ॥ उत् । यंयमीति । सविताऽइव । बाहू इति । उभे
इति । सिचौ । यतते । भीम । ऋंजन् । उत् । शुक्रं । अत्कं । अजते ।
सिमस्मात् । नवा । मातृऽभ्यः । वसना । जहाति ॥ ७ ॥ त्वेषं । रूपं । कृणुते ।
उत्ऽतरं । यत् । संऽपृंचानः । सदने । गोभिः । अत्ऽभिः । कविः । बुध्नं ।
परि । मर्मृज्यते । धीः । सा । देवऽताता । संऽइतिः । बभूव ॥ ८ ॥ उरु ।
ज्रयः । परि । एति । बुध्नं । विऽरोचमानं । महिषस्य । धाम । विश्वेभिः ।
अग्ने । स्वयशःऽभिः । इद्धः । अदब्धेभिः । पायुऽभिः । पाहि । अस्मान् ॥ ९ ॥

धन्वन्त्स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षाम् ।
विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु ॥ १० ॥
एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ११ ॥ २ ॥

॥ ९६ ॥ ऋषिः—आङ्गिरसः कुत्स । देवता शुद्धोग्नि । त्रिष्टुप्—छन्दः ॥

॥ ९६ ॥ स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ।
आपश्च मित्रं धिषणा च साधन्देवा अग्निं धारयन्द्रविणोदाम् ॥ १ ॥
स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनाम् ।
विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदाम् ॥ २ ॥
तमीळत प्रथमं यज्ञसाधं विश आरीराहुतमृञ्जसानम् ।
ऊर्जः पुत्रं भरतं सृप्रदानुं देवा अग्निं धारयन्द्रविणोदाम् ॥ ३ ॥

धन्वन् । स्रोतः । कृणुते । गातुं । ऊर्मिं । शुक्रैः । ऊर्मिऽभिः । अभि । नक्षति । क्षां । विश्वा । सनानि । जठरेषु । धत्ते । अंतः । नवासु । चरति । प्रऽसूषु ॥ १० ॥
एव । नः । अग्ने । संऽइधा । वृधानः । रेवत् । पावक । श्रवसे । वि । भाहि । तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत द्यौः ॥ ११ ॥ २ ॥

सः । प्रत्नऽथा । सहसा । जायमानः । सद्यः । काव्यानि । बट् । अधत्त । विश्वा । आपः । च । मित्रं । धिषणा । च । साधन् । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ १ ॥ सः । पूर्वया । निऽविदा । कव्यता । आयोः । इमाः । प्रऽजाः । अजनयत् । मनूनां । विवस्वता । चक्षसा । द्यां । अपः । च । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ २ ॥ तं । ईळत । प्रथमं । यज्ञऽसाधं । विशः । आरीः । आऽहुतं । ऋंजसानं । ऊर्जः । पुत्रं । भरतं । सृप्रऽदानुं । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ ३ ॥

स मातरिश्वा पुरुवारपुष्टिर्विदद्गातुं तनयाय स्वर्वित् ।
विशां गोपा जनिता रोदस्योर्देवा अग्निं धारयन्द्रविणोदाम् ॥ ४ ॥
नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं समीची ।
द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाम् ॥ ५ ॥ ३ ॥
रायो बुध्नः संगमनो वसूनां यज्ञस्य केतुर्मन्मसाधनो वेः ।
अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदाम् ॥ ६ ॥
नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षाम् ।
सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन्द्रविणोदाम् ॥ ७ ॥
द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्र यंसत् ।
द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः ॥ ८ ॥

सः । मातरिश्वा । पुरुवारऽपुष्टिः । विदत् । गातुं । तनयाय । स्वःऽवित् । विशां । गोपाः । जनिता । रोदस्योः । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ ४ ॥ नक्तोषसा । वर्णं । आमेम्याने इत्याऽमेम्याने । धापयेते इति । शिशुं । एकं । समीची इति सम्ऽईची । द्यावाक्षामा । रुक्मः । अंतः । वि । भाति । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ ५ ॥ ३ ॥ रायः । बुध्नः । सम्ऽगमनः । वसूनां । यज्ञस्य । केतुः । मन्मऽसाधनः । वेरिति वेः । अमृतऽत्वं । रक्षमाणासः । एनं । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ ६ ॥ नु । च । पुरा । च । सदनं । रयीणां । जातस्य । च । जायमानस्य । च । क्षां । सतः । च । गोपां । भवतः । च । भूरेः । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ ७ ॥ द्रविणःऽदाः । द्रविणसः । तुरस्य । द्रविणःऽदाः । सनरस्य । प्र । यंसत् । द्रविणःऽदाः । वीरऽवतीं । इषं । नः । द्रविणःऽदाः । रासते । दीर्घं । आयुः ॥ ८ ॥

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ९ ॥ ४ ॥

॥ ९७ ॥ ऋषिः—आङ्गिरसः कुत्स । देवता—शुद्धोऽग्नि । छन्दः—गायत्री ।

॥ ९७ ॥ अप नः शोशुचदघमग्ने शुशुग्ध्या रयिम् ।
अप नः शोशुचदघम् ॥ १ ॥
सुक्षेत्रिया सुगातुया वसूया च यजामहे ।
अप नः शोशुचदघम् ॥ २ ॥
प्र यद्भन्दिष्ठ एषां प्रास्माकासश्च सूरयः ।
अप नः शोशुचदघम् ॥ ३ ॥
प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयम् ।
अप नः शोशुचदघम् ॥ ४ ॥
प्र यदग्नेः सहस्वतो विश्वतो यन्ति भानवः ।
अप नः शोशुचदघम् ॥ ५ ॥

एव । नः । अग्ने । संऽइधा । वृधानः । रेवत् । पावक । श्रवसे । वि । भाहि । तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ९ ॥ ४ ॥

अप । नः । शोशुचत् । अघं । अग्ने । शुशुग्धि । आ । रयिं । अप । नः । शोशुचत् अघं ॥ १ ॥ सुऽक्षेत्रिया । सुगातुऽया । वसुऽया । च । यजामहे । अप । नः । शोशुचत् । अघं ॥ २ ॥ प्र । यत् । भंदिष्ठः । एषां । प्र । अस्माकासः । च । सूरयः । अप । नः । शोशुचत् । अघं ॥ ३ ॥ प्र । यत् । ते । अग्ने । सूरयः । जायेमहि । प्र । ते । वयं । अप । नः । शोशुचत् । अघं ॥ ४ ॥ प्र । यत् । अग्नेः । सहस्वतः । विश्वतः । यंति । भानवः । अप । नः । शोशुचत् । अघं ॥ ५ ॥

त्वं हि विश्वतोमुख विश्वतः परिभूरसि ।
अप नः शोशुचदघम् ॥ ६ ॥
द्विषो नो विश्वतोमुखाति नावेव पारय ।
अप नः शोशुचदघम् ॥ ७ ॥
स नः सिन्धुमिव नावयाति पर्षा स्वस्तये ।
अप नः शोशुचदघम् ॥ ८ ॥ ५ ॥

॥ ९८ ॥ ऋषिः–आङ्गिरसः कुत्स । देवता–अग्नि । छन्दः–त्रिष्टुप् ॥

॥ ९८ ॥ वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥ १ ॥
पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तम् ॥ २ ॥

त्वं । हि । विश्वतःऽमुख । विश्वतः । परिऽभूः । असि । अप । नः । शोशुचत् । अघं ॥ ६ ॥ द्विषः । नः । विश्वतःऽमुख । अति । नावाऽइव । पारय । अप । नः । शोशुचत् । अघं ॥ ७ ॥ सः । नः । सिंधुंऽइव । नावया । अति । पर्ष । स्वस्तये । अप । नः । शोशुचत् । अघं ॥ ८ ॥ ५ ॥

वैश्वानरस्य । सुऽमतौ । स्याम । राजा । हि । कं । भुवनानां । अभिऽश्रीः । इतः । जातः । विश्वं । इदं । वि । चष्टे । वैश्वानरः । यतते । सूर्येण ॥ १ ॥ पृष्टः । दिवि । पृष्टः । अग्निः । पृथिव्यां । पृष्टः । विश्वाः । ओषधीः । आ । विवेश । वैश्वानरः । सहसा । पृष्टः । अग्निः । सः । नः । दिवा । सः । रिषः । पातु । नक्तं ॥ २ ॥

वैश्वानर तव तत्सत्यमस्त्वस्मान्रायो मघवानः सचन्ताम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ३ ॥ ६ ॥

॥ ९९ ॥ ऋषि-मरीचिपुत्रः, काश्यपऋषिः । देवता-जातवेदा अग्निः छन्दः-त्रिष्टुप् ॥

॥ ९९ ॥ जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ १ ॥ ७ ॥

॥ १०० ॥ ऋषयः-वृषागिरः ऋज्राश्वः अंबरीषः सहदेवः भयमानः सुराधसः । देवता इन्द्रः । छन्दः ॥ त्रिष्टुप् ।

॥१००॥ स यो वृषा वृष्ण्येभिः समोका महो दिवः पृथिव्याश्च सम्राट् ।
सतीनसत्वा हव्यो भरेषु मरुत्वान्नो भवत्विन्द्र ऊती ॥ १ ॥
यस्यानाप्तः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति ।
वृषन्तमः सखिभिः स्वेभिरेवैर्मरुत्वान्नो भवत्विन्द्र ऊती ॥ २ ॥

वैश्वानर । तव । तत् । सत्यं । अस्तु । अस्मान् । रायः । मघऽवानः । सचंतां ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः
॥ ३ ॥ ६ ॥

जातऽवेदसे । सुनवाम । सोमं । अरातिऽयतः । नि । दहाति । वेदः ।
सः । नः । पर्षत् । अति । दुःऽगानि । विश्वा । नावाऽइव । सिंधुं । दुःऽइता ।
अति । अग्निः ॥ १ ॥ ७ ॥

सः । यः । वृषा । वृष्ण्येभिः । संऽओकाः । महः । दिवः । पृथिव्याः ।
च । संऽराट् । सतीनऽसत्वा । हव्यः । भरेषु । मरुत्वान् । नः । भवतु । इंद्रः ॥
ऊती ॥ १ ॥ यस्य । अनाप्तः । सूर्यस्यऽइव । यामः । भरेऽभरे । वृत्रऽहा । शुष्मः ।
अस्ति । वृषन्ऽतमः । सखिऽभिः । स्वेभिः । एवैः । मरुत्वान् । नः । भवतु । इंद्रः ।
ऊती ॥ २ ॥

दिवो न यस्य रेतसो दुघानाः पन्थासो यन्ति शवसापरीताः ।
तरद्द्वेषाः सासहिः पौंस्येभिर्मरुत्वान्नो भवत्विन्द्र ऊती ॥ ३ ॥
सो अङ्गिरोभिरङ्गिरस्तमो भूद्वृषा वृषभिः सखिभिः सखा सन् ।
ऋग्मिभिरृग्मी गातुभिर्ज्येष्ठो मरुत्वान्नो भवत्विन्द्र ऊती ॥ ४ ॥
स सूनुभिर्न रुद्रेभिरृभ्वा नृषाह्ये सासह्वाँ अमित्रान् ।
सनीळेभिः श्रवस्यानि तूर्वन्मरुत्वान्नो भवत्विन्द्र ऊती ॥ ५ ॥ ८ ॥
स मन्युमीः समदनस्य कर्तास्माकेभिर्नृभिः सूर्यं सनत् ।
अस्मिन्नहन्सत्पतिः पुरुहूतो मरुत्वान्नो भवत्विन्द्र ऊती ॥ ६ ॥
तमूतयो रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्राम् ।
स विश्वस्य करुणस्येश एको मरुत्वान्नो भवत्विन्द्र ऊती ॥ ७ ॥

दिवः । न । यस्य । रेतसः । दुघानाः । पंथासः । यंति । शवसा । अपरिऽइताः ।
तरत्ऽद्वेषाः । ससहिः । पौंस्येभिः । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ ३ ॥
सः । अंगिरःऽभिः । अंगिरःऽतमः । भूत् । वृषा । वृषऽभिः । सखिऽभिः । सखा ।
सन् । ऋग्मिऽभिः । ऋग्मी । गातुऽभिः । ज्येष्ठः । मरुत्वान् । नः । भवतु । इंद्रः ।
ऊती ॥ ४ ॥ सः । सूनुऽभिः । न । रुद्रेभिः । ऋभ्वा । नृऽसह्ये । ससह्वान् ।
अमित्रान् । सऽनीळेभिः । श्रवस्यानि । तूर्वन् । मरुत्वान् । नः । भवतु । इंद्रः । ऊती
॥ ५ ॥ ८ ॥ सः । मन्युऽमीः । सऽमदनस्य । कर्ता । अस्माकेभिः । नृऽभिः ।
सूर्यं । सनत् । अस्मिन् । अहन् । सत्ऽपतिः । पुरुऽहूतः । मरुत्वान् । नः ।
भवतु । इंद्रः । ऊती ॥ ६ ॥ तं । ऊतयः । रणयन् । शूरऽसातौ । तं । क्षेमस्य ।
क्षितयः । कृण्वत । त्रां । सः । विश्वस्य । करुणस्य । ईशे । एकः । मरुत्वान् ।
नः । भवतु । इंद्रः । ऊती ॥ ७ ॥

तमप्सन्त शवस उत्सवेषु नरो नरमवसे तं धनाय ।
सो अन्धे चित्तमसि ज्योतिर्विदन्मरुत्वान्नो भवत्विन्द्र ऊती ॥ ८ ॥
स सव्येन यमति व्राधतश्चित्स दक्षिणे संगृभीता कृतानि ।
स कीरिणा चित्सनिता धनानि मरुत्वान्नो भवत्विन्द्र ऊती ॥ ९ ॥
स ग्रामेभिः सनिता स रथेभिर्विदे विश्वाभिः कृष्टिभिर्न्वद्य ।
स पौंस्येभिरभिभूरशस्तीर्मरुत्वान्नो भवत्विन्द्र ऊती ॥ १० ॥ ९ ॥
स जामिभिर्यत्समजाति मीळ्हेऽजामिभिर्वा पुरुहूत एवैः ।
अपां तोकस्य तनयस्य जेषे मरुत्वान्नो भवत्विन्द्र ऊती ॥ ११ ॥
स वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा ।
चम्रीषो न शवसा पाञ्चजन्यो मरुत्वान्नो भवत्विन्द्र ऊती ॥ ॥ १२ ॥

तं । अप्सन्त । शवसः । उत्ऽसवेषु । नरः । नरं । अवसे । तं । धनाय । सः । अन्धे । चित् । तमसि । ज्योतिः । विदत् । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ ८ ॥ सः । सव्येन । यमति । व्राधतः । चित् । सः । दक्षिणे । संऽगृभीता । कृतानि । सः । कीरिणा । चित् । सनिता । धनानि । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ ९ ॥ सः । ग्रामेभिः । सनिता । सः । रथेभिः । विदे । विश्वाभिः । कृष्टिऽभिः । नु । अद्य । सः । पौंस्येभिः । अभिऽभूः । अशस्तीः । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ १० ॥ ९ ॥ सः । जामिऽभिः । यत् । संऽअजाति । मीळ्हे । अजामिऽभिः । वा । पुरुऽहूतः । एवैः । अपां । तोकस्य । तनयस्य । जेषे । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ ११ ॥ सः । वज्रऽभृत् । दस्युऽहा । भीमः । उग्रः । सहस्रऽचेताः । शतऽनीथः । ऋभ्वा । चम्रीषः । न । शवसा । पांचऽजन्यः । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ १२ ॥

तस्य वज्रः क्रन्दति स्मत्स्वर्षा दिवो न त्वेषो रवथः शिमीवान् ।
तं सचन्ते सनयस्तं धनानि मरुत्वान्नो भवत्विन्द्र ऊती ॥ १३ ॥
यस्याजस्रं शवसा मानमुक्थं परिभुजद्रोदसी विश्वतः सीम् ।
स पारिषत्क्रतुभिर्मन्दसानो मरुत्वान्नो भवत्विन्द्र ऊती ॥ १४ ॥
न यस्य देवा देवता न मर्ता आपश्चन शवसो अन्तमापुः ।
स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो भवत्विन्द्र ऊती ॥ १५ ॥ १० ॥
रोहिच्छ्यावा सुमदंशुर्ललामीर्द्युक्षा राय ऋज्राश्वस्य ।
वृषण्वन्तं बिभ्रती धूर्षु रथं मन्द्रा चिकेत नाहुषीषु विक्षु ॥ १६ ॥
एतत्त्यत्त इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः ।
ऋज्राश्वः प्रष्टिभिरम्बरीषः सहदेवो भयमानः सुराधाः ॥ १७ ॥

तस्य । वज्रः । क्रंदति । स्मत् । स्वःऽसाः । दिवः । न । त्वेषः । रवथः । शिमीऽवान् । तं । सचंते । सनयः । तं । धनानि । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ १३ ॥ यस्य । अजस्रं । शवसा । मानं । उक्थं । परिऽभुजत् । रोदसी इति । विश्वतः । सीं । सः । पारिषत् । क्रतुऽभिः । मंदसानः । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ १४ ॥ न । यस्य । देवाः । देवता । न । मर्ताः । आपः । चन । शवसः । अंतं । आपुः । सः । प्रऽरिक्वा । त्वक्षसा । क्ष्मः । दिवः । च । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ १५ ॥ १० ॥ रोहित् । श्यावा । सुमत्ऽअंशुः । ललामीः । द्युक्षा । राये । ऋज्रऽअश्वस्य । वृषण्ऽवंतं । बिभ्रती । धूःऽसु । रथं । मंद्रा । चिकेत । नाहुषीषु । विक्षु ॥ १६ ॥ एतत् । त्यत् । ते । इंद्र । वृष्णे । उक्थं । वार्षागिराः । अभि । गृणंति । राधः । ऋज्रऽअश्वः । प्रष्टिऽभिः । अंबरीषः । सहऽदेवः । भयमानः । सुऽराधाः ॥ १७ ॥

दस्यूञ्छिम्यूंश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत् ।
सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः ॥ १८ ॥
विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ १९ ॥ ११ ॥

॥ १०१ ॥ ऋषि-आङ्गिरसः कुत्स । देवता-इन्द्रः । छन्दः-जगती त्रिष्टुप् ॥

॥१०१॥ प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे ॥ १ ॥
यो व्यंसं जाहृषाणेन मन्युना यः शम्बरं यो अहन्पिप्रुमव्रतम् ।
इन्द्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वन्तं सख्याय हवामहे ॥ २ ॥
यस्य द्यावापृथिवी पौंस्यं महद्यस्य व्रते वरुणो यस्य सूर्यः ।
यस्येन्द्रस्य सिन्धवः सश्चति व्रतं मरुत्वन्तं सख्याय हवामहे ॥ ३ ॥

दस्यून् । शिम्यून् । च । पुरुऽहूतः । एवैः । हत्वा । पृथिव्याम् । शर्वा । नि । बर्हीत् । सनत् । क्षेत्रं । सखिऽभिः । श्वित्न्येभिः । सनत् । सूर्यं । सनत् । अपः । सुऽवज्रः ॥ १८ ॥ विश्वाहा । इन्द्रः । अधिऽवक्ता । नः । अस्तु । अपरिऽह्वृताः । सनुयाम । वाजं । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ १९ ॥ ११ ॥

प्र । मन्दिने । पितुऽमत् । अर्चत । वचः । यः । कृष्णऽगर्भाः । निःऽअहन् । ऋजिश्वना । अवस्यवः । वृषणम् । वज्रऽदक्षिणम् । मरुत्वन्तम् । सख्याय । हवामहे ॥ १ ॥ यः । विऽअंसम् । जहृषाणेन । मन्युना । यः । शम्बरम् । यः । अहन् । पिप्रुम् । अव्रतम् । इन्द्रः । यः । शुष्णम् । अशुषं । नि । अवृणक् । मरुत्वन्तम् । सख्याय । हवामहे ॥ २ ॥ यस्य । द्यावापृथिवी इति । पौंस्यं । महत् । यस्य । व्रते । वरुणः । यस्य । सूर्यः । यस्य । इन्द्रस्य । सिन्धवः । सश्चति । व्रतम् । मरुत्वन्तम् । सख्याय । हवामहे ॥ ३ ॥

यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः ।
वीळोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे ॥ ४ ॥
यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविन्दत् ।
इन्द्रो यो दस्यूँरधराँ अवातिरन्मरुत्वन्तं सख्याय हवामहे ॥ ५ ॥
यः शूरेभिर्हव्यो यश्च भीरुभिर्यो धावद्भिर्हूयते यश्च जिग्युभिः ।
इन्द्रं यं विश्वा भुवनाभि संदधुर्मरुत्वन्तं सख्याय हवामहे ॥ ६ ॥ १२ ॥
रुद्राणामेति प्रदिशा विचक्षणो रुद्रेभिर्योषा तनुते पृथु ज्रयः ।
इन्द्रं मनीषा अभ्यर्चति श्रुतं मरुत्वन्तं सख्याय हवामहे ॥ ७ ॥
यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजने मादयासे ।
अत आ याह्यध्वरं नो अच्छा त्वाया हविश्चकृमा सत्यराधः ॥ ८ ॥

यः । अश्वानां । यः । गवां । गोऽपतिः । वशी । यः । आरितः । कर्मणिऽकर्मणि । स्थिरः । वीळोः । चित् । इंद्रः । यः । असुन्वतः । वधः । मरुत्वंतं । सख्याय । हवामहे ॥ ४ ॥ यः । विश्वस्य । जगतः । प्राणतः । पतिः । यः । ब्रह्मणे । प्रथमः । गाः । अविंदत् । इंद्रः । यः । दस्यून् । अधरान् । अवऽअतिरत् । मरुत्वंतं । सख्याय । हवामहे ॥ ५ ॥ यः । शूरेभिः । हव्यः । यः । च । भीरुऽभिः । यः । धावत्ऽभिः । हूयते । यः । च । जिग्युऽभिः । इंद्रं । यं । विश्वा । भुवना । अभि । संऽदधुः । मरुत्वंतं । सख्याय । हवामहे ॥ ६ ॥ १२ ॥ रुद्राणां । एति । प्रऽदिशा । विऽचक्षणः । रुद्रेभिः । योषा । तनुते । पृथु । ज्रयः । इंद्रं । मनीषा । अभि । अर्चति । श्रुतं । मरुत्वंतं । सख्याय । हवामहे ॥ ७ ॥ यत् । वा । मरुत्वः । परमे । सधऽस्थे । यत् । वा । अवमे । वृजने । मादयासे । अतः । आ । याहि । अध्वरं । नः । अच्छ । त्वाऽया । हविः । चकृम । सत्यऽराधः ॥ ८ ॥

त्वायेन्द्र सोमं सुषुमा सुदक्ष त्वाया हविश्चकृमा ब्रह्मवाहः ।
अधा नियुत्वः सगणो मरुद्भिरस्मिन्यज्ञे बर्हिषि मादयस्व ॥ ९ ॥
मादयस्व हरिभिर्ये त इन्द्र वि ष्यस्व शिप्रे वि सृजस्व धेने ।
आ त्वा सुशिप्र हरयो वहन्तूशन्हव्यानि प्रति नो जुषस्व ॥ १० ॥
मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिन्द्रेण सनुयाम वाजम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ११ ॥ १३ ॥

॥ १०२ ॥ ऋषिः-आंगिरसः कुत्स । देवता-इन्द्रः । छन्दः-जगती त्रिष्टुप् ॥

॥ १०२ ॥ इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥ १ ॥
अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः ।
अस्मे सूर्याचन्द्रमसाभिचक्षे श्रद्धे कमिन्द्र चरतो वितर्तुरम् ॥ २ ॥

त्वाऽया । इंद्र । सोमं । सुसुम । सुऽदक्ष । त्वाऽया । हविः । चकृम । ब्रह्मऽवाहः ।
अध । नियुत्वः । सऽगणः । मरुत्ऽभिः । अस्मिन् । यज्ञे । बर्हिषि । मादयस्व ॥ ९ ॥
मादयस्व । हरिऽभिः । ये । ते । इंद्र । वि । स्यस्व । शिप्रे इति । वि ।
सृजस्व । धेने इति । आ । त्वा । सुऽशिप्र । हरयः । वहंतु । उशन् । हव्यानि ।
प्रति । नः । जुषस्व ॥ १० ॥ मरुत्ऽस्तोत्रस्य । वृजनस्य । गोपाः । वयं । इंद्रेण ।
सनुयाम । वाजं । तत् । नः । मित्रः । वरुणः । ममहंता । अदितिः । सिंधुः ।
पृथिवी । उत । द्यौः ॥ ११ ॥ १३ ॥

इमा । ते । धियं । प्र । भरे । महः । महीं । अस्य । स्तोत्रे । धिषणा ।
यत् । ते । आनजे । तम् । उत्ऽसवे । च । प्रऽसवे । च । ससहिम् । इन्द्रम् ।
देवासः । शवसा । अमदन् । अनु ॥ १ ॥ अस्य । श्रवः । नद्यः । सप्त । बिभ्रति ।
द्यावाक्षामा । पृथिवी । दर्शतम् । वपुः । अस्मे इति । सूर्याचन्द्रमसा । अभि
ऽचक्षे । श्रद्धे । कम् । इन्द्र । चरतः । विऽतर्तुरम् ॥ २ ॥

तं स्मा रथं मघवन्प्राव सातये जैत्रं यं ते अनुमदाम संगमे ।
आजा न इन्द्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः ॥ ३ ॥
वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे ।
अस्मभ्यमिन्द्र वरिवः सुगं कृधि प्र शत्रूणां मघवन्वृष्ण्या रुज ॥ ४ ॥
नाना हि त्वा हवमाना जना इमे धनानां धर्तरवसा विपन्यवः ।
अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हीन्द्र निभृतं मनस्तव ॥ ५ ॥ १४ ॥
गोजिता बाहू अमितक्रतुः सिमः कर्मन्कर्मञ्छतमूतिः खजंकरः ।
अकल्प इन्द्रः प्रतिमानमोजसाथा जना वि ह्वयन्ते सिषासवः ॥ ६ ॥
उत्ते शतान्मघवन्नुच्च भूयस उत्सहस्राद्रिरिचे कृष्टिषु श्रवः ।
अमात्रं त्वा धिषणा तित्विषे मह्यधा वृत्राणि जिघ्नसे पुरंदर ॥ ७ ॥

तम् । स्म । रथम् । मघऽवन् । प्र । अव । सातये । जैत्रम् । यम् । ते । अनुऽमदाम । सम्ऽगमे । आजा । नः । इन्द्र । मनसा । पुरुऽस्तुत । त्वायत्ऽभ्यः । मघऽवन् । शर्म । यच्छ । नः ॥ ३ ॥ वयम् । जयेम । त्वया । युजा । वृतम् । अस्माकम् । अंशम् । उत् । अव । भरेऽभरे । अस्मभ्यम् । इन्द्र । वरिवः । सुऽगम् । कृधि । प्र । शत्रूणाम् । मघऽवन् । वृष्ण्या । रुज ॥ ४ ॥ नाना । हि । त्वा । हवमानाः । जनाः । इमे । धनानाम् । धर्तः । अवसा । विपन्यवः । अस्माकम् । स्म । रथम् । आ । तिष्ठ । सातये । जैत्रम् । हि । इन्द्र । निऽभृतम् । मनः । तव ॥ ५ ॥ १४ ॥ गोऽजिता । बाहू इति । अमितऽक्रतुः । सिमः । कर्मन्ऽकर्मन् । शतम्ऽऊतिः । खजम्ऽकरः । अकल्पः । इन्द्रः । प्रतिऽमानम् । ओजसा । अथ । जनाः । वि । ह्वयन्ते । सिसासवः ॥ ६ ॥ उत् । ते । शतात् । मघऽवन् । उत् । च । भूयसः । उत् । सहस्रात् । रिरिचे । कृष्टिषु । श्रवः । अमात्रम् । त्वा । धिषणा । तित्विषे । मही । अध । वृत्राणि । जिघ्नसे । पुरम्ऽदर ॥ ७ ॥

त्रिविष्टिधातु प्रतिमानमोजसस्तिस्रो भूमीर्नृपते त्रीणि रोचना ।
अतीदं विश्वं भुवनं ववक्षिथाशत्रुरिन्द्र जनुषा सनादसि ॥ ८ ॥
त्वां देवेषु प्रथमं हवामहे त्वं बभूथ पृतनासु सासहिः ।
सेमं नः कारुमुपमन्युमुद्भिदमिन्द्रः कृणोतु प्रसवे रथं पुरः ॥ ९ ॥
त्वं जिगेथ न धना रुरोधिथार्भेष्वाजा मघवन्महत्सु च ।
त्वामुग्रमवसे सं शिशीमस्यथा न इन्द्र हवनेषु चोदय ॥ १० ॥
विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ११ ॥ १५ ॥

॥ १०३ ॥ ऋषिः—आङ्गिरसः कुत्स । देवता—इन्द्रः । छन्दः—जगती त्रिष्टुप् ॥

॥ १०३ ॥ तत्त इन्द्रियं परमं पराचैरधारयन्त कवयः पुरेदम् ।
क्षमेदमन्यद्दिव्य१न्यदस्य समी पृच्यते समनेव केतुः ॥ १ ॥

त्रिविष्टिऽधातु । प्रतिऽमानम् । ओजसः । तिस्रः । भूमीः । नृऽपते । त्रीणि । रोचना । अति । इदम् । विश्वम् । भुवनम् । ववक्षिथ । अशत्रुः । इन्द्र । जनुषा । सनात् । असि ॥ ८ ॥ त्वाम् । देवेषु । प्रथमम् । हवामहे । त्वम् । बभूथ । पृतनासु । ससहिः । सः । इमम् । नः । कारुम् । उपऽमन्युम् । उत्ऽभिदम् । इन्द्रः । कृणोतु । प्रऽसवे । रथम् । पुरः ॥ ९ ॥ त्वम् । जिगेथ । न । धना । रुरोधिथ । अर्भेषु । आजा । मघऽवन् । महत्ऽसु । च । त्वाम् । उग्रम् । अवसे । सम् । शिशीमसि । अथ । नः । इन्द्र । हवनेषु । चोदय ॥ १० ॥ विश्वाहा । इन्द्रः । अधिऽवक्ता । नः । अस्तु । अपरिऽह्वृताः । सनुयाम । वाजम् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ११ ॥ १५ ॥

तत् । ते । इन्द्रियम् । परमम् । पराचैः । अधारयन्त । कवयः । पुरा । इदम् । क्षमा । इदम् । अन्यत् । दिवि । अन्यत् । अस्य । सम् । ईमिति । पृच्यते । समनाऽइव । केतुः ॥ १ ॥

स धारयत्पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज ।
अहन्नहिमभिनद्रौहिणं व्यहन्व्यंसं मघवा शचीभिः ॥ २ ॥
स जातूभर्मा श्रद्दधान ओजः पुरो विभिन्दन्नचरद्वि दासीः ।
विद्वान्वज्रिन्दस्यवे हेतिमस्यार्यं सहो वर्धया द्युम्नमिन्द्र ॥ ३ ॥
तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत् ।
उपप्रयन्दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे ॥ ४ ॥
तदस्येदं पश्यता भूरि पुष्टं श्रदिन्द्रस्य धत्तन वीर्याय ।
स गा अविन्दत्सो अविन्ददश्वान्स ओषधीः सो अपः स वनानि ॥ ५॥१६॥
भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमम् ।
य आदृत्या परिपन्थीव शूरोऽयज्वनो विभजन्नेति वेदः ॥ ६ ॥

सः । धारयत् । पृथिवीम् । पप्रथत् । च । वज्रेण । हत्वा । निः । अपः । ससर्ज । अहन् । अहिम् । अभिनत् । रौहिणम् । वि । अहन् । विऽअंसम् । मघऽवा । शचीभिः ॥ २ ॥ सः । जातूऽभर्मा । श्रत्ऽदधानः । ओजः । पुरः । विऽभिन्दन् । अचरत् । वि । दासीः । विद्वान् । वज्रिन् । दस्यवे । हेतिम् । अस्य । आर्यम् । सहः । वर्धय । द्युम्नम् । इन्द्र ॥ ३ ॥ तत् । ऊचुषे । मानुषा । इमा । युगानि । कीर्तेन्यम् । मघऽवा । नाम । बिभ्रत् । उपऽप्रयन् । दस्युऽहत्याय । वज्री । यत् । ह । सूनुः । श्रवसे । नाम । दधे ॥ ४ ॥ तत् । अस्य । इदम् । पश्यत । भूरि । पुष्टम् । श्रत् । इन्द्रस्य । धत्तन । वीर्याय । सः । गाः । अविन्दत् । सः । अविन्दत् । अश्वान् । सः । ओषधीः । सः । अपः । सः । वनानि ॥ ५ ॥ १६ ॥ भूरिऽकर्मणे । वृषभाय । वृष्णे । सत्यऽशुष्माय । सुनवाम । सोमम् । यः । आऽदृत्य । परिपन्थीऽइव । शूरः । अयज्वनः । विऽभजन् । एति । वेदः ॥ ६ ॥

तदिन्द्र प्रेव वीर्यं चकर्थ यत्ससन्तं वज्रेणाबोधयोऽहिम् ।
अनु त्वा पत्नीर्हृषितं वयश्च विश्वे देवासो अमदन्ननु त्वा ॥ ७ ॥
शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र यदावधीर्वि पुरः शंबरस्य ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ८ ॥ १७ ॥

॥ १०४ ॥ ऋषिः—आङ्गिरसः कुत्स । देवता—इन्द्रः । छन्दः—जगती त्रिष्टुप् ॥

॥ १०४ ॥ योनिष्ट इन्द्र निषदे अकारि तमा नि षीद स्वानो नार्वा ।
विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्रपित्वे ॥ १ ॥
ओ त्ये नर इन्द्रमूतये गुर्नू चित्तान्त्सद्यो अध्वनो जगम्यात् ।
देवासो मन्युं दासस्य श्चम्नन्ते न आ वक्षन्त्सुविताय वर्णम् ॥ २ ॥
अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् ।
क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ॥ ३ ॥

तत् । इंद्र । प्रऽइव । वीर्यं । चकर्थ । यत् । ससंतं । वज्रेण । अबोधयः । अहिं ।
अनु । त्वा । पत्नीः । हृषितं । वयः । च । विश्वे । देवासः । अमदन् । अनु ।
त्वा ॥ ७ ॥ शुष्णं । पिप्रुं । कुयवं । वृत्रं । इंद्र । यदा । अवधीः । वि । पुरः ।
शंबरस्य । तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी ।
उत । द्यौः ॥ ८ ॥ १७ ॥

योनिः । ते । इंद्र । निऽसदे । अकारि । तं । आ । नि । सीद । स्वानः ।
न । अर्वा । विऽमुच्य । वयः । अवऽसाय । अश्वान् । दोषा । वस्तोः । वहीयसः ।
प्रऽपित्वे ॥ १ ॥ ओ इति । त्ये । नरः । इंद्रं । ऊतये । गुः । नु । चित् ।
तान् । सद्यः । अध्वनः । जगम्यात् । देवासः । मन्युं । दासस्य । श्चम्नन् । ते ।
नः । आ । वक्षन् । सुविताय । वर्णं ॥ २ ॥ अव । त्मना । भरते । केतऽवेदाः ।
अव । त्मना । भरते । फेनं । उदन् । क्षीरेण । स्नातः । कुयवस्य । योषे इति ।
हते इति । ते इति । स्यातां । प्रवणे । शिफायाः ॥ ३ ॥

युयोप नाभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः ।
अंजसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरन्ते ॥ ४ ॥
प्रति यत्स्या नीथादर्शि दस्योरोको नाच्छा सदनं जानती गात् ।
अध स्मा नो मघवञ्चर्कृतादिन्मा नो मघेव निष्षपी परा दाः ॥ ५ ॥ १८ ॥
स त्वं न इन्द्र सूर्ये सो अप्स्वनागास्त्व आ भज जीवशंसे ।
मान्तरां भुजमा रीरिषो नः श्रद्धितं ते महत इन्द्रियाय ॥ ६ ॥
अधा मन्ये श्रत्ते अस्मा अधायि वृषा चोदस्व महते धनाय ।
मा नो अकृते पुरुहूत योनाविन्द्र क्षुध्यद्भ्यो वय आसुतिं दाः ॥ ७ ॥
मा नो वधीरिन्द्र मा परा दा मा नः प्रिया भोजनानि प्र मोषीः ।
आण्डा मा नो मघवञ्छक्र निर्भेन्मा नः पात्रा भेत्सहजानुषाणि ॥ ८ ॥

युयोप । नाभिः । उपरस्य । आयोः । प्र । पूर्वाभिः । तिरते । राष्टि । शूरः । अंजसी । कुलिशी । वीरऽपत्नी । पयः । हिन्वानाः । उदऽभिः । भरंते ॥ ४ ॥ प्रति । यत् । स्या । नीथा । अदर्शि । दस्योः । ओकः । न । अच्छ । सदनं । जानती । गात् । अध । स्म । नः । मघऽवन् । चर्कृतात् । इत् । मा । नः । मघाऽइव । निष्षपी । परा । दाः ॥ ५ ॥ १८ ॥ सः । त्वं । नः । इंद्र । सूर्ये । सः । अप्ऽसु । अनागाःऽत्वे । आ । भज । जीवऽशंसे । मा । अंतरां । भुजं । आ । रिरिषः । नः । श्रद्धितं । ते । महते । इंद्रियाय ॥ ६ ॥ अध । मन्ये । श्रत् । ते । अस्मै । अधायि । वृषा । चोदस्व । महते । धनाय । मा । नः । अकृते । पुरुऽहूत । योनौ । इंद्र । क्षुध्यंत्ऽभ्यः । वयः । आऽसुतिं । दाः ॥ ७ ॥ मा । नः । वधीः । इंद्र । मा । परा । दाः । मा । नः । प्रिया । भोजनानि । प्र । मोषीः । आंडा । मा । नः । मघऽवन् । शक्र । निः । भेत् । मा । नः । पात्रा । भेत् । सहऽजानुषाणि ॥ ८ ॥

अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय ।
उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः ॥ ९ ॥ १९ ॥

॥ १०५ ॥ ऋषिः—आङ्गिरसः कुत्स । देवता—विश्वेदेव । छन्दः—जगती त्रिष्टुप् ॥

॥ १०५ ॥ चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥ १ ॥
अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम् ।
तुञ्जाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी ॥ २ ॥
मो षु देवा अदः स्वरव पादि दिवस्परि ।
मा सोम्यस्य शंभुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी ॥ ३ ॥
यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति ।
क्व ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी ॥ ४ ॥

अर्वाङ् । आ । इहि । सोमऽकामं । त्वा । आहुः । अयं । सुतः । तस्य । पिब । मदाय । उरुऽव्यचाः । जठरे । आ । वृषस्व । पिताऽइव । नः । शृणुहि । हूयमानः ॥ ९ ॥ १९ ॥

चंद्रमाः । अप्ऽसु । अंतः । आ । सुऽपर्णः । धावते । दिवि । न । वः । हिरण्यऽनेमयः । पदं । विंदंति । विऽद्युतः । वित्तं । मे । अस्य । रोदसी इति ॥१॥
अर्थं । इत् । वै । ऊं इति । अर्थिनः । आ । जाया । युवते । पतिं । तुंजाते इति । वृष्ण्यं । पयः । परिऽदाय । रसं । दुहे । वित्तं । मे । अस्य । रोदसी इति ॥२॥
मो इति । सु । देवाः । अदः । स्वः । अव । पादि । दिवः । परि । मा । सोम्यस्य । शंऽभुवः । शूने । भूम । कदा । चन । वित्तं । मे । अस्य । रोदसी इति ॥ ३ ॥
यज्ञं । पृच्छामि । अवमं । सः । तत् । दूतः । वि । वोचति । क्व । ऋतं । पूर्व्यं । गतं । कः । तत् । बिभर्ति । नूतनः । वित्तं । मे । अस्य । रोदसी इति ॥ ४ ॥

अमी ये देवा स्थन त्रिष्वा रोचने दिवः ।
कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी ॥ ५ ॥ २० ॥
कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणं ।
कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ॥ ६ ॥
अहं सो अस्मि यः पुरा सुते वदामि कानि चित् ।
तं मा व्यन्त्याध्यो३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ॥ ७ ॥
सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी ॥८॥
अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता ।
त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी ॥ ९ ॥

अमी इति । ये । देवाः । स्थन । त्रिषु । आ । रोचने । दिवः । कत् । वः । ऋतं । कत् । अनृतं । क्व । प्रत्ना । वः । आऽहुतिः । वित्तं । मे । अस्य । रोदसी इति ॥ ५ ॥ २० ॥ कत् । वः । ऋतस्य । धर्णसि । कत् । वरुणस्य । चक्षणं । कत् । अर्यम्णः । महः । पथा । अति । क्रामेम । दुःऽध्यः । वित्तं । मे । अस्य । रोदसी इति ॥ ६ ॥ अहं । सः । अस्मि । यः । पुरा । सुते । वदामि । कानि । चित् । तं । मा । व्यन्ति । आऽध्यः । वृकः । न । तृष्णऽजं । मृगं । वित्तं । मे । अस्य । रोदसी इति ॥ ७ ॥ सं । मा । तपन्ति । अभितः । सपत्नीःऽइव । पर्शवः । मूषः । न । शिश्ना । वि । अदन्ति । मा । आऽध्यः । स्तोतारं । ते । शतक्रतो इति शतऽक्रतो । वित्तं । मे । अस्य । रोदसी इति ॥ ८ ॥ अमी इति । ये । सप्त । रश्मयः । तत्र । मे । नाभिः । आऽतता । त्रितः । तत् । वेद । आप्त्यः । सः । जामिऽत्वाय । रेभति । वित्तं । मे । अस्य । रोदसी इति ॥ ९ ॥

अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी ॥ १० ॥ २१ ॥
सुपर्णा एत आसते मध्य आरोधने दिवः ।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी ॥ ११ ॥
नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनम् ।
ऋतमर्षन्ति सिन्धवः सत्यं तातान सूर्यो वित्तं मे अस्य रोदसी ॥ १२ ॥
अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम् ।
स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे अस्य रोदसी ॥ १३ ॥
सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी ॥ १४ ॥

अमी इति । ये । पंच । उक्षणः । मध्ये । तस्थुः । महः । दिवः । देवऽत्रा । नु । प्रऽवाच्यं । सध्रीचीनाः । नि । ववृतुः । वित्तं । मे । अस्य । रोदसी इति ॥ १० ॥ २१ ॥
सुऽपर्णाः । एते । आसते । मध्ये । आऽरोधने । दिवः । ते । सेधंति । पथः । वृकं । तरंतं । यह्वतीः । अपः । वित्तं । मे । अस्य । रोदसी इति ॥ ११ ॥
नव्यं । तत् । उक्थ्यं । हितं । देवासः । सुऽप्रवाचनं । ऋतं । अर्षंति । सिंधवः । सत्यं । ततान । सूर्यः । वित्तं । मे । अस्य । रोदसी इति ॥ १२ ॥ अग्ने । तव । त्यत् । उक्थ्यं । देवेषु । अस्ति । आप्यं । सः । नः । सत्तः । मनुष्वत् । आ । देवान् । यक्षि । विदुःऽतरः । वित्तं । मे । अस्य । रोदसी इति ॥ १३ ॥
सत्तः । होता । मनुष्वत् । आ । देवान् । अच्छ । विदुःऽतरः । अग्निः । हव्या । सुसूदति । देवः । देवेषु । मेधिरः । वित्तं । मे । अस्य । रोदसी इति ॥ १४ ॥

ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे ।
व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी ॥ १५ ॥ २२ ॥
असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः ।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ॥ १६ ॥
त्रितः कूपेऽवहितो देवान्हवत ऊतये ।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ॥ १७ ॥
अरुणो मा सकृद्वृकः पथा यन्तं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ॥ १८ ॥
एनाङ्गूषेण वयमिन्द्रवन्तोऽभि ष्याम वृजने सर्ववीराः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१९॥२३॥१६॥

ब्रह्म । कृणोति । वरुणः । गातुऽविदं । तं । ईमहे । वि । ऊर्णोति । हृदा । मतिं । नव्यः । जायतां । ऋतं । वित्तं । मे । अस्य । रोदसी इति ॥ १५ ॥ २२ ॥
असौ । यः । पंथाः । आदित्यः । दिवि । प्रऽवाच्यं । कृतः । न । सः । देवाः । अतिऽक्रमे । तं । मर्तासः । न । पश्यथ । वित्तं । मे । अस्य । रोदसी इति ॥ १६ ॥
त्रितः । कूपे । अवऽहितः । देवान् । हवते । ऊतये । तत् । शुश्राव । बृहस्पतिः । कृण्वन् । अंहूरणात् । उरु । वित्तं । मे । अस्य । रोदसी इति ॥ १७ ॥ अरुणः । मा । सकृत् । वृकः । पथा । यंतं । ददर्श । हि । उत् । जिहीते । निऽचाय्य । तष्टाऽइव । पृष्टिऽआमयी । वित्तं । मे । अस्य । रोदसी इति ॥ १८ ॥ एना । आंगूषेण । वयं । इंद्रऽवंतः । अभि । स्याम । वृजने । सर्वऽवीराः । तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥१९॥२३॥१६॥

॥ षोडशोऽनुवाकः ॥

॥ १०६ ॥ ऋषिः—आंगिरसः कुत्सः । देवता—इन्द्रः । छन्दः—जगती त्रिष्टुप् ॥

॥१०६॥ इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ १ ॥
त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शम्भुवः ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ २ ॥
अवन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ ३ ॥
नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ ४ ॥
बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ ५ ॥

इन्द्रम् । मित्रम् । वरुणम् । अग्निम् । ऊतये । मारुतम् । शर्धः । अदितिम् । हवामहे । रथम् । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ १ ॥ ते । आदित्याः । आ । गत । सर्वऽतातये । भूत । देवाः । वृत्रऽतूर्येषु । शम्ऽभुवः । रथम् । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ २ ॥ अवन्तु । नः । पितरः । सुऽप्रवाचनाः । उत । देवी इति । देवपुत्रे इति देवऽपुत्रे । ऋतऽवृधा । रथम् । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ ३ ॥ नराशंसम् । वाजिनम् । वाजयन् । इह । क्षयत्ऽवीरम् । पूषणम् । सुम्नैः । ईमहे । रथम् । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ ४ ॥ बृहस्पते । सदम् । इत् । नः । सुऽगम् । कृधि । शम् । योः । यत् । ते । मनुःऽहितम् । तत् । ईमहे । रथम् । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ ५ ॥

इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ ६ ॥
देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ७ ॥ २४ ॥

॥ १०७ ॥ ऋषिः-आङ्गिरसः कुत्स । देवता-अग्नि । छन्दः- जगती त्रिष्टुप् ।

॥ १०७ ॥ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत् ॥ १ ॥
उप नो देवा अवसा गमन्त्वङ्गिरसां सामभिः स्तूयमानाः ।
इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥ २ ॥
तन्न इन्द्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ३ ॥ २५ ॥

इंद्रं । कुत्सः । वृत्रऽहनं । शचीऽपतिं । काटे । निऽबाळ्हः । ऋषिः । अह्वत् । ऊतये । रथं । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ ६ ॥ देवैः । नः । देवी । अदितिः । नि । पातु । देवः । त्राता । त्रायतां । अप्रऽयुच्छन् । तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ७ ॥

यज्ञः । देवानां । प्रति । एति । सुम्नं । आदित्यासः । भवत । मृळयंतः । आ । वः । अर्वाची । सुऽमतिः । ववृत्यात् । अंहोः । चित् । या । वरिवोवित्ऽतरा । असत् ॥ १ ॥ उप । नः । देवाः । अवसा । आ । गमंतु । अंगिरसां । सामऽभिः । स्तूयमानाः । इंद्रः । इंद्रियैः । मरुतः । मरुत्ऽभिः । आदित्यैः । नः । अदितिः । शर्म । यंसत् ॥ २ ॥ तत् । नः । इंद्रः । तत् । वरुणः । तत् । अग्निः । तत् । अर्यमा । तत् । सविता । चनः । धात् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ३ ॥ २५ ॥

॥ १०८ ॥ ऋषिः—आङ्गिरसः कुत्स । देवता—इन्द्राग्नी । छन्दः—जगती त्रिष्टुप् ॥

॥१०८॥ य इन्द्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे ।
तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥ १ ॥
यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरम् ।
तावाँ अयं पातवे सोमो अस्त्वरमिन्द्राग्नी मनसे युवभ्याम् ॥ २ ॥
चक्राथे हि सध्र्यङ्नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः ।
ताविन्द्राग्नी सध्र्यञ्चा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम् ॥ ३ ॥
समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा ।
तीव्रैः सोमैः परिषिक्तेभिरर्वागेन्द्राग्नी सौमनसाय यातम् ॥ ४ ॥
यानीन्द्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि ।
या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ॥ ५ ॥ २६ ॥

यः । इंद्राग्नी इति । चित्रऽतमः । रथः । वां । अभि । विश्वानि । भुवनानि । चष्टे । तेन । आ । यातं । सऽरथं । तस्थिऽवांसा । अथ । सोमस्य । पिबतं । सुतस्य ॥ १ ॥ यावत् । इदं । भुवनं । विश्वं । अस्ति । उरुऽव्यचा । वरिमता । गभीरं । तावान् । अयं । पातवे । सोमः । अस्तु । अरं । इंद्राग्नी इति । मनसे । युवऽभ्यां ॥ २ ॥ चक्राथे इति । हि । सध्र्यक् । नाम । भद्रं । सध्रीचीना । वृत्रऽहना । उत । स्थः । तौ । इंद्राग्नी इति । सध्र्यंचा । निऽसद्य । वृष्णः । सोमस्य । वृषणा । आ । वृषेथां ॥ ३ ॥ संऽइद्धेषु । अग्निषु । आनजाना । यतऽस्रुचा । बर्हिः । ऊं इति । तिस्तिराणा । तीव्रैः । सोमैः । परिऽसिक्तेभिः । अर्वाक् । आ । इंद्राग्नी इति । सौमनसाय । यातं ॥ ४ ॥ यानि । इंद्राग्नी इति । चक्रथुः । वीर्याणि । यानि । रूपाणि । उत । वृष्ण्यानि । या । वां । प्रत्नानि । सख्या । शिवानि । तेभिः । सोमस्य । पिबतं । सुतस्य ॥ ५ ॥ २६ ॥

यदब्रवं प्रथमं वां वृणानोऽयं सोमो असुरैर्नो विहव्यः ।
तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य ॥ ६ ॥
यदिन्द्राग्नी मदथः स्वे दुरोणे यद्ब्रह्मणि राजनि वा यजत्रा ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ७ ॥
यदिन्द्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ८ ॥
यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ९ ॥
यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ १० ॥

यत् । अब्रवं । प्रथमं । वां । वृणानः । अयं । सोमः । असुरैः । नः । विऽहव्यः । तां । सत्यां । श्रद्धां । अभि । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ ६ ॥ यत् । इंद्राग्नी इति । मदथः । स्वे । दुरोणे । यत् । ब्रह्मणि । राजनि । वा । यजत्रा । अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ ७ ॥ यत् । इंद्राग्नी इति । यदुषु । तुर्वशेषु । यत् । द्रुह्युषु । अनुषु । पूरुषु । स्थः । अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ ८ ॥ यत् । इंद्राग्नी इति । अवमस्यां । पृथिव्यां । मध्यमस्यां । परमस्यां । उत । स्थः । अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ ९ ॥ यत् । इंद्राग्नी इति । परमस्यां । पृथिव्यां । मध्यमस्यां । अवमस्यां । उत । स्थः । अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ १० ॥

यदिन्द्राग्नी दिवि ष्ठो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ११ ॥
यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ १२ ॥
एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ १३ ॥ २७ ॥

॥ १०९ ॥ ऋषिः—आङ्गिरसः कुत्सः । देवता—इन्द्राग्नी । छन्दः—जगती त्रिष्टुप् ॥

॥१०९॥ वि ह्यख्यं मनसा वस्य इच्छन्निन्द्राग्नी ज्ञास उत वा सजातान्।
नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम् ॥ १ ॥
अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ।
अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् ॥ २ ॥

यत् । इंद्राग्नी इति । दिवि । स्थः । यत् । पृथिव्यां । यत् । पर्वतेषु । ओषधीषु । अप्ऽसु । अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ ११ ॥ यत् । इंद्राग्नी इति । उत्ऽइता । सूर्यस्य । मध्ये । दिवः । स्वधया । मादयेथे इति । अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ १२ ॥ एव । इंद्राग्नी इति । पपिऽवांसा । सुतस्य । विश्वा । अस्मभ्यं । सं । जयतं । धनानि । तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ १३ ॥ २७ ॥

वि । हि । अख्यं । मनसा । वस्यः । इच्छन् । इंद्राग्नी इति । ज्ञासः । उत । वा । सऽजातान् । न । अन्या । युवत् । प्रऽमतिः । अस्ति । मह्यं । सः । वां । धियं । वाजऽयंतीं । अतक्षं ॥ १ ॥ अश्रवं । हि । भूरिदावत्ऽतरा । वां । विऽजामातुः । उत । वा । घ । स्यालात् । अथ । सोमस्य । प्रऽयती । युवऽभ्यां । इंद्राग्नी इति । स्तोमं । जनयामि । नव्यं ॥ २ ॥

मा च्छेद्म रश्मीँरिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः ।
इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री धिषणाया उपस्थे ॥ ३ ॥
युवाभ्यां देवी धिषणा मदायेन्द्राग्नी सोममुशती सुनोति ।
तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु ॥ ४ ॥
युवामिन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये ।
तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥ ५ ॥ २८ ॥
प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च ।
प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या ॥ ६ ॥
आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः ।
इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ॥ ७ ॥

मा । छेद्म । रश्मीन् । इति । नाधमानाः । पितॄणां । शक्तीः । अनुऽयच्छमानाः । इंद्राग्निऽभ्यां । कं । वृषणः । मदंति । ता । हि । अद्री इति । धिषणायाः । उपऽस्थे ॥ ३ ॥ युवाभ्यां । देवी । धिषणा । मदाय । इंद्राग्नी इति । सोमं । उशती । सुनोति । तौ । अश्विना । भद्रऽहस्ता । सुपाणी इति सुऽपाणी । आ । धावतं । मधुना । पृंक्तं । अप्ऽसु ॥ ४ ॥ युवां । इंद्राग्नी इति । वसुनः । विऽभागे । तवःऽतमा । शुश्रव । वृत्रऽहत्ये । तौ । आऽसद्य । बर्हिषि । यज्ञे । अस्मिन् । प्र । चर्षणी इति । मादयेथां । सुतस्य ॥ ५ ॥ २८ ॥ प्र । चर्षणिऽभ्यः । पृतनाऽहवेषु । प्र । पृथिव्याः । रिरिचाथे इति । दिवः । च । प्र । सिंधुऽभ्यः । प्र । गिरिऽभ्यः । महिऽत्वा । प्र । इंद्राग्नी इति । विश्वा । भुवना । अति । अन्या ॥ ६ ॥ आ । भरतं । शिक्षतं । वज्रबाहू इति वज्रऽबाहू । अस्मान् । इंद्राग्नी इति । अवतं । शचीभिः । इमे । नु । ते । रश्मयः । सूर्यस्य । येभिः । सऽपित्वं । पितरः । नः । आसन् ॥ ७ ॥

पुरंदरा शिक्षतं वज्रहस्तास्माँ इन्द्राग्नी अवतं भरेषु ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ८ ॥ २९ ॥

॥ ११० ॥ ऋषिः—आङ्गिरसः कुत्सः । देवता—ऋभवः । छन्दः— जगत्यः, त्रिष्टुभ् ।

॥११०॥ ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥ १ ॥
आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्राञ्चो मम के चिदापयः ।
सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम् ॥ २ ॥
तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयन्त ऐतन ।
त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ॥ ३ ॥
विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वमानशुः ।
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः ॥ ४ ॥

पुरंऽदरा । शिक्षतं । वज्रऽहस्ता । अस्मान् । इंद्राग्नी इति । अवतं । भरेषु । तत् । नः । मित्रः । वरुणः । ममहंता । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ८ ॥ २९ ॥

ततं । मे । अपः । तत् । ऊं इति । तायते । पुनरिति । स्वादिष्ठा । धीतिः । उचथाय । शस्यते । अयं । समुद्रः । इह । विश्वऽदेव्यः । स्वाहाऽकृतस्य । सं । ऊं इति । तृप्णुत । ऋभवः ॥ १ ॥ आऽभोगयं । प्र । यत् । इच्छंतः । ऐतन । अपाकाः । प्रांचः । मम । के । चित् । आपयः । सौधन्वनासः । चरितस्य । भूमना । अगच्छत । सवितुः । दाशुषः । गृहं ॥ २ ॥ तत् । सविता । वः । अमृतऽत्वं । आ । असुवत् । अगोह्यं । यत् । श्रवयंतः । ऐतन । त्यं । चित् । चमसं । असुरस्य । भक्षणं । एकं । संतं । अकृणुत । चतुःऽवयं ॥ ३ ॥ विष्ट्वी । शमी । तरणिऽत्वेन । वाघतः । मर्तासः । संतः । अमृतऽत्वं । आनशुः । सौधन्वनाः । ऋभवः । सूरऽचक्षसः । संवत्सरे । सं । अपृच्यंत । धीतिऽभिः ॥ ४॥

क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम् ।
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः ॥ ५ ॥ १० ॥
आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना ।
तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः ॥ ६ ॥
ऋभुर्न इन्द्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः ।
युष्माकं देवा अवसाहनि प्रियेऽभि तिष्ठेम पृत्सुतीरसुन्वताम् ॥ ७ ॥
निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः ।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥ ८ ॥
वाजेभिर्नो वाजसातावविड्ढ्यृभुमाँ इन्द्र चित्रमा दर्षि राधः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ९ ॥ ११ ॥

क्षेत्रंऽइव । वि । ममुः । तेजनेन । एकं । पात्रं । ऋभवः । जेहमानं । उपऽस्तुताः । उपऽमं । नाधमानाः । अमर्त्येषु । श्रवः । इच्छमानाः ॥ ५ ॥ १० ॥ आ । मनीषां । अंतरिक्षस्य । नृऽभ्यः । स्रुचाऽइव । घृतं । जुहवाम । विद्मना । तरणिऽत्वा । ये । पितुः । अस्य । सश्चिरे । ऋभवः । वाजं । अरुहन् । दिवः । रजः ॥ ६ ॥ ऋभुः । नः । इंद्रः । शवसा । नवीयान् । ऋभुः । वाजेभिः । वसुऽभिः । वसुः । ददिः । युष्माकं । देवाः । अवसा । अहनि । प्रिये । अभि । तिष्ठेम । पृत्सुतीः । असुन्वतां ॥ ७ ॥ निः । चर्मणः । ऋभवः । गां । अपिंशत । सं । वत्सेन । असृजत । मातरं । पुनरिति । सौधन्वनासः । सुऽअपस्यया । नरः । जिव्री इति । युवाना । पितरा । अकृणोतन ॥ ८ ॥ वाजेभिः । नः । वाजऽसातौ । अविड्ढि । ऋभुऽमान् । इंद्र । चित्रं । आ । दर्षि । राधः । तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ९ ॥ १० ॥

॥ १११ ॥ ऋषिः—कुत्स । देवता—ऋभवः । छन्दः—जगती त्रिष्टुप् ॥

॥ १११ ॥ तक्षन्रथं सुवृतं विद्मनापसस्तक्षन्हरी इन्द्रवाहा वृषण्वसू ।
तक्षन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं सचाभुवम् ॥ १ ॥
आ नो यज्ञाय तक्षत ऋभुमद्वयः क्रत्वे दक्षाय सुप्रजावतीमिषम् ।
यथा क्षयाम सर्ववीरया विशा तन्नः शर्धाय धासथा स्विन्द्रियम् ॥ २ ॥
आ तक्षत सातिमस्मभ्यमृभवः सातिं रथाय सातिमर्वते नरः ।
सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिम् ॥ ३ ॥
ऋभुक्षणमिन्द्रमा हुव ऊतय ऋभून्वाजान्मरुतः सोमपीतये ।
उभा मित्रावरुणा नूनमश्विना ते नो हिन्वन्तु सातये धिये जिषे ॥ ४ ॥
ऋभुर्भराय सं शिशातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ५ ॥ ३२ ॥

तक्षन् । रथं । सुऽवृतं । विद्मनाऽअपसः । तक्षन् । हरी इति । इंद्रऽवाहा । वृषण्वसू इति वृषण्ऽवसू । तक्षन् । पितृभ्यां । ऋभवः । युवत् । वयः । तक्षन् । वत्साय । मातरं । सचाऽभुवं ॥ १ ॥ आ । नः । यज्ञाय । तक्षत । ऋभुऽमत् । वयः । क्रत्वे । दक्षाय । सुऽप्रजावतीं । इषं । यथा । क्षयाम । सर्वऽवीरया । विशा । तत् । नः । शर्धाय । धासथ । सु । इंद्रियं ॥ २ ॥ आ । तक्षत । सातिं । अस्मभ्यं । ऋभवः । सातिं । रथाय । सातिं । अर्वते । नरः । सातिं । नः । जैत्रीं । सं । महेत । विश्वहा । जामिं । अजामिं । पृतनासु । सक्षणिं ॥ ३ ॥ ऋभुक्षणं । इंद्रं । आ । हुवे । ऊतये । ऋभून् । वाजान् । मरुतः । सोमऽपीतये । उभा । मित्रावरुणा । नूनं । अश्विना । ते । नः । हिन्वंतु । सातये । धिये । जिषे ॥ ४ ॥ ऋभुः । भराय । सं । शिशातु । सातिं । समर्यऽजित् । वाजः । अस्मान् । अविष्टु । तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ५ ॥ ३२ ॥

॥ ११२ ॥ ऋषिः- कुत्स । देवता-द्यावा पृथिवी, अग्नि, अश्वी। छन्दः जगती त्रिष्टुप् ॥

॥ ११२ ॥ ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये ।
याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम् ॥ १ ॥
युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मन्तवे ।
याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतम् ॥ २ ॥
युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना ।
याभिर्धेनुमस्वं पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतम् ॥ ३ ॥
याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति ।
याभिस्त्रिमन्तुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतम् ॥ ४ ॥
याभी रेभं निवृतं सितमद्भ्य उद्वन्दनमैरयतं स्वर्दृशे ।
याभिः कण्वं प्र सिषासन्तमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥५॥११॥

ईळे । द्यावापृथिवी इति । पूर्वऽचित्तये । अग्निं । घर्मं । सुऽरुचं । यामन् । इष्टये । याभिः । भरे । कारं । अंशाय । जिन्वथः । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १ ॥ युवोः । दानाय । सुऽभराः । असश्चतः । रथं । आ । तस्थुः । वचसं । न । मंतवे । याभिः । धियः । अवथः । कर्मन् । इष्टये । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ २ ॥ युवं । तासां । दिव्यस्य । प्रऽशासने । विशां । क्षयथः । अमृतस्य । मज्मना । याभिः । धेनुं । अस्वं । पिन्वथः । नरा । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ ३ ॥ याभिः । परिऽज्मा । तनयस्य । मज्मना । द्विऽमाता । तूर्षु । तरणिः । विऽभूषति । याभिः । त्रिऽमंतुः । अभवत् । विऽचक्षणः । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ ४ ॥ याभिः । रेभं । निऽवृतं । सितं । अत्ऽभ्यः । उत् । वंदनं । ऐरयतं । स्वः । दृशे । याभिः । कण्वं । प्र । सिसासंतं । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ ५ ॥ ११ ॥

अध्याय ७.

सूक्त ९५.

॥ ९५ ॥ ऋषि-आङ्गिरस कुत्स । देवता—अग्नि ॥

(उषा और रात्रि) दोनों (युवतियोंका) स्वरूप बिलकुल भिन्न है। वे दोनों सुन्दर मार्गोंसे गमन करती हैं। हर एक परस्परके बालकको स्तन पिलाती हैं। एक (रात्री) के पास पीले रङ्गका बालक हृष्ट पुष्ट[1] होता है और दूसरे (उषा) के पास शुभ्र रङ्गका बालक वृद्धि पाता है। १

त्वष्टा देवके उद्योगी दश युवतियोंने इस खिलाडु[2] (अग्नि) बालकको जनाया। जब इस बालकका तेज दिखाई देने लगा तब उसकी कीर्ति (संसारमें) चारों ओर फैल गयी। वे दोनों (युवती) उस देदीप्यमान बालकको अपने साथ ले गयीं। २

तीन जगह उस बालकका जन्म हुआ—समुद्रमें, द्युलोकमें और अन्तरिक्षमें। ज्ञानी लोक उन तीनों जन्मोंका[3] अच्छा वर्णन करते हैं। पृथिवीके चारों दिशाओंतक पूर्वसे पश्चिम और दक्षिणसे उत्तर विभागोंतक और ऋतुओंपर वह बालक अपना शासन नियमानुसार चलाता है; और योग्य समयपर अपना प्रबन्ध स्थापित करता है। ३

जब यह बालक (अग्नि) गुप्त[4] रहता है तब कौन इसको पहचान सकता है? इस बालकने अपने माताओंको अपने सामर्थ्यसे उत्पन्न किया। सब ऋतुओंको अपने पेटमें रखनेवाला श्रेष्ठ, ज्ञानी, और सामर्थ्यवान् अग्नि अपने (अद्भुत) पराक्रमके स्थानसे बाहर निकलकर सबदूर सञ्चार करता है। ४

---

१ विरूपे द्वे स्वर्थे चरतः । अन्याअन्या वत्सं उप धापयेते । अन्यस्यां हरिः स्वधावान् भवति, अन्यस्यां शुक्रः सुवर्चाः ददृशे ।

२ त्वष्टुः अतन्द्रासः दश युवतयः इमं विभृत्रं गर्भं जनयन्त । तिग्मानीकं जनेषु स्वयशसं विरोचमानं ईं परि नयन्ति ।

३ समुद्रे एकं, दिवि एकं, अप्सु (एकं), अस्य त्रीणि जाना परि भूषन्ति । पूर्वां अनु पार्थिवानां प्रदिशं ऋतून् प्रशासत् अनुपूर्वं वि दधौ ।

४ निण्यं इमं वः कः आ चिकेत ? वत्सः स्वधाभिः मातॄः जनयत । बह्वीनां गर्भः, महान्, कविः, स्वधावान् अपसां उपस्थात् निः चरति ।

यह सुन्दर अग्नि जलमें रहकर सबके सामने[१] वृद्धि पाकर प्रकट होता है। आप निजके कीर्तिसे शोभायमान दिखाई देते हैं। जिन जलोंमें आप रहते हैं वे आड़ मार्गसे चलते हैं। किन्तु उनमें आप खड़े रह सकते हैं। जब आपका जन्म हुआ तब द्युलोक और पृथिवीलोक –जिनको त्वष्टा देवने उत्पन्न किया–दोनों घबड़ा गये। किन्तु (द्युलोक और पृथिवीलोक) दोनों लौट आये और सिंहरूपी बालकको गोदमें लिया। ५ (१)

उपकारी द्यावापृथिवीओंने माताकी नाईं उस बालकका पालन किया। अपने वत्सके लिये रांभनेवाली गौकी नाईं वे दोनों (माताएं) अपने बालकके पास दौड़ती गयीं। (सब उपासक लोग) अग्निको दहने ओरसे हवि अर्पण करते हैं; और सबसे आप सामर्थ्यवान् बन जाते हैं। ६

सविता देवकी नाईं अग्नि अपने हाथ खड़े करता है। और आप दोनों (द्यावापृथिवी)को वस्त्रोंसे सुशोभित करते हैं। सबसे आप उनके पुराणे उज्ज्वल वस्त्र[१०] छीन लेते हैं; और अपने माताओंसे भी नया वस्त्र छीन लेते हैं। ७

जब निजके घर (अन्तरिक्ष)में अग्निका सम्बन्ध उदकरूपी गौकेसाथ होता है तब बिजलीकी तरह उनका उज्ज्वलरूप प्रकट होता है। प्रज्ञावान अग्नि केवल बुद्धिकी मूर्ति है। इसके चमत्कारसे आकाशमें प्रकाश प्रकट होता है। आपही स्वर्गके मूलस्तम्भको पवित्र करते हैं। इसीको कहते हैं कि यज्ञके समय अग्निका मेल देवोंकेसाथ होता है। ८

(अग्नि) सबसे श्रेष्ठ है। आपका निवासस्थान (स्वर्ग लोकके) प्रदेशमें है। उस विस्तीर्ण प्रदेशको आपका देदीप्यमान तेज[११] व्याप्त करता है। हे अग्निदेव, आप अपने सब ज्वालाओंसे प्रदीप्त हो जाइये। अपने सामर्थ्यसे[१२] –जिसको कोई रोक नहीं सकता– भक्तोंकी रक्षा कीजिये। ९

---

५ चारु आविष्ट्य आसु वर्धते। स्वयशाः जिह्मानां उपस्थे ऊर्ध्वः। त्वष्टुः उभे जायमानात् बिभ्यतुः, प्रतीची सिंह प्रति जोषयेते।

६ भद्रे उभे मेने न जोषयेते। वाश्राः गावः न एवैः उप तस्थुः। यं दक्षिणतः हविर्भिः अंजन्ति सः दक्षाणां दक्षपतिः बभूव।

७ सविता इव बाहू उत यंयमीति। सिचौ उभे ऋञ्जन् भीमः यतते। सिसस्मात् शुक्र अत्कं[१०] उत् अजते। मातृभ्यः नवा वसना जहाति।

८ तत सदने गोभिः अद्भिः सपृचानः उत्तरं त्वेषं रूप कृणुते। धीः कविः बुध्न परि मर्मृज्यते। सा देवानां समितिः बभूव।

९ ते उरु विचरन्तं प्रय[११] महिषाय धाम बुध्नं परि एति। अग्ने स्वयशोभिः विश्वेभिः इद्धः अदब्धेभिः पायुभिः[१२] अस्मान् पाहि।

(अग्नि) बञ्जर[११] भूमीमें जलको बहाता है। उदकोंको आप मार्ग दिखाते हैं। आप पानीकी लहरें उछलाते हैं; और आप सब दूर पृथिवपर पानी फैलाते हैं। सब पुराणी वस्तुओंको आप पेटमें रखते हैं; और नये वृक्षोंको उत्पन्न करते हैं। १०

हे अग्निदेव, जो इन्धन (लकड़ी) हम आपको अर्पण करते हैं उससे आप बढ़ जाइये; अपना प्रकाश सब दूर फैलाइये; हमे धन दीजिये और अपनी कीर्ति बढ़ाइये। इस प्रार्थनाको मित्र, वरुण, तथा अदिति, सिन्धु, पृथ्वी, द्युलोक सुने और हमारी प्रार्थना सफल करें। ११ (८)

सूक्त ९६.

॥ ९६ ॥ ऋषि–आङ्गिरस कुत्स । देवता–द्रुद्रोग्नि ॥

सामर्थ्यसे उत्पन्न हुए अग्निने सचमुच[१] बुद्धिका सब खजाना एकदम प्राप्त किया। उदक और प्रज्ञाओंने अग्निको दुनियाका मित्र बनाया। और सब देवोंने वैभव देनेवाले अग्निकी शरण ली। १

अग्नि आयुकी स्तोत्रोंसे[२] सन्तुष्ट होकर अपने प्राचीन ज्ञानके अनुसार मनुष्यजातिकी सब प्रजा उत्पन्न की। आपने अपने तेजसे द्युलोक और उदकको उत्पन्न किया। वैभव देनेवाले अग्निकी सब देवोंने शरण ली। २

विश्वका पोषण करनेवाले, दान–कर्मकरनेमें सहायता देनेवाले और यज्ञकी सिद्धि करनेवाले सामर्थ्यके पुत्र–अग्निको–श्रद्धावान्[३] लोगोंने सबसे पहले बुलाया; (श्रद्धावान् लोगोंने) अग्निकी स्तुति करके आपको सन्तुष्ट किया। वैभव देनेवाले अग्निकी सब देवोंने शरण ली। ३

---

१० धन्वन्[११] स्रोतः ऊर्मिं गातुं कृणुते। शुक्रैः ऊर्मिभिः क्षां अभि नक्षति। विश्वा सनानि जठरेषु धत्ते। नवासु प्रसूषु अन्तः चरति।

११ पावक अग्ने, नः समिधा एव वृधानः श्रवसे रेवत् वि भाहि मित्रः वरुणः अदितिः सिन्धुः पृथिवी उत द्यौः तत् नः ममहन्तां।

१ प्रत्नथा सहसा जायमानः सः विश्वा काव्यानि सद्यः बट्[१] अधत्त। आपः च धिषणा च मित्रं साधन्। देवाः द्रविणोदां अग्निं धारयन्।

२ आयोः निविदा[२] सः पूर्वया कव्यता मनूनां इमाः प्रजाः अजनयत्, विवस्वता चक्षसा द्यां अपः च।

३ ऊर्जः पुत्रं, भरतं, सृप्रदानुं यज्ञसाध प्रथमं आहुत ऋञ्जमानं तं आरीः[३] विशः ईळत।

मानवजातिकी रक्षा करनेवाले, द्युलोक और भूलोकको उत्पन्न करनेवाले स्वर्गकी प्राप्ति करानेवाले और असंख्य[४] वैभव पास रखनेवाले मातरिश्वा देवने अपनी सन्तानका कल्याण करनेके लिये नये नये और अच्छे मार्ग ढूंढे। और इसी लिये वैभव देनेवाले अग्निकी सब देवोंने शरण ली। ४

अपने स्वरूपको हमेशा बदलनेवाली[५] रात्री और उषा दोनों मिलकर[६] अपने सूर्यरूपी अग्नि बालकको अपना स्तन पिलाती है। सुवर्णके समान शोभा देनेवाले (सूर्यरूपी) अग्नि–देव द्युलोक और भूलोकमें अपना प्रकाश फैलाते हैं। वैभव देनेवाले अग्निकी सब देवोंने शरण ली। ५ (३)

आप सम्पत्तिका मूल खजाना हैं; धन देनेवाले, यज्ञकी ध्वजा फहरानेवाले और प्रार्थना करनेवालोंकी[७] इच्छा[८] पूर्ण करनेवाले आपही हैं। अपना अमरत्व स्थिर करनेका प्रयत्न करनेवाले देवोंने वैभव देनेवाले अग्निकी शरण ली। ६

जैसे प्राचीनकालमें आप वैभवके स्थान थे वैसेही अबभी[९] आप वैभवके स्थान बने हुए हैं। आजतक जितने प्राणियोंका जन्म हुआ है और भविष्यत्कालमें जिनका जन्म होगा उन सबोंके आप आनन्दकारक स्थान[१०] हैं। वर्तमानकालमें जितने प्राणी जीवित है और भविष्यत्कालमें जिनका जन्म होगा उन सबोंकी रक्षा आप करनेवाले हैं। वैभव देनेवाले अग्निकी सब देवोंने शरण ली। ७

याभिर्वर्तिकां ग्रसिताममुञ्चतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ ८ ॥
याभिः सिन्धुं मधुमन्तमसश्चतं वसिष्ठं याभिरजरावजिन्वतम् ।
याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ ९ ॥
याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतम् ।
याभिर्वशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ १० ॥ ३४ ॥

याभिः । अन्तकम् । जसमानम् । आऽअरणे । भुज्युम् । याभिः । अव्यथिऽभिः । जिजिन्वथुः । याभिः । कर्कन्धुम् । वय्यम् । च । जिन्वथः । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ६ ॥ याभिः । शुचन्तिम् । धनऽसाम् । सुऽसंसदम् । तप्तम् । घर्मम् । ओम्याऽवन्तम् । अत्रये । याभिः । पृश्निऽगुम् । पुरुऽकुत्सम् । आवतम् । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ७ ॥ याभिः । शचीभिः । वृषणा । पराऽवृजम् । प्र । अन्धम् । श्रोणम् । चक्षसे । एतवे । कृथः । याभिः । वर्तिकाम् । ग्रसिताम् । अमुञ्चतम् । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ८ ॥ याभिः । सिन्धुम् । मधुऽमन्तम् । असश्चतम् । वसिष्ठम् । याभिः । अजरौ । अजिन्वतम् । याभिः । कुत्सम् । श्रुतर्यम् । नर्यम् । आवतम् । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ९ ॥ याभिः । विश्पलाम् । धनऽसाम् । अथर्व्यम् । सहस्रऽमीळ्हे । आजौ । अजिन्वतम् । याभिः । वशम् । अश्व्यम् । प्रेणिम् । आवतम् । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ १० ॥ ३४ ॥

याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत् ।
कक्षीवन्तं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ ११ ॥
याभी रसां क्षोदसोद्नः पिपिन्वथुरनश्वं याभी रथमावतं जिषे ।
याभिस्त्रिशोक उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतम् ॥ १२ ॥
याभिः सूर्यं परियाथः परावति मन्धातारं क्षैत्रपत्येष्वावतम् ।
याभिर्विप्रं प्र भरद्वाजमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ १३ ॥
याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शम्बरहत्य आवतम् ।
याभिः पूर्भिद्ये त्रसदस्युमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ १४ ॥
याभिर्वम्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः ।
याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ १५ ॥ ३५ ॥

याभिः । सुदानू इति सुऽदानू । औशिजाय । वणिजे । दीर्घऽश्रवसे । मधु । कोशः । अक्षरत् । कक्षीवन्तम् । स्तोतारम् । याभिः । आवतम् । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ गतम् ॥ ११ ॥ याभिः । रसाम् । क्षोदसा । उद्नः । पिपिन्वथुः । अनश्वम् । याभिः । रथम् । आवतम् । जिषे । याभिः । त्रिऽशोकः । उस्रियाः । उत्ऽआजत । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ १२ ॥ याभिः । सूर्यम् । परिऽयाथः । पराऽवति । मन्धातारम् । क्षैत्रऽपत्येषु । आवतम् । याभिः । विप्रम् । प्र । भरत्ऽवाजम् । आवतम् । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ १३ ॥ याभिः । महाम् । अतिथिऽग्वम् । कशःऽजुवम् । दिवःऽदासम् । शम्बरऽहत्ये । आवतम् । याभिः । पूःऽभिद्ये । त्रसदस्युम् । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥१४॥ याभिः । वम्रम् । विऽपिपानं । उपऽस्तुतं । कलिं । याभिः । वित्तऽजानिं । दुवस्यथः । याभिः । विऽअश्वं । उत । पृथिं । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १५ ॥ ३५ ॥

याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः ।
याभिः शारीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना गतम् ॥ १६ ॥
याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना ।
याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिरश्विना गतम् ॥ १७ ॥
याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः ।
याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिर[illegible]ना गतम् ॥ १८ ॥
याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतम् ।
याभिः सुदास ऊहथुः सुदेव्यं१ ताभिरू षु ऊतिभिरश्विना गतम् ॥ १९ ॥
याभिः शन्ताती भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुम् ।
ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु ऊतिभिरश्विना गतम् ॥ २० ॥ ३६

याभिः । नरा । शयवे । याभिः । अत्रये । याभिः । । पुरा । मनवे । गातुं ईषथुः । याभिः । शारीः । आजतं । स्यूमऽरश्मये । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १६ ॥ याभिः । पठर्वा । जठरस्य । मज्मना । अग्निः । न । अदीदेत् । चितः । इद्धः । अज्मन् । आ । याभिः । शर्यातं । अवथः । महाऽधने । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १७ ॥ याभिः । अङ्गिरः । मनसा । निऽरण्यथः । अग्रं । गच्छथः । विऽवरे । गोऽअर्णसः । याभिः । मनुं । शूरं । इषा । संऽआवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १८ ॥ याभिः । पत्नीः । विऽमदाय । निऽऊहथुः । आ । घ । वा । याभिः । अरुणीः । अशिक्षतं । याभिः । सुऽदासे । ऊहथुः । सुऽदेव्यं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १९ ॥ याभिः । शन्ताती इति । शंऽताती । भवथः । ददाशुषे । भुज्युं । याभिः । अवथः । याभिः । अध्रिऽगुं । ओम्याऽवतीं । सुऽभरां । ऋतऽस्तुभं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ २० ॥ ३६ ॥

याभिः कृशानुमसने दुवस्यथो जवे याभिर्यूनो अर्वन्तमावतम् ।
मधु प्रियं भरथो यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतम् ॥ २१ ॥
याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः ।
याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतम् ॥ २२ ॥
याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतम् ।
याभिर्ध्वसन्तिं पुरुषन्तिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ २३ ॥
अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥ २४ ॥
द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥२५॥३७॥७॥

याभिः । कृशानुं । असने । दुवस्यथः । जवे । याभिः । यूनः । अर्वन्तं । आवतं । मधु । प्रियं । भरथः । यत् । सरट्ऽभ्यः । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ २१ ॥ याभिः । नरं । गोसुऽयुधं । नृऽसह्ये । क्षेत्रस्य । साता । तनयस्य । जिन्वथः । याभिः । रथान् । अवथः । याभिः । अर्वतः । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ २२ ॥ याभिः । कुत्सं । आर्जुनेयं । शतक्रतू इति शतऽक्रतू । प्र । तुर्वीतिं । प्र । च । दभीतिं । आवतं । याभिः । ध्वसन्तिं । पुरुऽसन्तिं । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ २३ ॥ अप्नस्वतीं । अश्विना । वाचं । अस्मे इति । कृतं । नः । दस्रा । वृषणा । मनीषां । अद्यूत्ये । अवसे । नि । ह्वये । वां । वृधे । च । नः । भवतं । वाजऽसातौ ॥ २४ ॥ द्युऽभिः । अक्तुऽभिः । परि । पातं । अस्मान् । अरिष्टेभिः । अश्विना । सौभगेभिः । तत् । नः । मित्रः । वरुणः । ममहन्तां । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ २५ ॥ ३७ ॥

इति प्रथमाष्टके सप्तमोऽध्यायः ॥ ७ ॥

॥ अथ प्रथमाष्टके अष्टमोऽध्यायः ॥ ८ ॥

॥ ११३ ॥ ऋषि-आङ्गिरस कुत्स । देवता-उषा । छन्दः त्रिष्टुप ॥

॥११३॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।
यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् ॥ १ ॥
रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ २ ॥
समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥ ३ ॥
भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः ।
प्रार्प्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ॥ ४ ॥

॥ अथ प्रथमाष्टके अष्टमोऽध्यायः ॥ ८ ॥

इदं । श्रेष्ठं । ज्योतिषां । ज्योतिः । आ । अगात् । चित्रः । प्रऽकेतः । अजनिष्ट । विऽभ्वा । यथा । प्रऽसूता । सवितुः । सवाय । एव । रात्री । उषसे । योनिं । अरैक् ॥ १ ॥ रुशत्ऽवत्सा । रुशती । श्वेत्या । आ । अगात् । अरैक् । ऊं इति । कृष्णा । सदनानि । अस्याः । समानबंधू इति समानऽबंधू । अमृते इति । अनूची इति । द्यावा । वर्णं । चरतः । आमिनाने इत्याऽमिनाने ॥ २ ॥ समानः । अध्वा । स्वस्रोः । अनंतः । तं । अन्याऽअन्या । चरतः । देवशिष्टे इति देवऽशिष्टे । न । मेथेते इति । न । तस्थतुः । सुमेके इति सुऽमेके । नक्तोषसा । सऽमनसा । विरूपे इति विऽरूपे ॥ ३ ॥ भास्वती । नेत्री । सूनृतानां । अचेति । चित्रा । वि । दुरः । नः । आवरित्यावः । प्रऽअर्प्य । जगत् । वि । ऊं इति । नः । रायः । अख्यत् । उषाः । अजीगः । भुवनानि । विश्वा ॥ ४ ॥

जिह्मश्ये॒३॒ चरि॑तवे म॒घोन्या॑भो॒गय॑ इ॒ष्टये॑ रा॒य उ॑ त्वम् ।
द॒भ्रं पश्य॑द्भ्य उर्वि॒या वि॒चक्ष॑ उ॒षा अ॑जीग॒र्भुव॑नानि॒ विश्वा॑ ॥ ५ ॥ १ ॥

क्ष॒त्राय॑ त्वं॒ श्रव॑से त्वं म॒हीया॑ इ॒ष्टये॑ त्व॒मर्थ॑मिव त्वमि॒त्यै ।
विस॑दृशा जीवि॒ताभि॑प्र॒चक्ष॑ उ॒षा अ॑जीग॒र्भुव॑नानि॒ विश्वा॑ ॥ ६ ॥

ए॒षा दि॒वो दु॑हि॒ता प्रत्य॑दर्शि व्यु॒च्छन्ती॑ युव॒तिः शु॒क्रवा॑साः ।
विश्व॒स्येशा॑ना॒ पार्थि॑वस्य॒ वस्व॒ उषो॑ अ॒द्येह सु॑भगे॒ व्यु॑च्छ ॥ ७ ॥

प॒रा॒य॒ती॒नामन्वे॑ति॒ पाथ॑ आयती॒नां प्र॑थ॒मा शश्व॑तीनाम् ।
व्यु॒च्छन्ती॑ जी॒वमु॑दी॒रय॑न्त्यु॒षा मृ॒तं कं च॒न बो॒धय॑न्ती ॥ ८ ॥

उषो॒ यद॒ग्निं स॒मिधे॑ च॒कर्थ॒ वि यदाव॒श्चक्ष॑सा॒ सूर्य॑स्य ।
यन्मानु॑षान्य॒क्ष्यमा॑णाँ॒ अजी॑ग॒स्तद्दे॒वेषु॑ चकृषे भ॒द्रमप्नः॑ ॥ ९ ॥

जि॒ह्म॒ऽश्ये॑ । चरि॑तवे । म॒घोनी॑ । आ॒ऽभो॒गये॑ । इ॒ष्टये॑ । रा॒ये । ऊं॒ इ॒ति॒ । त्व॒म् । द॒भ्रम् । पश्य॑त्ऽभ्यः । उ॒र्वि॒या । वि॒ऽचक्षे॑ । उ॒षाः । अ॒जी॒ग॒रिति॑ । भुव॑नानि । विश्वा॑ ॥ ५ ॥ १ ॥

क्ष॒त्राय॑ । त्व॒म् । श्रव॑से । त्व॒म् । म॒ही॒यै । इ॒ष्टये॑ । त्व॒म् । अर्थ॑म्ऽइव । त्व॒म् । इ॒त्यै । विऽस॑दृशा । जी॒वि॒ता । अ॒भि॒ऽप्र॒चक्षे॑ । उ॒षाः । अ॒जी॒गः । भुव॑नानि । विश्वा॑ ॥ ६ ॥

ए॒षा । दि॒वः । दु॒हि॒ता । प्रति॑ । अ॒द॒र्शि॒ । वि॒ऽउ॒च्छन्ती॑ । यु॒व॒तिः । शु॒क्रऽवा॑साः । विश्व॑स्य । ईशा॑ना । पार्थि॑वस्य । वस्वः॑ । उषः॑ । अ॒द्य । इ॒ह । सु॒ऽभ॒गे॒ । वि । उ॒च्छ॒ ॥ ७ ॥

प॒रा॒ऽय॒ती॒नाम् । अनु॑ । ए॒ति॒ । पाथः॑ । आ॒ऽय॒ती॒नाम् । प्र॒थ॒मा । शश्व॑तीनाम् । वि॒ऽउ॒च्छन्ती॑ । जी॒वम् । उ॒त्ऽई॒रय॑न्ती । उ॒षाः । मृ॒तम् । कम् । च॒न । बो॒धय॑न्ती ॥ ८ ॥ उषः॑ । यत् । अ॒ग्निम् । स॒म्ऽइधे॑ । च॒कर्थ॑ । वि । यत् । आवः॑ । चक्ष॑सा । सूर्य॑स्य । यत् । मानु॑षान् । य॒क्ष्यमा॑णान् । अजी॑ग॒रिति॑ । तत् । दे॒वेषु॑ । च॒कृ॒षे॒ । भ॒द्रम् । अप्नः॑ ॥ ९ ॥

कियात्या यत्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान् ।
अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषमन्याभिरेति ॥ १० ॥ २ ॥
ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छन्तीमुषसं मर्त्यासः ।
अस्माभिरू नु प्रतिचक्ष्याभूदो ते यन्ति ये अपरीषु पश्यान् ॥ ११ ॥
यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयन्ती ।
सुमङ्गलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ ॥ १२ ॥
शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी ।
अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधाभिः ॥ १३ ॥
व्यञ्जिभिर्दिव आतास्वद्योदप कृष्णां निर्णिजं देव्यावः ।
प्रबोधयन्त्यरुणेभिरश्वैरोषा याति सुयुजा रथेन ॥ १४ ॥

कियति । आ । यत् । समया । भवाति । याः । विऽऊषुः । याः । च । नूनं । विऽउच्छान् । अनु । पूर्वाः । कृपते । वावशाना । प्रऽदीध्याना । जोषं । अन्याभिः । एति ॥ १० ॥ २
ईयुः । ते । ये । पूर्वऽतरां । अपश्यन् । विऽउच्छंतीं । उषसं । मर्त्यासः । अस्माभिः । ऊं इति । नु । प्रतिऽचक्ष्या । अभूत् । ओ इति । ते । यंति । ये । अपरीषु । पश्यान् ॥ ११ ॥
यावयत्ऽद्वेषाः । ऋतऽपाः । ऋतेऽजाः । सुम्नऽवरी । सूनृताः । ईरयंती । सुऽमंगलीः । बिभ्रती । देवऽवीतिं । इह । अद्य । उषः । श्रेष्ठऽतमा । वि । उच्छ ॥ १२ ॥
शश्वत् । पुरा । उषाः । वि । उवास । देवी । अथो इति । अद्य । इदं । वि । आवः । मघोनी । अथो इति । वि । उच्छात् । उत्ऽतरान् । अनु । द्यून् । अजरा । अमृता । चरति । स्वधाभिः ॥ १३ ॥ वि । अंजिऽभिः । दिवः । आतासु । अद्यौत् । अप । कृष्णा । निःऽनिजं । देवी । आवः । प्रऽबोधयंती । अरुणेभिः । अश्वैः । आ । उषाः । याति । सुऽयुजा । रथेन ॥ १४ ॥

आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना ।
ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत् ॥ १५ ॥ ३ ॥
उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति ।
आरैक्पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः ॥ १६ ॥
स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः ।
अद्या तदुच्छ गृणते मघोन्यस्मे आयुर्नि दिदीहि प्रजावत् ॥ १७ ॥
या गोमतीरुषसः सर्ववीरा व्युच्छन्ति दाशुषे मर्त्याय ।
वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा ॥ १८ ॥
माता देवानामदितेरनीकं यज्ञस्य केतुर्बृहती विभाहि ।
प्रशस्तिकृद्ब्रह्मणे नो व्युच्छा नो जने जनय विश्ववारे ॥ १९ ॥

आऽवहन्ती । पोष्या । वार्याणि । चित्रं । केतुं । कृणुते । चेकिताना । ईयुषीणां । उपऽमा । शश्वतीनां । विऽभातीनां । प्रथमा । उषाः । वि । अश्वैत् ॥ १५ ॥ ३ ॥ उत् । ईर्ध्वं । जीवः । असुः । नः । आ । अगात् । अप । प्र । अगात् । तमः । आ । ज्योतिः । एति । अरैक् । पंथां । यातवे । सूर्याय । अगन्म । यत्र । प्रऽतिरंते । आयुः ॥ १६ ॥ स्यूमना । वाचः । उत् । इयर्ति । वह्निः । स्तवानः । रेभः । उषसः । विऽभातीः । अद्य । तत् । उच्छ । गृणते । मघोनि । अस्मे इति । आयुः । नि । दिदीहि । प्रजाऽवत् ॥ १७ ॥ याः । गोऽमतीः । उषसः । सर्वऽवीराः । विऽउच्छंति । दाशुषे । मर्त्याय । वायोःऽइव । सूनृतानां । उत्ऽअर्के । ताः । अश्वऽदाः । अश्नवत् । सोमऽसुत्वा ॥ १८ ॥ माता । देवानां । अदितेः । अनीकं । यज्ञस्य । केतुः । बृहती । वि । भाहि । प्रशस्तिऽकृत् । ब्रह्मणे । नः । वि । उच्छ । आ । नः । जने । जनय । विश्वऽवारे ॥ १९ ॥

यच्चित्रमप्न उषसो वहन्तीजानाय शशमानाय भद्रम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ २० ॥ ४ ॥

॥ ११४ ॥ ऋषिः-आङ्गिरस कुत्स । देवता-रुद्रः । छन्दः-जगती ॥

॥११४॥ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ १ ॥
मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ २ ॥
अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥ ३ ॥
त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥ ४ ॥

यत् । चित्रं । अप्नः । उषसः । वहन्ति । ईजानाय । शशमानाय । भद्रं । तत् । नः । मित्रः । वरुणः । ममहन्तां । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ २० ॥४॥

इमाः । रुद्राय । तवसे । कपर्दिने । क्षयत्ऽवीराय । प्र । भरामहे । मतीः । यथा । शं । असत् । द्विऽपदे । चतुःऽपदे । विश्वं । पुष्टं । ग्रामे । अस्मिन् । अनातुरं ॥१॥ मृळ । नः । रुद्र । उत । नः । मयः । कृधि । क्षयत्ऽवीराय । नमसा । विधेम । ते । यत् । शं । च । योः । च । मनुः । आऽयेजे । पिता । तत् । अश्याम । तव । रुद्र । प्रऽनीतिषु ॥ २ ॥ अश्याम । ते । सुऽमतिं । देवऽयज्यया । क्षयत्ऽवीरस्य । तव । रुद्र । मीढ्वः । सुम्नऽयन् । इत् । विशः । अस्माकं । आ । चर । अरिष्टऽवीराः । जुहवाम । ते । हविः ॥ ३ ॥ त्वेषं । वयं । रुद्रं । यज्ञऽसाधं । वङ्कुं । कविं । अवसे । नि । ह्वयामहे । आरे । अस्मत् । दैव्यं । हेळः । अस्यतु । सुऽमतिं । इत् । वयं । अस्य । आ । वृणीमहे ॥ ४ ॥

दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म छर्दिरस्मभ्यं यंसत् ॥ ५ ॥ ५ ॥
इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥ ६ ॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ ७ ॥
मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ ८ ॥
उप ते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।
भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥ ९ ॥

दिवः । वराहं । अरुषं । कपर्दिनं । त्वेषं । रूपं । नमसा । नि । ह्वयामहे । हस्ते । बिभ्रत् । भेषजा । वार्याणि । शर्म । वर्म । छर्दिः । अस्मभ्यं । यंसत् ॥ ५ ॥ ५ ॥

इदं । पित्रे । मरुतां । उच्यते । वचः । स्वादोः । स्वादीयः । रुद्राय । वर्धनं । रास्व । च । नः । अमृत । मर्तऽभोजनं । त्मने । तोकाय । तनयाय । मृळ ॥ ६ ॥ मा । नः । महांतं । उत । मा । नः । अर्भकं । मा । नः । उक्षंतं । उत । मा । नः । उक्षितं । मा । नः । वधीः । पितरं । मा । उत । मातरं । मा । नः । प्रियाः । तन्वः । रुद्र । रिरिषः ॥ ७ ॥ मा । नः । तोके । तनये । मा । नः । आयौ । मा । नः । गोषु । मा । नः । अश्वेषु । रिरिषः । वीरान् । मा । नः । रुद्र । भामितः । वधीः । हविष्मंतः । सदं । इत् । त्वा । हवामहे ॥ ८ ॥ उप । ते । स्तोमान् । पशुपाःऽइव । आ । अकरं । रास्व । पितः । मरुतां । सुम्नं । अस्मे इति । भद्रा । हि । ते । सुऽमतिः । मृळयत्ऽतमा । अथ । वयं । अवः । इत् । ते । वृणीमहे ॥ ९ ॥

आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥ १० ॥
अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिंधुः पृथिवी उत द्यौः ॥ ११ ॥ ६ ॥

॥ ११५ ॥ ऋषिः-आङ्गिरसः कुत्स । देवता-सूर्यः । छन्दः-त्रिष्टुप् ॥

॥ ११५ ॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥ १ ॥
सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।
यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥ २ ॥
भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।
नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः ॥ ३ ॥

आरे । ते । गोऽघ्नं । उत । पुरुषऽघ्नं । क्षयत्ऽवीर । सुम्नं । अस्मे इति । ते । अस्तु । मृळ । च । नः । अधि । च । ब्रूहि । देव । अध । च । नः । शर्म । यच्छ । द्विऽबर्हाः ॥१०॥ अवोचाम । नमः । अस्मै । अवस्यवः । शृणोतु । नः । हवं । रुद्रः । मरुत्वान् । तत् । नः । मित्रः । वरुणः । मामहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ११ ॥ ६ ॥

चित्रं । देवानां । उत् । अगात् । अनीकं । चक्षुः । मित्रस्य । वरुणस्य । अग्नेः । आ । अप्राः । द्यावापृथिवी इति । अंतरिक्षं । सूर्यः । आत्मा । जगतः । तस्थुषः । च ॥ १ ॥ सूर्यः । देवीं । उषसं । रोचमानां । मर्यः । न । योषां । अभि । एति । पश्चात् । यत्र । नरः । देवऽयंतः । युगानि । विऽतन्वते । प्रति । भद्राय । भद्रं ॥ २ ॥ भद्राः । अश्वाः । हरितः । सूर्यस्य । चित्राः । एतऽग्वाः । अनुऽमाद्यासः । नमस्यंतः । दिवः । आ । पृष्ठं । अस्थुः । परि । द्यावापृथिवी इति । यंति । सद्यः ॥ ३ ॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥ ४ ॥
तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥ ५ ॥
अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥६॥७॥१६॥

॥ सप्तदशोऽनुवाकः ॥

॥ ११६ ॥ ऋषिः कक्षीवान । देवता अश्विनौ । छन्दः-त्रिष्टुप् ॥

॥ ११६ ॥ नासत्याभ्यां बर्हिरिव प्र वृञ्जे स्तोमाँ इयर्म्यभ्रियेव वातः ।
यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥ १ ॥
वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना ।
तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय ॥ २ ॥

तत् । सूर्यस्य । देवऽत्वं । तत् । महिऽत्वं । मध्या । कर्तोः । विऽततं । सं । जभार ।
यदा । इत् । अयुक्त । हरितः । सधऽस्थात् । आत् । रात्री । वासः । तनुते ।
सिमस्मै ॥ ४ ॥ तत् । मित्रस्य । वरुणस्य । अभिऽचक्षे । सूर्यः । रूपं । कृणुते ।
द्योः । उपऽस्थे । अनंतं । अन्यत् । रुशत् । अस्य । पाजः । कृष्णं । अन्यत् । हरितः ।
सं । भरंति ॥ ५ ॥ अद्य । देवाः । उत्ऽइता । सूर्यस्य । निः । अंहसः । पिपृत ।
निः । अवद्यात् । तत् । नः । मित्रः । वरुणः । ममहन्तां । अदितिः । सिन्धुः ।
पृथिवी । उत । द्यौः ॥ ६ ॥ ७ ॥ १६ ॥

नासत्याभ्या । बर्हिःऽइव । प्र । वृंजे । स्तोमान् । इयर्मि । अभ्रियाऽइव ।
वातः । यौ । अर्भगाय । विऽमदाय । जायां । सेनाऽजुवा । निऽऊहतुः । रथेन ॥ १ ॥
वीळुपत्मऽभिः । आशुहेमऽभिः । वा । देवानां । वा । जूतिऽभिः । शाशदाना । तत् ।
रासभः । नासत्या । सहस्रं । आजा । यमस्य । प्रऽधने । जिगाय ॥ २ ॥

तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः ।
तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ॥ ३ ॥

तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतङ्गैः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः ॥ ४ ॥

अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे ।
यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् ॥ ५ ॥ ८ ॥

यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति ।
तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः ॥ ६ ॥

युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिम् ।
कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः ॥ ७ ॥

तुग्रः । ह । भुज्युं । अश्विना । उदऽमेघे । रयिं । न । कः । चित् । ममृऽवान् । अवं । अहाः । तं । ऊहथुः । नौभिः । आत्मनऽवतीभिः । अंतरिक्षप्रुत्ऽभिः । अपऽउदकाभिः ॥ ३ ॥ तिस्रः । क्षपः । त्रिः । अहा । अतिव्रजत्ऽभिः । नासत्या । भुज्युं । ऊहथुः । पतंगैः । समुद्रस्य । धन्वन् । आर्द्रस्य । पारे । त्रिऽभिः । रथैः । शतपत्ऽभिः । षट्ऽअश्वैः ॥ ४ ॥ अनारंभणे । तत् । अवीरयेथां । अनास्थाने । अग्रभणे । समुद्रे । यत् । अश्विनौ । ऊहथुः । भुज्युं । अस्तं । शतऽअरित्रां । नावं । आ । तस्थिऽवांसं ॥ ५ ॥ ८ ॥ यं । अश्विना । ददथुः । श्वेतं । अश्वं । अघऽअश्वाय । शश्वत् । इत् । स्वस्ति । तत् । वां । दात्रं । महि । कीर्तेन्यं । भूत् । पैद्वः । वाजी । सदं । इत् । हव्यः । अर्यः ॥ ६ ॥ युवं । नरा । स्तुवते । पज्रियाय । कक्षीवते । अरदतं । पुरंऽधिं । कारोतरात् । शफात् । अश्वस्य । वृष्णः । शतं । कुंभान् । असिंचतं । सुरायाः ॥ ७ ॥

हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तं ।
ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति ॥ ८ ॥
परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मबारम् ।
क्षरन्नापो न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥ ९ ॥
जुजुरुषो नासत्योत वव्रिं प्रामुञ्चतं द्रापिमिव च्यवानात् ।
प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनाम् ॥ १० ॥ ९ ॥
तद्वां नरा शंस्यं राध्यं चाभिष्टिमन्नासत्या वरूथम् ।
यद्विद्वांसा निधिमिवापगूळ्हमुद्दर्शतादूपथुर्वन्दनाय ॥ ११ ॥
तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् ।
दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच ॥ १२ ॥

हिमेन । अग्निं । घ्रंसं । अवारयेथां । पितुऽमतीं । ऊर्जं । अस्मै । अधत्तं । ऋबीसं । अत्रिं । अश्विना । अवऽनीतं । उत् । निन्यथुः । सर्वऽगणं । स्वस्ति ॥ ८ ॥ परा । अवतं । नासत्या । अनुदेथां । उच्चाऽबुध्नं । चक्रथुः । जिह्मऽबारं । क्षरन् । आपः । न । पायनाय । राये । सहस्राय । तृष्यते । गोतमस्य ॥ ९ ॥ जुजुरुषः । नासत्या । उत । वव्रिं । प्र । अमुंचतं । द्रापिंऽइव । च्यवानात् । प्र । अतिरतं । जहितस्य । आयुः । दस्रा । आत् । इत् । पतिं । अकृणुतं । कनीनां ॥ १० ॥ ९ ॥ तत् । वां । नरा । शंस्यं । राध्यं । च । अभिष्टिऽमत् । नासत्या । वरूथं । यत् । विद्वांसा । निधिंऽइव । अपऽगूळ्हं । उत् । दर्शतात् । ऊपथुः । वंदनाय ॥ ११ ॥ तत् । वां । नरा । सनये । दंसः । उग्रं । आविः । कृणोमि । तन्यतुः । न । वृष्टिं । दध्यङ् । ह । यत् । मधु । आथर्वणः । वां । अश्वस्य । शीर्ष्णा । प्र । यत् । ईं । उवाच ॥ १२ ॥

अजोहवीन्नासत्या करा वां महे यामन्पुरुभुजा पुरंधिः ।
श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तम् ॥ १३ ॥
आस्नो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तम् ।
उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥ १४ ॥
चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायाम् ।
सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम् ॥ १५ ॥ १० ॥
शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितान्धं चकार ।
तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥ १६ ॥
आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयन्ती ।
विश्वे देवा अन्वमन्यन्त हृद्भिः समु श्रिया नासत्या सचेथे ॥ १७ ॥

अजोहवीत् । नासत्या । करा । वां । महे । यामन् । पुरुऽभुजा । पुरंऽधिः । श्रुतं । तत् । शासुःऽइव । वध्रिऽमत्याः । हिरण्यऽहस्तं । अश्विनौ । अदत्तं ॥ १३ ॥ आस्नः । वृकस्य । वर्तिकां । अभीके । युवं । नरा । नासत्या । अमुमुक्तं । उतो इति । कविं । पुरुऽभुजा । युवं । ह । कृपमाणं । अकृणुतं । विऽचक्षे ॥ १४ ॥ चरित्रं । हि । वेःऽइव । अच्छेदि । पर्णं । आजा । खेलस्य । परिऽतक्म्यायां । सद्यः । जंघां । आयसीं । विश्पलायै । धने । हिते । सर्तवे । प्रति । अधत्तं ॥ १५ ॥ १० ॥ शतं । मेषान् । वृक्ये । चक्षदानं । ऋज्रऽअश्वं । तं । पिता । अंधं । चकार । तस्मै । अक्षी इति । नासत्या । विऽचक्षे । आ । अधत्तं । दस्रा । भिषजौ । अनर्वन् ॥ १६ ॥ आ । वां । रथं । दुहिता । सूर्यस्य । कार्ष्मऽइव । अतिष्ठत् । अर्वता । जयंती । विश्वे । देवाः । अनु । अमन्यंत । हृत्ऽभिः । सं । ऊं इति । श्रिया । नासत्या । सचेथे । इति ॥ १७॥

यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयन्ता ।
रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता ॥ १८ ॥

रयिं सुक्षत्रं स्वपत्यमायुः सुवीर्यं नासत्या वहन्ता ।
आ जह्नावीं समनसोप वाजैस्त्रिरह्नो भागं दधतीमयातम् ॥ १९ ॥

परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः ।
विभिन्दुना नासत्या रथेन वि पर्वताँ अजरयू अयातम् ॥ २० ॥ ११ ॥

एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा ।
निरहतं दुच्छुना इन्द्रवन्ता पृथुश्रवसो वृषणावरातीः ॥ २१ ॥

शरस्य चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः ।
शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम् ॥ २२ ॥

यत् । अयातं । दिवःऽदासाय । वर्तिः । भरत्ऽवाजाय । अश्विना । हयन्ता । रेवत् । उवाह । सचनः । रथः । वां । वृषभः । च । शिंशुमारः । च । युक्ता ॥ १८ ॥

रयिं । सुऽक्षत्रं । सुऽअपत्यम् । आयुः । सुऽवीर्यं । नासत्या । वहन्ता । आ । जह्नावीं । सऽमनसा । उप । वाजैः । त्रिः । अह्नः । भागं । दधतीं । अयातं ॥ १९ ॥

परिऽविष्टं । जाहुषं । विश्वतः । सीं । सुऽगेभिः । नक्तं । ऊहथुः । रजःऽभिः । विऽभिन्दुना । नासत्या । रथेन । वि । पर्वतान् । अजरयू इति । अयातं ॥ २० ॥ ११ ॥

एकस्याः । वस्तोः । आवतं । रणाय । वशं । अश्विना । सनये । सहस्रा । निः । अहतं । दुच्छुनाः । इन्द्रऽवन्ता । पृथुऽश्रवसः । वृषणौ । अरातीः ॥ २१ ॥ शरस्य । चित् । आर्चत्ऽकस्य । अवतात् । आ । नीचात् । उच्चा । चक्रथुः । पातवे । वाः इति । वाः । शयवे । चित् । नासत्या । शचीभिः । जसुरये । स्तर्यं । पिप्यथुः । गां ॥ २२ ॥

अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः ।
पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय ॥ २३ ॥
दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्वन्तः ।
विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥ २४ ॥
प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः ।
उत पश्यन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणं जगम्याम् ॥ २५ ॥ १२ ॥

॥ ११७ ॥ ऋषिः—कक्षीवान् । देवता—अश्विनौ । छन्दः—त्रिष्टुप् ॥

॥ ११७ ॥ मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम् ।
बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः ॥ १ ॥
यो वामश्विना मनसो जवीयान्रथः स्वश्वो विश आजिगाति ।
येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातम् ॥ २ ॥

अवस्यते । स्तुवते । कृष्णियाय । ऋजुऽयते । नासत्या । शचीभिः । पशुम् । न । नष्टम्ऽइव । दर्शनाय । विष्णाप्वम् । ददथुः । विश्वकाय ॥ २३ ॥ दश । रात्रीः । अशिवेन । नव । द्यून् । अवऽनद्धम् । श्नथितम् । अप्ऽसु । अंतरिति । विऽप्रुतम् । रेभम् । उदनि । प्रऽवृक्तम् । उत् । निन्यथुः । सोमम्ऽइव । स्रुवेण ॥ २४ ॥ प्र । वाम् । दंसांसि । अश्विनौ । अवोचम् । अस्य । पतिः । स्याम् । सुऽगवः । सुऽवीरः । उत । पश्यन् । अश्नुवन् । दीर्घम् । आयुः । अस्तम्ऽइव । इत् । जरिमाणम् । जगम्याम् ॥ २५ ॥ १२ ॥

मध्वः । सोमस्य । अश्विना । मदाय । प्रत्नः । होता । आ । विवासते । वाम् । बर्हिष्मती । रातिः । विऽश्रिता । गीः । इषा । यातम् । नासत्या । उप । वाजैः ॥ १ ॥ यः । वाम् । अश्विना । मनसः । जवीयान् । रथः । सुऽअश्वः । विशः । आऽजिगाति । येन । गच्छथः । सुऽकृतः । दुरोणम् । तेन । नरा । वर्तिः । अस्मभ्यम् । यातम् ॥ २ ॥

ऋषिं नरावंहंसः पाञ्चंजन्यमृबीसादत्रिं मुञ्चथो गणेनं ।
मिनन्ता दस्योरशिवस्य माया अनुपूर्वं वृषणा चोदयन्ता ॥ ३ ॥

अश्वं न गूळ्हमश्विना दुरेवैर्ऋषिं नरा वृषणा रेभमप्सु ।
सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यन्ति पूर्व्या कृतानि ॥ ४ ॥

सुषुप्वांसं न निर्ऋतेरुपस्थे सूर्यं न दस्रा तमसि क्षियन्तम् ।
शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वन्दनाय ॥ ५ ॥ १३ ॥

तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन् ।
शफादश्वस्य वाजिनो जनाय शतं कुम्भाँ असिञ्चतं मधूनाम् ॥ ६ ॥

युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय ।
घोषायै चित्पितृषदे दुरोणे पतिं जूर्यन्त्या अश्विनावदत्तम् ॥ ७ ॥

ऋषिं । नरौ । अंहसः । पांचऽजन्यं । ऋबीसात् । अत्रिं । मुंचथः । गणेनं । मिनंता । दस्योः । अशिवस्य । मायाः । अनुऽपूर्वं । वृषणा । चोदयंता ॥ ३ ॥ अश्वं । न । गूळ्हं । अश्विना । दुःऽएवैः । ऋषिं । नरा । वृषणा । रेभं । अपऽसु । सं । तं । रिणीथः । विऽप्रुतं । दंसःऽभिः । न । वां । जूर्यंति । पूर्व्या । कृतानि ॥ ४ ॥ सुसुप्वांसं । न । निःऽऋतेः । उपऽस्थे । सूर्यं । न । दस्रा । तमसि । क्षियंतं । शुभे । रुक्मं । न । दर्शतं । निऽखातं । उत् । ऊपथुः । अश्विना । वंदनाय ॥५॥१३॥ तत् । वां । नरा । शंस्यं । पज्रियेण । कक्षीवता । नासत्या । परिऽज्मन् । शफात् । अश्वस्य । वाजिनः । जनाय । शतं । कुंभान् । असिंचतं । मधूनां ॥ ६ ॥ युवं । नरा । स्तुवते । कृष्णियाय । विष्णाप्वं । ददथुः । विश्वकाय । घोषायै । चित् । पितृऽसदे । दुरोणे । पतिं । जूर्यंत्यै । अश्विना । अदत्तं ॥ ७ ॥

युवं श्यावाय रुशतीमदत्तं महः क्षोणस्याश्विना कण्वाय ।
प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तम् ॥ ८ ॥

पुरू वर्पांस्यश्विना दधाना नि पेदव ऊहथुराशुमश्वम् ।
सहस्रसां वाजिनमप्रतीतमहिहनं श्रवस्यं तरुत्रम् ॥ ९ ॥

एतानि वां श्रवस्या सुदानू ब्रह्माङ्गूषं सदनं रोदस्योः ।
यद्वां पज्रासो अश्विना हवन्ते यातमिषा च विदुषे च वाजं ॥ १० ॥ १४ ॥

सूनोर्मानेनाश्विना गृणाना वाजं विप्राय भुरणा रदन्ता ।
अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतम् ॥ ११ ॥

कुह यान्ता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा ।
हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥ १२ ॥

युवं । श्यावाय । रुशतीं । अदत्तं । महः । क्षोणस्यं । अश्विना । कण्वाय । प्रऽवाच्यं । तत् । वृषणा । कृतं । वां । यत् । नार्षदाय । श्रवः । अधिऽअधत्तं ॥ ८ ॥ पुरु । वपूंसि । अश्विना । दधाना । नि । पेदवे । ऊहथुः । आशुं । अश्वं । सहस्रऽसां । वाजिनं । अप्रतिऽइतं । अहिऽहनं । श्रवस्यं । तरुत्रं ॥ ९ ॥ एतानि । वां । श्रवस्या । सुदानू इति सुऽदानू । ब्रह्म । आंगूषं । सदनं । रोदस्योः । यत् । वां । पज्रासः । अश्विना । हवंते । यातं । इषा । च । विदुषे । च । वाजं ॥ १० ॥ १४ ॥ सूनोः । मानेन । अश्विना । गृणाना । वाजं । विप्राय । भुरणा । रदंता । अगस्त्ये । ब्रह्मणा । ववृधाना । सं । विश्पलां । नासत्या । अरिणीतं ॥ ११ ॥ कुह । यांता । सुऽस्तुतिं । काव्यस्य । दिवः । नपाता । वृषणा । शयुऽत्रा । हिरण्यस्यऽइव । कलशं । निऽखातं । उत् । ऊपथुः । दशमे । अश्विना । अहन् ॥ १२ ॥

युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः ।
युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥ १३ ॥
युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना ।
युवं भुज्युमर्णसो निः समुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः ॥ १४ ॥
अजोहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्रमव्यथिर्जगन्वान् ।
निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ॥ १५ ॥ १५ ॥
अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुञ्चतं वृकस्य ।
वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण ॥ १६ ॥
शतं मेषान्वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा ।
आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरन्धाय चक्रथुर्विचक्षे ॥ १७ ॥

युवं । च्यवानं । अश्विना । जरन्तं । पुनः । युवानं । चक्रथुः । शचीभिः । युवोः । रथं । दुहिता । सूर्यस्य । सह । श्रिया । नासत्या । अवृणीत ॥ १३ ॥ युवं । तुग्राय । पूर्व्येभिः । एवैः । पुनःऽमन्यौ । अभवतं । युवाना । युवं । भुज्युं । अर्णसः । निः । समुद्रात् । विऽभिः । ऊहथुः । ऋज्रेभिः । अश्वैः ॥ १४ ॥ अजोहवीत् । अश्विना । तौग्र्यः । वां । प्रऽऊळ्हः । समुद्रं । अव्यथिः । जगन्वान् । निः । तं । ऊहथुः । सुऽयुजा । रथेन । मनःऽजवसा । वृषणा । स्वस्ति ॥ १५ ॥ १५ ॥ अजोहवीत् । अश्विना । वर्तिका । वां । आस्नः । यत् । सीं । अमुंचतं । वृकस्य । वि । जयुषा । ययथुः । सानुं । अद्रेः । जातं । विष्वाचः । अहतं । विषेण ॥ १६ ॥ शतं । मेषान् । वृक्ये । ममहानं । तमः । प्रऽनीतं । अशिवेन । पित्रा । आ । अक्षी इति । ऋज्रऽअश्वे । अश्विनौ । अधत्तं । ज्योतिः । अंधाय । चक्रथुः । विऽचक्षे ॥ १७ ॥

शुनमन्धाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति ।
जारः कनीन इव चक्षदान ऋज्राश्वः शतमेकं च मेषान् ॥ १८ ॥

मही वामूतिरश्विना मयोभूरुत स्रामं धिष्ण्या सं रिणीथः ।
अथा युवामिदह्वयत्पुरंधिरागच्छतं सीं वृषणाववोभिः ॥ १९ ॥

अधेनुं दस्रा स्तर्यं विषक्तामपिन्वतं शयवे अश्विना गाम् ।
युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम् ॥ २० ॥ १६ ॥

यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा ।
अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय ॥ २१ ॥

आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतम् ।
स वां मधु प्र वोचदृतायन्त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वाम् ॥ २२ ॥

शुनं । अंधाय । भरं । अह्वयत् । सा । वृकीः । अश्विना । वृषणा । नरा । इति ।
जारः । कनीनःऽइव । चक्षदानः । ऋज्रऽअश्वः । शतं । एकं । च । मेषान् ॥ १८ ॥
मही । वां । ऊतिः । अश्विना । मयःऽभूः । उत । स्रामं । धिष्ण्या । सं । रिणीथः ।
अथ । युवां । इत् । अह्वयत् । पुरंऽधिः । आ । अगच्छतं । सीं । वृषणौ । अवःऽभिः ॥ १९ ॥
अधेनुं । दस्रा । स्तर्यं । विऽसक्तां । अपिन्वतं । शयवे । अश्विना । गां । युवं ।
शचीभिः । विऽमदाय । जायां । नि । ऊहथुः । पुरुऽमित्रस्य । योषां ॥ २० ॥ १६ ॥
यवं । वृकेण । अश्विना । वपंता । इषं । दुहंता । मनुषाय । दस्रा । अभि । दस्युं ।
बकुरेण । धमंता । उरु । ज्योतिः । चक्रथुः । आर्याय ॥ २१ ॥ आथर्वणाय ।
अश्विना । दधीचे । अश्व्यं । शिरः । प्रति । ऐरयतं । सः । वां । मधु । प्र । वोचत् ।
ऋतऽयन् । त्वाष्ट्रं । यत् । दस्रौ । अपिऽकक्ष्यं । वां ॥ २२ ॥

सद्यो कवी सुमतिमा चके वां विश्वा धियो अश्विना प्रावतं मे ।
अस्मे रयिं नासत्या बृहन्तमपत्यसाचं श्रुत्यं रराथाम् ॥ २३ ॥
हिरण्यहस्तमश्विना रराणा पुत्रं नरा वध्रिमत्या अदत्तम् ।
त्रिधा ह श्यावमश्विना विकस्तमुज्जीवसं ऐरयतं सुदानू ॥ २४ ॥
एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन् ।
ब्रह्म कृण्वन्तो वृषणा युवभ्यां सुवीरासो विदथमा वदेम ॥ २५ ॥ १७ ॥

॥ ११८ ॥ ऋषिः–कक्षीवान् । देवता–अश्विनौ । छन्दः–त्रिष्टुप् ॥

॥११८॥ आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ् ।
यो मर्त्यस्य मनसो जवीयान्त्रिवन्धुरो वृषणा वातरंहाः ॥ १ ॥
त्रिवन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् ।
पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥ २ ॥

सद्यः । कवी इति । सुऽमतिं । आ । चके । वां । विश्वाः । धियः । अश्विना । प्र । अवतं । मे । अस्मे इति । रयिं । नासत्या । बृहंतं । अपत्यऽसाचं । श्रुत्यं । रराथां ॥ २३ ॥ हिरण्यऽहस्तं । अश्विना । रराणा । पुत्रं । नरा । वध्रिऽमत्याः । अदत्तं । त्रिधा । ह । श्यावं । अश्विना । विऽकस्तं । उत् । जीवसे । ऐरयतं । सुदानू इति सुऽदानू ॥ २४ ॥ एतानि । वां । अश्विना । वीर्याणि । प्र । पूर्व्याणि । आयवः । अवोचन् । ब्रह्म । कृण्वंतः । वृषणा । युवऽभ्यां । सुऽवीरासः । विदथं । आ । वदेम ॥ २५ ॥ १७ ॥

आ । वां । रथः । अश्विना । श्येनऽपत्वा । सुऽमृळीकः । स्वऽवान् । यातु । अर्वाङ् । यः । मर्त्यस्य । मनसः । जवीयान् । त्रिऽवंधुरः । वृषणा । वातऽरंहाः ॥ १ ॥ त्रिऽवंधुरेण । त्रिऽवृता । रथेन । त्रिऽचक्रेण । सुऽवृता । आ । यातं । अर्वाक् । पिन्वतं । गाः । जिन्वतं । अर्वतः । नः । वर्धयतं । अश्विना । वीरं । अस्मे इति ॥ २ ॥

प्रवत्यामना सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।
किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥ ३ ॥
आ वां श्येनासो अश्विना वहन्तु रथे युक्तास आशवः पतङ्गाः ।
ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति ॥ ४ ॥
आ वां रथं युवतिस्तिष्ठदत्र जुष्टी नरा दुहिता सूर्यस्य ।
परि वामश्वा वपुषः पतङ्गा वयो वहन्त्वरुषा अभीके ॥ ५ ॥ १८ ॥
उद्वन्दनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा शचीभिः ।
निष्टौग्र्यं पारयथः समुद्रात्पुनश्च्यवानं चक्रथुर्युवानम् ॥ ६ ॥
युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम् ।
युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा ॥ ७ ॥

प्रवत्ऽयामना । सुऽवृता । रथेन । दस्रौ । इमं । शृणुतं । श्लोकं । अद्रेः । किं । अंग । वां । प्रति । अवर्तिं । गमिष्ठा । आहुः । विप्रासः । अश्विना । पुराऽजाः ॥ ३ ॥
आ । वां । श्येनासः । अश्विना । वहंतु । रथे । युक्तासः । आशवः । पतंगाः । ये । अप्ऽतुरः । दिव्यासः । न । गृध्राः । अभि । प्रयः । नासत्या । वहंति ॥ ४ ॥
आ । वां । रथं । युवतिः । तिष्ठत् । अत्र । जुष्टी । नरा । दुहिता । सूर्यस्य । परि । वां । अश्वाः । वपुषः । पतंगाः । वयः । वहंतु । अरुषाः । अभीके ॥ ५ ॥ १८ ॥ उत् । वंदनं । ऐरतं । दंसनाभिः । उत् । रेभं । दस्रा । वृषणा । शचीभिः । निः । तौग्र्यं । पारयथः । समुद्रात् । पुनरिति । च्यवानं । चक्रथुः । युवानं ॥ ६ ॥ युवं । अत्रये । अवऽनीताय । तप्तं । ऊर्जं । ओमानं । अश्विनौ । अधत्तं । युवं । कण्वाय । अपिऽरिप्ताय । चक्षुः । प्रति । अधत्तं । सुऽस्तुतिं । जुजुषाणा ॥ ७ ॥

युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय ।

अमुञ्चतं वर्तिकामंहसो निः प्रति जङ्घां विश्पलाया अधत्तम् ॥ ८ ॥

युवं श्वेतं पेदव इन्द्रजूतमहिहनमश्विनादत्तमश्वम् ।

जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीड्वङ्गम् ॥ ९ ॥

ता वां नरा स्ववसे सुजाता हवामहे अश्विना नाधमानाः ।

आ न उप वसुमता रथेन गिरो जुषाणा सुविताय यातम् ॥ १० ॥

आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः ।

हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ ॥ ११ ॥ १९ ॥

युवं । धेनुं । शयवे । नाधिताय । अपिन्वतं । अश्विना । पूर्व्याय । अमुंचतं । वर्तिका । अंहसः । निः । प्रति । जंघां । विश्पलायाः । अधत्तं ॥ ८ ॥ युवं । श्वेतं । पेदवे । इंद्रऽजूतं । अहिऽहनं । अश्विना । अदत्तं । अश्वं । जोहूत्रं । अर्यः । अभिऽभूतिं । उग्रं । सहस्रऽसां । वृषणं । वीळुऽअंगं ॥ ९ ॥ ता । वां । नरा । सु । अवसे । सुऽजाता । हवामहे । अश्विना । नाधमानाः । आ । नः । उप । वसुऽमता । रथेन । गिरः । जुषाणा । सुविताय । यातं ॥ १० ॥ आ । श्येनस्य । जवसा । नूतनेन । अस्मे इति । यातं । नासत्या । सऽजोषाः । हवे । हि । वां । अश्विना । रातऽहव्यः । शश्वत्ऽतमायाः । उषसः । विऽउष्टौ ॥ ११ ॥ १९ ॥

॥ ११९ ॥ ऋषिः—कक्षीवान् । देवता—अश्विनौ । छन्दः—जगती ॥

॥११९॥ आ वां रथं पुरुमायं मनोजुवं जीराश्वं यज्ञियं जीवसे हुवे ।
सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः ॥ १ ॥
ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयन्त आ दिशः ।
स्वदामि घर्मं प्रति यन्त्यूतय आ वामूर्जानी रथमश्विनारुहत् ॥ २ ॥
सं यन्मिथः पस्पृधानासो अग्मत शुभे मखा अमिता जायवो रणे ।
युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरम् ॥ ३ ॥
युवं भुज्युं भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहन्ता पितृभ्य आ ।
यासिष्टं वर्तिर्वृषणा विजेन्यं१ दिवोदासाय महि चेति वामवः ॥ ४ ॥

आ । वां । रथं । पुरुऽमायं । मनःऽजुवं । जीरऽअश्वं । यज्ञियं । जीवसे । हुवे । सहस्रऽकेतुं । वनिनं । शतत्ऽवसुं । श्रुष्टीऽवानं । वरिवःऽधां । अभि । प्रयः ॥ १ ॥ ऊर्ध्वा । धीतिः । प्रति । अस्य । प्रऽयामनि । अधायि । शस्मन् । सं । अयंते । आ । दिशः । स्वदामि । घर्मं । प्रति । यंति । ऊतयः । आ । वां । ऊर्जानी । रथं । अश्विना । अरुहत् ॥ २ ॥ सं । यत् । मिथः । पस्पृधानासः । अग्मत । शुभे । मखाः । अमिताः । जायवः । रणे । युवोः । अह । प्रवणे । चेकिते । रथः । यत् । अश्विना । वहथः । सूरिं । आ । वरं ॥ ३ ॥ युवं । भुज्युं । भुरमाणं । विऽभिः । गतं । स्वयुक्तिऽभिः । निऽवहंता । पितृऽभ्यः । आ । यासिष्टं । वर्तिः । वृषणा । विऽजेन्यं । दिवःऽदासाय । महि । चेति । वां । अवः ॥ ४ ॥

युवोरश्विना वपुषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यम् ।
आ वां पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती ॥५॥२०॥
युवं रेभं परिषूतेरुरुष्यथो हिमेन घर्मं परितप्तमत्रये ।
युवं शयोरवसं पिप्यथुर्गवि प्र दीर्घेण वन्दनस्तार्यायुषा ॥ ६ ॥
युवं वन्दनं निर्ऋतं जरण्यया रथं न दस्रा करणा समिन्वथः ।
क्षेत्रादा विप्रं जनथो विपन्यया प्र वामत्र विधते दंसना भुवत् ॥ ७ ॥
अगच्छतं कृपमाणं परावति पितुः स्वस्य त्यजसा निबाधितम् ।
स्वर्वतीरित ऊतीर्युवोरह चित्रा अभीके अभवन्नभिष्टयः ॥ ८ ॥
उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति ।
युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत् ॥ ९ ॥

युवोः । अश्विना । वपुषे । युवाऽयुजं । रथं । वाणी इति । येमतुः । अस्य । शर्ध्यं ।
आ । वां । पतिऽत्वं । सख्याय । जग्मुषी । योषा । अवृणीत । जेन्या । युवां । पती
इति ॥ ५ ॥ २० ॥ युवं । रेभं । परिऽसूतेः । उरुष्यथः । हिमेन । घर्मं । परिऽतप्तं ।
अत्रये । युवं । शयोः । अवसं । पिप्यथुः । गवि । प्र । दीर्घेण । वंदनः । तारि ।
आयुषा ॥ ६ ॥ युवं । वंदनं । निःऽऋतं । जरण्यया । रथं । न । दस्रा । करणा ।
सं । इन्वथः । क्षेत्रात् । आ । विप्रं । जनथः । विपन्यया । प्र । वां । अत्र । विधते ।
दंसना । भुवत् ॥ ७ ॥ अगच्छतं । कृपमाणं । पराऽवति । पितुः । स्वस्य । त्यजसा ।
निऽबाधितं । स्वःऽवतीः । इतः । ऊतीः । युवोः । अह । चित्राः । अभीके । अभवन् ।
अभिष्टयः ॥ ८ ॥ उत । स्या । वां । मधुऽमत् । मक्षिका । अरपत् । मदे । सोमस्य ।
औशिजः । हुवन्यति । युवं । दधीचः । मनः । आ । विवासथः । अथ । शिरः ।
प्रति । वां । अश्व्यं । वदत् ॥ ९ ॥

युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः ।
शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिन्द्रमिव चर्षणीसहम् ॥ १० ॥ २१ ॥

॥ १२० ॥ ऋषिः– कक्षीवान् । देवता–अश्विनौ । छन्दः–गायत्री ॥

॥ १२० ॥ का राधद्धोत्राश्विना वां को वां जोष उभयोः ।
कथा विधात्यप्रचेताः ॥ १ ॥
विद्वांसाविद्दुरः पृच्छेदविद्वानित्थापरो अचेताः ।
नू चिन्नु मर्ते अक्रौ ॥ २ ॥
ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य ।
प्रार्चद्दयमानो युवाकुः ॥ ३ ॥
वि पृच्छामि पाक्या३न देवान्वषट्कृतस्याद्भुतस्य दस्रा ।
पातं च सह्यसो युवं च रभ्यसो नः ॥ ४ ॥

युवं । पेदवे । पुरुऽवारं । अश्विना । स्पृधां । श्वेतं । तरुतारं । दुवस्यथः । शर्यैः । अभिऽद्युं । पृतनासु । दुस्तरं । चर्कृत्यं । इंद्रंऽइव । चर्षणिऽसहं ॥ १० ॥ २१ ॥

का । राधत् । होत्रा । अश्विना । वां । कः । वां । जोषे । उभयोः । कथा । विधाति । अप्रऽचेताः ॥ १ ॥ विद्वांसौ । इत् । दुरः । पृच्छेत् । अविद्वान् । इत्था । अपरः । अचेताः । नु । चित् । नु । मर्ते । अक्रौ ॥ २ ॥ ता । विद्वांसा । हवामहे । वां । ता । नः । विद्वांसा । मन्म । वोचेतं । अद्य । प्र । आर्चत् । दयमानः । युवाकुः ॥ ३ ॥ वि । पृच्छामि । पाक्या । न । देवान् । वषट्ऽकृतस्य । अद्भुतस्य । दस्रा । पातं । च । सह्यसः । युवं । च । रभ्यसः । नः ॥ ४ ॥

प्र या घोषे भृगवाणे न शोभे यया वाचा यजति पज्रियो वाम् ।

प्रैषयुर्न विद्वान् ॥ ५ ॥ २२ ॥

श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वाम् ।

आक्षी शुभस्पती दन् ॥ ६ ॥

युवं ह्यास्तं महो रन्युवं वा यन्निरततंसतम् ।

ता नो वसू सुगोपा स्यातं पातं नो वृकादघायोः ॥ ७ ॥

मा कस्मै धातमभ्यमित्रिणे नो माकुत्रा नो गृहेभ्यो धेनवो गुः ।

स्तनाभुजो अशिश्वीः ॥ ८ ॥

दुहीयन्मित्रधितये युवाकु राये च नो मिमीतं वाजवत्यै ।

इषे च नो मिमीतं धेनुमत्यै ॥ ९ ॥

प्र । या । घोषे । भृगवाणे । न । शोभे । यया । वाचा । यजति । पज्रियः । वा । प्र । इषऽयुः । न । विद्वान् ॥ ५ ॥ २२ ॥ श्रुतं । गायत्रं । तकवानस्य । अहं । चित् । हि । रिरेभ । अश्विना । वां । आ । अक्षी इति । शुभः । पती इति । दन् ॥ ६ ॥ युवं । हि । आस्तं । महः । रन् । युवं । वा । यत् । निःऽअततंसतं । ता । नः । वसू इति । सुऽगोपा । स्यातं । पातं । नः । वृकात् । अघऽयोः ॥ ७ ॥ मा । कस्मै । धातं । अभि । अमित्रिणे । नः । मा । अकुत्र । नः । गृहेभ्यः । धेनवः । गुः । स्तनऽभुजः । अशिश्वीः ॥ ८ ॥ दुहीयन् । मित्रऽधितये । युवाकु । राये । च । नः । मिमीतं । वाजऽवत्यै । इषे । च । नः । मिमीतं । धेनुऽमत्यै ॥ ९ ॥

अश्विनोरसनं रथमनश्वं वाजिनीवतोः ।

तेनाहं भूरि चाकन ॥ १० ॥

अयं समह मा तनूह्याते जनाँ अनु ।

सोमपेयं सुखो रथः ॥ ११ ॥

अध स्वप्नस्य निर्विदेऽभुञ्जतश्च रेवतः ।

उभा ता बस्रि नश्यतः ॥ १२ ॥ २३ ॥ १७ ॥

॥ अष्टादशोऽनुवाकः ॥

॥ १२१ ॥ ऋषिः-कक्षीवान् । देवता-विश्वेदेवाः,-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥१२१॥ कदित्था नॄँः पात्रं देवयतां श्रवद्गिरो अङ्गिरसां तुरण्यन् ।
प्र यदानड्विश आ हर्म्यस्योरु क्रंसते अध्वरे यजत्रः ॥ १ ॥
स्तंभीद्ध द्यां स धरुणं प्रुषायदृभुर्वाजाय द्रविणं नरो गोः ।
अनु स्वजां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः ॥ २ ॥

अश्विनोः । असनं । रथं । अनश्वं । वाजिनीऽवतोः । तेन । अहं । भूरि । चाकन ॥ १० ॥ अयं । समह । मा । तनु । ऊह्याते । जनान् । अनु । सोमऽपेयं । सुऽखः । रथः ॥ ११ ॥ अध । स्वप्नस्य । निः । विदे । अभुंजतः । च रेवतः । उभा । ता । बस्रि । नश्यतः ॥ १२ ॥ २३ ॥ १७ ॥

कत् । इत्था । नॄन् । पात्रं । देवऽयता । श्रवत् । गिरः । अंगिरसा । तुरण्यन् । प्र । यत् । आनट् । विशः । आ । हर्म्यस्य । उरु । क्रंसते । अध्वरे । यजत्रः ॥ १ ॥ स्तंभीत् । ह । द्यां । सः । धरुणं । प्रुषायत् । ऋभुः । वाजाय । द्रविणं । नरः । गोः । अनु । स्वऽजां । महिषः । चक्षत । व्रां । मेनां । अश्वस्य । परि । मातरं । गोः ॥ २ ॥

नक्षद्धवमरुणीः पूर्व्यं राट् तुरो विशामङ्गिरसामनु द्यून् ।
तक्षद्वज्रं नियुतं तस्तम्भद्द्यां चतुष्पदे नर्याय द्विपादे ॥ ३ ॥
अस्य मदे स्वर्यं दा ऋतायापीवृतमुस्रियाणामनीकम् ।
यद्ध प्रसर्गे त्रिककुम्निवर्तदप द्रुहो मानुषस्य दुरो वः ॥ ४ ॥
तुभ्यं पयो यत्पितरावनीतां राधः सुरेतस्तुरणे भुरण्यू ।
शुचि यत्ते रेक्ण आयजन्त सबर्दुघायाः पय उस्रियायाः ॥ ५ ॥ २४ ॥
अध प्र जज्ञे तरणिर्ममत्तु प्र रोच्यस्या उषसो न सूरः ।
इन्दुर्येभिराष्ट स्वेदुहव्यैः स्रुवेण सिञ्चञ्जरणाभि धाम ॥ ६ ॥
स्विध्मा यद्वनधितिरपस्यात्सूरो अध्वरे परि रोधना गोः ।
यद्ध प्रभासि कृत्व्याँ अनु द्यूननर्विशे पश्विषे तुराय ॥ ७ ॥

नक्षत् । हवं । अरुणीः । पूर्व्यं । राट् । तुरः । विशां । अंगिरसां । अनु । द्यून् । तक्षत् । वज्रं । निऽयुतं । तस्तंभत् । द्यां । चतुःऽपदे । नर्याय । द्विऽपादे ॥ ३ ॥ अस्य । मदे । स्वर्यं । दाः । ऋताय । अपिऽवृतं । उस्रियाणां । अनीकं । यत् । ह । प्रऽसर्गे । त्रिऽककुप् । निऽवर्तत् । अप । द्रुहः । मानुषस्य । दुरः । वरिति वः ॥ ४ ॥ तुभ्यं । पयः । यत् । पितरौ । अनीतां । राधः । सुऽरेतः । तुरणे । भुरण्यू इति । शुचि । यत् । ते । रेक्णः । आ । अयजंत । सबःऽदुघायाः । पयः । उस्रियायाः ॥ ५ ॥ २४ ॥ अध । प्र । जज्ञे । तरणिः । ममत्तु । प्र । रोचि । अस्याः । उषसः । न । सूरः । इंदुः । येभिः । आष्ट । स्वऽइदुहव्यैः । स्रुवेण । सिंचन् । जरणा । अभि । धाम ॥ ६ ॥ सुऽइध्मा । यत् । वनऽधितिः । अपस्यात् । सूरः । अध्वरे । परि । रोधना । गोः । यत् । ह । प्रऽभासि । कृत्व्यान् । अनु । द्यून् । अनर्विशे । पशुऽइषे । तुराय ॥ ७ ॥

अष्टा महो दिव आदो हरी इह द्युम्नासाहमभि योधान उत्सं ।
हरिं यत्ते मन्दिनं दुक्षन्वृधे गोरभसमद्रिभिर्वाताप्यम् ॥ ८ ॥
त्वमायसं प्रति वर्तयो गोर्दिवो अश्मानमुपनीतमृभ्वा ।
कुत्साय यत्र पुरुहूत वन्वञ्छुष्णमनन्तैः परियासि वधैः ॥ ९ ॥
पुरा यत्सूरस्तमसो अपीतेस्तमद्रिवः फलिगं हेतिमस्य ।
शुष्णस्य चित्परिहितं यदोजो दिवस्परि सुग्रथितं तदादः ॥ १० ॥ २५ ॥
अनु त्वा मही पाजसी अचक्रे द्यावाक्षामा मदतामिन्द्र कर्मन् ।
त्वं वृत्रमाशयानं सिरासु महो वज्रेण सिष्वपो वराहुम् ॥ ११ ॥
त्वमिन्द्र नर्यो याँ अवो नॄन्तिष्ठा वातस्य सुयुजो वहिष्ठान् ।
यं ते काव्य उशना मन्दिनं दाद्वृत्रहणं पार्यं ततक्ष वज्रम् ॥ १२ ॥

अष्टा । महः । दिवः । आदः । हरी इति । इह । द्युम्नऽसहं । अभि । योधानः । उत्सं । हरिं । यत् । ते । मंदिनं । धुक्षन् । वृधे । गोऽरभसं । अद्रिऽभिः । वाताप्यं ॥ ८ ॥ त्वं । आयसं । प्रति । वर्तयः । गोः । दिवः । अश्मानं । उपऽनीतं । ऋभ्वा । कुत्साय । यत्र । पुरुऽहूत । वन्वन् । शुष्णं । अनंतैः । परिऽयासि । वधैः ॥ ९ ॥ पुरा । यत् । सूरः । तमसः । अपिऽइतेः । तं । अद्रिऽवः । फलिऽगं । हेतिं । अस्य । शुष्णस्य । चित् । परिऽहितं । यत् । ओजः । दिवः । परि । सुऽग्रथितं । तत् । आ । अदः इत्यदः ॥ १० ॥ २५ ॥ अनु । त्वा । मही इति । पाजसी इति । अचक्रेऽइति । द्यावाक्षामा । मदतां । इंद्र । कर्मन् । त्वं । वृत्रं । आऽशयानं । सिरासु । महः । वज्रेण । सिस्वपः । वराहुं ॥ ११ ॥ त्वं । इंद्र । नर्यः । यान् । अवः । नॄन् । तिष्ठ । वातस्य । सुऽयुजः । वहिष्ठान् । यं । ते । काव्यः । उशना । मंदिनं । दात् । वृत्रऽहनं । पार्यं । ततक्ष । वज्रं ॥ १२ ॥

त्वं सूरो॑ हरितो॑ रामयो नॄन्भर॑च्चक्रमेत॑शो नायमि॑न्द्र ।
प्रास्यं॑ पारं॑ नंवतिं॑ नाव्या॑नामपि॑ कर्तमंवर्तयोऽयंज्यून् ॥ १३ ॥
त्वं नो॑ अस्या इ॑न्द्र दुर्हणा॑याः पाहि वं॑ज्रिवो दुरितादभीके॑ ।
प्र नो वाजा॑न्रथ्यो३॑अश्वं॑बुध्यानिषे यं॑न्धि श्रवं॑से सूनृता॑यै ॥ १४ ॥
मा सा ते॑ अस्मत्सुमतिर्वि दं॑सद्वाजंप्रमहः समिषो॑ वरन्त ।
आ नो॑ भज मघवन्गोष्वर्यो मंहिं॑ष्ठास्ते सधमादः॑ स्याम ॥१५॥२६॥८॥१॥

त्वं । सूरः॑ । हरितः॑ । रमयः । नॄन् । भरंत् । चक्रं । एतंशः । न । अयं । इंद्र ।
प्रऽअस्यं । पारं । नवतिं । नाव्यां॑नां । अपि । कर्तं । अवर्तयः । अयंज्यून् ॥ १३ ॥
त्वं । नः । अस्याः । इंद्र । दुःऽहनां॑याः । पाहि । वज्रिऽवः । दुःऽइतात् । अभीके॑ । प्र ।
नः । वाजा॑न् । रथ्यः॑ । अश्वंऽबुध्यान् । इषे । यंधि । श्रवं॑से । सूनृता॑यै ॥ १४ ॥
मा । सा । ते । अस्मत् । सुऽमतिः । वि । दसत् । वाजंऽप्रमहः । सं । इषः॑ । वरंत ।
आ । नः । भज । मघऽवन् । गोषुं । अर्यः॑ । मंहिंष्ठाः । ते । सधऽमादः॑ । स्याम ।
॥ १५ ॥ २६ ॥ ८ ॥ १ ॥

इति प्रथमाष्टके अष्टमोऽध्यायः ॥ ८ ॥

॥ प्रथमाष्टकः समाप्तः ॥ १ ॥

जिन सामर्थ्योंसे चलते चलते[1] थके[2] हुए अन्तकको आप उत्साहित करते हैं, दुःखसे मुक्त करके भुज्युको उत्साह दिलाते हैं, और कर्कन्धु और वय्यको आनन्द दिलाते हैं, ऐसे सामर्थ्योंके साथ हे अश्विनीदेव, हमारे यहां आइये। ६

जिन भक्तगणोंकी रक्षा करनेवाले सामर्थ्योंसे आपने शुचन्तिको धनसे भरा हुआ गृह[3] अर्पण किया, जिन सामर्थ्योंके कारण आपने अत्रिका दाह (गर्मी) शान्त किया, और जिन सामर्थ्योंसे आपने पृश्निगु और पुरुकुत्सकी रक्षा की, उन सामर्थ्योंके साथ हे अश्विनीदेव, आप यहां आइये। ७

जिन भक्तगणोंकी रक्षा करनेवाले सामर्थ्योंसे आपने अन्धे और लङ्गडे[4] परावृजको देखनेकी और चलनेकी शक्ति प्रदान की और जिन सामर्थ्योंके कारण आपने अन्तरिक्षमें उडनेवाले (चिड़िया) पक्षीको नाश करनेवाले प्राणियोंसे बचा लिया उन सामर्थ्योंके साथ हे अश्विनीदेव, आप यहां आइये। ८

जिन भक्तगणोंकी रक्षा करनेवाले सामर्थ्योंसे आपने नदीयोंमें पूरा पूरा मधुर जल भर[5] दिया, जिनसे आपने वसिष्ठकी उन्नति की, और जिनसे आपने कुत्स्य, श्रुतर्य और नर्यकी रक्षा की उन सामर्थ्योंके साथ हे अश्विनीदेव, आप यहां आइये। ९

जिन भक्तगणोंकी रक्षा करनेवाले सामर्थ्योंसे आपने अथर्वकुलमें उत्पन्न हुए धनवान् विश्पलाकी भयङ्कर युद्धमें (जिसमें सैकड़ों मनुष्य मरते हैं) रक्षा की, और जिन सामर्थ्योंसे, आपसे प्रेम[6] करनेवाले अश्वकुलमें उत्पन्न हुए पुरुषोंकी आपने रक्षा की उन सामर्थ्योंके साथ आप यहां आइये। १० (३४)

---

६ याभिः आअरणे[1] जसमानं[2] अन्तकं, याभिः अव्यथिभिः भुज्युं जिजिन्वथुः, याभिः कर्कंधुं वय्यं च जिन्वथः ताभिः ऊतिभिः, अश्विना सु आ गतं।

७ याभिः शुचन्तिं धनसां सुषंसदं,[3] तप्तं घर्मं अत्रये ओम्यावन्तं, याभिः पृश्निगुं पुरुकुत्सं आवतं ताभिः ऊतिभिः, अश्विना, सु आ गतं।

८ वृषणा अश्विना, याभिः शचीभिः अन्धं श्रोणं[4] परावृजं चक्षसे एतवे कृथः, याभिः प्रसितां वर्तिकां अमुंचतं ताभिः ऊतिभिः सु आ गतं।

९ याभिः मधुमंत सिन्धुं असश्चत,[5] अजरौ, याभिः वसिष्ठं अजि वतं, याभिः कुत्सं श्रुतर्यं नर्यं आवतं, ताभिः ऊतिभिः, अश्विना, सु आ गतं।

१० अथर्व्यं धनसां विश्पलां याभिः सहस्रमीळ्हे आजौ अजिन्वतं, प्रेषिं[6] अश्व्यं वशं याभिः आवतं ताभिः ऊतिभिः, अश्विना, सु आ गतं।

हे उदार अश्विनीदेव, जिन भक्तरक्षक सामर्थ्योंसे आपने उशीजकुलमें उत्पन्न हुए दीर्घश्रवाका व्यापार बढ़ानेके लिये मेघोंसे मधुर (जलोंकी) वृष्टि कराई, और जिन सामर्थ्योंसे आपकी स्तुति करनेवाले कक्षीवानोंकी रक्षा की, उन सामर्थ्योंके साथ आप यहां आगमन कीजिये ।　११

हे अश्विनीदेव, जिन भक्त रक्षक सामर्थ्योंसे आपने रसा नामके नदीको जलप्रवाहसे बढ़ा दिया, जिन सामर्थ्योंसे बिना अश्वके जोते हुए रथकी विजय कराके आपने रक्षा की, और जिन सामर्थ्योंके कारण त्रिशोक अपने गौको अपने घर ले जा सका उन सामर्थ्योंके साथ आप यहां आइये ।　१२

हे अश्विनीदेव, जिन (भक्तगण) रक्षक सामर्थ्योंके कारण आप दूरके प्रदेशमें भी सूर्यकी चारों ओर घुम सकते हैं, जिन सामर्थ्योंके कारण जमीन का स्वामी बननेका यत्न करनेवाले मन्धाताकी रक्षा आप कर सकते हैं, और जिन (सामर्थ्यों) के कारण विद्वान भारद्वाजकी आप रक्षा करते हैं उन सामर्थ्योंके साथ आप यहां आइये ।　१३

हे अश्विनीदेव, जिन (भक्तगण रक्षक) सामर्थ्योंके कारण आपने शम्बरका वध करनेके समय श्रेष्ठ अतिथिग्वी, कशोजु और दिवोदासकी रक्षा की, और जिन सामर्थ्योंके कारण (शत्रुओं) के नगरोंका नाश करनेवाले त्रिदस्युकी रक्षा की उन सामर्थ्योंके साथ आप यहां आइये ।　१४

हे अश्विनीदेव, जिन (भक्तगण रक्षक) सामर्थ्योंके कारण आपने सोमरसका पान करनेवाले बभ्रु, उपस्तुत और स्त्रीका लाभ करनेवाले कालिका सन्मान किया, और जिन सामर्थ्योंके कारण आपने व्यश्व और पृथिकी रक्षा की उन सामर्थ्योंके साथ आप यहां आइये ।　१५ (३५)

---

११ सुदानू अश्विना, याभिः औशजाय दीर्घश्रवसे वणिजे कोशः मधु अक्षरत्, याभिः स्तोतारं कक्षीवन्तं आवत ताभिः, ऊतिभिः, अश्विना, सु आ गतं ।

१२ अश्विना, याभिः उद्रः क्षोदसा रसां पिपिन्वथुः, याभिः अनश्वं रथं जिषे आवतं, याभिः त्रिशोकः उस्रियाः उदाजत, ताभिः ऊतिभिः सु आ गतं ।

१३ अश्विना, याभिः परावति सूर्यं परियाथः, क्षेत्रपत्येषु मंधातारं आवतं, याभिः विप्रं भरद्वाजं प्र आवतं ताभिः ऊतिभिः सु आ गत ।

१४ अश्विना, याभिः शम्बरहत्ये महां अतिथिग्वं, कशोजुवं, दिवोदासं आवतं, याभिः पूर्भिद्ये त्रसदस्युं आवतं, ताभिः ऊतिभिः सु आ गतं ।

१५ अश्विना याभिः विपिपानं वम्रं, उपस्तुतं, विसजानिं कलिं दुवस्यथः, याभिः व्यश्वं उत पृथिं आवतं, ताभिः ऊतिभिः सु आ गतं ।

हे पराक्रमी अश्विनीदेव, जिन (भक्तरक्षक) सामर्थ्योंके कारण आपने पुराने समयमें भृगु, अत्रि और मनुकी उन्नति करनेकी इच्छा की, और जिन सामर्थ्योंसे आपने स्यूम-रश्मीके लिये बाण[8] चलाये उन सामर्थ्योंके साथ आप हमारे यहां आइये। १६

हे अश्विनीदेव, जिन (भक्तरक्षक) सामर्थ्योंके कारण प्रज्वलित अग्निकी नाई पठर्वा मार्गसे[9] चलता हुआ अपने बड़े शरीरके कारण देदीप्यमान दिखने लगा, और जिन सामर्थ्योंके कारण आपने बड़े बड़े युद्धमेंभी शर्यातकी रक्षा की उन सामर्थ्योंके साथ आप हमारे यहां आइये। १७

हे अश्विनीदेव, जिन (भक्तरक्षक) सामर्थ्योंके कारण अङ्गिरसोंकी स्तुतियोंसे सन्तुष्ट[10] हुए आपने गुहामें बन्धे हुए गौओंको सबसे आगे होकर मुक्त किया, और जिन सामर्थ्योंके कारण पराक्रमी मनुको अन्न देकर आपने उसकी रक्षा की उन सामर्थ्योंके साथ आप यहां आइये। १८

हे अश्विनीदेव, जिन (भक्तरक्षक) सामर्थ्योंके कारण आपने विमदाको भार्या दिला दी, जिन सामर्थ्योंके कारण आपने लाल रङ्गकी धेनुओंको अपनी आज्ञा माननेको सिखलाया, और जिन सामर्थ्योंके कारण सुदेव्यको सुदासकी ओर आप ले गये उन सामर्थ्योंके साथ आप यहां आइये। १९

हे अश्विनीदेव, जिन (भक्तरक्षक) सामर्थ्योंके कारण हवि अर्पण करनेवाले भक्तोंका आप कल्याण[11] करते हैं, जिन सामर्थ्योंसे भुज्यु और अध्रिगुकी आप रक्षा करते हैं, और जिन सामर्थ्योंके कारण आप हवि अर्पण करनेवाले ऋतस्तुभको आनन्द दिलाते हैं उन सामर्थ्योंके साथ आप यहां आइये। २० (३६)

---

१६ नरा अश्विना, याभिः पुरा भृगवे, याभिः अत्रये, याभिः मनवे गातुं ईषथुः, याभिः स्यूमरश्मये शारीः[8] आजतं, ताभिः ऊतिभिः सु आ गतं।

१७ अश्विना, याभिः पठर्वा जठरस्य मज्मना अज्मन्[9] चितः इद्धः अग्निः न अदीदेत्, याभिः महाधने शर्यातं अवथः ताभिः ऊतिभिः सु आ गतं।

१८ अश्विना, याभिः अंगिरः मनसा निरण्यथः,[10] गोअर्णसः विवरे अग्रं गच्छथः, याभिः शूरं मनुं इषा समावतं ताभिः ऊतिभिः सु आ गतं।

१९ अश्विना, याभिः विमदाय पत्नीः नि ऊहथुः, याभिः वा घ अरुणीः अशिक्षतं, याभिः सुदेव्यं सुदासे ऊहथुः ताभिः ऊतिभिः सु आ गतं।

२० अश्विना, याभिः दाशुषे शंताती[11] भवथः, याभिः भुज्युं, याभिः अध्रिगुं अवथः, याभिः सुभरां ऋतस्तुभं ओम्यावतीं, ताभिः ऊतिभिः सु आ गतं।

हे अश्विनीदेव, जिन (भक्तगण रक्षक) सामर्थ्योंके कारण आपने बाण चलाते समय[11] कृशानुकी प्रशंसा करवाई, जिन सामर्थ्योंके कारण अश्वपर बैठकर दौड़नेवाले युवाकी आपने रक्षा की और जिन सामर्थ्योंके कारण आप भ्रमरको मधुर रस पिलाते हैं उन सामर्थ्योंके साथ आप यहां आइये। २१

हे अश्विनीदेव, जिन (भक्तगणरक्षक) सामर्थ्योंके कारण युद्धमें धेनु, भूमि और सन्ततिके लाभ इच्छा करनेवाले वीरोंकी आपने उन्नति की, और जिन सामर्थ्योंके कारण आप रथ और अश्वकी रक्षा करते हैं उन सामर्थ्योंके साथ आप यहां आइये। २२

हे अश्विनीदेव, जिन (भक्तरक्षक) सामर्थ्योंसे अर्जुनीका पुत्र कुत्स, तुर्वीति और दभीतिकी आपने रक्षा की, और जिनके कारण ध्वसन्ति और पुरुषन्तिकी भी आपने रक्षा की उन सामर्थ्योंके साथ आप यहां आइये। २३

हे शत्रुओंका नाश करनेवाले पराक्रमी अश्विनीदेव, हमपर कृपा करके हमारी स्तुति और प्रार्थना सफल[13] कीजिये। सूर्यप्रकाश[14] चारों ओर फैलनेके पहले हम अपनी रक्षाके लिये आपकी प्रार्थना करते हैं। इसलिये आप हमें सामर्थ्य अर्पण करके हमारी उन्नति कीजिये। २४

स्तुषे । सा । वां । वरुण । मित्र । रातिः । गवां । शता । पृक्षऽयामेषु । पज्रे । श्रुतऽरथे । प्रियऽरथे । दधानाः । सद्यः । पुष्टिं । निऽरुन्धानासः । अग्मन् ॥ ७ ॥
अस्य । स्तुषे । महिऽमघस्य । राधः । सचा । सनेम । नहुषः । सुऽवीराः । जनः । यः । पज्रेभ्यः । वाजिनीऽवान् । अश्वऽवतः । रथिनः । मह्यं । सूरिः ॥ ८ ॥
जनः । यः । मित्रावरुणौ । अभिऽध्रुक् । अपः । न । वां । सुनोति । अक्ष्णयाऽध्रुक् । स्वयं । सः । यक्ष्मं । हृदये । नि । धत्ते । आप । यत् । ईं । होत्राभिः । ऋतऽवा ॥ ९ ॥

स आर्धतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः ।
विसृष्टरातिर्याति बाळ्हसृत्वा विश्वासु पृत्सु सदमिच्छूरः ॥ १० ॥ २ ॥
अध ग्मन्ता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मन्द्राः ।
नभोजुवो यन्निरवस्य राधः प्रशस्तये महिना रथवते ॥ ११ ॥
एतं शर्धं धाम यस्य सूरेरित्यवोचन्दशतयस्य नंशे ।
द्युम्नानि येषु वसुताती रारन्विश्वे सन्वन्तु प्रभृथेषु वाजं ॥ १२ ॥
मन्दामहे दशतयस्य धासेर्द्विर्यत्पञ्च बिभ्रतो यन्त्यन्ना ।
किमिष्टाश्व इष्टरश्मिरेत ईशानासस्तरुष ऋञ्जते नॄन् ॥ १३ ॥
हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यन्तु देवाः ।
अर्यो गिरः सद्य आ जग्मुषीरोस्राश्चाकन्तूभयेष्वस्मे ॥ १४ ॥

सः । आर्धतः । नहुषः । दंसुऽजूतः । शर्धःऽतरः । नरां । गूर्तऽश्रवाः । विसृष्टऽरातिः । याति । बाळ्हऽसृत्वा । विश्वासु । पृत्ऽसु । सदं । इत् । शूरः ॥ १० ॥ २ ॥ अधं । ग्मन्तं । नहुषः । हवं । सूरेः । श्रोतं । राजानः । अमृतस्य । मंद्राः । नभःऽजुवः । यत् । निरवस्य । राधः । प्रऽशस्तये । महिना । रथऽवते ॥ ११ ॥ एतं । शर्धं । धाम । यस्य । सूरेः । इति । अवोचन् । दशऽतयस्य । नंशे । द्युम्नानि । येषु । वसुऽताती । रारन् । विश्वे । सन्वंतु । प्रऽभृथेषु । वाजं ॥ १२ ॥ मंदामहे । दशऽतयस्य । धासेः । द्विः । यत् । पंच । बिभ्रतः । यंति । अन्ना । किं । इष्टऽअश्वः । इष्टऽरश्मिः । एते । ईशानासः । तरुषः । ऋंजते । नॄन् ॥ १३ ॥ हिरण्यऽकर्णं । मणिऽग्रीवं । अर्णः । तत् । नः । विश्वे । वरिवस्यंतु । देवाः । अर्यः । गिरः । सद्यः । आ । जग्मुषीः । आ । उस्राः । चाकंतु । उभयेषु । अस्मे इति ॥ १४ ॥

चत्वारो मा मशर्शारस्य शिश्वस्त्रयो राज्ञ आयवसस्य जिष्णोः ।
रथो वां मित्रावरुणा दीर्घाप्साः स्यूमगभस्तिः सूरो नाद्यौत् ॥ १५ ॥ ३ ॥

॥ १२३ ॥ ऋषिः—कक्षीवान् । देवता—उषाः । छन्दः—त्रिष्टुप् ॥

॥१२३॥ पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः ।
कृष्णादुदस्थादर्या३विहाया श्चिकित्सन्ती मानुषाय क्षयाय ॥ १ ॥
पूर्वा विश्वस्माद्भुवनादबोधि जयन्ती वाजं बृहती सनुत्री ।
उच्चा व्यख्यद्युवतिः पुनर्भूरोषा अगन्प्रथमा पूर्वहूतौ ॥ २ ॥
यदद्य भागं विभजासि नृभ्य उषो देवि मर्त्यत्रा सुजाते ।
देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय ॥ ३ ॥
गृहंगृहमहना यात्यच्छा दिवेदिवे अधि नामा दधाना ।
सिषासन्ती द्योतना शश्वदागादग्रमग्रमिद्भजते वसूनाम् ॥ ४ ॥

चत्वारः । मा । मशर्शारस्य । शिश्वः । त्रयः । राज्ञः । आयवसस्य । जिष्णोः । रथः । वाम् । मित्रावरुणा । दीर्घऽअप्साः । स्यूमऽगभस्तिः । सूरः । न । अद्यौत् ॥ ३ ॥

पृथुः । रथः । दक्षिणायाः । अयोजि । आ । एनम् । देवासः । अमृतासः । अस्थुः । कृष्णात् । उत् । अस्थात् । अर्या । विऽहायाः । चिकित्सन्ती । मानुषाय । क्षयाय ॥ १ ॥ पूर्वा । विश्वस्मात् । भुवनात् । अबोधि । जयन्ती । वाजम् । बृहती । सनुत्री । उच्चा । वि । अख्यत् । युवतिः । पुनःऽभूः । आ । उषाः । अगन् । प्रथमा । पूर्वऽहूतौ ॥ २ ॥ यत् । अद्य । भागम् । विऽभजासि । नृऽभ्यः । उषः । देवि । मर्त्यऽत्रा । सुऽजाते । देवः । नः । अत्र । सविता । दमूनाः । अनागसः । वोचति । सूर्याय ॥ ३ ॥ गृहम्ऽगृहम् । अहना । याति । अच्छ । दिवेऽदिवे । अधि । नाम । दधाना । सिसासन्ती । द्योतना । शश्वत् । आ । अगात् । अग्रम्ऽअग्रम् । इत् । भजते । वसूनाम् ॥ ४ ॥

भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व ।
पश्चा स दघ्या यो अघस्य धाता जयेम तं दक्षिणया रथेन ॥ ५ ॥ ४ ॥
उदीरतां सूनृता उत्पुरंधीरुदग्नयः शुशुचानासो अस्थुः ।
स्पार्हा वसूनि तमसापगूळ्हाविष्कृण्वन्त्युषसो विभातीः ॥ ६ ॥
अपान्यदेत्यभ्यन्यदेति विषुरूपे अहनी सं चरेते ।
परिक्षितोस्तमो अन्या गुहाकरद्यौदुषाः शोशुचता रथेन ॥ ७ ॥
सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचन्ते वरुणस्य धाम ।
अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परि यन्ति सद्यः ॥ ८ ॥
जानत्यह्नः प्रथमस्य नाम शुक्रा कृष्णादजनिष्ट श्वितीची ।
ऋतस्य योषा न मिनाति धामाहरहर्निष्कृतमाचरन्ती ॥ ९ ॥

भगस्य । स्वसा । वरुणस्य । जामिः । उषः । सूनृते । प्रथमा । जरस्व । पश्चा । सः । दघ्याः । यः । अघस्य । धाता । जयेम । तं । दक्षिणया । रथेन ॥ ५ ॥ ४ ॥ उत् । ईरतां । सूनृताः । उत् । पुरंऽधीः । उत् । अग्नयः । शुशुचानासः । अस्थुः । स्पार्हा । वसूनि । तमसा । अपऽगूळ्हा । आविः । कृण्वंति । उषसः । विऽभातीः ॥ ६ ॥ अप । अन्यत् । एति । अभि । अन्यत् । एति । विषुरूपे इति विषुऽरूपे । अहनी इति । सं । चरेते इति । परिऽक्षितोः । तमः । अन्या । गुहा । अकः । अद्यौत् । उषाः । शोशुचता । रथेन ॥ ७ ॥ सऽदृशीः । अद्य । सऽदृशीः । इत् । ऊं इति । श्वः । दीर्घं । सचंते । वरुणस्य । धाम । अनवद्याः । त्रिंशतं । योजनानि । एकाऽएका । क्रतुं । परि । यंति । सद्यः ॥ ८ ॥ जानती । अह्नः । प्रथमस्य । नाम । शुक्रा । कृष्णात् । अजनिष्ट । श्वितीची । ऋतस्य । योषा । न । मिनाति । धाम । अहःऽअहः । निःऽकृतं । आऽचरंती ॥ ९ ॥

कन्येव तन्वा३ शाशदानाँ एषि देवि देवमियक्षमाणम् ।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ॥ १० ॥ ५ ॥
सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कम् ।
भद्रा त्वमुषो वितरं व्युच्छ न तत्ते अन्या उषसो नशन्त ॥ ११ ॥
अश्वावतीर्गोमतीर्विश्ववारा यतमाना रश्मिभिः सूर्यस्य ।
परा च यन्ति पुनरा च यन्ति भद्रा नाम वहमाना उषासः ॥ १२ ॥
ऋतस्य रश्मिमनुयच्छमाना भद्रम्भद्रं क्रतुमस्मासु धेहि ।
उषो नो अद्य सुहवा व्युच्छास्मासु रायो मघवत्सु च स्युः ॥ १३ ॥ ६ ॥

॥ १२४ ॥ ऋषिः—कक्षीवान । देवताः—उषाः । छन्दः—त्रिष्टुप् ॥

॥१२४॥ उषा उच्छन्ती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत् ।
देवो नो अत्र सविता न्वर्थं प्रासावीद्द्विपत्प्र चतुष्पदित्यै ॥ १ ॥

कन्याऽइव । तन्वा । शाशदाना । एषि । देवि । देवं । इयक्षमाणं । संऽस्मयमाना । युवतिः । पुरस्तात् । आविः । वक्षांसि । कृणुषे । विऽभाती ॥ १० ॥ ५ ॥ सुसंऽकाशा । मातृमृष्टाऽइव । योषा । आविः । तन्वं । कृणुषे । दृशे । कं । भद्रा । त्वं । उषः । विऽतरं । वि । उच्छ । न । तत् । ते । अन्याः । उषसः । नशंत ॥ ११ ॥ अश्वऽवतीः । गोऽमतीः । विश्वऽवाराः । यतमानाः । रश्मिऽभिः । सूर्यस्य । परा । च । यंति । पुनः । आ । च । यंति । भद्रा । नाम । वहमानाः । उषसः ॥ १२ ॥ ऋतस्य । रश्मिं । अनुऽयच्छमाना । भद्रंऽभद्रं । क्रतुं । अस्मासु । धेहि । उषः । नः । अद्य । सुऽहवा । वि । उच्छ । अस्मासु । रायः । मघवत्ऽसु । च । स्युरिति स्युः ॥ १३ ॥ ६ ॥

उषाः । उच्छंती । संऽइधाने । अग्नौ । उत्ऽयन् । सूर्यः । उर्विया । ज्योतिः । अश्रेत् । देवः । नः । अत्र । सविता । नु । अर्थं । प्र । असावीत् । द्विऽपत् । प्र । चतुःऽपत् । इत्यै ॥ १ ॥

अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि ।
ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत् ॥ २ ॥
एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥ ३ ॥
उपो अदर्शि शुन्ध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि ।
अद्मसन्न ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् ॥ ४ ॥
पूर्वे अर्धे रजसो अप्त्यस्य गवां जनित्र्यकृत प्र केतुम् ।
व्यु प्रथते वितरं वरीय ओभा पृणन्ती पित्रोरुपस्था ॥ ५ ॥ ७ ॥
एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिम् ।
अरेपसा तन्वा३शाशदाना नार्भादीषते न महो विभाती ॥ ६ ॥

अमिनती । दैव्यानि । व्रतानि । प्रऽमिनती । मनुष्या । युगानि । ईयुषीणां । उपमा । शश्वतीनां । आऽयतीनां । प्रथमा । उषाः । वि । अद्यौत् ॥ २ ॥ एषा । दिवः । दुहिता । प्रति । अदर्शि । ज्योतिः । वसाना । समना । पुरस्तात् । ऋतस्य । पंथां । अनु । एति । साधु । प्रजानतीऽइव । न । दिशः । मिनाति ॥ ३ ॥ उपो इति । अदर्शि । शुन्ध्युवः । न । वक्षः । नोधाःऽइव । आविः । अकृत । प्रियाणि । अद्मऽसत् । न । ससतः । बोधयंती । शश्वत्ऽतमा । आ । अगात् । पुनः । आऽईयुषीणा ॥ ४ ॥ पूर्वे । अर्धे । रजसः । अप्त्यस्य । गवां । जनित्री । अकृत । प्र । केतुं । वि । ऊं इति । प्रथते । विऽतरं । वरीयः । आ । उभा । पृणंती । पित्रोः । उपऽस्था ॥ ५ ॥ ७ ॥ एव । इत् । एषा । पुरुऽतमा । दृशे । कं । न । अजामिं । न । परि । वृणक्ति । जामिं । अरेपसा । तन्वा । शाशदाना । न । अर्भात् । ईषते । न । महः । विऽभाती ॥ ६ ॥

अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥ ७ ॥
स्वसा स्वस्रे ज्यायस्यै योनिमारैगपैत्यस्याः प्रतिचक्ष्येव ।
व्युच्छन्ती रश्मिभिः सूर्यस्याञ्ज्यङ्क्ते समनगा इव व्राः ॥ ८ ॥
आसां पूर्वासामहसु स्वसॄणामपरा पूर्वामभ्येति पश्चात् ।
ताः प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छन्तु सुदिना उषासः ॥ ९ ॥
प्र बोधयोषः पृणतो मघोन्यबुध्यमानाः पणयः ससन्तु ।
रेवदुच्छ मघवद्भ्यो मघोनि रेवत्स्तोत्रे सूनृते जारयन्ती ॥ १० ॥ ८ ॥
अवेयमश्वैद्युवतिः पुरस्ताद्युङ्क्ते गवामरुणानामनीकम् ।
वि नूनमुच्छादसति प्र केतुर्गृहंगृहमुप तिष्ठाते अग्निः ॥ ११ ॥

अभ्राताऽइव । पुंसः । एति । प्रतीची । गर्तऽआरुगिव । सनये । धनानां । जायाऽइव
पत्ये । उशती । सुऽवासाः । उषाः । हस्राऽइव । नि । रिणीते । अप्सः ॥ ७ ॥
स्वसा । स्वस्रे । ज्यायस्यै । योनिं । अरैक् । अप । एति । अस्याः । प्रतिचक्ष्यांऽइव ।
विऽउच्छंती । रश्मिऽभिः । सूर्यस्य । अंजि । अंक्ते । समनगाःऽइव । व्राः ॥ ८ ॥
आसां । पूर्वासां । अहऽसु । स्वसॄणां । अपरा । पूर्वां । अभि । एति । पश्चात् । ताः ।
प्रत्नऽवत् । नव्यसीः । नूनं । अस्मे इति । रेवत् । उच्छंतु । सुऽदिनाः । उषसः ॥ ९ ॥
प्र । बोधय । उषः । पृणतः । मघोनि । अबुध्यमानाः । पणयः । ससंतु । रेवत् ।
उच्छ । मघवत्ऽभ्यः । मघोनि । रेवत् । स्तोत्रे । सूनृते । जरयंती ॥ १० ॥ ८ ॥
अव । इयं । अश्वैत् । युवतिः । पुरस्तात् । युंक्ते । गवां । अरुणानां । अनीकं । वि ।
नूनं । उच्छात् । असति । प्र । केतुः । गृहंऽगृहं । उप । तिष्ठाते । अग्निः ॥ ११ ॥

उत्ते वर्यश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥ १२ ॥
अस्तोढ्वं स्तोम्या ब्रह्मणा मेऽवीवृधध्वमुशतीरुषासः ।
युष्माकं देवीरवसा सनेम सहस्रिणं च शतिनं च वाजम् ॥ १३ ॥ ९ ॥

॥ १२५ ॥ ऋषिः-कक्षीवान् । देवते-दम्पती । छन्दः-त्रिष्टुप् ॥

॥१२५॥ प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रतिगृह्या नि धत्ते ।
तेन प्रजां वर्धयमान आयू रायस्पोषेण सचते सुवीरः ॥ १ ॥
सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति ।
यस्त्वायन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति ॥ २ ॥
आयमद्य सुकृतं प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन ।
अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः ॥ ३ ॥

उत् । ते । वयः । चित् । वसतेः । अपप्तन् । नरः । च । ये । पितुऽभाजः । विऽउष्टौ । अमा । सते । वहसि । भूरि । वामं । उषः । देवि । दाशुषे । मर्त्याय ॥ १२ ॥ अस्तोढ्वं । स्तोम्याः । ब्रह्मणा । मे । अवीवृधध्वं । उशतीः । उषसः । युष्माकं । देवीः । अवसा । सनेम । सहस्रिणं । च । शतिनं । च । वाजं ॥ १३ ॥ ९ ॥

प्रातरिति । रत्नं । प्रातःऽइत्वा । दधाति । तं । चिकित्वान् । प्रतिऽगृह्य । नि । धत्ते । तेन । प्रऽजां । वर्धयमानः । आयुः । रायः । पोषेण । सचते । सुऽवीरः ॥ १ ॥ सुऽगुः । असत् । सुऽहिरण्यः । सुऽअश्वः । बृहत् । अस्मै । वयः । इंद्रः । दधाति । यः । त्वा । आऽयंतं । वसुना । प्रातःऽइत्वः । मुक्षीजयाऽइव । पदिं । उत्ऽसिनाति ॥ २ ॥ आयं । अद्य । सुऽकृतं । प्रातः । इच्छन् । इष्टेः । पुत्रं । वसुऽमता । रथेन । अंशोः । सुतं । पायय । मत्सरस्य । क्षयत्ऽवीरं । वर्धय । सूनृताभिः ॥ ३ ॥

उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः ।
पृणन्तं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ॥ ४ ॥
नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ।
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा ॥ ५ ॥
दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः ।
दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः ॥ ६ ॥
मा पृणन्तो दुरितमेन आरन्मा जारिषुः सूरयः सुव्रतासः ।
अन्यस्तेषां परिधिरस्तु कश्चिदपृणन्तमभि सं यन्तु शोकाः ॥ ७ ॥ १० ॥

॥ १२६ ॥ ऋषिः-कक्षीवान् । देवता-विद्वांसः । छन्दः-त्रिष्टुप् ॥

॥१२६॥ अमन्दान्स्तोमान्प्र भरे मनीषा सिन्धावधि क्षियतो भाव्यस्य ।
यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥ १ ॥

उप । क्षरंति । सिंधवः । मयःऽभुवः । ईजानं । च । यक्ष्यमाणं । च । धेनवः । पृणंतं । च । पपुरिं । च । श्रवस्यवः । घृतस्य । धाराः । उप । यंति । विश्वतः ॥ ४ ॥ नाकस्य । पृष्ठे । अधि । तिष्ठति । श्रितः । यः । पृणाति । सः । ह । देवेषु । गच्छति । तस्मै । आपः । घृतं । अर्षंति । सिंधवः । तस्मै । इयं । दक्षिणा । पिन्वते । सदा ॥ ५ ॥ दक्षिणाऽवतां । इत् । इमानि । चित्रा । दक्षिणाऽवतां । दिवि । सूर्यासः । दक्षिणाऽवंतः । अमृतं । भजंते । दक्षिणाऽवंतः । प्र । तिरंते । आयुः ॥६॥ मा । पृणंतः । दुःऽइतं । एनः । आ । अरन् । मा । जारिषुः । सूरयः । सुऽव्रतासः । अन्यः । तेषां । परिऽधिः । अस्तु । कः । चित् । अपृणंतं । अभि । सं । यंतु । शोकाः ॥ ७ ॥ १० ॥

अमंदान् । स्तोमान् । प्र । भरे । मनीषा । सिंधौ । अधि । क्षियतः । भाव्यस्य । यः । मे । सहस्रं । अमिमीत । सवान् । अतूर्तः । राजा । श्रवः । इच्छमानः ॥ १ ॥

शतं राज्ञो नाधमानस्य निष्कान्छतमश्वान्प्रयतान्त्सद्य आदम् ।
शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥ २ ॥
उप मा श्यावाः स्वनयेन दत्ता वधूमन्तो दश रथासो अस्थुः ।
षष्टिः सहस्रमनु गव्यमागात्सनत्कक्षीवाँ अभिपित्वे अह्नाम् ॥ ३ ॥
चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति ।
मदच्युतः कृशनावतो अत्यान्कक्षीवन्त उदमृक्षन्त पज्राः ॥ ४ ॥
पूर्वामनु प्रयतिमा ददे वस्त्रीन्युक्ताँ अष्टावरिधायसो गाः ।
सुबन्धवो ये विश्या इव व्रा अनस्वन्तः श्रव ऐषन्त पज्राः ॥ ५ ॥
आगधिता परिगधिता या कशीकेव जङ्गहे ।
ददाति मह्यं यादुरी याशूनां भोज्या शता ॥ ६ ॥

शतं । राज्ञः । नाधमानस्य । निष्कान् । शतं । अश्वान् । प्रऽयतान् । सद्यः । आदं ।
शतं । कक्षीवान् । असुरस्य । गोनां । दिवि । श्रवः । अजरं । आ । ततान ॥ २ ॥
उप । मा । श्यावाः । स्वनयेन । दत्ताः । वधूऽमंतः । दश । रथासः । अस्थुः । षष्टिः ।
सहस्रं । अनु । गव्यं । आ । अगात् । सनत् । कक्षीवान् । अभिऽपित्वे । अह्नां ॥ ३ ॥
चत्वारिंशत् । दशऽरथस्य । शोणाः । सहस्रस्य । अग्रे । श्रेणिं । नयंति । मदऽच्युतः ।
कृशनऽवतः । अत्यान् । कक्षीवंतः । उत् । अमृक्षंत । पज्राः ॥ ४ ॥ पूर्वां । अनु ।
प्रऽयतिं । आ । ददे । वः । त्रीन् । युक्तान् । अष्टौ । अरिऽधायसः । गाः । सुऽबंधवः ।
ये । विश्याःऽइव । व्राः । अनस्वंतः । श्रवः । ऐषंत । पज्राः ॥ ५ ॥ आऽगधिता ।
परिऽगधिता । या । कशीकाऽइव । जंगहे । ददाति । मह्यं । यादुरी । याशूनां ।
भोज्या । शता ॥ ६ ॥

उपोप मे परा मृश मा मे दभ्राणि मन्यथाः ।
सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥ ७ ॥ ११ ॥ १८ ॥

॥ एकोनविंशोऽनुवाकः ॥

॥ १२७ ॥ ऋषिः—परुच्छेपः । देवता—अग्निः । छन्दः—अत्यष्टिः ॥

॥१२७॥ अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् । य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः ॥ १ ॥
यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः । परिज्मानमिव द्यां होतारं चर्षणीनाम् ।
शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥ २ ॥
स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहन्तरः परशुर्न द्रुहन्तरः ।
वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम् ।
निःषहमाणो यमते नायते धन्वासहा नायते ॥ ३ ॥

उपऽउप । मे । परा । मृश । मा । मे । दभ्राणि । मन्यथाः । सर्वा । अहं । अस्मि । रोमशा । गंधारीणांऽइव । अविका ॥ ७ ॥ ११ ॥ १८ ॥

अग्निं । होतारं । मन्ये । दास्वंतं । वसुं । सूनुं । सहसः । जातऽवेदसं । विप्रं । न । जातऽवेदसं ॥ यः । ऊर्ध्वया । सुऽअध्वरः । देवः । देवाच्या । कृपा । घृतस्य । विऽभ्राष्टिं । अनु । वष्टि । शोचिषा । आऽजुह्वानस्य । सर्पिषः ॥ १ ॥ यजिष्ठं । त्वा । यजमानाः । हुवेम । ज्येष्ठं । अंगिरसां । विप्र । मन्मऽभिः । विप्रेभिः । शुक्र । मन्मऽभिः । परिज्मानंऽइव । द्यां । होतारं । चर्षणीनां । शोचिःऽकेशं । वृषणं । यं । इमाः । विशः । प्र । अवंतु । जूतये । विशः ॥ २ ॥ सः । हि । पुरु । चित् । ओजसा । विरुक्मता । दीद्यानः । भवति । द्रुहंऽतरः । परशुः । न । द्रुहंऽतरः । वीळु । चित् । यस्य । संऽऋतौ । श्रुवत् । वनाऽइव । यत् । स्थिरं । निःऽसहमानः । यमते । न । अयते । धन्वऽसहा । न । अयते ॥ ३ ॥

दृळ्हा चिदस्मा अनु दुर्यथा विदे तेजिष्ठाभिररणिभिर्दाष्ट्यवसेऽग्नये दाष्ट्यवसे । प्र यः पुरूणि गाहते तक्षद्वनेव शोचिषा ।
स्थिरा चिदन्ना नि रिणात्योजसा नि स्थिराणि चिदोजसा ॥ ४ ॥
तमस्य पृक्षमुपरासु धीमहि नक्तं यः सुदर्शतरो दिवातरादप्रायुषे दिवातरात् । आदस्यायुर्ग्रभणवद्वीळु शर्म न सूनवे ।
भक्तमभक्तमवो व्यन्तो अजरा अग्नयो व्यन्तो अजराः ॥ ५ ॥ १२ ॥
स हि शर्धो न मारुतं तुविष्वणिरप्नस्वतीषूर्वरास्विष्टनिरार्तनास्विष्टनिः ।
आदद्धव्यान्याददिर्यज्ञस्य केतुरर्हणा ।
अध स्मास्य हर्षतो हृषीवतो विश्वे जुषन्त पन्थां नरः शुभे न पन्थाम् ॥ ६ ॥

दृळ्हा । चित् । अस्मै । अनु । दुः । यथा । विदे । तेजिष्ठाभिः । अरणिऽभिः । दाष्टि । अवसे । अग्नये । दाष्टि । अवसे ॥ प्र । यः । पुरूणि । गाहते । तक्षत् वनाऽइव । शोचिषा । स्थिरा । चित् । अन्ना । नि । रिणाति । ओजसा । नि । स्थिराणि । चित् । ओजसा ॥ ४ ॥ तं । अस्य । पृक्षं । उपरासु । धीमहि । नक्तं । यः । सुदर्शऽतरः । दिवाऽतरात् । अप्रऽआयुषे । दिवाऽतरात् ॥ आत् । अस्य । आयुः । ग्रभणऽवत् । वीळु । शर्म । न । सूनवे । भक्तं । अभक्तं । अवः । व्यंतः । अजराः । अग्नयः । व्यंतः । अजराः ॥ ५ ॥ १२ ॥ सः । हि । शर्धः । न । मारुतं । तुविऽस्वनिः । अप्नस्वतीषु । उर्वरासु । इष्टनिः । आर्तनासु । इष्टनिः ॥ आदत् । हव्यानि । आऽददिः । यज्ञस्य । केतुः । अर्हणा । अध । स्म । अस्य । हर्षतः । हृषीवतः । विश्वे । जुषंत । पंथां । नरः । शुभे । न । पंथां ॥ ६ ॥

द्विता यदीं कीस्तासो अभिद्यवो नमस्यन्त उपवोचन्त भृगवो मथ्नन्तो दाशा भृगवः । अग्निरीशे वसूनां शुचिर्यो धर्णिरेषाम् ।
प्रियाँ अपिधीँर्वनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः ॥ ७ ॥

विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं दम्पतिं भुजे सत्यगिर्वाहसं भुजे । अतिथिं मानुषाणां पितुर्न यस्यासया ।
अमी च विश्वे अमृतास आ वयो हव्या देवेष्वा वयः ॥ ८ ॥

त्वमग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे देवतातये रयिर्न देवतातये ।
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
अध स्मा ते परि चरन्त्यजर श्रुष्टीवानो नाजर ॥ ९ ॥

द्विता । यत् । ईं । कीस्तासः । अभिऽद्यवः । नमस्यन्तः । उपऽवोचन्त । भृगवः । मथ्नन्तः । दाशा । भृगवः ॥ अग्निः । ईशे । वसूनां । शुचिः । यः । धर्णिः । एषां । प्रियान् । अपिऽधीन । वनिषीष्ट । मेधिरः । आ । वनिषीष्ट । मेधिरः ॥ ७ ॥

विश्वासां । त्वा । विशां । पतिं । हवामहे । सर्वासां । समानं । दम्ऽपतिं । भुजे । सत्यऽगिर्वाहसं । भुजे ॥ अतिथिं । मानुषाणां । पितुः । न । यस्य । आसया । अमी इति । च । विश्वे । अमृतासः । आ । वयः । हव्या । देवेषु । आ । वयः ॥ ८ ॥

त्वं । अग्ने । सहसा । सहन्ऽतमः । शुष्मिन्ऽतमः । जायसे । देवऽतातये । रयिः । न । देवऽतातये ॥ शुष्मिन्ऽतमः । हि । ते । मदः । द्युम्निन्ऽतमः । उत । क्रतुः । अध । स्म । ते । परि । चरंति । अजर । श्रुष्टीऽवानः । न । अजर ॥ ९ ॥

प्र वो॑ म॒हे सह॑सा॒ सह॑स्वत उष॒र्बुधे॑ पशु॒षे नाग्नये॒ स्तोमो॑ बभूत्व॒ग्नये॑ ।
प्रति॒ यदीं॑ ह॒विष्मा॒न्विश्वा॑सु॒ क्षासु॒ जोगु॑वे ।
अग्रे॑ रे॒भो न ज॑रत ऋषू॒णां जू॒र्णिर्होत॑ ऋषू॒णाम् ॥ १० ॥
स नो॒ नेदि॑ष्ठं॒ ददृ॑शान॒ आ भ॒राग्ने॑ दे॒वेभिः॒ सच॑नाः सुचे॒तुना॑ म॒हो रा॒यः सु॑चे॒तुना॑ । महि॑ शविष्ठ नस्कृधि सं॒चक्षे॑ भु॒जे अ॒स्यै ।
महि॑ स्तो॒तृभ्यो॑ मघवन्त्सु॒वीर्यं॒ मथी॑रु॒ग्रो न शव॑सा ॥ ११ ॥ १३ ॥

॥ १२८ ॥ ऋषिः परुच्छेपः । देवता अग्निः । छन्दः—अत्यष्टिः ॥

॥१२८॥ अ॒यं जा॑यत॒ मनु॑षो॒ धरी॑मणि॒ होता॒ यजि॑ष्ठ उ॒शिजा॒मनु॑ व्र॒तम॒ग्निः स्वमनु॑ व्र॒तम् । वि॒श्वश्रु॑ष्टिः सखीय॒ते र॒यिरि॑व श्रवस्य॒ते ।
अद॑ब्धो॒ होता॒ नि ष॑ददि॒ळस्प॒दे परि॑वीत इ॒ळस्प॒दे ॥ १ ॥

प्र । वः॒ । म॒हे । सह॑सा । सह॑स्वते । उ॒षः॒ऽबुधे॑ । प॒शु॒ऽसे । न । अ॒ग्नये॑ । स्तोमः॑ । ब॒भू॒तु॒ । अ॒ग्नये॑ ॥ प्रति॑ । यत् । ई॒म् । ह॒विष्मा॑न् । विश्वा॑सु । क्षासु॑ । जोगु॑वे । अग्रे॑ । रे॒भः । न । ज॒र॒ते॒ । ऋ॒षू॒णाम् । जू॒र्णिः । होता॑ । ऋ॒षू॒णाम् ॥ १० ॥ सः । नः॒ । नेदि॑ष्ठम् । ददृ॑शानः । आ । भ॒र॒ । अग्ने॑ । दे॒वेभिः॑ । स॒ऽच॑नाः । सु॒ऽचे॒तुना॑ । म॒हः । रा॒यः । सु॒ऽचे॒तुना॑ ॥ महि॑ । श॒वि॒ष्ठ॒ । नः॒ । कृ॒धि॒ । स॒म्ऽचक्षे॑ । भु॒जे । अ॒स्यै । महि॑ । स्तो॒तृऽभ्यः॑ । म॒घ॒ऽव॒न् । सु॒ऽवीर्य॑म् । मथीः॑ । उ॒ग्रः । न । शव॑सा ॥ ११ ॥ १३ ॥

अ॒यम् । जा॒य॒त॒ । मनु॑षः । धरी॑मणि । होता॑ । यजि॑ष्ठः । उ॒शिजा॑म् । अनु॑ । व्र॒तम् । अ॒ग्निः । स्वम् । अनु॑ । व्र॒तम् ॥ वि॒श्वऽश्रु॑ष्टिः । स॒खि॒ऽय॒ते । र॒यिःऽइ॑व । श्र॒व॒स्य॒ते ॥ अद॑ब्धः । होता॑ । नि । स॒द॒त् । इ॒ळः । प॒दे । परि॑ऽवीतः । इ॒ळः । प॒दे ॥ १ ॥

तं यज्ञसाधमपि वातयामस्यृतस्य पथा नमसा हविष्मता देवताता हविष्मता ।
स न ऊर्जामुपाभृत्यया कृपा न जूर्यति ।
यं मातरिश्वा मनवे परावतो देवं भाः परावतः ॥ २ ॥

एवेन सद्यः पर्यैति पार्थिवं मुहुर्गी रेतो वृषभः कनिक्रदद्दधद्रेतः कनिक्रदत् ।
शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः ।
सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु ॥ ३ ॥

स सुक्रतुः पुरोहितो दमेदमेऽग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति ।
क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे ।
यतो घृतश्रीरतिथिरजायत वह्निर्वेधा अजायत ॥ ४ ॥

तं । यज्ञऽसाधं । अपि । वातयामसि । ऋतस्य । पथा । नमसा । हविष्मता । देवऽताता । हविष्मता ॥ सः । नः । ऊर्जा । उपऽआभृति । अया । कृपा । न । जूर्यति । यं । मातरिश्वा । मनवे । पराऽवतः । देवं । भारिति भाः । पराऽवतः ॥ २ ॥
एवेन । सद्यः । परि । एति । पार्थिवं । मुहुःऽगीः । रेतः । वृषभः । कनिक्रदत् । दधत् । रेतः । कनिक्रदत् ॥ शतं । चक्षाणः । अक्षऽभिः । देवः । वनेषु । तुर्वणिः ॥ सदः । दधानः । उपरेषु । सानुषु । अग्निः । परेषु । सानुषु ॥ ३ ॥ सः । सुऽक्रतुः । पुरःऽहितः । दमेऽदमे । अग्निः । यज्ञस्य । अध्वरस्य । चेतति । क्रत्वा । यज्ञस्य । चेतति ॥ क्रत्वा । वेधाः । इषुऽयते । विश्वा । जातानि । पस्पशे । यतः । घृतऽश्रीः । अतिथिः । अजायत । वह्निः । वेधाः । अजायत ॥ ४ ॥

क्रत्वा यदस्य तविषीषु पृञ्चतेऽग्नेरवेण मरुतां न भोज्येषिराय न भोज्या।
स हि ष्मा दानमिन्वति वसूनां च मज्मना।
स नस्त्रासते दुरितादभिहुतः शंसादघादभिहुतः ॥ ५ ॥ १४ ॥
विश्वो विहाया अरतिर्वसुर्दधे हस्ते दक्षिणे तरणिर्न शिश्रथच्छ्रवस्यया न शिश्रथत्। विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे।
विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति ॥ ६ ॥
स मानुषे वृजने शन्तमो हितो३ऽग्निर्यज्ञेषु जेन्यो न विश्पतिः प्रियो यज्ञेषु विश्पतिः। स हव्या मानुषाणामिळा कृतानि पत्यते।
स नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः ॥ ७ ॥

क्रत्वा। यत्। अस्य। तविषीषु। पृञ्चते। अग्नेः। अवेन। मरुताम्। न। भोज्या। इषिराय। न। भोज्या ॥ सः। हि। स्म। दानम्। इन्वति। वसूनाम्। च। मज्मना। सः। नः। त्रासते। दुःऽइतात्। अभिऽहुतः। शंसात्। अघात्। अभिऽहुतः ॥ ५ ॥ १४ ॥
विश्वः। विऽहायाः। अरतिः। वसुः। दधे। हस्ते। दक्षिणे। तरणिः। न। शिश्रथत्। श्रवस्यया। न। शिश्रथत् ॥ विश्वस्मै। इत्। इषुध्यते। देवऽत्रा। हव्यम्। आ। ऊहिषे। विश्वस्मै। इत्। सुऽकृते। वारम्। ऋण्वति। अग्निः। द्वारा। वि। ऋण्वति ॥ ६ ॥ सः। मानुषे। वृजने। शम्ऽतमः। हितः। अग्निः। यज्ञेषु। जेन्यः। न। विश्पतिः। प्रियः। यज्ञेषु। विश्पतिः ॥ सः। हव्या। मानुषाणाम्। इळा। कृतानि। पत्यते। सः। नः। त्रासते। वरुणस्य। धूर्तेः। महः। देवस्य। धूर्तेः ॥ ७ ॥

अग्निं होतारमीळते वसुंधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे ।
विश्वायुं विश्ववेदसं होतारं यजतं कविम् ।
देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसूयवः ॥ ८ ॥ १५ ॥

॥ १२९ ॥ ऋषिः–परुच्छेपः । देवता–इन्द्रः । छन्दः–अत्यष्टिः ॥

॥ १२९ ॥ यं त्वं रथमिन्द्र मेधसातयेऽपाका सन्तमिषिर प्रणयसि प्रानवद्य नयसि । सद्यश्चित्तमभिष्टये करो वशश्च वाजिनम् ।
सास्माकमनवद्य तूतुजान वेधसामिमां वाचं न वेधसाम् ॥ १ ॥
स श्रुधि यः स्मा पृतनासु कासु चिद्दक्षाय्य इन्द्र भरहूतये नृभिरसि प्रतूर्तये नृभिः । यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरुता ।
तमीशानास इरधन्त वाजिनं पृक्षमत्यं न वाजिनम् ॥ २ ॥

अग्निं । होतारं । ईळते । वसुंऽधितिं । प्रियं । चेतिष्ठं । अरतिं । नि । एरिरे । हव्यऽवाहं । नि । एरिरे ॥ विश्वऽआयुं । विश्वऽवेदसं । होतारं । यजतं । कविं । देवासः । रण्वं । अवसे । वसुऽयवः । गीःऽभिः । रण्वं । वसुऽयवः ॥ ८ ॥ १५ ॥

यं । त्वं । रथं । इंद्र । मेधऽसातये । अपाका । संतं । इषिर । प्रऽनयसि । प्र । अनवद्य । नयसि ॥ सद्यः । चित् । तं । अभिष्टये । करः । वशः । च । वाजिनं । सः । अस्माकं । अनवद्य । तूतुजान । वेधसां । इमां । वाचं । न । वेधसां ॥ १ ॥
सः । श्रुधि । यः । स्म । पृतनासु । कासु । चित् । दक्षाय्यः । इंद्र । भरऽहूतये । नृऽभिः । असि । प्रऽतूर्तये । नृऽभिः ॥ यः । शूरैः । स्वरिति स्वः । सनिता । यः । विप्रैः । वाजं । तरुता । तं । ईशानासः । इरधंत । वाजिनं । पृक्षं । अत्यं । न । वाजिनं ॥ २ ॥

दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीररुं शूर मर्त्यं परिवृणक्षि मर्त्यम् । इन्द्रोत तुभ्यं तद्दिवे तद्रुद्राय स्वयशसे ।
मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः ॥ ३ ॥
अस्माकं व इन्द्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजम् । अस्माकं ब्रह्मोतयेऽवा पृत्सुषु कासु चित् ।
नहि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यम् ॥ ४ ॥
नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः ।
नेषि णो यथा पुरानेनाः शूर मन्यसे ।
विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ॥ ५ ॥ १६ ॥

दस्मः । हि । स्म । वृषणं । पिन्वसि । त्वचं । कं । चित् । यावीः । अररुं । शूर । मर्त्यं । परिऽवृणक्षि । मर्त्यं ॥ इंद्र । उत । तुभ्यं । तत् । दिवे । तत् । रुद्राय । स्वऽयशसे । मित्राय । वोचं । वरुणाय । सऽप्रथः । सुऽमृळीकाय । सऽप्रथः ॥ ३ ॥
अस्माकं । वः । इंद्रं । उश्मसि । इष्टये । सखायं । विश्वऽआयुं । प्रऽसहं । युजं । वाजेषु । प्रऽसहं । युजं ॥ अस्माकं । ब्रह्म । ऊतये । अव । पृत्सुषु । कासु । चित् । नहि । त्वा । शत्रुः । स्तरते । स्तृणोषि । यं । विश्वं । शत्रुं । स्तृणोषि । यं ॥ ४ ॥ नि । सु । नम । अतिऽमतिं । कयस्य । चित् । तेजिष्ठाभिः । अरणिऽभिः । न । ऊतिऽभिः । उग्राभिः । उग्र । ऊतिऽभिः ॥ नेषि । नः । यथा । पुरा । अनेनाः । शूर । मन्यसे । विश्वानि । पुरोः । अप । पर्षि । वह्निः । आसा । वह्निः । नः । अच्छ ॥ ५ ॥ १६ ॥

प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति ।
स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम् ।
अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥ ६ ॥
वनेम तद्धोत्रया चितन्त्या वनेम रयिं रयिवः सुवीर्यं रण्वं सन्तं सुवीर्यम् ।
दुर्मन्मानं सुमन्तुभिरेमिषा पृचीमहि ।
आ सत्याभिरिन्द्रं द्युम्नहूतिभिर्यजत्रं द्युम्नहूतिभिः ॥ ७ ॥
प्रप्रा वो अस्मे स्वयशोभिरूती परिवर्ग इन्द्रो दुर्मतीनां दरीमन्दुर्मतीनाम् ।
स्वयं सा रिषयध्यै या न उपेषे अत्रैः ।
हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति ॥ ८ ॥

प्र । तत् । वोचेयं । भव्याय । इन्दवे । हव्यः । न । यः । इषऽवान । मन्म । रेजति । रक्षःऽहा । मन्म । रेजति ॥ स्वयं । सः । अस्मत् । आ । निदः । वधैः । अजेत । दुःऽमतिं । अव । स्रवेत् । अघऽशंसः । अवऽतरं । अव । क्षुद्रंऽइव । स्रवेत् ॥ ६ ॥ वनेम । तत् । होत्रया । चितन्त्या । वनेम । रयिं । रयिऽवः । सुऽवीर्यं । रण्वं । सन्तं । सुऽवीर्यं ॥ दुःऽमन्मानं । सुमन्तुऽभिः । आ । ईं । इषा । पृचीमहि । आ । सत्याभिः । इन्द्रं । द्युम्नहूतिऽभिः । यजत्रं । द्युम्नहूतिऽभिः ॥ ७ ॥ प्रऽप्र । वः । अस्मे इति । स्वयशःऽभिः । ऊती । परिऽवर्गे । इन्द्रः । दुःऽमतीनां । दरीमन् । दुःऽमतीनां ॥ स्वयं । सा । रिषयध्यै । या । नः । उपऽईषे । अत्रैः । हता । ईं । असत् । न । वक्षति । क्षिप्ता । जूर्णिः । न । वक्षति ॥ ८ ॥

त्वं न इन्द्र राया परीणसा याहि पथाँ अनेहसा पुरो याह्यरक्षसा ।
सचस्व नः पराक आ सचस्वास्तमीक आ ।
पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः ॥ ९ ॥
त्वं न इन्द्र राया तरूषसोग्रं चित्त्वा महिमा सक्षदवसे महे मित्रं नावसे ।
ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य ।
अन्यमस्मद्रिरिषेः कं चिदद्रिवो रिरिक्षन्तं चिदद्रिवः ॥ १० ॥
पाहि न इन्द्र सुष्टुत स्रिधोऽवयाता सदमिद्दुर्मतीनां देवः सन्दुर्मतीनाम् ।
हन्ता पापस्य रक्षसस्त्राता विप्रस्य मावतः ।
अधा हि त्वा जनिता जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो ॥ ११ ॥१७॥

त्वं । नः । इंद्र । राया । परीणसा । याहि । पथा । अनेहसा । पुरः । याहि । अर-क्षसा ॥ सचस्व । नः । पराके । आ । सचस्व । अस्तंऽईके । आ । पाहि । नः । दूरात् । आरात् । अभिष्टिंऽभिः । सदा । पाहि । अभिष्टिंऽभिः ॥ ९ ॥ त्वं । नः । इंद्र । राया । तरूषसा । उग्रं । चित् । त्वा । महिमा । सक्षत् । अवसे । महे । मित्रं । न । अवसे ॥ ओजिष्ठ । त्रातः । अवितरिति । रथं । कं । चित् । अमर्त्य । अन्यं । अस्मत् । रिरिषेः । कं । चित् । अद्रिऽवः । रिरिक्षंतं । चित् । अद्रिऽवः ॥ १० ॥ पाहि । नः । इंद्र । सुऽस्तुत । स्रिधः । अवऽयाता । सदं । इत् । दुःऽमतीनां । देवः । सन् । दुःऽमतीनां ॥ हंता । पापस्य । रक्षसः । त्राता । विप्रस्य । माऽवतः । अध । हि । त्वा । जनिता । जीजनत् । वसो इति । रक्षःऽहनं । त्वा । जीजनत् । वसो इति ॥ ११ ॥ १७ ॥

॥ १३० ॥ ऋषिः–परुच्छेपः । देवता–इन्द्रः । छन्दः–अत्यष्टिः ॥

॥१३०॥ एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पति-
रस्तं राजेव सत्पतिः । हवामहे त्वा वयं प्रयस्वन्तः सुते सचा ।
पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥ १ ॥
पिबा सोममिन्द्र सुवानमद्रिभिः कोशेन सिक्तमवतं न वंसगस्तातृषाणो
न वंसगः । मदाय हर्यताय ते तुविष्टमाय धायसे ।
आ त्वा यच्छन्तु हरितो न सूर्यमहा विश्वेव सूर्यम् ॥ २ ॥
अविन्दद्दिवो निहितं गुहा निधिं वेर्न गर्भं परिवीतमश्मन्यनन्ते अन्तरश्मनि ।
व्रजं वज्री गवामिव सिषासन्नङ्गिरस्तमः ।
अपावृणोदिष इन्द्रः परीवृता द्वार इषः परीवृताः ॥ ३ ॥

आ । इंद्र । याहि । उप । नः । पराऽवतः । न । अयं । अच्छ । विदथानिऽइव । सत्ऽपतिः । अस्तं । राजाऽइव । सत्ऽपतिः ॥ हवामहे । त्वा । वयं । प्रयस्वंतः । सुते । सचा । पुत्रासः । न । पितरं । वाजऽसातये । मंहिष्ठं । वाजऽसातये ॥ १ ॥
पिब । सोमं । इंद्र । सुवानं । अद्रिऽभिः । कोशेन । सिक्तं । अवतं । न । वंसगः । ततृषाणः । न । वंसगः ॥ मदाय । हर्यताय । ते । तुविःऽतमाय । धायसे । आ । त्वा । यच्छंतु । हरितः । न । सूर्यं । अहा । विश्वाऽइव । सूर्यं ॥ २ ॥ अविंदत् । दिवः । निऽहितं । गुहा । निऽधिं । वेः । न । गर्भं । परिऽवीतं । अश्मनि । अनंते । अंतः । अश्मनि ॥ व्रजं । वज्री । गवांऽइव । सिसासन् । अंगिरःऽतमः । अप । अवृणोत् । इषः । इंद्रः । परिऽवृताः । द्वारः । इषः । परिऽवृताः ॥ ३ ॥

दाद्दहाणो वज्रमिन्द्रो गभस्त्योः क्षद्मेव तिग्ममसनाय सं श्यदहिहत्याय सं श्यत्। संविव्यान ओजसा शवोभिरिन्द्र मज्मना।
तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि ॥ ४ ॥

त्वं वृथा नद्य इन्द्र सर्तवेऽच्छा समुद्रमसृजो रथाँ इव वाजयतो रथाँ इव।
इत ऊतीरयुञ्जत समानमर्थमक्षितम्।
धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः ॥ ५ ॥ १८ ॥

इमां ते वाचं वसूयन्त आयवो रथं न धीरः स्वपा अतक्षिषुः सुम्नाय त्वामतक्षिषुः। शुम्भन्तो जेन्यं यथा वाजेषु विप्र वाजिनम्।
अत्यमिव शवसे सातये धना विश्वा धनानि सातये ॥ ६ ॥

दद्दहाणः। वज्रं। इंद्रः। गभस्त्योः। क्षद्मऽइव। तिग्मं। असनाय। सं। श्यत्। अहिऽहत्याय। सं। श्यत्॥ संऽविव्यानः। ओजसा। शवःऽभिः। इंद्र। मज्मना। तष्टाऽइव। वृक्षं। वनिनः। नि। वृश्चसि। परश्वाऽइव। नि। वृश्चसि ॥ ४ ॥
त्वं। वृथा। नद्यः। इंद्र। सर्तवे। अच्छ। समुद्रं। असृजः। रथान्ऽइव। वाजऽयतः। रथान्ऽइव॥ इतः। ऊतीः। अयुंजत। समानं। अर्थं। अक्षितं। धेनूःऽइव। मनवे। विश्वऽदोहसः। जनाय। विश्वऽदोहसः ॥ ५ ॥ १८ ॥ इमां। ते। वाचं। वसुऽयंतः। आयवः। रथं। न। धीरः। सुऽअपाः। अतक्षिषुः। सुम्नाय। त्वां। अतक्षिषुः॥ शुंभंतः। जेन्यं। यथा। वाजेषु। विप्र। वाजिनं। अत्यंऽइव। शवसे। सातये। धना। विश्वा। धनानि। सातये ॥ ६ ॥

भिनत्पुरो नवतिमिन्द्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो । अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत् ।
महो धनानि दयमान ओजसा विश्वा धनान्योजसा ॥ ७ ॥
इन्द्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजिषु ।
मनवे शासदव्रतान्त्वचं कृष्णामरन्धयत् ।
दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ॥ ८ ॥
सूरश्चक्रं प्र बृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ मुषायति । उशना यत्परावतोऽजगन्नूतये कवे ।
सुम्नानि विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः ॥ ९ ॥
स नो नव्येभिर्वृषकर्मन्नुक्थैः पुरां दर्तः पायुभिः पाहि शग्मैः ।
दिवोदासेभिरिन्द्र स्तवानो वावृधीथा अहोभिरिव द्यौः ॥ १० ॥ १९ ॥

भिनत् । पुरः । नवतिं । इंद्र । पूरवे । दिवःऽदासाय । महि । दाशुषे । नृतो इति । वज्रेण । दाशुषे । नृतो इति ॥ अतिथिऽग्वाय । शंबरं । गिरेः । उग्रः । अव । अभरत् । महः । धनानि । दयमानः । ओजसा । विश्वा । धनानि । ओजसा ॥ ७ ॥
इंद्रः । समत्ऽसु । यजमानं । आर्यं । प्र । आवत् । विश्वेषु । शतम्ऽऊतिः । आजिषु । स्वःऽमीळ्हेषु । आजिषु ॥ मनवे । शासत् । अव्रतान् । त्वचं । कृष्णां । अरंधयत् । धक्षत् । न । विश्वं । ततृषाणं । ओषति । नि । अर्शसानं । ओषति ॥ ८ ॥
सूरः । चक्रं । प्र । बृहत् । जातः । ओजसा । प्रऽपित्वे । वाचं । अरुणः । मुषायति । ईशानः । आ । मुषायति ॥ उशना । यत् । पराऽवतः । अजगन् । ऊतये । कवे । सुम्नानि । विश्वा । मनुषाऽइव । तुर्वणिः । अहा । विश्वाऽइव । तुर्वणिः ॥ ९ ॥
सः । नः । नव्येभिः । वृषऽकर्मन् । उक्थैः । पुरां । दर्तरिति दर्तः । पायुऽभिः । पाहि । शग्मैः । दिवःऽदासेभिः । इंद्र । स्तवानः । ववृधीथाः । अहोभिःऽइव । द्यौः ॥ १० ॥ १९ ॥

॥ १३१ ॥ ऋषिः-परुच्छेपः । देवता-इन्द्रः । छन्दः-अत्यष्टिः ॥

॥ १३१ ॥ इन्द्राय हि द्यौरसुरो अनम्नतेन्द्राय मही पृथिवी वरीमभिर्द्युम्नसाता वरीमभिः । इन्द्रं विश्वे सजोषसो देवासो दधिरे पुरः ।
इन्द्राय विश्वा सवनानि मानुषा रातानि सन्तु मानुषा ॥ १ ॥
विश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक् । तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि ।
इन्द्रं न यज्ञैश्चितयन्त आयवः स्तोमेभिरिन्द्रमायवः ॥ २ ॥
वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य निःसृजः सक्षन्त इन्द्र निःसृजः । यद्गव्यन्ता द्वा जना स्वर्यन्ता समूहसि ।
आविष्करिक्रद्वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम् ॥ ३ ॥

इंद्राय । हि । द्यौः । असुरः । अनम्नत । इंद्राय । मही । पृथिवी । वरीमऽभिः । द्युम्नऽसाता । वरीमऽभिः ॥ इंद्रं । विश्वे । सऽजोषसः । देवासः । दधिरे । पुरः । इंद्राय । विश्वा । सवनानि । मानुषा । रातानि । संतु । मानुषा ॥ १ ॥
विश्वेषु । हि । त्वा । सवनेषु । तुंजते । समानं । एकं । वृषऽमन्यवः । पृथक् । स्वरितिं स्वः । सनिष्यवः । पृथक् ॥ तं । त्वा । नावं । न । पर्षणिं । शूषस्य । धुरि । धीमहि । इंद्रं । न । यज्ञैः । चितयंतः । आयवः । स्तोमेभिः । इंद्रं । आयवः ॥ २ ॥
वि । त्वा । ततस्रे । मिथुनाः । अवस्यवः । व्रजस्य । साता । गव्यस्य । निःऽसृजः । सक्षंतः । इंद्र । निःऽसृजः ॥ यत् । गव्यंता । द्वा । जना । स्वः । यंता । संऽऊहसि । आविः । करिक्रत् । वृषणं । सचाऽभुवं । वज्रं । इंद्र । सचाऽभुवं ॥ ३ ॥

विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिन्द्र शारदीरवातिरः सासहानो अवातिरः ।
शासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते ।
महीममुष्णाः पृथिवीमिमा अपो मन्दसान इमा अपः ॥ ४ ॥
आदित्ते अस्य वीर्यस्य चर्किरन्मदेषु वृषन्नुशिजो यदाविथ सखीयतो यदाविथ ।
चकर्थ कारमेभ्यः पृतनासु प्रवन्तवे ।
ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यन्तः सनिष्णत ॥ ५ ॥
उतो नो अस्या उषसो जुषेत ह्यर्कस्य बोधि हविषो हवीमभिः स्वर्षाता
हवीमभिः । यदिन्द्र हन्तवे मृधो वृषा वज्रिञ्चिकेतसि ।
आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ॥ ६ ॥
त्वं तमिन्द्र वावृधानो अस्मयुरमित्रयन्तं तुविजात मर्त्यं वज्रेण शूर मर्त्यम् ।
जहि यो नो अघायति शृणुष्व सुश्रवस्तमः ।
रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः ॥ ७ ॥ २० ॥

विदुः । ते । अस्य । वीर्यस्य । पूरवः । पुरः । यत् । इंद्र । शारदीः । अवऽअतिरः ।
ससहानः । अवऽअतिरः ॥ शासः । तं । इंद्र । मर्त्यं । अयज्युं । शवसः । पते । महीं ।
अमुष्णाः । पृथिवीं । इमाः । अपः । मंदसानः । इमाः । अपः ॥ ४ ॥ आत् । इत् ।
ते । अस्य । वीर्यस्य । चर्किरन् । मदेषु । वृषन् । उशिजः । यत् । आविथ ।
सखिऽयतः । यत् । आविथ ॥ चकर्थ । कारं । एभ्यः । पृतनासु । प्रऽवंतवे । ते ।
अन्याऽअन्यां । नद्यं । सनिष्णत । श्रवस्यंतः । सनिष्णत ॥ ५ ॥ उतो इति । नः ।
अस्याः । उषसः । जुषेत । हि । अर्कस्य । बोधि । हविषः । हवीमऽभिः । स्वःऽसाता ।
हवीमऽभिः ॥ यत् । इंद्र । हंतवे । मृधः । वृषा । वज्रिन् । चिकेतसि । आ । मे ।
अस्य । वेधसः । नवीयसः । मन्म । श्रुधि । नवीयसः ॥ ६ ॥ त्वं । तं । इंद्र ।
ववृधानः । अस्मऽयुः । अमित्रऽयंतं । तुविऽजात । मर्त्यं । वज्रेण । शूर । मर्त्यं ॥
जहि । यः । नः । अघऽयति । शृणुष्व । सुश्रवःऽतमः । रिष्टं । न । यामन् । अप ।
भूतु । दुःऽमतिः । विश्वा । अप । भूतु । दुःऽमतिः ॥ ७ ॥ २० ॥

॥ १३२ ॥ ऋषिः—परुच्छेपः । देवता—इन्द्रः । छन्दः—अत्यष्टिः ॥

॥ १३२ ॥ त्वया॑ व॒यं म॑घवन्पू॒र्व्ये धन॒ इन्द्र॑त्वोताः सासह्याम पृतन्य॒तो
व॑नु॒याम॑ वनुष्य॒तः । नेदि॑ष्ठे अ॒स्मिन्नह॒न्यधि॑ वोचा॒ नु सु॑न्व॒ते ।
अ॒स्मिन्य॒ज्ञे वि च॑येमा॒ भरे॑ कृ॒तं वा॑ज॒यन्तो॒ भरे॑ कृ॒तम् ॥ १ ॥
स्व॒र्जेषे॒ भर॑ आ॒प्रस्य॒ वक्म॑न्युष॒र्बुधः॒ स्वस्मि॒न्नञ्ज॑सि क्रा॒णस्य॒ स्वस्मि॒न्नञ्ज॑सि ।
अह॒न्निन्द्रो॒ यथा॑ वि॒दे शी॒र्ष्णाशी॑र्ष्णोपवा॒च्यः॑ ।
अ॒स्म॒त्रा ते॑ स॒ध्र्य॑क्सन्तु रा॒तयो॑ भ॒द्रा भ॒द्रस्य॑ रा॒तयः॑ ॥ २ ॥
नत्तु प्रयः॑ प्र॒त्नथा॑ ते शुशु॒कनं॑ यस्मि॑न्य॒ज्ञे वार॒मकृ॑ण्वत॒ क्षय॑मृ॒तस्य॒ वार॑सि॒
क्षय॑म् । वि तद्वो॑चे॒रध॑ द्वि॒तान्तः प॑श्यन्ति र॒श्मिभिः॑ ।
स घा॑ वि॒दे अन्विन्द्रो॑ ग॒वेष॑णो बन्धु॒क्षिद्भ्यो॑ ग॒वेष॑णः ॥ ३ ॥

त्वया॑ । व॒यं । म॒घ॒ऽव॒न् । पू॒र्व्ये । धने॑ । इन्द्र॑त्वाऽऊताः । स॒स॒ह्या॒म॒ । पृ॒त॒न्य॒तः ।
व॒नु॒याम॑ । व॒नु॒ष्य॒तः ॥ नेदि॑ष्ठे । अ॒स्मिन् । अह॑नि । अधि॑ । वो॒च॒ । नु । सु॒न्व॒ते ।
अ॒स्मिन् । य॒ज्ञे । वि । च॒ये॒म॒ । भरे॑ । कृ॒तं । वा॒ज॒ऽयन्तः॑ । भरे॑ । कृ॒तं ॥ १ ॥
स्वः॒ऽजेषे॑ । भरे॑ । आ॒प्रस्य॑ । वक्म॑नि । उ॒षः॒ऽबुधः॑ । स्वस्मि॑न् । अञ्ज॑सि । क्रा॒णस्य॑ ।
स्वस्मि॑न् । अञ्ज॑सि ॥ अह॑न् । इन्द्रः॑ । यथा॑ । वि॒दे । शी॒र्ष्णाऽशी॑र्ष्णा । उ॒प॒ऽवा॒च्यः॑ ।
अ॒स्म॒ऽत्रा । ते॒ । स॒ध्र्य॑क् । स॒न्तु॒ । रा॒तयः॑ । भ॒द्राः । भ॒द्रस्य॑ । रा॒तयः॑ ॥ २ ॥
नत् । तु । प्रयः॑ । प्र॒त्नऽथा॑ । ते॒ । शु॒शु॒कनं॑ । यस्मि॑न् । य॒ज्ञे । वार॑म् । अकृ॑ण्वत ।
क्षय॑म् । ऋ॒तस्य॑ । वाः । अ॒सि॒ । क्षय॑म् ॥ वि । तत् । वो॒चेः॒ । अध॑ । द्वि॒ता । अ॒न्तः । इति॑ ।
प॒श्य॒न्ति॒ । र॒श्मिऽभिः॑ । सः । घ॒ । वि॒दे॒ । अनु॑ । इन्द्रः॑ । गो॒ऽएष॑णः । ब॒न्धु॒क्षित्ऽभ्यः॑ ।
गो॒ऽएष॑णः ॥ ३ ॥

नू इत्था ते पूर्वथा च प्रवाच्यं यदङ्गिरोभ्योऽवृणोरप व्रजमिन्द्र शिक्षन्नप व्रजम् । ऐभ्यः समान्या दिशास्मभ्यं जेषि योत्सि च ।
सुन्वद्भ्यो रन्धया कं चिदव्रतं हृणायन्तं चिदव्रतम् ॥ ४ ॥
सं यज्जनान् क्रतुभिः शूर ईक्षयद्धने हिते तरुषन्त श्रवस्यवः प्र यक्षन्त श्रवस्यवः । तस्मा आयुः प्रजावदिद्बाधे अर्चन्त्योजसा ।
इन्द्र ओक्यं दिधिषन्त धीतयो देवाँ अच्छा न धीतयः ॥ ५ ॥
युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तन्तमिद्धतं वज्रेण तन्तमिद्धतम् । दूरे चत्ताय छन्त्सद्गहनं यदिनक्षत् ।
अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ॥ ६ ॥ २१ ॥

नु । इत्था । ते । पूर्वऽथा । च । प्रऽवाच्यं । यत् । अंगिरःऽभ्यः । अवृणोः । अप । व्रजं । इंद्र । शिक्षन् । अप । व्रजं ॥ आ । एभ्यः । समान्या । दिशा । अस्मभ्यं । जेषि । योत्सि । च । सुन्वत्ऽभ्यः । रंधय । कं । चित् । अव्रतं । हृणायंतं । चित् । अव्रतं ॥ ४ ॥ सं । यत् । जनान् । क्रतुऽभिः । शूरः । ईक्षयत् । धने । हिते । तरुषंत । श्रवस्यवः । प्र । यक्षंत । श्रवस्यवः ॥ तस्मै । आयुः । प्रजाऽवत् । इत् । बाधे । अर्चंति । ओजसा । इंद्रे । ओक्यं । दिधिषंत । धीतयः । देवान् । अच्छ । न । धीतयः ॥ ५ ॥ युवं । तं । इंद्रापर्वता । पुरःऽयुधा । यः । नः । पृतन्यात् । अप । तंऽतं । इत् । हतं । वज्रेण । तंऽतं । इत् । हतं ॥ दूरे । चत्ताय । छंत्सत् । गहनं । यत् । इनक्षत् । अस्माकं । शत्रून् । परि । शूर । विश्वतः । दर्मा । दर्षीष्ट । विश्वतः ॥ ६ ॥

॥ १३३ ॥ ऋषिः—परुच्छेप । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ १३३ ॥ उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरनिन्द्राः ।
अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृळ्हा अशेरन् ॥ १ ॥

अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनाम् ।
छिन्धि वटूरिणा पदा महावटूरिणा पदा ॥ २ ॥

अवासां मघवन् जहि शर्धो यातुमतीनाम् ।
वैलस्थानके अर्मके महावैलस्थे अर्मके ॥ ३ ॥

यासां तिस्रः पञ्चाशतोऽभिव्लङ्गैरपावपः ।
तत्सु ते मनायति तकत्सु ते मनायति ॥ ४ ॥

पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण ।
सर्वं रक्षो नि बर्हय ॥ ५ ॥

उभे इति । पुनामि । रोदसी इति । ऋतेन । द्रुहः । दहामि । सं । महीः । अनिन्द्राः । अभिऽव्लग्य । यत्र । हताः । अमित्राः । वैलऽस्थानं । परि । तृळ्हाः । अशेरन् ॥ १ ॥ अभिऽव्लग्य । चित् । अद्रिऽवः । शीर्षा । यातुऽमतीनां । छिन्धि । वटूरिणा । पदा । महाऽवटूरिणा । पदा ॥ २ ॥ अव । आसां । मघऽवन् । जहि । शर्धः । यातुऽमतीनां । वैलऽस्थानके । अर्मके । महाऽवैलस्थे । अर्मके ॥ ३ ॥ यासां । तिस्रः । पञ्चाशतः । अभिऽव्लङ्गैः । अपाऽअवपः । तत् । सु । ते । मनायति । तकत् । सु । ते । मनायति ॥४॥ पिशङ्गऽभृष्टिं । अम्भृणं । पिशाचिं । इन्द्र । सं । मृण । सर्वं । रक्षः । नि । बर्हय ॥ ५ ॥

अवर्मह इन्द्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो घृणान्न भीषाँ अद्रिवः ॥ शुष्मिन्तमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे । अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः ॥ ६ ॥

वनोति हि सुन्वन्क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः । सुन्वान इत्सिषासति सहस्रा वाज्यवृतः । सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम् ॥ ७ ॥ २२ ॥ १९ ॥

अवः । महः । इंद्र । ददृहि । श्रुधि । नः । शुशोचं । हि । द्यौः । क्षाः । न । भीषा । अद्रिऽवः । घृणात् । न । भीषा । अद्रिऽवः ॥ शुष्मिनऽतंमः । हि । शुष्मिऽभिः । वधैः । उग्रेभिः । ईयसे । अपुरुषऽघ्नः । अप्रतिऽइत । शूर । सत्वंऽभिः । त्रिऽसप्तैः । शूर । सत्वंऽभिः ॥ ६ ॥ वनोति । हि । सुन्वन् । क्षयं । परीणसः । सुन्वानः । हि । स्म । यजति । अवं । द्विषः । देवानां । अवं । द्विषः ॥ सुन्वानः । इत् । सिसासति । सहस्रा । वाजी । अवृतः । सुन्वानायं । इंद्रः । ददाति । आऽभुवं । रयिं । ददाति । आऽभुवं ॥ ७ ॥ २२ ॥ १९ ॥

॥ विंशोऽनुवाकः ॥

॥ ११४ ॥ ऋषिः-परुच्छेपः । देवता-वायुः । छन्दः-अत्यष्टिः ॥

॥ ११४ ॥ आ त्वा जुवों रारहाणा अभि प्रयो वायो वहन्त्विह पूर्वपीतये सोमस्य पूर्वपीतये । ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती । नियुत्वता रथेना याहि दावने वायो मखस्य दावने ॥ १ ॥

मन्दन्तु त्वा मन्दिनो वायविन्दवोऽस्मत्क्राणासः सुकृता अभिद्यवो गोभिः क्राणा अभिद्यवः ॥ यद्ध क्राणा इरध्यै दक्षं सचन्त ऊतयः । सध्रीचीना नियुतो दावने धिय उप ब्रुवत ईं धियः ॥ २ ॥

वायुर्युङ्क्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ॥ प्र बोधया पुरंधिं जार आ ससतीमिव । प्र चक्षय रोदसी वासयोषसः श्रवसे वासयोषसः ॥ ३ ॥

आ । त्वा । जुवः । ररहाणाः । अभि । प्रयः । वायो इति । वहन्तु । इह । पूर्वऽपीतये । सोमस्य । पूर्वऽपीतये ॥ ऊर्ध्वा । ते । अनु । सूनृता । मनः । तिष्ठतु । जानती । नियुत्वता । रथेन । आ । याहि । दावने । वायो इति । मखस्य । दावने ॥१॥ मंदंतु । त्वा । मंदिनः । वायो इति । इंदवः । अस्मत् । क्राणासः । सुऽकृताः । अभिऽद्यवः । गोभिः । क्राणाः । अभिऽद्यवः ॥ यत् । ह । क्राणाः । इरध्यै । दक्षं । सचंते । ऊतयः । सध्रीचीनाः । निऽयुतः । दावने । धियः । उप । ब्रुवते । ईं । धियः ॥ २ ॥ वायुः । युंक्ते । रोहिता । वायुः । अरुणा । वायुः । रथे । अजिरा । धुरि । वोळ्हवे । वहिष्ठा । धुरि । वोळ्हवे ॥ प्र । बोधय । पुरंऽधिं । जारः । आ । ससतींऽइव । प्र । चक्षय । रोदसी इति । वासय । उषसः । श्रवसे । वासय । उषसः ॥ ३ ॥

तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु । तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते ।
अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः ॥ ४ ॥
तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इषणन्त भुर्वण्यपामिषन्त भुर्वणि ।
त्वां त्सारी दसमानो भगमीट्टे तक्ववीये ।
त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा ॥ ५ ॥
त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिमर्हसि ।
उतो विहुत्मतीनां विशां ववर्जुषीणाम् ।
विश्वा इत्ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरम् ॥ ६ ॥ २३ ॥

तुभ्यं । उषसः । शुचयः । पराऽवति । भद्रा । वस्त्रा । तन्वते । दंऽसु । रश्मिषु । चित्रा । नव्येषु । रश्मिषु ॥ तुभ्यं । धेनुः । सबःऽदुघा । विश्वा । वसूनि । दोहते । अजनयः । मरुतः । वक्षणाभ्यः । दिवः । आ । वक्षणाभ्यः ॥ ४ ॥ तुभ्यं । शुक्रासः । शुचयः । तुरण्यवः । मदेषु । उग्राः । इषणंत । भुर्वणि । अपां । इषंत । भुर्वणि ॥ त्वां । त्सारी । दसमानः । भगं । ईट्टे । तक्वऽवीये । त्वं । विश्वस्मात् । भुवनात् । पासि । धर्मणा । असुर्यात् । पासि । धर्मणा ॥ ५ ॥ त्वं । नः । वायो इति । एषां । अपूर्व्यः । सोमानां । प्रथमः । पीतिं । अर्हसि । सुतानां । पीतिं । अर्हसि ॥ उतो इति । विहुत्मतीनां । विशां । ववर्जुषीणां । विश्वाः । इत् । ते । धेनवः । दुह्रे । आऽशिरं । घृतं । दुह्रते । आऽशिरं ॥ ६ ॥ २३ ॥

द्वितीय अष्टक । प्रथम मण्डल ।

॥ ऋग्वेद ॥

[प्रथम अध्याय] [अष्टादश अनुवाक]

सूक्त १२२.

॥ ऋषि–कक्षीवान् । देवता–विश्वेदेव ॥

हे ऋत्विज, आप बड़े उत्साही और चञ्चल हैं। अब अपना पेय, हवि और यज्ञ रुद्रको अर्पण कीजिये। आप (रुद्र) सिद्धि देनेवाले हैं। आकाशमें रहनेवाले परमेश्वरकी कृपासे वे पराक्रमी मरुत् अन्तरिक्षमें अपने बलसे रहते हैं। १

प्रथम आहुति पूर्ण उत्साहके साथ अर्पण करनेके लिये उषा और रात्रिकी कृपा प्राप्त करनी चाहिये। उषा और रात्रि नूतन वधूकी नाईं अपने शरीरको शोभायमान करती हैं। उनमेंसे एक (रात्रि) बिजलीरूपी वस्त्र पहिनकर चमकती है, और दूसरी (उषा) प्रातःकालमें सूर्यके किरणोंसे शोभायमान दिखाई देती है। २

अन्धकारका नाश करनेवाला और आकाशमें सञ्चार करनेवाला सूर्य हमें आनन्दित करें। जलकी वर्षा करनेवाला वायु हमें आनन्दित करें। हे इन्द्र और पर्वत, हमारी बुद्धि कुशाग्र होवें; और सब देव मिलकर हमें सब वस्तुओंका लाभ करा दें। ३

मैं उशिजाका पुत्र हूं। आप संसारका पालन करनेवाले हैं। आपका कभी नाश नहीं होता है। आप दोनों यश देनेवाले हैं और इसलिये प्रातःकालके समय में आपको (दोनों अश्विनको) बुलाता हूं। आप अपने अग्निकी क्रमसे स्तुति कीजिये। अग्निको प्रकट करनेवाली दोनों लकड़ियोंको अपने सामने रखिये। यह अग्नि आकाशमें रहनेवाले जलमें भी प्रकट होता है। बडे जोरसे चिल्लाकर यह अग्नि अपने भक्तोंको आशीस देता है। ४

---

१ हे रत्नुमन्यवः (यूयं) वः पान्तं अंधः यज्ञं (च) मीळ्हुषे रुद्राय प्र भरध्वम्, (अहच) असुरस्य दिवः वीरैः इषुध्येव रोदस्योः (स्थितान्) मरुतः अस्तोषि।

२ पूर्वहूतिं वव्रधध्यै उषसानक्ता पुरुधा विदाने (स्तवनीये)। (तयोः एका) स्तरीः न व्युतं अत्क वसाना, (अपरा) सूर्यस्य श्रिया हिरण्यैः (इव) सुदृशी।

३ परिज्मा वसर्हा नः ममत्तु, अपां वृषण्वान् वातः ममत्तु, हे इन्द्रापर्वता युवः नः शिशीतम्, तत् विश्वेदेवाः नः वरिवस्यन्तु।

४ उत औशिजः श्वेतनार्य, त्या मे यशसा व्यता पांता हुवध्यै (प्रवृत्तः), (यूयं) वः अपां नपातं प्र कृणुध्वम्, रस्पिनस्य आयोः मातरा प्र (कृणुध्वम्)।

मैं उशिजाका पुत्र हूं। आपके लिये जोरसे चिल्लानेवाले अग्निकी मैं स्तुति करता हूं। कोढ रोगका नाश होनेके लिये घोषाने भी इस प्रकार आपकी स्तुति की थी। आपहीके लिये दानी पूषाकी कृपा मैं प्राप्त कर लेता हूं और धनका लाभ होनेके लिये मैं अग्निसे प्रार्थना करता हूं। ५(१)

हे मित्र और वरुण, मेरी पुकारकी ओर ध्यान दीजिये। जब आप अपने घरमें रहते हैं तब भी मेरी प्रार्थनाकी ओर ध्यान दीजिये। चारों तरफसे मैं आपकी प्रार्थना करता हूं। हमारी पुकार शीघ्रतासे सुननेवाला सिन्धु भी हमारी स्तुति सुने। आपका दान सबको विदित ही है। यह सिन्धु उपजाऊ प्रदेशको अपने जलसे भर देता है। ६

हे मित्र और वरुण, पज्र कुलमें उत्पन्न हुए मुझको अनेक यज्ञके समय आपने सैंकडों गौधनका दान प्रदान किया हैं। उसका स्मरण करके मैं आपके दानी स्वभावकी बडी स्तुति करता हूं। जिनके रथका दर्शन होते ही प्रेम उत्पन्न होता है वे मित्र और वरुण रथमें बैठकर वैभवके साथ आते हैं। ७

जिनका वैभव बहुत बडा है उन (परमेश्वरके) दानी स्वभावकी मैं बहुत प्रशंसा करता हूं। आप बडे पराक्रमी है। हम सब मिलकर आपके गुणोंकी प्रशंसा करते हैं। पज्र कुलमें उत्पन्न हुए मुझको आपहीने पवित्र सामर्थ्य अर्पण किया। घोडोंपर सवार होकर मुझे सहायता देनेके लिये वीर पुरुषोंके मनमें (बुद्धिवान्) आपही प्रेरणा उत्पन्न करते हैं। ८

हे मित्र और वरुण, खुले तौरपर लोगोंका द्वेष करनेवाले, सोमरसका पान करके आपकी सेवा न करनेवाले, और कपटसे दूसरे लोगोंका नाश करनेवाले दुष्ट लोगोंको जब विदित होता है कि सदाचारी भक्तोंकी सेवा अच्छी तरह सफल हुई है, तब उनके हृदयमें एक प्रकारका रोग (चिन्ता) उत्पन्न होता है। ९

---

५ औशिजः वः (अर्थे) स्वण्युं आ हुवध्यै शंसं (कर्तुं प्रवृत्तः), अर्जुनस्य नशे घोषा इव; वः (अर्थे) दानवे पूष्णे आ प्र (वोचेय), अग्नेः वसुतातिं अच्छ वोचेय।

६ हे मित्रावरुणा मे इमा हवा श्रुतम्, उत सदने (अपि) विश्वतः सीम् श्रुतम्; सुश्रोतुः सिन्धुः नः श्रोतु, (अद्य) श्रोनुरातिः सुक्षेत्रा अद्भिः (पिपर्ति)।

७ हे वरुण मित्र वां वृक्षयामेषु पज्रे (मयि) सा गवां शता रातिः स्तुषे; प्रियरथे श्रुतरथः सद्यः पुष्टिं दधानाः (तांश्च) निरुधानासः अग्मन्।

८ (अहम्) अस्य महिमघस्य राधः स्तुषे, (वयं) सुवीराः नहुषः (अतः) सचा सनेम; (अपिच) यो जनः पज्रेभ्यः वाजिनीवान् (अस्ति), अश्वावतः रथिनः मह्यं सूरिः हि (चास्ति)।

९ मित्रावरुणौ यः जनः अभिध्रुक् वः अपां न सुनोति; अक्ष्णयाध्रुक् च, सः बत् ऋतावा होत्राभिः ईम् आप (इति पश्यति तदा); स्वयं हृदये यक्ष्म नि धत्ते।

दूसरी ओर उपर्युक्त भक्तगणोंकी इतना शीघ्र उत्कर्ष होता है कि सब लोग आश्चर्य करते हैं। पराक्रमी पुरुषोंमें भी वे भक्तगण दिनपर दिन बलवान होते हैं। सब लोगोंमें उनकी कीर्ति बढती हुई सब दूर फैलती है, चाहे जैसा संकट होवे, दानी और पराक्रमी भक्तगण, ऐसे बडे संकटसे भी अपनी रक्षा करते हैं। १०(२)

हे देव, जब भक्तगण आपको बुलाते हैं तब आप शीघ्रतासे आईये। हे देव, भक्तगणको सहज रीतिसे आप अमरत्वका पद दे सकते हैं। आकाशतक आप सहज रीतिसे जा सकते हैं। पराक्रमी पुरुषोंको सहायता देनेवाला कोई नहीं है। आप उनकी प्रार्थना सुनिये। आप उनको ऐसा सामर्थ्य दीजिये जिससे उनकी सब जगह प्रशंसा होवे। ११

प्रत्यक्ष रीतिसे देव कहते हैं कि 'जिन भक्तोंके यज्ञमें दस प्रकारके हवियोंका स्वीकार करनेके लिये हम जाते हैं उन भक्तोंका सामर्थ्य बहुत बढ जाता है'। जो पराक्रम और सामर्थ्यका केवल स्थान है ऐसे सब देव यज्ञमें हमे पवित्र सामर्थ्य प्राप्त करा दे। १२

कभी कभी देव अपने वचनसे कहते हैं कि 'चलिये, ये ऋत्विज दस प्रकारका हविरूपी अन्न लेकर हमारी ओर आये हैं; इसलिये हम उसका स्वीकार करते हैं'। इष्टाश्व अथवा इष्टरश्मि हमारे भक्तोंसे अधिक क्या कर सकते हैं? लोगोंपर अधिकार चलानेवाले और यश सम्पादन करनेवाले हमारे भक्त सचमुच शोभायमान दिखाई देते हैं। १३

कानमें सुवर्णके कुण्डल और गलेमें जेवरका हार पहिने हुए शरीरका लाभ सामर्थ्यवान देवकी कृपासे हमे प्राप्त होवे। स्वयंस्फूर्तिसे हमारे मुखसे निकलनेवाली स्तुति और स्तोत्र देदीप्यमान देव बडे प्रेमसे सुने। १४

---

१० सः (ऋतावा) दंसुजूतः, व्राधतः नहुषः शर्धस्तरः, नरां गूर्तश्रवाः, विश्वासु पृत्सु (सः) विसृष्टरातिः शूरः सदमित् बाळ्हमृत्वा याति।

११ अध मूरः नहुषः हवम् ग्मन्त, हे अमृतस्य मंद्रा राजानः (यूयं) नभोजुवः (तत्) रथवते महिना प्रशस्तये (यथा भवेत् तथा) निरवस्य राधः श्रोत।

१२ यस्य सूरेः दशतयस्य (धासेः) नंशे (वयं आगताः तस्य) एतं शर्ध धाम इति (देवाः) अवोचन्, येषु द्युम्नानि वसुतातिश्च ररन् ते विश्वेदेवाः प्रभृथेषु वाजम् सन्वन्तु।

१३ "यत् द्विः पञ्च अन्ना बिभ्रतः यन्ति (तस्मात्) दशतयस्य धासेः मन्दामहे" (इत्यपि ब्रुवन्ति)। किम् इष्टाश्वो वा इष्टरश्मिर्वा (करिष्यति)। एते ईशा नासः तरुषश्च (भक्ताः) नृन् ऋजते।

१४ (यत्) हिरण्यकर्णं मणिग्रीवम् अर्णः तत् विश्वेदेवाः नः वरिवस्यन्तु। अस्मे उभयेषु (विषये) सद्यः आ जग्मुषीः गिरः उस्राः अर्यः आचकन्तु।

मशर्शारके चार पुत्र और बड़ा बलवान् राजा आयवसके तीन पुत्र मुझे अब सता नहीं सकते। इसका कारण यह है कि, हे मित्र और वरुण, आपका बड़ा रथ अब दिखाई देने लगा है। उसके किरण भी बड़े सुन्दर दिखाई देते हैं। स्वयं वह रथ बड़ा तेजस्वी दिखाई देता है। १५ (३)

सूक्त १२३.

॥ ऋषि–कक्षीवान् । देवता–उषा ॥

यह उषा बड़ी सुन्दर दिखाई देती है। देखिये। उषाका बड़ा रथ जोता हुआ बिलकुल तैयार दिखाई देता है। उस रथकी चारों ओर तेजोमय प्रकाशका गोला चमकता हुआ दिखाई देता है। काले अन्धेरेसे बाहर निकलकर प्रकाशमान उषा लोगोंपर उपकार करनेके लिये अपना प्रकाश फैलाती हुई दिखाई देती है। १

जब सब लोग सोते हैं तब उषाही सबसे पहिले जागृत होती है। उषा मनसे भी अधिक पवित्र और सामर्थ्यवान है। आप सबसे श्रेष्ठ हैं। आप सबसे अधिक उदार हैं। हमेशा युवा अवस्थामें रहनेवाली सुन्दर उषा बारबार आकाशमें जन्म लेती है और वहांसे उच्च स्थानसे जगत्की चारों ओर दृष्टि फैंकती है। प्रथम हवि अर्पण करनेके समय सबमें पहिले उषा आ पहुंचती है। २

हे उषादेवी, आप सबसे उच्च स्थानमें जन्म लेती हैं और सब मनुष्योंकी रक्षा करती हैं। प्रत्येक दिनका सुख और दुःखका भाग हरएक मनुष्यको आप बाट देती हैं। हे उषादेवी, आप हमारी ओरसे स्वयं प्रकाशमान सूर्यको ऐसा कहिये कि हम बिलकुल निष्पाप हैं। वह सूर्य अब प्रकाशमान होनेवाला है। वह सबको चैतन्य दिलाता है। ३

प्रत्येक दिन उषादेवी भिन्नभिन्न प्रकारका पोषाक पहिनकर प्रकाशमान होती है। आप सब मनुष्योंको मिलती है। सज्जनलोगोंपर अनुग्रह करनेके लिये तेजोमय उषादेवी बड़े उत्साहके साथ आ रही है। जगत्में जितनी जितनी सुन्दर वस्तुएं हैं उन सबोंका रस (उपभोग) उषादेवी अपने प्रकाशके द्वारा चख लेती है। ४

---

१५ मशर्शारस्य चत्वारः जिष्णोः आयवसस्य राज्ञः त्रयः शिश्वः मा (अधुना न पीडयन्ति, यतः) हे मित्रावरुणा वां दीर्घाप्साः स्यूमगभस्तिः रथः सूरो न अद्यौत्।

१ दक्षिणायाः (उषसः) पृथु रथः अयोजि, एनम् अमृतासः देवासः आ अस्थुः। अर्या विहाय मानुषाय क्षयाय चिकित्सन्ती कृष्णात् उदस्थात्।

२ विश्वस्मात् भुवनात् पूर्वा अबोधि, (सा) वाजं जयती बृहती सनुत्री, युवतिः पुनर्भूः व्यख्यत्, उषाः पूर्वहूतौ प्रथमा आ अगन्।

३ हे देवी सुजाते उषाः यत् (त्वं) मर्त्यत्रा, अद्य नृभ्यः भागं विभजासि, अत्र देवः दमूना. सविता नः सूर्याय अनागसः इति वोचति।

४ दिवेदिवे नामा अधि दधाना अहना गृहं गृहं अच्छ याति, सिषासन्ती द्योतना च (उषाः) शश्वत् आ अगात्, वसूनाम् (च) अग्रमग्रम् इत् भजते।

हे उषादेवी, यह बात विदित हुई है कि आप भगवान् सूर्यदेवकी बहिन हैं। वरुणदेवकी भी आप नातेदार हैं। हे उषादेवी, सत्य और मनोहर स्तोत्र गानेकी प्रेरणा करनेवाली आपही हैं। सबसे पहले हम आपहीकी स्तुति करते हैं। पापकर्म करनेवाला जो मनुष्य है वह ठोकर खाकर नीचे गिर जाय। आप सदाचारी हैं; इस लिये आपकी सहायतासे हम पापी मनुष्यका एक क्षणमें नाश कर सकेंगे। ५(४)

अब हम सत्य और मनोहर स्तोत्र गाना शुरू करता हूं। कविकी प्रभा काव्यके द्वारा प्रकट होवे। प्रातःकालके समय अग्निकुण्डमें जो अग्नि है वह प्रदिप्त हो रहा है। जगत्में जितना धन आजतक अन्धेरेमें छुपा हुआ था वह सब धन उषाके प्रकाशके कारण अब प्रकट हुआ है। वह धन अब दिखाई देता है। ६

जब उषा दिखाई देती है तब रात अन्धेरेमें चली जाती है। इस तरह वर्षरूप पुरुषके ये दोन भाग है। रात और उषा अनुक्रमसे छोटी बड़ी होती है और एकके पीछे दूसरी चली जाती है। उषा और रात जब पृथ्वीपर सञ्चार करती है तब दोनों भिन्न स्वरूप धारण करती है। जब रात सब दूर अन्धकारको फैलाकर चली जाती है तब उसके पीछे उषा अपने प्रकाशके साथ रथमें बैठकर चली आती है। ७

जिस तरह उषा वरुणका रहनेका स्थानमें आज प्रकाशमान दिखाई देती है उसी तरह वह कल भी दिखाई देगी। इस तरह रात्रि और उषा लम्बे चौड़े आकाशमें सञ्चार करती है। उनको कोई दोष नहीं लगा सकता। वे दोनों निष्पाप है। वे निष्कलंक है। वे दोनों तीस दिन तक आकाशकी परिक्रमा करती है। इस तरह वे दोनों नियत समयपर अपना अपना काम पुरा करती हैं। ८

नये वर्षका नया दिन बतानवाली उषा अपने श्वेत रंग और तेजोमय प्रकाशके साथ गहिरे और काले अन्धकारसे बाहर निकलती हुई दिखाई देती है। उषा हमेशा अपना काम करनेमें मग्न हुई दिखाई देती है। तथापि सूर्यका नियत मार्ग छोड़कर उषा अपनी मर्यादाको नहीं उल्लंघन करती है। ९

---

५ (त्व) भगस्य स्वसा वरुणस्य जामिः, हे सूनृते उषः प्रथमा जरस्व। यः अघस्य धाता स पश्चाद्‌ध्याः त दक्षिणया रथेन जयेम।

६ सूनृताः उदीरतां, पुरन्धीः उदीरतां, अग्नयः च शुशुचानासः उदस्थुः। स्पार्हा वसूनि तमसा अप गूळ्हा (आसन् तानि) विभातीः उषसः आविः कृण्वन्ति।

७ अन्यत् अभि एति, अन्यत् अप एति, (एतावता संवत्सरस्य) विषुरूपे अहनी सं चरेते। (तयोः) परिक्षितोः अन्या तमः गुहा अकः, (अन्या) उषाः च शोशुचता रथेन अद्यौत्।

८ सदृशीः अद्य, उ श्वः इत् सदृशीः (एव) (एतादृशः) वरुणस्य दीर्घं धाम सचन्ते। अनवद्याः (ताः) एकैका त्रिंशतं योजनानि (एवं) क्रतुं सद्यः परि यन्ति।

२ हे वायो! अस्मत् इन्दवः मन्दिनः क्राणासः, सुकृताः अभिद्यवः, गोभिः क्राणाः अभिद्यवः त्वा मन्दन्तु। यत् ह क्राणाः ऊतयः (अश्वाः) दक्षं त्वां इरध्यै सचन्ते, यदा ते नियुतः धियः दावने सध्रीचीनाः (भवन्ति) (ऋत्विजः) ईं धियः उपब्रुवते।

३ वायुः (कदाचित्) रोहिताः वायु (कदाचित्) अरुणाः (अश्वाः) युङ्क्ते। (अथ) वायुः रथे धुरि वोळ्हवे, (रथे) वोळ्हवे अजिराः वहिष्ठाः (अश्वाः) धुरि (युङ्क्ते)। जारः आ ससतीं इव पुरंधिं प्रबोधय। रोदसी प्रचक्षय, उषसः वासय, अवसे उषसः वासय।

हे वायु, देदीप्यमान उषा आपके लिये अपना सुन्दर और महीन मंगल-वस्त्र अपने अपूर्व किरणोंमें—अपने अलौकिक किरणोंमें सब दूर फैलाती है। अमृतकी वर्षा करनेवाली किरणरूपी दिव्य धेनुएँ आपहीके लिये सुन्दर वस्तुओंको देती (दिलाती) हैं। आकाशके उदरमें (अन्तरिक्षमें) आपही तूफान उत्पन्न करते हैं। नदीयोंको बहानेके लिये ही आप (समुद्रमें) आन्धी उत्पन्न करते हैं। ४

ये स्वच्छ सोमरस स्फूर्ती देनेवाले हैं। वे सोमरस आपको (वायूको) आरामसे बैठने नहीं देते। वे आपको (वायूको) अन्तरिक्षमें घुमाते हैं। वे आपके द्वारा पृथ्वीपर वर्षा कराते हैं। जब कोई यात्री प्रवास करते हुए थक जाता है और जब कोई चोर उसके ऊपर हमला करता है तब वह आपकी प्रार्थना करता है और आप उसकी रक्षा करते हैं। जब सब लोग आपके भक्तके विरुद्ध हैं तब आप उस भक्तकी भक्तिसे प्रसन्न होकर उसकी रक्षा करते हैं। गहरे अन्धःकारमें भी आप दिव्य शक्तिसे अपने भक्तकी रक्षा करते हैं। ५

हे वायु, (यज्ञमें) आप सबसे पहिले हैं। इस लिये हमारे सोमरसका पान सबसे पहिले आपहीको करना चाहिये। पहिले पहल सोमरसका पान करनेके लिये आपही योग्य हैं। आपको नानाप्रकारके हवि अर्पण करनेवाले और बैठनेके लिये दर्भासन देनेवाले भक्तोंने दिया हुआ सोमरसका पान आपको करना चाहिये। आपके लिये धेनुएं अच्छा दूध देती हैं। ६ (२१)

---

४ तुभ्यं शुचयः उषसः (स्वेषु) दंसु रश्मिषु नव्येषु रश्मिषु चित्रा भद्रा वस्त्रा परावति तन्वते। तुभ्यं सबर्दुघा धेनुः विश्वा वसूनि दोहते। त्वं मरुतः दिवः वक्षणाभ्यः, वक्षणाभ्यः आ अजनयः।

५ (इमे) शुक्रासः शुचयः (सोमासः) तुरण्यन्तः (परं च) मदेषु उग्राः त्वां इषणंत, भुर्वणि, अपां भुर्वणि इषणंत। त्सारी दसमानः (भक्तः) तक्ववीये त्वां भगं ईट्टे। (तदा) त्वम् (तं भक्तं) विश्वस्मात् भुवनात् धर्मणा पासि, असुर्यात् (अपि) धर्मणा पासि।

६ हे वायो, त्वं अपूर्व्यः प्रथमः, नः एषाम् सोमानां पीतिम् अर्हसि, सुतानां पीतिं अर्हसि। उत विहु-त्मतीनां, ववर्जुषीणां विशाम् (एष अयं सोमः)। ते इत् विश्वाः धेनवः आशिरं दुह्रे, घृतं आशिरं दुह्रे।

100,000

तिजोरियां

हरिचंद मन्छाराम एण्ड कंपनी की इ. स. १८७० से आज कत एक लाख तिजोरी बेची गई है। हरिचंदकी कंपनी सबसे पुरानी है। युरोपियन-अमेरिकन कंपनीके साथ टकर देनेवाली तथा सस्ती कीमतवाली सिर्फ हरिचंदही की कंपनी है। प्रायां स्वदेशी मालकी कीमत परदेशी मालसे अधिक रहती है किन्तु हरिचंद के तिजोरोका मूल्य इतना कम है कि परदेशी मालसे वह, बहुतसे बहुत, आधा होगा। यह असल तिजोरी देख कर डाकेखोरभी चकित हो गये हैं और इसके उपर

आगीकी मात्रा

भी नहीं चलती। इस बाबत इन तिजोरिओंको "आगीमें बिनधोक" ऐसा

बंबई प्रदर्शन

में सर्टिफिकीटभी मिल चुका है। जितने सर्टिफिकीट हमारे मालको मिले हैं उतने

उन्नचास सर्टिफिकीटों

दुसरे कोईभी कंपनीको अभीतक नहीं मिले. हमारा कंपनीका नूतन क्यॉटलाग तथा प्राइस लिस्ट जरूर मांग लीजिए.

हरिचंद मन्छाराम आणि कं०

हेड ऑफिस १२१, गुलालवाडी मुंबई.

Printed at Vaidya Brothers' Press, Thakurdwar, Bombay No. 2 & published at Shrutibodh Office 47 Kalbadevi Road, Bombay, by Gajanan Bhaskar Vaidya.

हिन्दी, मराठी, गुजराती और अङ्ग्रेजी चार
भाषाओं में अलग अलग प्रसिद्ध होनेवाला

वेदों का भाषांतर।

प्रति मास में ६४ पृष्ठ; ३२ पृष्ठ संहिता [स्वर और पदपाठ सहित]
* * ३२ पृष्ठ भाषान्तर। * *

वर्ष १] फाल्गुन संवत १९६९-एप्रिल सन १९१३ [अंक १०

वार्षिक मूल्य डाकव्ययसहित रु. ४

हिन्दी

सम्पादक,

रामचंद्र विनायक पटवर्धन, बी. ए. एल् एल्. बी.
अच्युत बलवंत कोल्हटकर, बी. ए. एल्. एल्. बी.
दत्तो आप्पाजी तुळजापुरकर बी. ए. एल्. एल्. बी.

स्थाणुरयं भारहारः किलाभूत्।
अधीत्य वेदं न विजानाति योऽर्थम्॥

यास्काचार्य.

'श्रुतिबोध' ऑफिस, ४७, [illegible] रोड, बम्बई.

प्रति अंकका मूल्य आठ आना.

॥ १३५ ॥ ऋषिः-परुच्छेपः । देवता-वायुः । छन्दः-अत्यष्टिः ॥

॥ १३५ ॥ स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते । तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे ।
प्र ते सुतासो मधुमन्तो अस्थिरन्मदाय क्रत्वे अस्थिरन् ॥ १ ॥
तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति शुक्रा वसानो अर्षति ॥ तवायं भाग आयुषु सोमो देवेषु हूयते ।
वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः ॥ २ ॥
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि वीतये वायो हव्यानि वीतये ॥ तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा ।
अध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ॥ ३ ॥

स्तीर्णं । बर्हिः । उप । नः । याहि । वीतये । सहस्रेण । निऽयुता । नियुत्वते । शतिनीभिः । नियुत्वते ॥ तुभ्यं । हि । पूर्वऽपीतये । देवाः । देवाय । येमिरे । प्र । ते । सुतासः । मधुऽमन्तः । अस्थिरन् । मदाय । क्रत्वे । अस्थिरन् ॥ १ ॥ तुभ्यं । अयं । सोमः । परिऽपूतः । अद्रिऽभिः । स्पार्हा । वसानः । परि । कोशं । अर्षति । शुक्रा । वसानः । अर्षति ॥ तव । अयं । भागः । आयुषु । सोमः । देवेषु । हूयते । वह । वायो इति । निऽयुतः । याहि । अस्मऽयुः । जुषाणः । याहि । अस्मऽयुः ॥ २ ॥ आ । नः । नियुत्ऽभिः । शतिनीभिः । अध्वरं । सहस्रिणीभिः । उप । याहि । वीतये । वायो इति । हव्यानि । वीतये ॥ तव । अयं । भागः । ऋत्वियः । सऽरश्मिः । सूर्ये । सचा । अध्वर्युऽभिः । भरमाणाः । अयंसत । वायो इति । शुक्राः । अयंसत ॥ ३ ॥

आ वां रथो नियुत्वान्वक्षदवसेऽभि प्रयांसि सुधितानि वीतये वायो हव्यानि वीतये ॥ पिबतं मध्वो अन्धसः पूर्वपेयं हि वां हितम् ।
वायवा चन्द्रेण राधसा गतमिन्द्रश्च राधसा गतम् ॥ ४ ॥
आ वां धियो ववृत्युरध्वराँ उपेममिन्दुं मर्मृजन्त वाजिनमाशुमत्यं न वाजिनम् । तेषां पिबतमस्मयू आ नो गन्तमिहोत्या ।
इन्द्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवम् ॥ ५ ॥ २४ ॥
इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत । एते वामभ्यसृक्षत तिरः पवित्रमाशवः ।
युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया ॥ ६ ॥

आ । वा । रथः । नियुत्वान् । वक्षत् । अवसे । अभि । प्रयांसि । सुऽधितानि । वीतये । वायो इति । हव्यानि । वीतये ॥ पिबतं । मध्वः । अंधसः । पूर्वऽपेयं । हि । वां । हितं । वायो इति । आ । चंद्रेण । राधसा । आ । गतं । इंद्रः । च । राधसा । आ । गतं ॥ ४ ॥ आ । वां । धियः । ववृत्युः । अध्वरान् । उप । इमं । इंदुं । मर्मृजंत । वाजिनं । आशुं । अत्यं । न । वाजिनं ॥ तेषां । पिबतं । अस्मयू इत्यस्मऽयू । आ । नः । गंतं । इह । ऊत्या । इंद्रवायू इति । सुतानां । अद्रिऽभिः । युवं । मदाय । वाजऽदा । युवं ॥ ५ ॥ २४ ॥ इमे । वां । सोमाः । अप्ऽसु । आ । सुताः । इह । अध्वर्युऽभिः । भरमाणाः । अयंसत । वायो इति । शुक्राः । अयंसत ॥ एते । वां । अभि । असृक्षत । तिरः । पवित्रं । आशवः । युवाऽयवः । अति । रोमाणि । अव्यया । सोमासः । अति । अव्यया ॥ ६ ॥

अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिन्द्रश्च गच्छतम्। वि सूनृता ददृशे रीयते घृतमा पूर्णया नियुता याथो अध्वरमिन्द्रश्च याथो अध्वरम् ॥ ७ ॥

अत्राह तद्वहेथे मध्व आहुतिं यमश्वत्थमुपतिष्ठन्त जायवोऽस्मे ते सन्तु जायवः। साकं गावः सुवते पच्यते यवो न ते वाय उप दस्यन्ति धेनवो नाप दस्यन्ति धेनवः ॥ ८ ॥

इमे ये ते सु वायो बाह्वोजसोऽन्तर्नदी ते पतयन्त्युक्षणो महि व्राधन्त उक्षणः।
धन्वन् चिद्ये अनाशवो जीराश्चिदगिरौकसः।
सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः ॥ ९ ॥ २५ ॥

अति। वायो इति। ससतः। याहि। शश्वतः। यत्र। ग्रावा। वदति। तत्र। गच्छतं। गृहं। इंद्रः। च। गच्छतं॥ वि। सूनृता। ददृशे। रीयते। घृतं। आ। पूर्णया। निऽयुता। याथः। अध्वरं। इंद्रः। च। याथः। अध्वरं॥ ७॥ अत्र। अह। तत्। वहेथे इति। मध्वः। आऽहुतिं। यं। अश्वत्थं। उपऽतिष्ठंत। जायवः। अस्मे इति। ते। संतु। जायवः। साकं। गावः। सुवते। पच्यते। यवः। न। ते। वायो इति। उप। दस्यंति। धेनवः। न। अप। दस्यंति। धेनवः॥ ८॥ इमे। ये। ते। सु। वायो इति। बाहुऽओजसः। अंतः। नदी इति। ते। पतयंति। उक्षणः। महि। व्राधंतः। उक्षणः॥ धन्वन्। चित्। ये। अनाशवः। जीराः। चित्। अगिराऽओकसः। सूर्यस्यऽइव। रश्मयः। दुःऽनियंतवः। हस्तयोः। दुःऽनियंतवः॥ ९॥ २५॥

॥ १३६ ॥ ऋषिः-परुच्छेपः । देवता-मित्रावरुणौ । छन्दः-अत्यष्टिः ॥

॥ १३६ ॥ प्र सु ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता मृळ-
यद्भ्यां स्वादिष्ठं मृळयद्भ्याम् । ता सम्राजा घृतासुती यज्ञेयज्ञ उपस्तुता ।
अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे ॥ १ ॥
अदर्शि गातुरुरवे वरीयसी पन्था ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य
रश्मिभिः । द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च ।
अथा दधाते बृहदुक्थ्यं वय उपस्तुत्यं बृहद्वयः ॥ २ ॥
ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते दिवेदिवे जागृवांसा दिवे-
दिवे । ज्योतिष्मत्क्षत्रमाशाते आदित्या दानुनस्पती ।
मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः ॥ ३ ॥

प्र । सु । ज्येष्ठं । निऽचिराभ्यां । बृहत् । नमः । हव्यं । मतिं । भरत ।
मृळयत्ऽभ्यां । स्वादिष्ठं । मृळयत्ऽभ्यां । ता । संऽराजा । घृतासुती इति घृतऽआ-
सुती । यज्ञेऽयज्ञे । उपऽस्तुता । अथ । एनोः । क्षत्रं । न । कुतः । चन । आऽधृषे ।
देवऽत्वं । नु । चित् । आऽधृषे ॥ १ ॥ अदर्शि । गातुः । उरवे । वरीयसी । पंथाः ।
ऋतस्य । सं । अयंस्त । रश्मिऽभिः । चक्षुः । भगस्य । रश्मिऽभिः ॥ द्युक्षं । मित्रस्य ।
सदनं । अर्यम्णः । वरुणस्य । च । अथ । दधाते इति । बृहत् । उक्थ्यं । वयः ।
उपऽस्तुत्यं । बृहत् । वयः ॥ २ ॥ ज्योतिष्मतीं । अदितिं । धारयत्ऽक्षितिं ।
स्वःऽवतीं । आ । सचेते इति । दिवेऽदिवे । जागृऽवांसा । दिवेऽदिवे । ज्योतिष्मत् ।
क्षत्रं । आशाते इति । आदित्या । दानुनः । पती इति । मित्रः । तयोः । वरुणः ।
यातयत्ऽजनः । अर्यमा । यातयत्ऽजनः ॥ ३ ॥

अयं मित्राय वरुणाय शंतमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वाभगः ।
तं देवासो जुषेरत विश्वे अद्य सजोषसः ।
तथा राजाना करथो यदीमह ऋतावाना यदीमहे ॥ ४ ॥
यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अंहसो दाश्वांसं मर्तमंहसः । तमर्यमाभि रक्षत्यृजूयन्तमनु व्रतम् ।
उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतम् ॥ ५ ॥
नमो दिवे बृहते रोदसीभ्यां मित्राय वोचं वरुणाय मीळ्हुषे सुमृळीकाय मीळ्हुषे ॥ इन्द्रमग्निमुप स्तुहि द्युक्षमर्यमणं भगम् ।
ज्योग्जीवन्तः प्रजया सचेमहि सोमस्योती सचेमहि ॥ ६ ॥
ऊती देवानां वयमिन्द्रवन्तो मंसीमहि स्वयशसो मरुद्भिः ।
अग्निर्मित्रो वरुणः शर्म यंसन् तदश्याम मघवानो वयं च ॥ ७ ॥ २६ ॥ १ ॥

अयं । मित्राय । वरुणाय । शंऽतमः । सोमः । भूतु । अवऽपानेषु । आऽभगः । देवः । देवेषु । आऽभगः ॥ तं । देवासः । जुषेरत । विश्वे । अद्य । सऽजोषसः । तथा । राजाना । करथः । यत् । ईमहे । ऋतऽवाना । यत् । ईमहे ॥ ४ ॥
यः । मित्राय । वरुणाय । अविधत् । जनः । अनर्वाणं । तं । परि । पातः । अंहसः । दाश्वांसं । मर्तं । अंहसः ॥ तं । अर्यमा । अभि । रक्षति । ऋजुऽयन्तं । अनु । व्रतं । उक्थैः । यः । एनोः । परिऽभूषति । व्रतं । स्तोमैः । आऽभूषति । व्रतं ॥ ५ ॥
नमः । दिवे । बृहते । रोदसीभ्यां । मित्राय । वोचं । वरुणाय । मीळ्हुषे । सुऽमृळीकाय । मीळ्हुषे ॥ इंद्रं । अग्निं । उप । स्तुहि । द्युक्षं । अर्यमणं । भगं । ज्योक् । जीवंतः । प्रऽजया । सचेमहि । सोमस्य । ऊती । सचेमहि ॥ ६ ॥
ऊती । देवानां । वयं । इंद्रऽवंतः । मंसीमहि । स्वऽयशसः । मरुत्ऽभिः । अग्निः । मित्रः । वरुणः । शर्म । यंसन् । तत् । अश्याम । मघऽवानः । वयं । च ॥ ७ ॥ २६ ॥ १ ॥

इति द्वितीयाष्टके प्रथमोऽध्यायः ॥ १ ॥

॥ अथ द्वितीयाष्टके द्वितीयोऽध्यायः ॥ २ ॥

॥ १३७ ॥ ऋषिः—परुच्छेपः । देवता—मित्रावरुणौ । छन्दः—निचृच्छक्करी ॥

॥१३७॥ सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे ।
आ राजाना दिविस्पृशास्मत्रा गन्तमुप नः ।
इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ॥ १ ॥
इम आ यातमिन्दवः सोमासो दध्याशिरः सुतासो दध्याशिरः ।
उत वामुषसो बुधि साकं सूर्यस्य रश्मिभिः ।
सुतो मित्राय वरुणाय पीतये चारुर्ऋताय पीतये ॥ २ ॥
तां वां धेनुं न वासरीमंशुं दुहन्त्यद्रिभिः सोमं दुहन्त्यद्रिभिः ।
अस्मत्रा गन्तमुप नोऽर्वाञ्चा सोमपीतये ।
अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः ॥ ३ ॥ १ ॥

सुसुम । आ । यातं । अद्रिऽभिः । गोऽश्रीताः । मत्सराः । इमे । सोमासः । मत्सराः । इमे ॥ आ । राजाना । दिविऽस्पृशा । अस्मऽत्रा । गंतं । उप । नः । इमे । वां । मित्रावरुणा । गोऽआशिरः । सोमाः । शुक्राः । गोऽआशिरः ॥ १ ॥ इमे । आ । यातं । इंदवः । सोमासः । दधिऽआशिरः । सुतासः । दधिऽआशिरः । उत । वां । उषसः । बुधि । साकं । सूर्यस्य । रश्मिऽभिः । सुतः । मित्राय । वरुणाय । पीतये । चारुः । ऋताय । पीतये ॥ २ ॥ तां । वां । धेनुं । न । वासरीं । अंशुं । दुहंति । अद्रिऽभिः । सोमं । दुहंति । अद्रिऽभिः ॥ अस्मऽत्रा । गंतं । उप । नः । अर्वांचा । सोमऽपीतये । अयं । वां । मित्रावरुणा । नृऽभिः । सुतः । सोमः । आ । पीतये । सुतः ॥ ३ ॥ १ ॥

॥ १३८ ॥ ऋषिः-परुच्छेपः । देवता-पूषा । छन्दः-अत्यष्टिः ॥

॥१३८॥ प्रप्र पूष्णस्तुविजातस्य शस्यते महित्वमस्य तवसो न तन्दते स्तोत्रमस्य न तन्दते । अर्चामि सुम्नयन्नहमन्त्यूतिं मयोभुवम् ।
विश्वस्य यो मन आयुयुवे मखो देव आयुयुवे मखः ॥ १ ॥
प्र हि त्वा पूषन्नजिरं न यामनि स्तोमेभिः कृण्व ऋणवो यथा मृध उष्ट्रो न पीपरो मृधः ॥ हुवे यत्त्वा मयोभुवं देवं सख्याय मर्त्यः ।
अस्माकमाङ्गूषान्द्युम्निनस्कृधि वाजेषु द्युम्निनस्कृधि ॥ २ ॥
यस्य ते पूषन्त्सख्ये विपन्यवः क्रत्वा चित्सन्तोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे । तामनु त्वा नवीयसीं नियुतं राय ईमहे ।
अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव ॥ ३ ॥

प्रऽप्र । पूष्णः । तुविऽजातस्य । शस्यते । महिऽत्वं । अस्य । तवसः । न । तंदते । स्तोत्रं । अस्य । न । तंदते ॥ अर्चामि । सुम्नऽयन् । अहं । अंतिऽऊतिं । मयःऽभुवं । विश्वस्य । यः । मनः । आऽयुयुवे । मखः । देवः । आऽयुयुवे । मखः ॥१॥
प्र । हि । त्वा । पूषन् । अजिरं । न । यामनि । स्तोमेभिः । कृण्वे । ऋणवः । यथा । मृधः । उष्ट्रः । न । पीपरः । मृधः ॥ हुवे । यत् । त्वा । मयःऽभुवं । देवं । सख्याय । मर्त्यः । अस्माकं । आंगूषान् । द्युम्निनः । कृधि । वाजेषु । द्युम्निनः । कृधि ॥ २ ॥
यस्य । ते । पूषन् । सख्ये । विपन्यवः । क्रत्वा । चित् । संतः । अवसा । बुभुज्रिरे । इति । क्रत्वा । बुभुज्रिरे ॥ तां । अनु । त्वा । नवीयसीं । निऽयुतं । रायः । ईमहे । अहेळमानः । उरुऽशंस । सरी । भव । वाजेऽवाजे । सरी । भव ॥ ३ ॥

अस्या ऊ षु ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व श्रवस्यतामजाश्व ।
ओ षू त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः ।
नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे ॥ ४ ॥ २ ॥

॥ १३९ ॥ ऋषिः—परुच्छेपः । देवता—विश्वेदेवाः । छन्दः—अत्यष्टिः ॥

॥ १३९ ॥ अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे । यद्ध क्राणा विवस्वति नाभा सन्दायि नव्यसी ।
अध प्र सू न उप यन्तु धीतयो देवाँ अच्छा न धीतयः ॥ १ ॥
यद्ध त्यन्मित्रावरुणावृतादध्याददाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना ।
युवोरित्थाधि सद्मस्वपश्याम हिरण्ययम् ।
धीभिश्चन मनसा स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः ॥ २ ॥

अस्याः । ऊं इति । सु । नः । उप । सातये । भुवः । अहेळमानः । ररिऽवान् । अजऽअश्व । श्रवस्यता । अजऽअश्व ॥ ओ इति । सु । त्वा । ववृतीमहि । स्तोमेभिः । दस्म । साधुऽभिः । नहि । त्वा । पूषन् । अतिऽमन्ये । आघृणे । न । ते । सख्यं । अपऽह्नुवे ॥ ४ ॥ २ ॥

अस्तु । श्रौषट् । पुरः । अग्निं । धिया । दधे । आ । नु । तत् । शर्धः । दिव्यं । वृणीमहे । इन्द्रवायू इति । वृणीमहे ॥ यत् । ह । क्राणा । विवस्वति । नाभा । संऽदायि । नव्यसी । अध । प्र । सु । नः । उप । यन्तु । धीतयः । देवान् । अच्छ । न । धीतयः ॥ १ ॥ यत् । ह । त्यत् । मित्रावरुणा । ऋतात् । अधि । आददाथे इत्याऽददाथे । अनृतं । स्वेन । मन्युना । दक्षस्य । स्वेन । मन्युना ॥ युवोः । इत्था । अधि । सद्मऽसु । अपश्याम । हिरण्ययं । धीभिः । चन । मनसा । स्वेभिः । अक्षऽभिः । सोमस्य । स्वेभिः । अक्षऽभिः ॥ २ ॥

युवां स्तोमेभिर्देवयन्तो अश्विनाश्रावयन्त इव श्लोकमायवो युवां
हव्याभ्या३यवः । युवोर्विश्वा अधि श्रियः पृक्षश्च विश्ववेदसा ।
प्रुषायन्ते वां पवयो हिरण्यये रथे दस्रा हिरण्यये ॥ ३ ॥
अचेति दस्रा व्यु१नाकमृण्वथो युञ्जते वां रथयुजो दिविष्टिष्वध्वस्मानो
दिविष्टिषु । अधि वां स्थाम वन्धुरे रथे दस्रा हिरण्यये ।
पथेव यन्तावनुशासता रजोऽञ्जसा शासता रजः ॥ ४ ॥
शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतम् ।
मा वां रातिरुप दसत्कदा चनास्मद्रातिः कदा चन ॥ ५ ॥ ३ ॥

युवां । स्तोमेभिः । देवऽयन्तः । अश्विना । आश्रवयन्तःऽइव । श्लोकं । आयवः ।
युवां । हव्या । अभि । आयवः ॥ युवोः । विश्वाः । अधि । श्रियः । पृक्षः । च ।
विश्वऽवेदसा । प्रुषायन्ते । वां । पवयः । हिरण्यये । रथे । दस्रा । हिरण्यये ॥ ३ ॥
अचेति । दस्रा । वि । ऊं इति । नाकं । ऋण्वथः । युंजते । वां । रथऽयुजः ।
दिविष्टिषु । अध्वस्मानः । दिविष्टिषु ॥ अधि । वां । स्थाम । वंधुरे । रथे । दस्रा ।
हिरण्यये । पथाऽइव । यंता । अनुऽशासता । रजः । अंजसा । शासता । रजः ॥ ४॥
शचीभिः । नः । शचीवसू इति शचीऽवसू । दिवा । नक्तं । दशस्यतं । मा । वां ।
रातिः । उप । दसत् । कदा । चन । अस्मत् । रातिः । कदा । चन ॥ ५ ॥ ३ ॥

वृषन्निन्द्र वृषपाणास इन्दव इमे सुता अद्रिषुतास उद्भिदस्तुभ्यं सुतास उद्भिदः । ते त्वा मन्दन्तु दावने महे चित्राय राधसे । गीर्भिर्गिर्वाह स्तवमान आ गहि सुमृळीको न आ गहि ॥ ६ ॥

ओ षू णो अग्ने शृणुहि त्वमीळितो देवेभ्यो ब्रवसि यज्ञियेभ्यो राजभ्यो यज्ञियेभ्यः । यद्ध त्यामङ्गिरोभ्यो धेनुं देवा अदत्तन । वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा ॥ ७ ॥

मो षु वो अस्मदभि तानि पौंस्या सना भूवन्द्युम्नानि मोत जारिषुरस्मत्पुरोत जारिषुः । यद्वश्चित्रं युगेयुगे नव्यं घोषादमर्त्यम् । अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरम् ॥ ८ ॥

वृषन् । इन्द्र । वृषऽपानासः । इन्दवः । इमे । सुताः । अद्रिऽसुतासः । उत्ऽभिदः । तुभ्यं सुतासः । उत्ऽभिदः ॥ ते । त्वा । मन्दन्तु । दावने । महे । चित्राय । राधसे गीःऽभिः । गिर्वाहः । स्तवमानः । आ । गहि । सुऽमृळीकः । नः । आ । गहि ॥ ६ ॥

ओ इति । सु । नः । अग्ने । शृणुहि । त्वं । ईळितः । देवेभ्यः । ब्रवसि यज्ञियेभ्यः । राजऽभ्यः । यज्ञियेभ्यः ॥ यत् । ह । त्याम् । अङ्गिरःऽभ्यः । धेनुं । देवाः । अदत्तन । वि । ताम् । दुह्रे । अर्यमा । कर्तरी । सचा । एषः । ताम् । वेद । मे । सचा ॥ ७ ॥

मो इति । सु । वः । अस्मत् । अभि । तानि । पौंस्या सना । भूवन् । द्युम्नानि । मा । उत । जारिषुः । अस्मत् । पुरा । उत । जारिषुः ॥ यत् । वः । चित्रं । युगेऽयुगे । नव्यं । घोषात् । अमर्त्यं । अस्मासु । तत् । मरुतः यत् । च । दुस्तरं । दिधृत । यत् । च । दुस्तरं ॥ ८ ॥

दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः । तेषां देवेष्वायतिरस्माकं तेषु नाभयः ।
तेषां पदेन मह्या नमे गिरेन्द्राग्नी आ नमे गिरा ॥ ९ ॥
होता यक्षद्वनिनो वन्त वार्यं बृहस्पतिर्यजति वेन उक्षभिः पुरुवारेभिरुक्षभिः ।
जगृभ्मा दूरआदिशं श्लोकमद्रेरध त्मना ।
अधारयदररिन्दानि सुक्रतुः पुरू सद्मानि सुक्रतुः ॥ १० ॥
ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥११॥४॥२०॥

॥ एकविंशोऽनुवाकः ॥

॥ १४० ॥ ऋषिः-दीर्घतमाः । देवता-अग्निः । छन्दः-जगती ॥

॥१४०॥ वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये ।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम् ॥ १ ॥

दध्यङ् । ह । मे । जनुषं । पूर्वः । अंगिराः । प्रियऽमेधः । कण्वः । अत्रिः । मनुः । विदुः । ते । मे । पूर्वे । मनुः । विदुः ॥ तेषां । देवेषु । आऽयतिः । अस्माकं । तेषु । नाभयः । तेषां । पदेन । महि । आ । नमे । गिरा । इंद्राग्नी इति । आ । नमे । गिरा ॥ ९ ॥ होता । यक्षत् । वनिनः । वंत । वार्यं । बृहस्पतिः । यजति । वेनः । उक्षऽभिः । पुरुऽवारेभिः । उक्षऽभिः ॥ जगृभ्म । दूरेऽआदिशं । श्लोकं । अद्रेः । अध । त्मना । अधारयत् । अररिंदानि । सुऽक्रतुः । पुरु । सद्मानि । सुऽक्रतुः ॥ १० ॥ ये । देवासः । दिवि । एकादश । स्थ । पृथिव्यां । अधि । एकादश । स्थ । अप्सुऽक्षितः । महिना । एकादश । स्थ । ते । देवासः । यज्ञं । इमं । जुषध्वं ॥ ११ ॥ ४ ॥ वेदिऽसदे । प्रियऽधामाय । सुऽद्युते । धासिंऽइव । प्र । भर । योनिं । अग्नये । वस्त्रेणऽइव । वासय । मन्मना । शुचिं । ज्योतिःऽरथं । शुक्रऽवर्णं । तमःऽहनं ॥ १ ॥

अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः ।
अन्यस्यासा जिह्वया जेन्यो वृषा न्यन्येन वनिनो मृष्ट वारणः ॥ २ ॥
कृष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुम् ।
प्राचाजिह्वं ध्वसयन्तं तृषुच्युतमा साच्यं कुपयं वर्धनं पितुः ॥ ३ ॥
मुमुक्ष्वो मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः ।
असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः ॥ ४ ॥
आदस्य ते ध्वसयन्तो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः ।
यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वसन्स्तनयन्नेति नानदत् ॥ ५ ॥ ५ ॥

अभि । द्विऽजन्मा । त्रिऽवृत् । अन्नं । ऋज्यते । संवत्सरे । वदृधे । जग्धं । ईमिति । पुनरिति । अन्यस्य । आसा । जिह्वया । जेन्यः । वृषा । नि । अन्येन । वनिनः । मृष्ट । वारणः ॥ २ ॥ कृष्णऽप्रुतौ । वेविजे इति । अस्य । सऽक्षितौ । उभा । तरेते इति । अभि । मातरा । शिशुं । प्राचाऽजिह्वं । ध्वसयंतं । तृषुऽच्युतं । आ । साच्यं । कुपयं । वर्धनं । पितुः ॥ ३ ॥ मुमुक्ष्वः । मनवे । मानवस्यते । रघुऽद्रुवः । कृष्णऽसीतासः । ऊं इति । जुवः । असमनाः । अजिरासः । रघुऽस्यदः । वातऽजूताः । उप । युज्यंते । आशवः ॥ ४ ॥ आत् । अस्य । ते । ध्वसयंतः । वृथा । ईरते । कृष्णं । अभ्वं । महि । वर्पः । करिक्रतः । यत् । सीं । महीं । अवनिं । प्र । अभि । मर्मृशत् । अभिऽश्वसन् । स्तनयन् । एति । नानदत् ॥ ५ ॥ ५ ॥

भृषन्न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत् ।
ओजायमानस्तन्वश्च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः ॥ ६ ॥
स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये ।
पुनर्वर्धन्ते अपि यन्ति देव्यमन्यद्वर्पः पित्रोः कृण्वते सचा ॥ ७ ॥
तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मम्रुषीः प्रायवे पुनः ।
तासां जरां प्रमुञ्चन्नेति नानददसुं परं जनयञ्जीवमस्तृतम् ॥ ८ ॥
अधीवासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः ।
वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरह ॥ ९ ॥
अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः ।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ॥ १० ॥ ६ ॥

भृषन् । न । यः । अधि । बभ्रूषु । नम्नते । वृषाऽइव । पत्नीः । अभि । एति । रोरुवत् । ओजायमानः । तन्वः । च । शुम्भते । भीमः । न । शृङ्गा । दविधाव । दुःऽगृभिः ॥ ६ ॥ सः । सम्ऽस्तिरः । विऽस्तिरः । सम् । गृभायति । जानन् । एव । जानतीः । नित्यः । आ । शये । पुनः । वर्धन्ते । अपि । यन्ति । देव्यम् । अन्यत् । वर्पः । पित्रोः । कृण्वते । सचा ॥ ७ ॥ तम् । अग्रुवः । केशिनीः । सम् । हि । रेभिरे । ऊर्ध्वाः । तस्थुः । मम्रुषीः । प्र । आयवे । पुनः । तासाम् । जराम् । प्रऽमुञ्चन् । एति । नानदत् । असुम् । परम् । जनयन् । जीवम् । अस्तृतम् ॥ ८ ॥ अधीवासम् । परि । मातुः । रिहन् । अह । तुविऽग्रेभिः । सत्वऽभिः । याति । वि । ज्रयः । वयः । दधत् । पत्ऽवते । रेरिहत् । सदा । अनु । श्येनी । सचते । वर्तनिः । अह ॥ ९ ॥ अस्माकम् । अग्ने । मघवत्ऽसु । दीदिहि । अध । श्वसीवान् । वृषभः । दमूनाः । अवऽअस्य । शिशुऽमतीः । अदीदेः । वर्मऽइव । युत्ऽसु । परिऽजर्भुराणः ॥ १० ॥ ६ ॥

इदमग्ने सुधितं दुर्धितादधि प्रियादु चिन्मन्मनः प्रेयो अस्तु ते ।
यत्ते शुक्रं तन्वो३ रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वम् ॥ ११ ॥
रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने ।
अस्माकं वीराँ उत नो मघोनो जनाँश्च या पारयाच्छर्म या च ॥ १२ ॥
अभी नो अग्न उक्थमिज्जुगुर्या द्यावाक्षामा सिन्धवश्च स्वगूर्ताः ।
गव्यं यव्यं यन्तो दीर्घाहेषं वरमरुण्यो वरन्त ॥ १३ ॥ ७ ॥

॥ १४१ ॥ ऋषिः-दीर्घतमाः । देवता-अग्निः । छन्दः-जगती ॥

॥१४१॥ बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।
यदीमुप ह्वरते साधते मतिर्ऋतस्य धेना अनयन्त सस्रुतः ॥ १ ॥
पृक्षो वपुः पितुमान्नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु ।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ॥ २ ॥

इदं । अग्ने । सुऽधितं । दुःऽधितात् । अधि । प्रियात् । ऊं इति । चित् । मन्मनः । प्रेयः । अस्तु । ते । यत् । ते । शुक्रं । तन्वः । रोचते । शुचि । तेन । अस्मभ्यं । वनसे । रत्नं । आ । त्वं ॥ ११ ॥ रथाय । नावं । उत । नः । गृहाय । नित्यऽअरित्रां । पत्ऽवतीं । रासि । अग्ने । अस्माकं । वीरान् । उत । नः । मघोनः । जनान् । च । या । पारयात् । शर्म । या । च ॥ १२ ॥ अभि । नः । अग्ने । उक्थं । इत् । जुगुर्याः । द्यावाक्षामा । सिन्धवः । च । स्वऽगूर्ताः । गव्यं । यव्यं । यंतः । दीर्घा । अहा । इषं । वरं । अरुण्यः । वरंत ॥ १३ ॥ ७ ॥

बट् । इत्था । तत् । वपुषे । धायि । दर्शतं । देवस्य । भर्गः । सहसः । यतः । जनि । यत् । ईं । उप । ह्वरते । साधते । मतिः । ऋतस्य । धेनाः । अनयंत । सऽस्रुतः ॥ १ ॥ पृक्षः । वपुः । पितुऽमान । नित्यः । आ । शये । द्वितीयं । आ । सप्तऽशिवासु । मातृषु । तृतीयं । अस्य । वृषभस्य । दोहसे । दशऽप्रमतिं । जनयंत । योषणः ॥ २ ॥

निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः ।
यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति ॥ ३ ॥
प्र यत्पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।
उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणा शुचिः ॥ ४ ॥
आदिन्मातॄराविशद्यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे ।
अनु यत्पूर्वा अरुहत्सनाजुवो नि नव्यसीष्ववरासु धावते ॥ ५ ॥ ८ ॥
आदिद्धोतारं वृणते दिविष्टिषु भगमिव पपृचानास ऋञ्जते ।
देवान्यत्क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे ॥ ६ ॥
वि यदस्थाद्यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः ।
तस्य पत्मन्दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः ॥ ७ ॥

निः । यत् । ईम् । बुध्नात् । महिषस्य । वर्पसः । ईशानासः । शवसा । क्रन्त । सूरयः । यत् । ईम् । अनु । प्रऽदिवः । मध्वः । आऽधवे । गुहा । सन्तम् । मातरिश्वा । मथायति ॥ ३ ॥ प्र । यत् । पितुः । परमात् । नीयते । परि । आ । पृक्षुधः । वीरुधः । दम्ऽसु । रोहति । उभा । यत् । अस्य । जनुषम् । यत् । इन्वतः । आत् । इत् । यविष्ठः । अभवत् । घृणा । शुचिः ॥ ४ ॥ आत् । इत् । मातॄः । आ । अविशत् । यासु । आ । शुचिः । अहिंस्यमानः । उर्विया । वि । ववृधे । अनु । यत् । पूर्वाः । अरुहत् । सनाऽजुवः । नि । नव्यसीषु । अवरासु । धावते ॥ ५ ॥ ८ ॥ आत् । इत् । होतारम् । वृणते । दिविष्टिषु । भगम्ऽइव । पपृचानासः । ऋञ्जते । देवान् । यत् । क्रत्वा । मज्मना । पुरुऽस्तुतः । मर्तम् । शंसम् । विश्वधा । वेति । धायसे ॥ ६ ॥ वि । यत् । अस्थात् । यजतः । वातऽचोदितः । ह्वारः । न । वक्वा । जरणाः । अनाऽकृतः । तस्य । पत्मन् । धक्षुषः । कृष्णऽजंहसः । शुचिऽजन्मनः । रजः । आ । विऽअध्वनः ॥ ७ ॥

रथो न यातः शिक्वभिः कृतो द्यामंगेभिररुषेभिरीयते ।
आदस्य ते कृष्णासो दक्षि सूरयः शूरस्येव त्वेषथादीषते वयः ॥ ८ ॥
त्वया ह्यग्ने वरुणो धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः ।
यत्सीमनु क्रतुना विश्वथा विभुररान्न नेमिः परिभूरजायथाः ॥ ९ ॥
त्वमग्ने शशमानाय सुन्वते रत्नं यविष्ठ देवतातिमिन्वसि ।
तं त्वा नु नव्यं सहसो युवन्वयं भगं न कारे महिरत्न धीमहि ॥ १० ॥
अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम् ।
रश्मीँरिव यो यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः ॥ ११ ॥
उत नः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच्चन्द्ररथः ।
स नो नेषन्नेषतमैरमूरोऽग्निर्वामं सुवितं वस्यो अच्छ ॥ १२ ॥

रथः । न । यातः । शिक्वऽभिः । कृतः । द्यां । अंगेभिः । अरुषेभिः । ईयते । आत् । अस्य । ते । कृष्णासः । धक्षि । सूरयः । शूरस्यऽइव । त्वेषथात् । ईषते । वयः ॥८॥ त्वया । हि । अग्ने । वरुणः । धृतऽव्रतः । मित्रः । शाशद्रे । अर्यमा । सुऽदानवः । यत् । सीं । अनु । क्रतुना । विश्वऽथा । विऽभुः । अरान् । न । नेमिः । परिऽभूः । अजायथाः ॥ ९ ॥ त्वं । अग्ने । शशमानाय । सुन्वते । रत्नं । यविष्ठ । देवऽतातिं । इन्वसि । तं । त्वा । नु । नव्यं । सहसः । युवन् । वयं । भगं । न । कारे । महिऽरत्न । धीमहि ॥ १० ॥ अस्मे इति । रयिं । न । सुऽअर्थं । दमूनसं । भगं । दक्षं । न । पपृचासि । धर्णसिं । रश्मीन्ऽइव । यः । यमति । जन्मनी इति । उभे इति । देवानां । शंसं । ऋते । आ । च । सुऽक्रतुः ॥ ११ ॥ उत । नः । सुऽद्योत्मा । जीरऽअश्वः । होता । मंद्रः । शृणवत् । चंद्रऽरथः । सः । नः । नेषत् । नेषऽतमैः । अमूरः । अग्निः । वामं । सुवितं । वस्यः । अच्छ ॥ १२ ॥

अस्ताव्यग्निः शिमीवद्भिरर्कैः साम्राज्याय प्रतरं दधानः ।
अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः ॥ १३ ॥ ९ ॥

॥ १४२ ॥ ऋषिः-दीर्घतमाः । देवता-अग्निः । छन्दः-अनुष्टुप् ॥

॥ १४२ ॥ समिद्धो अग्न आ वह देवाँ अद्य यतस्रुचे ।
तन्तुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे ॥ १ ॥

घृतवन्तमुप मासि मधुमन्तं तनूनपात् ।
यज्ञं विप्रस्य मावतः शशमानस्य दाशुषः ॥ २ ॥

शुचिः पावको अद्भुतो मध्वा यज्ञं मिमिक्षति ।
नराशंसस्त्रिरा दिवो देवो देवेषु यज्ञियः ॥ ३ ॥

ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम् ।
इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते ॥ ४ ॥

अस्तावि । अग्निः । शिमीवत्ऽभिः । अर्कैः । साम्ऽराज्याय । प्रऽतरं । दधानः । अमी इति । च । ये । मघऽवानः । वयं । च । मिहं । न । सूरः । अति । निः । ततन्युः ॥ १३ ॥ ९ ॥

सम्ऽइद्धः । अग्ने । आ । वह । देवान् । अद्य । यतऽस्रुचे । तंतुं । तनुष्व । पूर्व्यं । सुतऽसोमाय । दाशुषे ॥ १ ॥ घृतऽवंतं । उप । मासि । मधुऽमंतं । तनूऽनपात् । यज्ञं । विप्रस्य । माऽवतः । शशमानस्य । दाशुषः ॥ २ ॥ शुचिः । पावकः । अद्भुतः । मध्वा । यज्ञं । मिमिक्षति । नराशंसः । त्रिः । आ । दिवः । देवः । देवेषु । यज्ञियः ॥ ३ ॥ ईळितः । अग्ने । आ । वह । इंद्रं । चित्रं । इह । प्रियं । इयं । हि । त्वा । मतिः । मम । अच्छ । सुऽजिह्व । वच्यते ॥ ४ ॥

स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे ।
वृञ्जे देवव्यचस्तममिन्द्राय शर्म सप्रथः ॥ ५ ॥
वि श्रयन्तामृतावृधः प्रयै देवेभ्यो महीः ।
पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः ॥ ६ ॥१०॥
आ भन्दमाने उपाके नक्तोषासा सुपेशसा ।
यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत् ॥ ७ ॥
मन्द्रजिह्वा जुगुर्वणी होतारा दैव्या कवी ।
यज्ञं नो यक्षतामिमं सिध्रमद्य दिविस्पृशम् ॥ ८ ॥
शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती ।
इळा सरस्वती मही बर्हिः सीदन्तु यज्ञियाः ॥ ९ ॥
तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना ।
त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः ॥ १० ॥

स्तृणानासः । यतऽस्रुचः । बर्हिः । यज्ञे । सुऽअध्वरे । वृंजे । देवव्यचःऽतमं । इंद्राय । शर्म । सऽप्रथः ॥ ५ ॥ वि । श्रयंतां । ऋतऽवृधः । प्रऽयै । देवेभ्यः । महीः । पावकासः । पुरुऽस्पृहः । द्वारः । देवीः । असश्चतः ॥ ६ ॥ १० ॥ आ । भंदमाने इति । उपाके इति । नक्तोषसा । सुऽपेशसा । यह्वी इति । ऋतस्य । मातरा । सीदतां । बर्हिः । आ । सुऽमत् ॥ ७ ॥ मंद्रऽजिह्वा । जुगुर्वणी इति । होतारा । दैव्या । कवी इति । यज्ञं । नः । यक्षतां । इमं । सिध्रं । अद्य । दिविऽस्पृशं ॥ ८ ॥ शुचिः । देवेषु । अर्पिता । होत्रा । मरुत्ऽसु । भारती । इळा । सरस्वती । मही । बर्हिः । सीदंतु । यज्ञियाः ॥ ९ ॥ तत् । नः । तुरीपं । अद्भुतं । पुरु । वा । अरं । पुरु । त्मना । त्वष्टा । पोषाय । वि । स्यतु । राये । नाभा । नः । अस्मऽयुः ॥१०॥

अवसृजन्नुप त्मना देवान्यक्षि वनस्पते ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरः ॥ ११ ॥
पूषण्वते मरुत्वते विश्वदेवाय वायवे ।
स्वाहा गायत्रवेपसे हव्यमिन्द्राय कर्तन ॥ १२ ॥
स्वाहाकृतान्या गह्युप हव्यानि वीतये ।
इन्द्रा गहि श्रुधी हवं त्वां हवन्ते अध्वरे ॥ १३ ॥ ११ ॥

॥ १४३ ॥ ऋषिः—दीर्घतमाः । देवता—अग्निः । छन्दः—अनुष्टुप् ॥

॥१४३॥ प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे ।
अपां नपाद्यो वसुभिः सह प्रियो होता पृथिव्यां न्यसीददृत्वियः ॥ १ ॥
स जायमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने ।
अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत् ॥ २ ॥

अवऽसृजन् । उप । त्मना । देवान् । यक्षि । वनस्पते । अग्निः । हव्या । सुसूदति । देवः । देवेषु । मेधिरः ॥ ११ ॥ पूषण्ऽवते । मरुत्वते । विश्वऽदेवाय । वायवे । स्वाहा । गायत्रऽवेपसे । हव्यं । इंद्राय । कर्तन ॥ १२ ॥ स्वाहाऽकृतानि । आ । गहि । उप । हव्यानि । वीतये । इंद्र । आ । गहि । श्रुधि । हवं । त्वां । हवंते । अध्वरे ॥ १३ ॥ ११ ॥

प्र । तव्यसीं । नव्यसीं । धीतिं । अग्नये । वाचः । मतिं । सहसः । सूनवे । भरे । अपां । नपात् । यः । वसुऽभिः । सह । प्रियः । होता । पृथिव्यां । नि । असीदत् । ऋत्वियः ॥ १ ॥ सः । जायमानः । परमे । विऽओमनि । आविः । अग्निः । अभवत् । मातरिश्वने । अस्य । क्रत्वा । संऽइधानस्य । मज्मना । प्र । द्यावा । शोचिः । पृथिवी इति । अरोचयत् ॥ २ ॥

अस्य त्वेषा अजरा अस्य भानवः सुसन्दृशः सुप्रतीकस्य सुद्युतः ।
भात्वक्षसो अत्यक्तुर्न सिन्धवोऽग्ने रेजन्ते असंसन्तो अजराः ॥ ३ ॥
यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना ।
अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ॥ ४ ॥
न यो वराय मरुतामिव स्वनः सेनेव सृष्टा दिव्या यथाशनिः ।
अग्निर्जम्भैस्तिगितैरत्ति भर्वति योधो न शत्रून्त्स वना न्यृञ्जते ॥ ५ ॥
कुविन्नो अग्निरुचथस्य वीरसद्वसुष्कुविद्वसुभिः काममावरत् ।
चोदः कुवित्तुतुज्यात्सातये धियः शुचिप्रतीकं तमया धिया गृणे ॥ ६ ॥
घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋञ्जते ।
इन्धानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियम् ॥ ७ ॥

अस्य । त्वेषाः । अजराः । अस्य । भानवः । सुऽसंदृशः । सुऽप्रतीकस्य । सुऽद्युतः । भात्वऽक्षसः । अति । अक्तुः । न । सिन्धवः । अग्ने । रेजंते । असंसंतः । अजराः ॥३॥ यं । आऽईरिरे । भृगवः । विश्वऽवेदसं । नाभा । पृथिव्याः । भुवनस्य । मज्मना । अग्निं । तं । गीःऽभिः । हिनुहि । स्वे । आ । दमे । यः । एकः । वस्वः । वरुणः । न । राजति ॥ ४ ॥ न । यः । वराय । मरुतांऽइव । स्वनः । सेनाऽइव । सृष्टा । दिव्या । यथा । अशनिः । अग्निः । जंभैः । तिगितैः । अत्ति । भर्वति । योधः । न । शत्रून् । सः । वना । नि । ऋंजते ॥ ५ ॥ कुविन् । नः । अग्निः । उचथस्य । वीः । असत् । वसुः । कुविन् । वसुऽभिः । कामं । आऽवरत् । चोदः । कुविन् । तुतुज्यात् । सातये । धियः । शुचिऽप्रतीकं । तं । अया । धिया । गृणे ॥ ६ ॥ घृतऽप्रतीकं । वः । ऋतस्य । धूःऽसदं । अग्निं । मित्रं । न । संऽइधानः । ऋंजते । इंधानः । अक्रः । विदथेषु । दीद्यत् । शुक्रऽवर्णां । उत् । ऊं इति । नः । यंसते । धियं ॥ ७ ॥

अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः ।
अदब्धेभिरदृपितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः ॥ ८ ॥ १२ ॥

॥ १४४ ॥ ऋषिः-दीर्घतमाः । देवता-अग्निः । छन्दः-जगती ॥

॥१४४॥ एति प्र होता व्रतमस्य माययोर्ध्वां दधानः शुचिपेशसं धियम् ।
अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते ॥ १ ॥
अभीमृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः ।
अपामुपस्थे विभृतो यदावसदध स्वधा अधयद्याभिरीयते ॥ २ ॥
युयूषतः सवयसा तदिद्वपुः समानमर्थं वितरित्रता मिथः ।
आदीं भगो न हव्यः समस्मदा वोळ्हुर्न रश्मीन्त्समयंस्त सारथिः ॥ ३ ॥
यमीं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा ।
दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मानुषा युगा ॥ ४ ॥

अप्रऽयुच्छन् । अप्रयुच्छत्ऽभिः । अग्ने । शिवेभिः । नः । पायुऽभिः । पाहि । शग्मैः । अदब्धेभिः । अदृपितेभिः । इष्टे । अनिमिषत्ऽभिः । परि । पाहि । नः । जाः ॥ ८ ॥ १२ ॥

एति । प्र । होता । व्रतं । अस्य । मायया । ऊर्ध्वां । दधानः । शुचिऽपेशसं । धियं । अभि । स्रुचः । क्रमते । दक्षिणाऽआवृतः । याः । अस्य । धाम । प्रथमं । ह । निंसते ॥ १ ॥ अभि । ईं । ऋतस्य । दोहनाः । अनूषत । योनौ । देवस्य । सदने । परिऽवृताः । अपां । उपऽस्थे । विऽभृतः । यत् । आ । अवसत् । अध । स्वधाः । अधयत् । याभिः । ईयते ॥ २ ॥ युयूषतः । सऽवयसा । तत् । इत् । वपुः । समानं । अर्थं । विऽतरित्रता । मिथः । आत् । ईं । भगः । न । हव्यः । सं । अस्मत् । आ । वोळ्हुः । न । रश्मीन् । सं । अयंस्त । सारथिः ॥ ३ ॥ यं । ईं । द्वा । सऽवयसा । सपर्यतः । समाने । योना । मिथुना । संऽओकसा । दिवा । न । नक्तं । पलितः । युवा । अजनि । पुरु । चरन् । अजरः । मानुषा । युगा ॥ ४ ॥

तमीं हिन्वंति धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे ।
धनोरधि प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित ॥ ५ ॥
त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य पशुपा इव त्मना ।
एनी त एते बृहती अभिश्रिया हिरण्ययी वक्वरी बर्हिराशाते ॥ ६ ॥
अग्ने जुषस्व प्रति हर्य तद्वचो मन्द्र स्वधाव ऋतजात सुक्रतो ।
यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः सन्दृष्टौ पितुमाँ इव क्षयः ॥ ७ ॥ १३ ॥

॥ १४५ ॥ ऋषिः—दीर्घतमः । देवता-अग्निः । छन्दः—जगती ॥

॥१४५॥ तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्वीयते ।
तस्मिन्त्सन्ति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः ॥ १ ॥
तमित्पृच्छन्ति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रभीत् ।
न मृष्यते प्रथमं नापरं वचोऽस्य क्रत्वा सचते अप्रदृपितः ॥ २ ॥

तं । ईं । हिन्वंति । धीतयः । दश । व्रिशः । देवं । मर्तासः । ऊतये । हवामहे । धनोः । अधि । प्रऽवतः । आ । सः । ऋण्वति । अभिव्रजत्ऽभिः । वयुना । नवा । अधित ॥ ५ ॥ त्वं । हि । अग्ने । दिव्यस्य । राजसि । त्वं । पार्थिवस्य । पशुपाःऽइव । त्मना । एनी इति । ते । एते इति । बृहती इति । अभिऽश्रिया । हिरण्ययी इति । वक्वरी इति । बर्हिः । आशाते इति ॥ ६ ॥ अग्ने । जुषस्व । प्रति । हर्य । तत् । वचः । मंद्र । स्वधाऽवः । ऋतऽजात । सुक्रतो इति सुऽक्रतो । यः । विश्वतः । प्रत्यङ् । असि । दर्शतः । रण्वः । संऽदृष्टौ । पितुमान्ऽइव । क्षयः ॥ ७ ॥ १३ ॥

तं । पृच्छत । सः । जगाम । सः । वेद । सः । चिकित्वान् । ईयते । सः । नु । ईयते । तस्मिन् । संति । प्रऽशिषः । तस्मिन् । इष्टयः । सः । वाजस्य । शवसः । शुष्मिणः । पतिः ॥ १ ॥ तं । इत् । पृच्छंति । न । सिमः । वि । पृच्छति । स्वेनऽइव । धीरः । मनसा । यत् । अग्रभीत् । न । मृष्यते । प्रथमं । न । अपरं । वचः । अस्य । क्रत्वा । सचते । अप्रऽदृपितः ॥ २ ॥

तमिद्गच्छन्ति जुह्व१स्तमर्वतीर्विश्वान्येकः शृणवद्वचांसि मे ।
पुरुप्रैषस्ततुरिर्यज्ञसाधनोऽच्छिद्रोतिः शिशुरादत्त सं रभः ॥ ३ ॥
उपस्थायं चरति यत्समारत सद्यो जातस्तत्सार युज्येभिः ।
अभि श्वान्तं मृशते नान्द्ये मुदे यदीं गच्छन्त्युशतीरपिष्ठितम् ॥ ४ ॥
स ईं मृगो अप्यो वनर्गुरुप त्वच्युपमस्यां नि धायि ।
व्यब्रवीद्वयुना मर्त्येभ्योऽग्निर्विद्वाँ ऋतचिद्धि सत्यः ॥ ५ ॥ १४ ॥

॥ १४६ ॥ ऋषिः-दीर्घतमाः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ १४६ ॥ त्रिमूर्धानं सप्तरश्मिं गृणीषेऽनूनमग्निं पित्रोरुपस्थे ।
निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसम् ॥ १ ॥
उक्षा महाँ अभि ववक्ष एने अजरस्तस्थावितऊतिर्ऋष्वः ।
उर्व्याः पदो नि दधाति सानौ रिहन्त्यूधो अरुषासो अस्य ॥ २ ॥

तं । इत् । गच्छंति । जुह्वः । तं । अर्वतीः । विश्वानि । एकः । शृणवत् । वचांसि । मे । पुरुऽप्रैषः । ततुरिः । यज्ञऽसाधनः । अच्छिद्रऽऊतिः । शिशुः । आ । अदत्त । सं । रभः ॥ ३ ॥ उपऽस्थायं । चरति । यत् । संऽआरत । सद्यः । जातः । तत्सार । युज्येभिः । अभि । श्वातं । मृशते । नान्द्ये । मुदे । यत् । ईं । गच्छंति । उशतीः । अपिऽस्थितं ॥ ४ ॥ सः । ईं । मृगः । अप्यः । वनर्गुः । उप । त्वचि । उपऽमस्यां । नि । धायि । वि । अब्रवीत् । वयुना । मर्त्येभ्यः । अग्निः । विद्वान् । ऋतऽचित् । हि । सत्यः ॥ ५ ॥ १४ ॥

त्रिऽमूर्धानं । सप्तऽरश्मिं । गृणीषे । अनूनं । अग्निं । पित्रोः । उपऽस्थे । निऽसत्तं । अस्य । चरतः । ध्रुवस्य । विश्वा । दिवः । रोचना । आपप्रिऽवांसं ॥ १ ॥ उक्षा । महान् । अभि । ववक्षे । एने इति । अजरः । तस्थौ । इतःऽऊतिः । ऋष्वः । उर्व्याः । पदः । नि । दधाति । सानौ । रिहंति । ऊधः । अरुषासः । अस्य ॥ २ ॥

समानं वत्समभि सञ्चरन्ती विष्वग्धेनू वि चरतः सुमेके ।
अनपवृज्याँ अध्वनो मिमाने विश्वान्केताँ अधि महो दधाने ॥ ३ ॥
धीरासः पदं कवयो नयन्ति नाना हृदा रक्षमाणा अजुर्यम् ।
सिषासन्तः पर्यपश्यन्त सिन्धुमाविरेभ्यो अभवत्सूर्यो नॄन् ॥ ४ ॥
दिदृक्षेण्यः परि काष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे ।
पुरुत्रा यदभवत्सूरहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः ॥ ५ ॥ १५ ॥

॥ १४७ ॥ ऋषिः—दीर्घतमाः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ १४७ ॥ कथा ते अग्ने शुचयन्त आयोर्ददाशुर्वाजेभिराशुषाणाः ।
उभे यत्तोके तनये दधाना ऋतस्य सामन्रणयन्त देवाः ॥ १ ॥
बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने ॥ २ ॥

समानं । वत्सं । अभि । संचरन्ती इति संऽचरन्ती । विष्वक् । धेनू इति । वि । चरतः । सुमेके इति सुऽमेके । अनपऽवृज्यान् । अध्वनः । मिमाने इति । विश्वान् । केतान् । अधि । महः । दधाने इति ॥ ३ ॥ धीरासः । पदं । कवयः । नयंति । नाना । हृदा । रक्षमाणाः । अजुर्यं । सिसासंतः । परि । अपश्यंत । सिंधुं । आविः । एभ्यः । अभवत् । सूर्यः । नॄन् ॥ ४ ॥ दिदृक्षेण्यः । परि । काष्ठासु । जेन्यः । ईळेन्यः । महः । अर्भाय । जीवसे । पुरुऽत्रा । यत् । अभवत् । सूः । अह । एभ्यः । गर्भेभ्यः । मघऽवा । विश्वऽदर्शतः ॥ ५ ॥ १५ ॥

कथा । ते । अग्ने । शुचयंतः । आयोः । ददाशुः । वाजेभिः । आशुषाणाः । उभे इति । यत् । तोके इति । तनये । दधानाः । ऋतस्य । सामन् । रणयंत । देवाः । ॥ १ ॥ बोध । मे । अस्य । वचसः । यविष्ठ । मंहिष्ठस्य । प्रऽभृतस्य । स्वधाऽवः । पीयति । त्वः । अनु । त्वः । गृणाति । वंदारुः । ते । तन्वं । वंदे । अग्ने ॥ २ ॥

ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान्त्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ ३ ॥
यो नो अग्ने अररिवाँ अघायुररातीवा मर्चयति द्वयेन ।
मन्त्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ॥ ४ ॥
उत वा यः सहस्य प्रविद्वान्मर्तो मर्तं मर्चयति द्वयेन ।
अतः पाहि स्तवमान स्तुवन्तमग्ने माकिर्नो दुरिताय धायीः ॥ ५ ॥ १६ ॥

॥ १४८ ॥ ऋषिः-दीर्घतमाः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥१४८॥ मथीद्यदीं विष्टो मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यम् ।
नि यं दधुर्मनुष्यासु विक्षु स्वर्ण चित्रं वपुषे विभावम् ॥ १ ॥
ददानमिन्न ददभन्त मन्माग्निर्वरूथं मम तस्य चाकन् ।
जुषन्त विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य कारोः ॥ २ ॥

ये । पायवः । मामतेयं । ते । अग्ने । पश्यंतः । अंधं । दुःऽइतात् । अरक्षन् । ररक्ष । तान् । सुऽकृतः । विश्वऽवेदाः । दिप्संतः । इत् । रिपवः । न । अह । देभुः ॥ ३ ॥ यः । नः । अग्ने । अररिऽवान् । अघऽयुः । अरातिऽवा । मर्चयति । द्वयेन । मंत्रः । गुरुः । पुनः । अस्तु । सः । अस्मै । अनु । मृक्षीष्ट । तन्वं । दुःऽउक्तैः ॥ ४ ॥ उत । वा । यः । सहस्य । प्रऽविद्वान् । मर्तः । मर्तं । मर्चयति । द्वयेन । अतः । पाहि । स्तवमान । स्तुवंतं । अग्ने । माकिः । नः । दुःऽइताय । धायीः ॥ ५ ॥ १६ ॥

॥ १४८ ॥ मथीत् । यत् । ईं । विष्टः । मातरिश्वा । होतारं । विश्वऽअप्सुं । विश्वऽदेव्यं । नि । यं । दधुः । मनुष्यासु । विक्षु । स्वः । न । चित्रं । वपुषे । विभाऽवं ॥ १ ॥ ददानं । इत् । न । ददभंत । मन्म । अग्निः । वरूथं । मम । तस्य । चाकन् । जुषंत । विश्वानि । अस्य । कर्म । उपऽस्तुतिं । भरमाणस्य । कारोः ॥ २ ॥

नित्यें चित्रु यं सद॑ने जगृभ्रे प्रश॑स्तिभिर्दधिरे यज्ञियासः ।
प्र सू नयन्त गृभयन्त इष्टावश्वासो न रथ्यो रारहाणाः ॥ ३ ॥
पुरूणि दस्मो नि रिणाति जम्भैराद्रोचते वन आ विभावा ।
आदस्य वातो अनु वाति शोचिरस्तुर्न शर्यामसनामनु द्यून् ॥ ४ ॥
न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति ।
अन्धा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन् ॥ ५ ॥ १७ ॥

॥ १४९ ॥ ऋषिः—दीर्घतमाः । देवता-अग्निः । छन्दः—विराट् ॥

॥ १४९ ॥ महः स राय एषते पतिर्दन्निन इनस्य वसुनः पद आ ।
उप ध्रजन्तमद्रयो विधन्नित् ॥ १ ॥
स यो वृषा नरां न रोदस्योः श्रवोभिरस्ति जीवपीतसर्गः ।
प्र यः सस्राणः शिश्रीत योनौ ॥ २ ॥

नित्ये । चित् । नु । यं । सदने । जगृभ्रे । प्रशस्तिऽभिः । दधिरे । यज्ञियासः । प्र । सु । नयंत । गृभयंतः । इष्टौ । अश्वासः । न । रथ्यः । ररहाणाः ॥ ३ ॥ पुरूणि । दस्मः । नि । रिणाति । जंभैः । आत् । रोचते । वने । आ । विभाऽवा । आत् । अस्य । वातः । अनु । वाति । शोचिः । अस्तुः । न । शर्यां । असनां । अनु । द्यून् ॥ ४ ॥ न । यं । रिपवः । न । रिषण्यवः । गर्भे । संतं । रेषणाः । रेषयंति । अंधाः । अपश्याः । न । दभन् । अभिऽख्या । नित्यासः । ईं । प्रेतारः । अरक्षन् ॥ ५ ॥ १७ ॥

महः । सः । रायः । आ । ईषते । पतिः । दन् । इनः । इनस्य । वसुनः । पदे । आ । उप । ध्रजंतं । अद्रयः । विधन् । इत् ॥ १ ॥ सः । यः । वृषा । नरां । न । रोदस्योः । श्रवःऽभिः । अस्ति । जीवपीतऽसर्गः । प्र । यः । सस्राणः । शिश्रीत । योनौ ॥ २ ॥

आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३नार्वा ।

सूरो न रुरुक्वाञ्छतात्मा ॥ ३ ॥

अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात् ।

होता यजिष्ठो अपां सधस्थे ॥ ४ ॥

अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।

मर्तो यो अस्मै सुतुको ददाश ॥ ५ ॥ १८ ॥

॥ १५० ॥ ऋषिः—दीर्घतमाः । देवता—अग्निः । छन्दः—उष्णिक् ॥

॥ १५० ॥ पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा ।

तोदस्येव शरण आ महस्य ॥ १ ॥

व्यनिनस्य धनिनः प्रहोषे चिदररुषः ।

कदा चन प्रजिगतो अदेवयोः ॥ २ ॥

स चन्द्रो विप्र मर्त्यो महो व्राधन्तमो दिवि ।

प्रप्रेत्ते अग्ने वनुषः स्याम ॥ ३ ॥ १९ ॥

आ । यः । पुरं । नार्मिणीं । अदीदेत् । अत्यः । कविः । नभन्यः । न । अर्वा । सूरः । न । रुरुक्वान् । शतऽआत्मा ॥ ३ ॥ अभि । द्विऽजन्मा । त्री । रोचनानि । विश्वा । रजांसि । शुशुचानः । अस्थात् । होता । यजिष्ठः । अपां । सधऽस्थे ॥ ४ ॥ अयं । सः । होता । यः । द्विऽजन्मा । विश्वा । दधे । वार्याणि । श्रवस्या । मर्तः । यः । अस्मै । सुऽतुकः । ददाश ॥ ५ ॥ १८ ॥

पुरु । त्वा । दाश्वान् । वोचे । अरिः । अग्ने । तव । स्वित् । आ । तोदस्यऽइव । शरणे । आ । महस्य ॥ १ ॥ वि । अनिनस्य । धनिनः । प्रऽहोषे । चित् । अररुषः । कदा । चन । प्रऽजिगतः । अदेवऽयोः ॥ २ ॥ सः । चंद्रः । विप्र । मर्त्यः । महः । व्राधन्ऽतमः । दिवि । प्रऽप्र । इत् । ते । अग्ने । वनुषः । स्याम ॥ ३ ॥ १९ ॥

॥ १५१ ॥ ऋषिः-दीर्घतमाः । देवता-मित्रावरुणौ । छन्दः-जगती ॥

॥ १५१ ॥ मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन् ।
अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषामवः ॥ १ ॥
यद्ध त्यद्वां पुरुमीळ्हस्य सोमिनः प्र मित्रासो न दधिरे स्वाभुवः ।
अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः ॥ २ ॥
आ वां भूषन्क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे महे ।
यदीमृताय भरथो यदर्वते प्र होत्रया शिम्या वीथो अध्वरम् ॥ ३ ॥
प्र सा क्षितिरसुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत् ।
युवं दिवो बृहतो दक्षमाभुवं गां न धुर्युप युञ्जाथे अपः ॥ ४ ॥
मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन्धेनवः ।
स्वरन्ति ता उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरिव ॥ ५ ॥ २० ॥

मित्रं । न । यं । शिम्या । गोषु । गव्यवः । सुऽआध्यः । विदथे । अप्ऽसु । जीजनन् । अरेजेतां । रोदसी इति । पाजसा । गिरा । प्रति । प्रियं । यजतं । जनुषां । अवः ॥ १ ॥ यत् । ह । त्यत् । वां । पुरुऽमीळ्हस्य । सोमिनः । प्र । मित्रासः । न । दधिरे । सुऽआभुवः । अध । क्रतुं । विदतं । गातुं । अर्चते । उत । श्रुतं । वृषणा । पस्त्यऽवतः ॥ २ ॥ आ । वां । भूषन् । क्षितयः । जन्म । रोदस्योः । प्रऽवाच्यं । वृषणा । दक्षसे । महे । यत् । ईं । ऋताय । भरथः । यत् । अर्वते । प्र । होत्रया । शिम्या । वीथः । अध्वरं ॥ ३ ॥ प्र । सा । क्षितिः । असुर । या । महि । प्रिया । ऋतऽवानौ । ऋतं । आ । घोषथः । बृहत् । युवं । दिवः । बृहतः । दक्षं । आऽभुवं । गां । न । धुरि । उप । युंजाथे इति । अपः ॥ ४ ॥ मही इति । अत्र । महिना । वारं । ऋण्वथः । अरेणवः । तुजः । आ । सद्मन् । धेनवः । स्वरन्ति । ताः । उपरऽताति । सूर्यं । आ । निऽम्रुचः । उषसः । तक्ववीःऽइव ॥ ५ ॥ २० ॥

आ वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः ।
अव त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः ॥ ६ ॥

यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः ।
उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गन्तमस्मयू ॥ ७ ॥

युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना मनसो न प्रयुक्तिषु ।
भरन्ति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे ॥ ८ ॥

रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति माहिनम् ।
न वां द्यावोऽहभिर्नोत सिन्धवो न देवत्वं पणयो नानशुर्मघम् ॥ ९ ॥ २१ ॥

आ । वा । ऋताय । केशिनीः । अनूषत । मित्र । यत्र । वरुण । गातुं । अर्चथः । अव । त्मना । सृजतं । पिन्वतं । धियः । युवं । विप्रस्य । मन्मनां । इरज्यथः ॥ ६ ॥ यः । वा । यज्ञैः । शशमानः । ह । दाशति । कविः । होता । यजति । मन्मऽसाधनः । उप । अह । तं । गच्छथः । वीथः । अध्वरं । अच्छ । गिरः । सुऽमतिं । गंतं । अस्मयू इत्यस्मऽयू ॥ ७ ॥ युवां । यज्ञैः । प्रथमा । गोभिः । अंजते । ऋतऽवाना । मनसः । न । प्रऽयुक्तिषु । भरंति । वां । मन्मना । संऽयता । गिरः । अदृप्यता । मनसा । रेवत् । आशाथे इति ॥ ८ ॥ रेवत् । वयः । दधाथे इति । रेवत् । आशाथे इति । नरा । मायाभिः । इतःऽऊति । माहिनं । न । वा । द्यावः । अहऽभिः । न । उत । सिंधवः । न । देवऽत्वं । पणयः । न । आनशुः । मघं ॥ ९ ॥ २१ ॥

॥ १५२ ॥ ऋषिः-दीर्घतमाः । देवता-मित्रावरुणौ । छन्दः-त्रिष्टुप् ॥

॥१५२॥ युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्तवो ह सर्गाः ।
अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥ १ ॥
एतच्चन त्वो वि चिकेतदेषां सत्यो मन्त्रः कविशस्त ऋघावान् ।
त्रिरश्रिं हन्ति चतुरश्रिरुग्रो देवनिदो ह प्रथमा अजूर्यन् ॥ २ ॥
अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत ।
गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ॥ ३ ॥
प्रयन्तमित्परि जारं कनीनां पश्यामसि नोपनिपद्यमानम् ।
अनवपृग्णा वितता वसानं प्रियं मित्रस्य वरुणस्य धाम ॥ ४ ॥
अनश्वो जातो अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः ।
अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणन्तः ॥ ५ ॥

युवं । वस्त्राणि । पीवसा । वसाथे इति । युवोः । अच्छिद्राः । मंतवः । ह । सर्गाः । अव । अतिरतं । अनृतानि । विश्वा । ऋतेन । मित्रावरुणा । सचेथे इति ॥ १ ॥ एतत् । चन । त्वः । वि । चिकेतत् । एषां । सत्यः । मंत्रः । कविऽशस्तः । ऋघावान् । त्रिःऽअश्रिं । हंति । चतुःऽअश्रिः । उग्रः । देवऽनिदः । ह । प्रथमाः । अजूर्यन् ॥ २ ॥ अपात् । एति । प्रथमा । पत्ऽवतीनां । कः । तत् । वां । मित्रावरुणा । आ । चिकेत । गर्भः । भारं । भरति । आ । चित् । अस्य । ऋतं । पिपर्ति । अनृतं । नि । तारीत् ॥ ३ ॥ प्रऽयंतं । इत् । परि । जारं । कनीनां । पश्यामसि । न । उपऽनिपद्यमानं । अनवऽपृग्णा । विऽतता । वसानं । प्रियं । मित्रस्य । वरुणस्य । धाम ॥ ४ ॥ अनश्वः । जातः । अनभीशुः । अर्वा । कनिक्रदत् । पतयत् । ऊर्ध्वऽसानुः । अचित्तं । ब्रह्म । जुजुषुः । युवानः । प्र । मित्रे । धाम । वरुणे । गृणंतः ॥ ५ ॥

आ धेनवो मामतेयमवन्तीर्ब्रह्मप्रियं पीपयन्त्सस्मिन्नूधन् ।
पित्वो भिक्षेत वयुनानि विद्वानासाविवासन्नदितिमुरुष्येत् ॥ ६ ॥
आ वां मित्रावरुणा हव्यजुष्टिं नमसा देवाववसा ववृत्याम् ।
अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ॥ ७ ॥ २२ ॥

॥ १५३ ॥ ऋषिः–दीर्घतमाः । देवता–मित्रावरुणौ । छन्दः–त्रिष्टुप् ॥

॥ १५३ ॥ यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः ।
घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरन्ति ॥ १ ॥
प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरुणा सुवृक्तिः ।
अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ॥ २ ॥
पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे ।
हिनोति यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता ॥ ३ ॥

आ । धेनवः । मामतेयं । अवन्तीः । ब्रह्मऽप्रियं । पीपयन् । सस्मिन् । ऊधन् । पित्वः । भिक्षेत । वयुनानि । विद्वान् । आसा । आऽविवासन् । अदितिं । उरुष्येत् ॥ ६ ॥ आ । वां । मित्रावरुणा । हव्यऽजुष्टिं । नमसा । देवौ । अवसा । ववृत्यां । अस्माकं । ब्रह्म । पृतनासु । सह्याः । अस्माकं । वृष्टिः । दिव्या । सुऽपारा ॥ ७ ॥ २२ ॥

यजामहे । वां । महः । सऽजोषाः । हव्येभिः । मित्रावरुणा । नमःऽभिः । घृतैः । घृतस्नू इति घृतऽस्नू । अध । यत् । वां । अस्मे इति । अध्वर्यवः । न । धीतिऽभिः । भरन्ति ॥ १ ॥ प्रऽस्तुतिः । वां । धाम । न । प्रऽयुक्तिः । अयामि । मित्रावरुणा । सुऽवृक्तिः । अनक्ति । यत् । वां । विदथेषु । होता । सुम्नं । वां । सूरिः । वृषणौ । इयक्षन् ॥ २ ॥ पीपाय । धेनुः । अदितिः । ऋताय । जनाय । मित्रावरुणा । हविःऽदे । हिनोति । यत् । वां । विदथे । सपर्यन् । सः । रातऽहव्यः । मानुषः । न । होता ॥ ३ ॥

उत वां विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः ।
उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः ॥ ४ ॥ २३ ॥

॥ १५४ ॥ ऋषिः-दीर्घतमाः । देवता-विष्णुः । छन्दः-त्रिष्टुप् ॥

॥१५४॥ विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥ १ ॥
प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ २ ॥
प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥ ३ ॥
यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥ ४ ॥

उत । वां । विक्षु । मद्यासु । अन्धः । गावः । आपः । च । पीपयन्त । देवीः । उतो इति । नः । अस्य । पूर्व्यः । पतिः । दन् । वीतं । पातं । पयसः । उस्रियायाः ॥२३॥

विष्णोः । नु । कं । वीर्याणि । प्र । वोचं । यः । पार्थिवानि । विऽममे । रजांसि । यः । अस्कभायत् । उत्ऽतरं । सधऽस्थं । विऽचक्रमाणः । त्रेधा । उरुऽगायः ॥ १ ॥ प्र । तत् । विष्णुः । स्तवते । वीर्येण । मृगः । न । भीमः । कुचरः । गिरिऽस्थाः । यस्य । उरुषु । त्रिषु । विऽक्रमणेषु । अधिऽक्षियन्ति । भुवनानि । विश्वा ॥ २ ॥ प्र । विष्णवे । शूषं । एतु । मन्म । गिरिऽक्षिते । उरुऽगायाय । वृष्णे । यः । इदं । दीर्घं । प्रऽयतं । सधऽस्थं । एकः । विऽममे । त्रिऽभिः । इत् । पदेभिः ॥३॥ यस्य । त्री । पूर्णा । मधुना । पदानि । अक्षीयमाणा । स्वधया । मदन्ति । यः । ऊं इति । त्रिऽधातु । पृथिवीं । उत । द्यां । एकः । दाधार । भुवनानि । विश्वा ॥४॥

सूक्त १३५.

॥ ऋषि–परुच्छेप । देवता–वायु ॥

हमारे यहां दर्भासन बिछा हुआ है। इस लिये, हे वायु, हवियोंका स्वीकार करनेके लिये आप हमारे यहां आइये। प्रशंसायुक्त मन्त्र कहनेके कारण सोमरस तीव्र बन गया है। अपने रथको हजारों घोडे जोतकर सोमरसका आस्वाद लेनेके लिये यहां आइये। हे भगवन् वायुदेव, अन्य देवताएँ सोमपान करनेके लिये आपको यहां पहिले आनेके लिये आग्रह करती हैं। आपको आनन्दित करनेके लिये मधुर सोमबिंदु हम आपको अर्पण करते हैं। हम आपको सोमबिंदु इस लिये अर्पण करते हैं कि आप सत्कार्य करनेके लिये प्रेरणा उत्पन्न करें। १

पत्थरोंसे पिसे हुए सोमरसको केवल आपहीके लिये हमने तैयार किया है। यह स्वच्छ और तेजस्वी सोमरस थालीमें डाला हुआ है। (मोतीकी नाई) यह तेजस्वी सोमरस छाना हुआ है। सोमरसका एक भाग आपको अर्पण किया जाता है और दूसरा भाग अन्य देवताओंको और दिव्यजनोंको अर्पण किया जाता है। हे वायुदेव, आपके घोडोंको हमारी ओर खींचो। हमपर आप बडी कृपा करते हैं। हमपर आप बहुत प्रेम रखते हैं। आप सन्तुष्ट होकर हमारी ओर आइये। २

हे वायुदेव, आपके सैकडों नहीं हजारों घोडोंको जोतकर हमारे यज्ञके समय हवियोंका स्वीकार करनेके और आस्वाद लेनेके लिये आप आइये। एक भाग केवल आपहीके लिये अलग रखा हुआ है। रविकिरणोंके प्रकाशके कारण वह भाग बहुतही तेजोमय दिखाई देता है। हे वायुदेव, अध्वर्युने आपके लिये थालीमें सोमरस तैयार रखा है। उसको हम आपके सामने रखते हैं। मोतीकी नाई शुभ्र सोमरसको हम बडे प्रेमसे आपको अर्पण करते हैं। ३

---

१ स्तीर्णं बर्हिः उप नः याहि वीतये, सहस्रेण नियुता नियुत्वते (सोमाय) शतिनीभिः (स्तुतिभिः) नियुत्वते (आयाहि)। तुभ्यं देवाय देवाः पूर्वपीतये येमिरे हि। (इमे) मधुमंतः सुतासः ते मदाय प्र अस्थिरन्, (तव) क्रत्वे अस्थिरन्।

२ अयं अद्रिभिः परिपूतः स्पार्हा वसानः तुभ्यं कोशं परि अर्षति, शुक्रा वसानः अर्षति। तव अयं भागः, अयं सोमः देवेषु आयुषु हूयते, (तत्) हे वायो नियुतः वह, अस्मयुः याहि, अस्मयुः जुषाणः याहि।

३ शतिनीभिः सहस्रिणीभिः नियुद्भिः नः अध्वर आ याहि, हे वायो वीतये, हव्यानि वीतये उपयाहि,। तव अयं ऋत्वियः भागः (स अधुना) सूर्ये सचा सरश्मिः। (तस्मात्) अध्वर्युभिः भरमाणाः (इमे सोमाः) अयसत, हे वायो शुक्राः (सोमाः) अयसत।

आपका रथ, आप दोनों (इन्द्र और वायु) को हमारी रक्षा करनेके लिये, तैयार किये हुए पकान्न-भोजनको पानेके लिये, और हवियोंका आस्वाद लेनेके लिये, ले आया है। आपके रथको नियुत नामके अश्व जोते हुए थे। इस मधुर सोमरसका प्राशन कीजिये। आपही के लिये वह रस तैयार किया हुआ रखा है। हे वायु, आपकी कृपा हमपर हमेशा बनी रहे। अर्पण किये हुए विभागको आप ले जाइये। हे वायु और इन्द्र, आप अपना भाग ले आइये। आनन्द देनेवाला भोजनका भाग आप ले जाइये। ४

हमारी हार्दिक प्रार्थनाएं आप (इन्द्र और वायु) दोनोंको हमारे यज्ञकी ओर आकर्षित करें। तेजस्वी और चञ्चल अश्वकी तरह हमारे ऋत्विजोंने सोमरसको बड़ी चिन्तासे स्वच्छ तैयार किया है। आप हमपर प्रेम करते हैं इस लिये हमारे सोमरसका आप प्राशन कीजिये और हमारी सहायताके लिये आइये। हे इन्द्र, हे वायु, पत्थरोंसे पीसकर बने हुए सोमरसका आप दोनों स्वीकार कीजिये। हे दिव्य सामर्थ्य देनेवाले देव, सोमरस पीकर आप प्रसन्न हूजिये। ५ (२४)

वही यह अग्नि दोनों स्थानोंमें प्रकट होनेवाला यज्ञका आचार्य है। सत्य भक्तिसे प्रेरित होकर जो भक्त इसे हविर्भाग अर्पण करता है उसे यह अग्नि अत्युत्कृष्ट संपत्ति और जगद्विख्यात सत्कीर्तिका लाभ अवश्यही कर देता है। ५ (१८)

सूक्त १५०.

॥ ऋषि-दीर्घतमा । देवता-अग्नि ॥

हे अग्निदेव, मैं आपसे बहुत धन मांगता हूं। क्योंकि मैं आपका अनन्य भक्त हूं। आप सबसे बडे हैं। आप धर्मका प्रचार करनेवाले हैं। आपहीकी कृपासे मैं आनन्दमें रहता हूं। १

आप मुझपर कृपा कीजिये। जो नास्तिक मनुष्य यज्ञ नहीं करता है और जो ईश्वरकी भक्ति नहीं करता है उसका आप नाश कीजिये। वह बडा धनवान होनेपर भी आप उसकी पुकार मत सुनिये। उसकी ओर आप ध्यान मत दीजिये। २

हे ज्ञानवान अग्निदेव, जो मनुष्य आपका भक्त है वह सबको आनन्द दिलाता है। वह भी उन भक्तोंकी उन्नति होती है। हे अग्निदेव, हम भी आपके भक्त हैं। इस लिये हमारी भी आप उन्नति कीजिये। आप हमें सबसे श्रेष्ठ बनाइये। ३ (१९)

---

३ यः नार्मिणीनाम् पुरम् अदीदेत् (सः) कविः (अग्निः) नभन्यः अत्यः अर्वा न, सूरः न रुरुक्वान्, शतात्मा (भवति)।

४ (सः) द्विजन्मा त्री रोचनानि विश्वा रजांसि अभि शुशुचानः यजिष्ठः होता अपां सधस्थे अस्थात्।

५ अयं सः द्विजन्मा होता, यः मर्तः सुतुकः अस्मै ददाश, (तस्मै) विश्वा वार्याणि श्रवस्या च दधे।

१ हे अग्ने दाश्वान् (अहं) त्वा पुरु वोचे, (यतः) अरिः तव स्वित् शरणे आ (अस्मि, यथा) महस्य तोदस्य इव शरणे आ (भवामि)।

२ (प्रहोषे) अनिनस्य, धनिनः (सतः) अररुषः चित् अदेवयोः च वि प्रहोषे (अपि) कदा चन प्रजिगतः।

३ हे विप्र अग्ने सः (तव) मर्त्यः (भक्तः) चन्द्रः महः दिवि व्राधन्तमः च, (अतः) हे अग्ने (वयं) ते वनुषः (अपि) प्रप्र इत् स्याम।

सूक्त १५१.

॥ ऋषि—दीर्घतमा । देवता—मित्रावरुण ॥

(ईश्वरके) ध्यानमें मग्न हुए सज्जनोंने (ज्ञानरूपी) गोधनकी इच्छा करके यज्ञके समय मित्रकी तरह उपकार करनेवाले, परम प्रिय और परमपूज्य अग्निको आकाशके जलसे प्रकट किया। उस समय अग्निने बड़े जोरसे गर्जना की। उससे आकाश और पृथ्वी भी कम्पित हुई। वे सोचने लगे कि मनुष्यकी रक्षा किस तरह होगी। १

सोमयाग करनेवाले पुरुमिळ्हकी आज्ञाके अनुसार चलनेवाले ऋत्विजोंने बड़े प्रेमसे आपको हवि अर्पण किया है। इस लिये आपकी स्तुति करनेवाले भक्तोंको आप ज्ञान और काव्य करनेकी स्फूर्ती अर्पण कीजिये। हे पराक्रमी पुरुष, घरका स्वामी अथवा यजमानकी प्रार्थनाकी ओर भी आप ध्यान दीजिये। २

हे वीर पुरुष, आप अन्तरिक्षसे उत्पन्न होते हैं। उत्कृष्ट सामर्थ्य प्राप्त करनेके लिये आपके भक्त बड़े प्रेमसे आपकी उत्पत्तिका वर्णन करते हैं। यथाविधि किये हुए यज्ञका जब आप प्रेमसे स्वीकार करते हैं तब आप अपने साथ लाया हुआ सामर्थ्य धर्मप्रचारके लिये उनको अर्पण करते हैं। ३

हे ईश्वररूपी मित्र और वरुण, जिन लोगोंपर आप कृपा करते हैं उनका वैभव बढ़ता है। हे धर्मकी रक्षा करनेवाले देव, हमारे यज्ञकी आप प्रशंसा कीजिये। जिस तरह रथके साथ हमेशा बैल जोते हुए रहते हैं उसी तरह आपकी कृपासे लोगोंको प्राप्त होनेवाले सामर्थ्यके साथ सत्कर्म हमेशा रहता है। ४

आप अपने प्रभावसे पृथ्वीकी सुन्दर सम्पत्तिका संग्रह करते हैं। इस लिये निष्कलंक और तेजस्वी (बुद्धिरूप) धेनुएँ अच्छी तरह रहती हैं। जिस दिन आकाश मेघोंसे आच्छादित रहता है उस दिन जिस तरह तकवी पक्षी सूर्यका दर्शन लेनेके लिये सबेरे और श्यामको मधुर आवाज करती हैं उसी तरह वे धेनुएँ भी सुन्दर (काव्य) ध्वनि अपने मुंहसे निकालती हैं। ५ (२०)

---

१ स्वाध्याः गोषु गव्यवः विदथे, यं प्रिय यजत अग्निम् मित्र न, शिम्या अप्सु अजीजनन्, (तस्य अग्नेः । पाजसा गिरा च रोदसी जनुषां अवःप्रति अरेजताम् ।

२ यत् ह सोमिनः पुरुमीळ्हस्य स्वाभुवः (ऋत्विजः) मित्रासः न वाम् त्वत् (हविः) प्रदधिरे, अध अर्चते क्रतुं गातुं च वित्तम्, उत हे वृषणा पस्त्यवतः श्रुतम् ।

३ हे वृषणा, महे दक्षसे, वां रोदस्योः प्रवाच्यं जन्म क्षितयः आ भूषन् । यत् होत्रया शिक्षया अध्वरं वीथः, ईम् (दक्षम्) ऋताय अर्चते भरथः ।

४ हे असुरा, या वां महि प्रिया सा क्षितिः प्र (कृष्टा भवति) । हे ऋतवानौ (नः) ऋतम् बृहत् आ घोषथः । यवम् बृहतः दिवः (ऊर्ध्व) आयुजम् दक्षं, अपः च, रथस्य धुरि गाम् न उपयुञ्जाथे ।

५ अत्र मही, महिना वारम् ऋण्वथः (तेन) अरेणवः तुजः धेनवः सद्मन् आ (तिष्ठन्ति.) ताः उपर-ताती आनिम्रुचः उषसः तक्वीः इव सूर्यम् स्वरन्ति ।

हे मित्र और वरुण, जिस यज्ञमें आप बड़े जोरसे गाते हैं उस यज्ञमें स्वर्गकी स्त्रीयां भी जिनके बाल बड़े मनोहर दिखाई देते हैं आपके यशका वर्णन करते हैं। आप अपने मनसे हमारी बुद्धिकी उन्नति कीजिये। मैं जैसे कवीकी बुद्धिको स्तुति करनेकी प्रेरणा करनेवाले आपही हैं। ६

जो मनुष्य आपकी स्तुति करके यज्ञके द्वारा आपको हवि अर्पण करता है और जो कवि और पुजारी बड़े ओजसे आपका स्तवन करता है और आपकी उपासना करता है उनके पास आप जाते हैं और बड़े प्रेमसे उनके यज्ञके हवियोंका आप स्वीकार करते हैं। हमपर कृपा करनेवाले हे मित्र और वरुण, हमारी प्रार्थना और सच्ची भक्तिकी ओर ध्यान देकर हमारी ओर आइये। ७

न्याय और नीतिका प्रचार करनेवाले मित्र और वरुण, यज्ञके लिये लाये हुए गोरससे हम नियमके अनुसार हृदयसे आपहीकी पूजा करते हैं। (भक्तजन) आपहीको अनन्य भक्तिसे स्तुतियां और प्रार्थनाएँ अर्पण करते हैं। आप भी दिव्य वैभव साथ लेकर उनको हृदयसे अर्पण करते हैं। ८

हे वीर पुरुष, आप बड़े जवान है। श्रेष्ठ और सबकी रक्षा करनेवाला सामर्थ्य भी ईश्वरकी कृपासे आपही हमें अर्पण करते हैं इस लिये आकाशरूपी समुद्र और पणि भी आपके दैवी सामर्थ्यकी बराबरी नहीं कर सकते। ९ (२१)

---

६ हे मित्र वरुण यत्र गातुम् अवथ, तत्र (यज्ञे) केशिनीः ऋताय वाम् आ अनूषत। (युवां) त्मना धियः अवसृजतम् पिन्वतम् च युवम् विप्रस्य मन्मनाम् इरज्यथः।

७ यः वां शशमानः ह यज्ञैः दाशति, यः कविः होता (च) मन्मसाधनः (वां) यजति। तम् उप गच्छथः अह, (तस्य) अध्वरं वीथः, (तत्) हे अस्मयू (अस्माकं) गिरः सुमतिं च गन्तम्।

८ हे ऋतावाना, यज्ञैः गोभिः मनसःप्रयुक्तिषु न युवाम् प्रथमा अञ्जते। (भक्ताश्च) संयता मन्मना वां गिरः भरन्ति, (युवां हि) अदृप्यता मनसा रेवत् (च) आशाथे।

९ हे नरा, रेवत् वयः दधाथे, रेवत्, इतऊति, (च) माहिनम् (ऐश्वर्यमपि युवां) मायया आशाथे। (अतः) न द्यावः न उत सिन्धवः नापि पणयः वाम् देवत्वम् मघं (वा) अहभिः न आनशुः।

सूक्त १५२.

॥ ऋषि–दीर्घतमा । देवता–मित्रावरुण ॥

हे मित्र और वरुण, आप ऐसा वस्त्र पहिनते हैं जिससे सबदूर प्रकाशही फैलता है। आप अपने नियत कर्ममें और अपने कृत्यमें कभी भूल नहीं करते। किसीकी कपटनीति (चालबाजी) आपके सामने नहीं चलती। हे मित्र और वरुण, इसका कारण यह है कि आप हमेशा सत्य धर्मसेही चलते हैं। १

हे मित्र और वरुण, आपके कामके विषयमें विद्वान् लोक जो अनुमान करते हैं वह बिलकुल ठीक निकलता है। उसके लिये विद्वान् लोग आपकी स्तुति करते हैं। आप जो काम करते हैं वह बिलकुल उचित है। शत्रुका हथियार जब तीन जगह पलकी धारका होता है तब आपका हथियार चार जगह पलकी धारका होता है। इस तरह आप शत्रुका नाश करते हैं। उसी समय देवोंकी निन्दा करनेवाले लोगोंका नाश आपही आप होता है। २

यह बड़ी आश्चर्यकी बात है कि जिस स्त्रीको पैर नहीं होते वह पैरवाली स्त्रियोंके आगे चलती है। हे मित्र और वरुण, आपका उपर्युक्त महिमा कौन जान सकता है?। आपका स्वरूप छोटा होनेपर भी आप जगतका भार सहन करते हैं। आपका अवतार सत्यधर्मको बढ़ाता है और असत्य धर्मका नाश करता है। ३

सूर्य–जिसपर स्वर्गकी स्त्रियां प्रेम करती हैं–सदा हमें चलता हुआ दिखाई देता है। आराम लेता हुआ वह कभी दिखाई नहीं देता। उसके तेजोमयी वस्त्र सबदूर प्रकाश फैलाते हैं। मित्र और वरुणका प्रीतिका स्थान भी आप (सूर्य) ही हैं। ४

उदय होतेही बिना लगामके अश्वही तरह सूर्य बड़े गर्वसे अपनी आग्नी दिखाकर और गर्जना करके आकाशमें एकदम उछलने और कूदने लगता है। इस आश्चर्यके कारण सदा युवा अवस्थाका उपभोग लेनेवाले देव मित्र और वरुणके वैभवकी स्तुति करते हैं और वे देव ईश्वरके अलक्ष्य गुणोंका वर्णन करते हैं और उसीमें मग्न हो जाते हैं। ५

---

१ युवम् पीवसा वस्त्राणि वसाथे, युवोः, मन्तवः, सर्गाश्च अच्छिद्राः । (युवाम्) विश्वा अनृतानि अव अतिरतम्, (यतः) हे मित्रावरुणा (युवाम्) ऋतेन सचेथे ।

२ एतत् चन त्वः वि चिकेतत् (यत्) एषाम् मन्त्रः (यः) कविशस्तः, सः सत्यः ऋघावान् च । (स पुनः) उग्रः चतुरश्रिः (भूत्वा) त्रिरश्रिम् हन्ति । (तदानीम्) देवनिदः ह प्रथमाः अजूर्यन् ।

३ अपात् पद्वतीनां (मध्ये) प्रथमा एति, हे मित्रा वरुणा वां तत् (कर्म) कः आ चिकेत । गर्भः अस्य चित् भारं आ भरति, ऋतं पिपर्ति, अनृतं नितारीत् ।

४ कनीनां जारं प्रयन्तमित् परिपश्यामसि न (तु) उपनिपद्यमानम् । (अपि च) अनवपृग्णा वितता (वस्त्राणि) वसानम्, मित्रस्य वरुणस्य च प्रियं धाम (पश्यामसि) ।

५ अर्वा जातः (सन्) अनश्वः अनभीशुः (तथापि) कनिक्रदत् पतयत् ऊर्ध्वसानुः (भवति) । (अतः हेतोः) युवानः (देवाः) मित्रेच वरुणेच धाम प्रगृणन्तः अचित्तम् ब्रह्म जुजुषुः ।

जिन धेनुओंने मेरी—मैं जो ममताका पुत्र हूं—रक्षा की उन्होंने मुझे—जो मैं उनकी उपासना करनेवाला भक्त—हूं अपना दूध पिलाकर हृष्टपुष्ट बनाया है। सब प्रकारकी विद्याओंको पढ़कर (दिव्यज्ञान) प्राप्त करनेके लिये मैं उनसे प्रार्थना करता हूं। उसके अनन्तर ईश्वरपर सब भरोसा रखकर दुःखसे मुक्त होनेकी इच्छा मैं करूंगा। ६

हे देव, हे मित्र और वरुण, मैंने अर्पण किये हुए हविर्योंका आप स्वीकार कीजिये। मैं आपकी सेवा करनेवाला भक्त हूं। इस लिये मेरी ओर आप ध्यान दीजिये। युद्धमें हमारी प्रार्थना सफल होवे, हमें दिव्य ज्ञान प्राप्त होवे और आपकी कृपासे हमारा कल्याण होवे। ७ (२२)

सूक्त १५३.

॥ ऋषि—दीर्घतमा । देवता—मित्रावरुण ॥

हे मित्र और वरुण, आप सामर्थ्यवान् हैं। हम सब लोग एकत्रित होकर प्रेमसे आपको हवि अर्पण करते हैं। हम नम्रतासे आपकी प्रार्थना करके आपकी सेवा करते हैं। हे स्वर्गके घीकी वर्षा करनेवाले देव; हमारे अध्वर्यु घीकी आहुतिकी तरह योग्य स्तोत्रोंसे आपको सन्तुष्ट करते हैं। १

आपकी अच्छी तरहसे स्तुति करनेसे और आपका ध्यान करनेसे दोनोंसे सामर्थ्य प्राप्त होता है। हे मित्र और वरुण, इस लिये मैं आपको एक सुन्दर स्तोत्र अर्पण करता हूं जब धर्ममन्दिरमें यज्ञका आचार्य आपका भजन करता है तब, हे वीर पुरुष, आपसे वह महात्मा (आचार्य) सबे आनन्दके लाभकी इच्छा करता है। २

हे मित्र और वरुण, यज्ञके सभामन्दिरमें आचार्य भी साधारण मनुष्यकी तरह आपको हवि अर्पण करके आपकी पूजा करता है। वह अपने हृदयको भी आपकी सेवामें लगाता है। उस समय मनकी शक्तिस्वरूप धेनु सत्यधर्म बढ़ानेके लिये और हवियोंको देनेवाले भक्तलोगोंके लिये दिव्य दूधसे भरी हुई, बड़ी मस्त रहती है। ३

---

६ (याः) धेनवः (मां) मामतेय अवन्तीः (ताः) मह्य (तारयन्त मां) अस्मद्धितं सस्मिन् ऊधः पीपयन्। वयुनानि विद्वान् पित्वः भिक्षेत अदितम् अस्मा आविवासन् उरुष्यन्।

७ हे देवौ मित्रावरुणौ नमसा अवस्या च वां हव्यजुष्टिं (प्रति) आ वहत्याम्। अस्माकं ब्रह्म पृतनासु सह्या। दिव्या वृष्टिः अस्माकं सुपारा (भवतु)।

१ हे मित्रावरुणा (वयं) सजोषाः हव्येभिः नमोभिः वां महः यजामहे। हे घृतस्नू, अध यत् अध्वर्यवः घृतैः न धीतिभिः वाम् भरन्ति।

२ प्रस्तुतिः वाम् प्रयुक्तिः न धाम (अतः) हे मित्रावरुणा (मया) सुवृक्तिः अयामि। यत् होता विदथेषु वाम् अनक्ति, (तदा) हे वृषणौ सः सूरिः वाम् सुम्नम् इयक्षन् (वर्तते)।

३ हे मित्रावरुणा यत् विदथे सः होता मानुषः न रातहव्यः सपर्यन् च (स्वांतः) वाम् हिनोति। (तदा) अदितिः धेनुः ऋताय, हविर्दे जनाय च पीपाय।

जब आपके भक्त आपके आनन्दमें मग्न होते हैं तब सोमरस, दिव्य धेनु, और स्वर्गोंका जल आपको यथेष्ठ रूपसे प्राप्त होते हैं। यदि इसी तरह सनातन भगवान् हमें हमेशा आनन्द देवे तो आप भी मित्र और वरुण, आईये और प्रकाशरूप धेनुके मधुर दूधका आस्वाद लीजिये। ४ (२३)

सूक्त १५४.

॥ ऋषि–दीर्घतमा । देवता–विष्णु ॥

हम पूर्ण रीतिसे विष्णुके पराक्रमोंका वर्णन नहीं कर सकते। क्यों कि वे बहुत हैं। विष्णुने सब जगत् व्याप्त किया है। इतनाही नहीं किन्तु देवलोग भी–जो सबसे ऊंचा है आपके बलके आधार पर ही रहता है। भिन्न भिन्न जगह तीन पैर रखकर आपने सब विश्व व्याप्त किया है। १

विष्णुके पराक्रमोंके कारण ही सब लोग उनकी स्तुति करते है। घोर वनमें सञ्चार करने-वाले और गुहामें रहनेवाले सिंहकी नाई विष्णुके (सब दिव्य देवताओंमें) बड़े पराक्रमी है। देखिये; उनके केवल तीन पैरोंने विश्वके सब भुवनोंको व्याप्त किया है। २

कार्य करनेको उत्साह दिलानेवाली हमारी सुन्दर स्तुतिको विष्णु सुने। हमारी स्तुतिको, आप प्रेमसे स्वीकार करते हैं। सब लोग आपका यश गाते हैं। आप बड़े वीर हैं। आप अकेले केवल तीन पैरोंसे इतने बड़े विश्वको व्याप्त करते हैं। ३

आप तीन जगह रहते हैं। हरएक जगह मधुर रस भरा हुआ है। तीनों स्थान अक्षय्य हैं। हरएक स्थानमें आपके भक्त बड़े आनन्दमें मग्न रहते हैं। आप स्वयं ऐसे है कि त्रिगुणात्मक विश्वको–पृथ्वी, आकाश और अन्य अन्य भुवनोंको आप अकेले संम्हाल सकते हैं। ४

---

४ उत वां मद्यासु विक्षु, अन्धः गावः आपः देवीः च पीपयन्त । उत न (अस्य) अस्य (भुवनस्य) पूर्व्यः पतिः दन् (भवतु, अतः) उस्रियायाः पयसः वीतम् पातम् ।

१ नु कम् विष्णोः वीर्याणि प्र वोचम्, यः (विष्णुः) पार्थिवानि रजांसि विममे । यः त्रेधा विचक्रमाणः उरुगायः (सन्) उत्तरं सधस्थं अस्कभायत् ।

२ (सः) विष्णुः तत् वीर्येण प्र स्तवते, कुचरः गिरिष्ठाः मृगः न भीमः । यस्य त्रिषु उरुषु विक्रमणेषु विश्वा भुवनानि अधि क्षियन्ति ।

३ (एतत्) शूषं मन्म गिरिक्षिते उरुगायाय वृष्णे विष्णवे प्रैतु । यः इदं दीर्घं प्रयतं सधस्थं एकः (सन्नपि) त्रिभिः पदेभिः इत् विममे ।

४ यस्य त्री पदानि मधुना पूर्णा, अक्षीयमाणा स्वधया मदन्ति । यः उ त्रिधातु पृथिवीम् उत द्याम् विश्वा भुवनानि च एकः दाधार ।

Printed at Vaidya Brothers' Press, Thakurdwar, Bombay No. 2 & published at Shrutibodh Office 47 Kalbadevi Road, Bombay, by Gajanan Bhaskar Vaidya

तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥ ५ ॥
ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि ॥ ६ ॥ २४ ॥

॥ १५५ ॥ ऋषिः–दीर्घतमाः । देवता–विष्णुः । छन्दः–जगती ॥

॥१५५॥ प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत ।
या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना ॥ १ ॥
त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति ।
या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ॥ २ ॥
ता ईं वर्धन्ति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे ।
दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः ॥ ३ ॥

तत् । अस्य । प्रियं । अभि । पाथः । अश्यां । नरः । यत्र । देवऽयवः । मदंति । उरुऽक्रमस्य । सः । हि । बंधुः । इत्था । विष्णोः । पदे । परमे । मध्वः । उत्सः ॥५॥ ता । वां । वास्तूनि । उश्मसि । गमध्यै । यत्र । गावः । भूरिऽशृंगाः । अयासः । अत्र । अह । तत् । उरुऽगायस्य । वृष्णः । परमं । पदं । अव । भाति । भूरि ॥६॥२४॥

प्र । वः । पांतं । अंधसः । धियाऽयते । महे । शूराय । विष्णवे । च । अर्चत । या । सानुनि । पर्वतानां । अदाभ्या । महः । तस्थतुः । अर्वताऽइव । साधुना ॥ १ ॥ त्वेषं । इत्था । संऽअरणं । शिमीऽवतोः । इंद्राविष्णू इति । सुतऽपाः । वां । उरुष्यति । या । मर्त्याय । प्रतिऽधीयमानं । इत् । कृशानोः । अस्तुः । असनां । उरुष्यथः ॥ २ ॥ ताः । ईं । वर्धंति । महि । अस्य । पौंस्यं । नि । मातरा । नयति । रेतसे । भुजे । दधाति । पुत्रः । अवरं । परं । पितुः । नाम । तृतीयं । अधि । रोचने । दिवः ॥ ३ ॥

तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः ।
यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे ॥ ४ ॥
द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति ।
तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः ॥ ५ ॥
चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीँरवीविपत् ।
बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवम् ॥ ६ ॥ २५ ॥

॥ १५६ ॥ ऋषिः दीर्घतमाः । देवता विष्णुः । छन्दः जगती ॥

॥१५६॥ भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न एवया उ सप्रथाः ।
अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हविष्मता ॥ १ ॥
यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति ।
यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत् ॥ २ ॥

तत्ऽतत् । इत् । अस्य । पौंस्यं । गृणीमसि । इनस्य । त्रातुः । अवृकस्य । मीळ्हुषः । यः । पार्थिवानि । त्रिऽभिः । इत् । विगामऽभिः । उरु । क्रमिष्ट । उरुऽगायाय । जीवसे ॥ ४ ॥ द्वे इति । इत् । अस्य । क्रमणे इति । स्वःऽदृशः । अभिऽख्याय । मर्त्यः । भुरण्यति । तृतीयं । अस्य । नकिः । आ । दधर्षति । वयः । चन । पतयन्तः । पतत्रिणः ॥ ५ ॥ चतुःऽभिः । साकं । नवतिं । च । नामऽभिः । चक्रं । न । वृत्तं । व्यतीन् । अवीविपत् । बृहत्ऽशरीरः । विऽमिमानः । ऋक्वऽभिः । युवा । अकुमारः । प्रति । एति । आऽहवं ॥ ६ ॥ २५ ॥

भव । मित्रः । न । शेव्यः । घृतऽआसुतिः । विभूतऽद्युम्नः । एवऽयाः । ऊं इति । सऽप्रथाः । अध । ते । विष्णो इति । विदुषा । चित् । अर्ध्यः । स्तोमः । यज्ञः । च । राध्यः । हविष्मता ॥ १ ॥ यः । पूर्व्याय । वेधसे । नवीयसे । सुमत्ऽजानये । विष्णवे । ददाशति । यः । जातं । अस्य । महतः । महि । ब्रवत् । सः । इत् । ऊं इति । श्रवःऽभिः । युज्यं । चित् । अभि । असत् ॥ २ ॥

तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन ।
आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे ॥ ३ ॥
तमस्य राजा वरुणस्तमश्विना क्रतुं सचन्त मारुतस्य वेधसः ।
दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते ॥ ४ ॥
आ यो विवाय सचथाय दैव्य इन्द्राय विष्णुः सुकृते सुकृत्तरः ।
वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत् ॥५॥२६॥२१॥

॥ द्वाविंशोऽनुवाकः ॥

॥ १५७ ॥ ऋषि-दीर्घतमा । देवता-अश्विनौ । छन्दः त्रिष्टुप ॥

॥१५७॥ अबोध्यग्निर्ज्म उदेति सूर्यो व्युषाश्चन्द्रा मह्यावो अर्चिषा ।
आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥ १ ॥

तं । ऊं इति । स्तोतारः । पूर्व्यं । यथा । विद । ऋतस्य । गर्भं । जनुषा । पिपर्तन । आ । अस्य । जानंतः । नाम । चित् । विवक्तन । महः । ते । विष्णो इति । सुऽमतिं । भजामहे ॥ ३ ॥ तं । अस्य । राजा । वरुणः । तं । अश्विना । क्रतुं । सचंत । मारुतस्य । वेधसः । दाधार । दक्षं । उत्ऽतमं । अहःऽविदं । व्रजं । च । विष्णुः । सखिऽवान् । अपऽऊर्णुते ॥ ४ ॥ आ । यः । विवाय । सचथाय । दैव्यः । इंद्राय । विष्णुः । सुऽकृते । सुकृत्ऽतरः । वेधाः । अजिन्वत् । त्रिऽसधस्थः । आर्यं । ऋतस्य । भागे । यजमानं । आ । अभजत् ॥ ५ ॥ २६ ॥ २१ ॥

अबोधि । अग्निः । ज्मः । उत् । एति । सूर्यः । वि । उषाः । चंद्रा । मही । आवः । अर्चिषा । अयुक्षातां । अश्विना । यातवे । रथं । प्र । असावीत् । देवः । सविता । जगत् । पृथक् ॥ १ ॥

यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम् ।
अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥ २ ॥
अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः ।
त्रिवन्धुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे ॥ ३ ॥
आ न ऊर्जं वहतमश्विना युवं मधुमत्या नः कशया मिमिक्षतम् ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥ ४ ॥
युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः ।
युवमग्निं च वृषणावपश्च वनस्पतींरश्विनावैरयेथाम् ॥ ५ ॥
युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या३राथ्येभिः ।
अथो ह क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मनसा ददाश ॥ ६ ॥ २७ ॥ २ ॥

यत् । युंजाथे इति । वृषणं । अश्विना । रथं । घृतेन । नः । मधुना । क्षत्रं । उक्षतं । अस्माकं । ब्रह्म । पृतनासु । जिन्वतं । वयं । धना । शूरऽसाता । भजेमहि ॥ २ ॥ अर्वाङ् । त्रिऽचक्रः । मधुऽवाहनः । रथः । जीरऽअश्वः । अश्विनोः । यातु । सुऽस्तुतः । त्रिऽवंधुरः । मघऽवा । विश्वऽसौभगः । शं । नः । आ । वक्षत् । द्विऽपदे । चतुःऽपदे ॥ ३ ॥ आ । नः । ऊर्जं । वहतं । अश्विना । युवं । मधुऽमत्या । नः । कशया । मिमिक्षतं । प्र । आयुः । तारिष्टं । निः । रपांसि । मृक्षतं । सेधतं । द्वेषः । भवतं । सचाऽभुवा ॥ ४ ॥ युवं । ह । गर्भं । जगतीषु । धत्थः । युवं । विश्वेषु । भुवनेषु । अंतरिति । युवं । अग्निं । च । वृषणौ । अपः । च । वनस्पतीन् । अश्विना । ऐरयेथां ॥ ५ ॥ युवं । ह । स्थः । भिषजा । भेषजेभिः । अथो इति । ह । स्थः । रथ्या । रथ्येभिरितिरथ्येभिः । अथो इति । ह । क्षत्रं । अधि । धत्थः । उग्रा । यः । वां । हविष्मान् । मनसा । ददाश ॥ ६ ॥ २७ ॥ २ ॥

॥ द्वितीयाष्टके द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

॥ अथ द्वितीयाष्टके तृतीयोऽध्यायः ॥ ३ ॥

॥ १५८ ॥ ऋषिः—दीर्घतमाः । देवता—अश्विनौ । छन्दः—त्रिष्टुप् ॥

॥१५८॥ वसू रुद्रा पुरुमन्तू वृधन्ता दशस्यतं नो वृषणावभिष्टौ ।
दस्रा ह यद्रेक्णं औचथ्यो वां प्र यत्सस्राथे अकवाभिरूती ॥ १ ॥
को वां दाशत्सुमतये चिदस्यै वसू यद्धेथे नमसा पदे गोः ।
जिगृतमस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरन्ता ॥ २ ॥
युक्तो ह यद्वां तौग्र्याय पेरुर्वि मध्ये अर्णसो धायि पज्रः ।
उप वामवः शरणं गमेयं शूरो नाज्म पतयद्भिरेवैः ॥ ३ ॥
उपस्तुतिरौचथ्यमुरुष्येन्मा मामिमे पतत्रिणी वि दुग्धाम् ।
मा मामेधो दशतयश्चितो धाक् प्र यद्वां बद्धस्त्मनि खादति क्षाम् ॥ ४ ॥

वसू इति । रुद्रा । पुरुमंतू इति पुरुऽमंतू । वृधंता । दशस्यतं । नः । वृषणौ । अभिष्टौ । दस्रा । ह । यत् । रेक्णः । औचथ्यः । वां । प्र । यत् । सस्राथे इति । अकवाभिः । ऊती ॥ १ ॥ कः । वां । दाशत् । सुऽमतये । चित् । अस्यै । वसू इति । यत् । धेथे इति । नमसा । पदे । गोः । जिगृतं । अस्मे इति । रेवतीः । पुरंऽधीः । कामप्रेणऽइव । मनसा । चरंता ॥ २ ॥ युक्तः । ह । यत् । वां । तौग्र्याय । पेरुः । वि । मध्ये । अर्णसः । धायि । पज्रः । उप । वां । अवः । शरणं । गमेयं । शूरः । न । अज्म । पतयत्ऽभिः । एवैः ॥ ३ ॥ उपऽस्तुतिः । औचथ्यं । उरुष्येत् । मा । मां । इमे इति । पतत्रिणी इति । वि । दुग्धां । मा । मां । एधः । दशऽतयः । चितः । धाक् । प्र । यत् । वां । बद्धः । त्मनि । खादति । क्षां ॥ ४ ॥

न मा गरन्नद्यो मातृतमा दासा यदीं सुसमुब्धमवाधुः ।
शिरो यदस्य त्रैतनो वितक्षत्स्वयं दास उरो अंसावपि ग्ध ॥ ५ ॥
दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे ।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः ॥ ६ ॥ १ ॥

॥ १५९ ॥ ऋषिः-दीर्घतमाः । देवता-द्यावापृथिव्यौ । छन्दः जगती ॥

॥१५९॥ प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा ।
देवेभिर्ये देवपुत्रे सुदंससेत्था धिया वार्याणि प्रभूषतः ॥ १ ॥
उत मन्ये पितुरद्रुहो मनो मातुर्महि स्वतवस्तद्धवीमभिः ।
सुरेतसा पितरा भूम चक्रतुरुरु प्रजाया अमृतं वरीमभिः ॥ २ ॥
ते सूनवः स्वपसः सुदंससो मही जज्ञुर्मातरा पूर्वचित्तये ।
स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ॥ ३ ॥

न । मा । गरन् । नद्यः । मातृऽतमाः । दासाः । यत् । ईं । सुऽसमुब्धं । अवऽअधुः । शिरः । यत् । अस्य । त्रैतनः । विऽतक्षत् । स्वयं । दासः । उरः । अंसौ । अपि । ग्धेति ग्ध ॥ ५ ॥ दीर्घऽतमाः । मामतेयः । जुजुर्वान् । दशमे । युगे । अपां । अर्थं । यतीनां । ब्रह्मा । भवति । सारथिः ॥ ६ ॥ १ ॥

प्र । द्यावा । यज्ञैः । पृथिवी इति । ऋतऽवृधा । मही इति । स्तुषे । विदथेषु । प्रऽचेतसा । देवेभिः । ये इति । देवपुत्रे इति देवऽपुत्रे । सुऽदंससा । इत्था । धिया । वार्याणि । प्रऽभूषतः ॥ १ ॥ उत । मन्ये । पितुः । अद्रुहः । मनः । मातुः । महि । स्वऽतवः । तत् । हवीमऽभिः । सुऽरेतसा । पितरा । भूम । चक्रतुः । उरु । प्रऽजायाः । अमृतं । वरीमऽभिः ॥ २ ॥ ते । सूनवः । सुऽअपसः । सुऽदंससः । मही इति । जज्ञुः । मातरा । पूर्वऽचित्तये । स्थातुः । च । सत्यं । जगतः । च । धर्मणि । पुत्रस्य । पाथः । पदं । अद्वयाविनः ॥ ३ ॥

ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा ।
नव्यंनव्यं तन्तुमा तन्वते दिवि समुद्रे अन्तः कवयः सुदीतयः ॥ ४ ॥
तद्राधो अद्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मनामहे ।
अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमन्तं शतग्विनम् ॥ ५ ॥ २ ॥

॥ १६० ॥ ऋषिः-दीर्घतमाः । देवता-द्यावापृथिव्यौ । छन्दः-जगती ॥

॥१६०॥ ते हि द्यावापृथिवी विश्वशम्भुव ऋतावरी रजसो धारयत्कवी ।
सुजन्मनी धिषणे अन्तरीयते देवो देवी धर्मणा सूर्यः शुचिः ॥ १ ॥
उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः ।
सुधृष्टमे वपुष्ये३न रोदसी पिता यत्सीमभि रूपैरवासयत् ॥ २ ॥
स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुवनानि मायया ।
धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य धुक्षत ॥ ३ ॥

ते । मायिनः । ममिरे । सुऽप्रचेतसः । जामी इति । सयोनी इति सऽयोनी । मिथुना । संऽओकसा । नव्यंऽनव्यं । तंतुं । आ । तन्वते । दिवि । समुद्रे । अंतरिति । कवयः । सुऽदीतयः ॥ ४ ॥ तत् । राधः । अद्य । सवितुः । वरेण्यं । वयं । देवस्य । प्रऽसवे । मनामहे । अस्मभ्यं । द्यावापृथिवी इति । सुऽचेतुना । रयिं । धत्तं । वसुऽमंतं । शतऽग्विनं ॥ ५ ॥ २ ॥

ते इति । हि । द्यावापृथिवी इति । विश्वऽशंभुवा । ऋतवरी इत्यृतऽवरी । रजसः । धारयत्कवी इति धारयत्ऽकवी । सुजन्मनी इति सुऽजन्मनी । धिषणे इति । अंतः । ईयते । देवः । देवी इति । धर्मणा । सूर्यः । शुचिः ॥ १ ॥ उरुऽव्यचसा । महिनी इति । असश्चता । पिता । माता । च । भुवनानि । रक्षतः । सुधृष्टमे इति सुऽधृष्टमे । वपुष्ये३ इति । न । रोदसी इति । पिता । यत् । सीं । अभि । रूपैः । अवासयत् ॥ २ ॥ सः । वह्निः । पुत्रः । पित्रोः । पवित्रऽवान् । पुनाति । धीरः । भुवनानि । मायया । धेनुं । च । पृश्निं । वृषभं । सुऽरेतसं । विश्वाहा । शुक्रं । पयः । अस्य । धुक्षत ॥ ३ ॥

अयं देवानामपसामपस्तमो यो जजान रोदसी विश्वशम्भुवा ।
वि यो ममे रजसी सुक्रतूययाजरेभिः स्कम्भनेभिः समानृचे ॥ ४ ॥
ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत् ।
येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतम् ॥ ५ ॥ ३ ॥

॥ १६१ ॥ ऋषिः–दीर्घतमाः । देवता–ऋभवः । छन्दः–जगती ॥

॥१६१॥ किमु श्रेष्ठः किं यविष्ठो न आजगन्किमीयते दूत्यं१कद्यदूचिम ।
न निन्दिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम ॥ १ ॥
एकं चमसं चतुरः कृणोतन तद्वो देवा अब्रुवन्तद्व आगमम् ।
सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो भविष्यथ ॥ २ ॥
अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः ।
धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि ॥ ३ ॥

अयं । देवानां । अपसां । अपःऽतमः । यः । जजान । रोदसी इति । विश्वशम्ऽभुवा ।
वि । यः । ममे । रजसी इति । सुक्रतुऽयया । अजरेभिः । स्कंभनेभिः । सं ।
आनृचे ॥ ४ ॥ ते इति । नः । गृणाने इति । महिनी इति । महि । श्रवः । क्षत्रं ।
द्यावापृथिवी इति । धासथः । बृहत् । येन । अभि । कृष्टीः । ततनाम । विश्वहा ।
पनाय्यं । ओजः । अस्मे इति । सं । इन्वतं ॥ ५ ॥ ३ ॥

किं । ऊं इति । श्रेष्ठः । किं । यविष्ठः । नः । आ । अजगन् । किं । ईयते ।
दूत्यं । कत् । यत् । ऊचिम । न । निन्दिम । चमसं । यः । महाऽकुलः । अग्ने ।
भ्रातः । द्रुणः । इत् । भूतिं । ऊदिम ॥ १ ॥ एकं । चमसं । चतुरः । कृणोतन ।
तत् । वः । देवाः । अब्रुवन् । तत् । वः । आ । अगमं । सौधन्वनाः । यदि । एव ।
करिष्यथ । साकं । देवैः । यज्ञियासः । भविष्यथ ॥ २ ॥ अग्निं । दूतं । प्रति ।
यत् । अब्रवीतन । अश्वः । कर्त्वः । रथः । उत । इह । कर्त्वः । धेनुः । कर्त्वा ।
युवशा । कर्त्वा । द्वा । तानि । भ्रातः । अनु । वः । कृत्वी । आ । इमसि ॥ ३ ॥

चकृवांस ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजगन् ।
यदावाख्यच्चमसाञ्चतुरः कृतानादित्त्वष्टा ग्नास्वन्तर्न्यानजे ॥ ४ ॥
हनामैनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिन्दिषुः ।
अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कन्या३ नामभिः स्परत् ॥ ५ ॥ ४ ॥
इन्द्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत ।
ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ॥ ६ ॥
निश्चर्मणो गामरिणीत धीतिभिर्या जरन्ता युवशा ताकृणोतन ।
सौधन्वना अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन ॥ ७ ॥
इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुञ्जनेजनम् ।
सौधन्वना यदि तन्नेव हर्यथ तृतीये घा सवने मादयाध्वै ॥ ८ ॥

चकृऽवांसः । ऋभवः । तत् । अपृच्छत । क्व । इत् । अभूत् । यः । स्यः । दूतः । नः । आ । अजगन् । यदा । अवऽअख्यत् । चमसान् । चतुरः । कृतान् । आत् । इत् । त्वष्टा । ग्नासु । अन्तरिति । नि । आनजे ॥ ४ ॥ हनाम । एनान् । इति । त्वष्टा । यत् । अब्रवीत् । चमसं । ये । देवऽपानं । अनिन्दिषुः । अन्या । नामानि । कृण्वते । सुते । सचा । अन्यैः । एनान् । कन्या । नामऽभिः । स्परत् ॥ ५ ॥ ४ ॥ इन्द्रः । हरी इति । युयुजे । अश्विना । रथं । बृहस्पतिः । विश्वऽरूपां । उप । आजत । ऋभुः । विऽभ्वा । वाजः । देवान् । अगच्छत । सुऽअपसः । यज्ञियं । भागं । ऐतन ॥ ६ ॥ निः । चर्मणः । गां । अरिणीत । धीतिऽभिः । या । जरन्ता । युवशा । ता । अकृणोतन । सौधन्वनाः । अश्वात् । अश्वं । अतक्षत । युक्त्वा । रथं । उप । देवान् । अयातन ॥ ७ ॥ इदं । उदकं । पिबत । इति । अब्रवीतन । इदं । वा । घ । पिबत । मुंजऽनेजनं । सौधन्वनाः । यदि । तत् । नऽइव । हर्यथ । तृतीये । घ । सवने । मादयाध्वै ॥ ८ ॥

आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् ।
वधर्यन्तीं बहुभ्यः प्रैको अब्रवीदृता वदन्तश्चमसाँ अपिंशत ॥ ९ ॥
श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतम् ।
आ निम्रुचः शकृदेको अपाभरत्किं स्वित्पुत्रेभ्यः पितरा उपावतुः ॥१०॥८॥
उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्वपस्यया नरः ।
अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु गच्छथ ॥ ११ ॥
सम्मील्य यद्भुवना पर्यसर्पत क्व । स्वित्तात्या पितरा व आसतुः ।
अशपत यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अब्रवीतन ॥ १२ ॥
सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत् ।
श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ॥ १३ ॥

आपः । भूयिष्ठाः । इति । एकः । अब्रवीत् । अग्निः । भूयिष्ठः । इति । अन्यः । अब्रवीत् । वधःऽयन्तीम् । बहुऽभ्यः । प्र । एकः । अब्रवीत् । ऋता । वदन्तः । चमसान् । अपिंशत ॥ ९ ॥ श्रोणाम् । एकः । उदकम् । गाम् । अव । अजति । मांसम् । एकः । पिंशति । सूनया । आऽभृतम् । आ । निऽम्रुचः । शकृत् । एकः । अप । अभरत् । किम् । स्वित् । पुत्रेभ्यः । पितरा । उप । आवतुः ॥ १० ॥ ८ ॥ उद्वत्ऽसु । अस्मै । अकृणोतन । तृणम् । निवत्ऽसु । अपः । सुऽअपस्यया । नरः । अगोह्यस्य । यत् । असस्तन । गृहे । तत् । अद्य । इदम् । ऋभवः । न । अनु । गच्छथ ॥ ११ ॥ सम्ऽमील्य । यत् । भुवना । परिऽअसर्पत । क्व । स्वित् । तात्या । पितरा । वः । आसतुः । अशपत । यः । करस्नम् । वः । आऽददे । यः । प्र । अब्रवीत् । प्रो इति । तस्मै । अब्रवीतन ॥ १२ ॥ सुसुप्वांसः । ऋभवः । तत् । अपृच्छत । अगोह्य । कः । इदम् । नः । अबूबुधत् । श्वानम् । बस्तः । बोधयितारम् । अब्रवीत् । संवत्सरे । इदम् । अद्य । वि । अख्यत ॥ १३ ॥

दिवा यान्ति मरुतो भूम्याग्निरयं वातो अन्तरिक्षेण याति ।
अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छन्तः शवसो नपातः ॥ १४ ॥ ६ ॥

॥ १६२ ॥ ऋषिः—दीर्घतमाः । देवता—अश्वस्तुतिः । छन्दः—त्रिष्टुप् ॥

॥१६२॥ मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥ १ ॥
यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥ २ ॥
एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति ॥ ३ ॥
यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥ ४ ॥

दिवा । यान्ति । मरुतः । भूम्या । अग्निः । अयं । वातः । अन्तरिक्षेण । याति । अत्ऽभिः । याति । वरुणः । समुद्रैः । युष्मान् । इच्छन्तः । शवसः । नपातः ॥१४॥६

मा । नः । मित्रः । वरुणः । अर्यमा । आयुः । इन्द्रः । ऋभुक्षाः । मरुतः । परि । ख्यन् । यत् । वाजिनः । देवऽजातस्य । सप्तेः । प्रऽवक्ष्यामः । विदथे । वीर्याणि ॥ १ ॥ यत् । निःऽनिजा । रेक्णसा । प्रावृतस्य । रातिं । गृभीतां । मुखतः । नयन्ति । सुऽप्राङ् । अजः । मेम्यत् । विश्वऽरूपः । इन्द्रापूष्णोः । प्रियं । अपि । एति । पाथः ॥ २ ॥ एषः । छागः । पुरः । अश्वेन । वाजिना । पूष्णः । भागः । नीयते । विश्वऽदेव्यः । अभिऽप्रियं । यत् । पुरोळाशं । अर्वता । त्वष्टा । इत् । एनं । सौश्रवसाय । जिन्वति ॥३॥ यत् । हविष्यं । ऋतुऽशः । देवऽयानं । त्रिः । मानुषाः । परि । अश्वं । नयन्ति । अत्र । पूष्णः । प्रथमः । भागः । एति । यज्ञं । देवेभ्यः । प्रतिऽवेदयन् । अजः ॥ ४ ॥

होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् ॥ ५ ॥ ७ ॥
यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनं सम्भरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥ ६ ॥
उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥ ७ ॥
यद्वाजिनो दाम सन्दानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये तृणं सर्वा ता ते अपि देवेष्वस्तु ॥ ८ ॥
यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥ ९ ॥

होता । अध्वर्युः । आऽवयाः । अग्निम्ऽइन्धः । ग्रावऽग्राभः । उत । शंस्ता । सुऽविप्रः ।
तेन । यज्ञेन । सुऽअरंकृतेन । सुऽइष्टेन । वक्षणाः । आ । पृणध्वं ॥ ५ ॥ ७ ॥
यूपऽव्रस्काः । उत । ये । यूपऽवाहाः । चषालं । ये । अश्वऽयूपाय । तक्षति । ये ।
च । अर्वते । पचनं । संऽभरंति । उतो इति । तेषां । अभिऽगूर्तिः । नः । इन्वतु ॥ ६ ॥
उप । प्र । अगात् । सुऽमत् । मे । अधायि । मन्म । देवानां । आशाः । उप ।
वीतऽपृष्ठः । अनु । एनं । विप्राः । ऋषयः । मदंति । देवानां । पुष्टे । चकृम ।
सुऽबंधुं ॥ ७ ॥ यत् । वाजिनः । दाम । संऽदानं । अर्वतः । या । शीर्षण्या ।
रशना । रज्जुः । अस्य । यत् । वा । घ । अस्य । प्रऽभृतं । आस्ये । तृणं । सर्वा ।
ता । ते । अपि । देवेषु । अस्तु ॥ ८ ॥ यत् । अश्वस्य । क्रविषः । मक्षिका ।
आश । यत् । वा । स्वरौ । स्वऽधितौ । रिप्तं । अस्ति । यत् । हस्तयोः । शमितुः ।
यत् । नखेषु । सर्वा । ता । ते । अपि । देवेषु । अस्तु ॥ ९ ॥

यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधं शृतपाकं पचन्तु ॥ १० ॥ ८ ॥
यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ ११ ॥
ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥ १२ ॥
यन्नीक्षणं मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वम् ॥ १३ ॥
निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥ १४ ॥

यत् । ऊवध्यं । उदरस्य । अपऽवाति । यः । आमस्य । क्रविषः । गंधः । अस्ति । सुऽकृता । तत् । शमितारः । कृण्वंतु । उत । मेधं । शृतऽपाकं । पचंतु ॥ १० ॥ ८ ॥ यत् । ते । गात्रात् । अग्निना । पच्यमानात् । अभि । शूलं । निऽहतस्य । अवऽधावति । मा । तत् । भूम्यां । आ । श्रिषत् । मा । तृणेषु । देवेभ्यः । तत् । उशत्ऽभ्यः । रातं । अस्तु ॥ ११ ॥ ये । वाजिनं । परिऽपश्यंति । पक्वं । ये । ईं । आहुः । सुरभिः । निः । हर । इति । ये । च । अर्वतः । मांसऽभिक्षां । उपऽआसते । उतो इति । तेषां । अभिऽगूर्तिः । नः । इन्वतु ॥ १२ ॥ यत् । निऽईक्षणं । मांस्पचन्याः । उखायाः । या । पात्राणि । यूष्णः । आऽसेचनानि । ऊष्मण्या । अपिऽधाना । चरूणां । अंकाः । सूनाः । परि । भूषंति । अश्वं ॥ १३ ॥ निऽक्रमणं । निऽसदनं । विऽवर्तनं । यत् । च । पड्बीशं । अर्वतः । यत् । च । पपौ । यत् । च । घासिं । जघास । सर्वा । ता । ते । अपि । देवेषु । अस्तु ॥ १४ ॥

मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥ १५ ॥ ९ ॥
यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
सन्दानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥ १६ ॥
यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥ १७ ॥
चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥ १८ ॥
एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथ ऋतुः ।
या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ ॥ १९ ॥

मा । त्वा । अग्निः । ध्वनयीत् । धूमऽगंधिः । मा । उखा । भ्राजंती । अभि । विक्त । जघ्रिः । इष्टं । वीतं । अभिऽगूर्तं । वषट्ऽकृतं । तं । देवासः । प्रति । गृभ्णंति । अश्वं ॥ १५ ॥ ९ ॥ यत् । अश्वाय । वासः । उपऽस्तृणंति । अधीऽवासं । या । हिरण्यानि । अस्मै । संऽदानं । अर्वंतं । पड्बीशं । प्रिया । देवेषु । आ । यमयंति ॥ १६ ॥ यत् । ते । सादे । महसा । शूकृतस्य । पार्ष्ण्या । वा । कशया । वा । तुतोद । स्रुचाऽइव । ता । हविषः । अध्वरेषु । सर्वा । ता । ते । ब्रह्मणा । सूदयामि ॥ १७ ॥ चतुःऽत्रिंशत् । वाजिनः । देवऽबंधोः । वंक्रीः । अश्वस्य । स्वऽधितिः । सं । एति । अच्छिद्रा । गात्रा । वयुना । कृणोत । परुःऽपरुः । अनुऽघुष्य । वि । शस्त ॥ १८ ॥ एकः । त्वष्टुः । अश्वस्य । विऽशस्ता । द्वा । यंतारा । भवतः । तथा । ऋतुः । या । ते । गात्राणां । ऋतुऽथा । कृणोमि । ताऽता । पिंडानां । प्र । जुहोमि । अग्नौ ॥ १९ ॥

मा त्वा तपत्प्रिय आत्मापियन्तं मा स्वधितिस्तन्व आ तिष्ठिपत्ते ।
मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः ॥ २० ॥
न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥ २१ ॥
सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिम् ।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान् ॥ २२ ॥ १० ॥

॥ १६३ ॥ ऋषिः-दीर्घतमाः । देवता-अश्वस्तुतिः । छन्दः-त्रिष्टुप् ॥

॥ १६३ ॥ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ १ ॥
यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥ २ ॥

मा । त्वा । तपत् । प्रियः । आत्मा । अपिऽयन्तं । मा । स्वऽधितिः । तन्वः । आ । तिष्ठिपत् । ते । मा । ते । गृध्नुः । अविऽशस्ता । अतिऽहाय । छिद्रा । गात्राणि । असिना । मिथू । करिति कः ॥ २० ॥ न । वै । ऊं इति । एतत् । म्रियसे । न । रिष्यसि । देवान् । इत् । एषि । पथिऽभिः । सुऽगेभिः । हरी इति । ते । युंजा । पृषती इति । अभूतां । उप । अस्थात् । वाजी । धुरि । रासभस्य ॥ २१ ॥ सुऽगव्यं । नः । वाजी । सुऽअश्व्यं । पुंसः । पुत्रान् । उत । विश्वऽपुषं । रयिं । अनागाःऽत्वं । नः । अदितिः । कृणोतु । क्षत्रं । नः । अश्वः । वनतां । हविष्मान् ॥ २२ ॥ १० ॥

यत् । अक्रंदः । प्रथमं । जायमानः । उत्ऽयन् । समुद्रात् । उत । वा । पुरीषात् । श्येनस्य । पक्षा । हरिणस्य । बाहू इति । उपऽस्तुत्यं । महि । जातं । ते । अर्वन् ॥ १ ॥ यमेन । दत्तं । त्रितः । एनं । अयुनक् । इंद्रः । एनं । प्रथमः । अधि । अतिष्ठत् । गंधर्वः । अस्य । रशना । अगृभ्णात् । सूरात् । अश्वं । वसवः । निः । अतष्ट ॥ २ ॥

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥ ३ ॥
त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥ ४ ॥
इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधाना ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥ ५ ॥ ११ ॥
आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम् ।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥ ६ ॥
अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः ॥ ७ ॥

असि । यमः । असि । आदित्यः । अर्वन् । असि । त्रितः । गुह्येन । व्रतेन । असि । सोमेन । समया । विऽपृक्तः । आहुः । ते । त्रीणि । दिवि । बंधनानि ॥ ३ ॥ त्रीणि । ते । आहुः । दिवि । बंधनानि । त्रीणि । अप्ऽसु । त्रीणि । अंतरिति । समुद्रे । उतऽइव । मे । वरुणः । छंत्सि । अर्वन् । यत्र । ते । आहुः । परमं । जनित्रं ॥ ४ ॥ इमा । ते । वाजिन् । अवऽमार्जनानि । इमा । शफानां । सनितुः । निऽधाना । अत्र । ते । भद्राः । रशनाः । अपश्यं । ऋतस्य । याः । अभिऽरक्षंति । गोपाः ॥ ५ ॥ ११ ॥ आत्मानं । ते । मनसा । आरात् । अजानां । अवः । दिवा । पतयंतं । पतंगं । शिरः । अपश्यं । पथिऽभिः । सुऽगेभिः । अरेणुऽभिः । जेहमानं । पतत्रि ॥ ६ ॥ अत्र । ते । रूपं । उत्ऽतमं । अपश्यं । जिगीषमाणं । इषः । आ । पदे । गोः । यदा । ते । मर्तः । अनु । भोगं । आनट् । आत् । इत् । ग्रसिष्ठः । ओषधीः । अजीगरिति ॥ ७ ॥

अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥ ८ ॥
हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥ ९ ॥
ईर्मान्तासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः ।
हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥ १० ॥ १२ ॥
तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान् ।
तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥ ११ ॥
उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥ १२ ॥

अनु । त्वा । रथः । अनु । मर्यः । अर्वन् । अनु । गावः । अनु । भगः । कनीनाम् । अनु । व्रातासः । तव । सख्यं । ईयुः । अनु । देवाः । ममिरे । वीर्यं । ते ॥ ८ ॥ हिरण्यऽशृंगः । अयः । अस्य । पादाः । मनःऽजवाः । अवरः । इंद्रः । आसीत् । देवाः । इत् । अस्य । हविःऽअद्यं । आयन् । यः । अर्वंतं । प्रथमः । अधिऽअतिष्ठत् ॥ ९ ॥ ईर्मऽअंतासः । सिलिकऽमध्यमासः । सं । शूरणासः । दिव्यासः । अत्याः । हंसाःऽइव । श्रेणिऽशः । यतंते । यत् । आक्षिषुः । दिव्यं । अज्मं । अश्वाः ॥ १० ॥ १२ ॥ तव । शरीरं । पतयिष्णु । अर्वन् । तव । चित्तं । वातःऽइव । ध्रजीमान् । तव । शृंगाणि । विऽस्थिता । पुरुऽत्रा । अरण्येषु । जर्भुराणा । चरंति ॥ ११ ॥ उप । प्र । अगात् । शसनं । वाजी । अर्वा । देवद्रीचा । मनसा । दीध्यानः । अजः । पुरः । नीयते । नाभिः । अस्य । अनु । पश्चात् । कवयः । यंति । रेभाः ॥ १२ ॥

उप प्रागात्परमं यत्सधस्थमर्वाँ अच्छा पितरं मातरं च ।
अद्या देवाञ्जुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ॥ १३ ॥ १३ ॥

॥ १६४ ॥ ऋषिः-दीर्घतमाः । देवता-विश्वेदेवाः । छन्दः-त्रिष्टुप् ॥

॥१६४॥ अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः ।
तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् ॥ १ ॥
सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥ २ ॥
इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः ।
सप्त स्वसारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम ॥ ३ ॥
को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति ।
भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसमुप गात्प्रष्टुमेतत् ॥ ४ ॥

उप । प्र । अगात् । परमं । यत् । सधऽस्थं । अर्वान् । अच्छ । पितरं । मातरं । च । अद्य । देवान् । जुष्टऽतमः । हि । गम्याः । अथ । आ । शास्ते । दाशुषे । वार्याणि ॥ १३ ॥ १३ ॥

अस्य । वामस्य । पलितस्य । होतुः । तस्य । भ्राता । मध्यमः । अस्ति । अश्नः । तृतीयः । भ्राता । घृतऽपृष्ठः । अस्य । अत्र । अपश्यं । विश्पतिं । सप्तऽपुत्रं ॥ १ ॥ सप्त । युञ्जन्ति । रथं । एकऽचक्रं । एकः । अश्वः । वहति । सप्तऽनामा । त्रिऽनाभि । चक्रं । अजरं । अनर्वं । यत्र । इमा । विश्वा । भुवना । अधि । तस्थुः ॥ २ ॥ इमं । रथं । अधि । ये । सप्त । तस्थुः । सप्तऽचक्रं । सप्त । वहन्ति । अश्वाः । सप्त । स्वसारः । अभि । सं । नवन्ते । यत्र । गवां । निऽहिता । सप्त । नाम ॥ ३ ॥ कः । ददर्श । प्रथमं । जायमानं । अस्थन्ऽवन्तं । यत् । अनस्था । बिभर्ति । भूम्याः । असुः । असृक् । आत्मा । क्व । स्वित् । कः । विद्वांसं । उप । गात् । प्रष्टुं । एतत् ॥ ४ ॥

पाकः पृच्छामि मनसाविजानन्देवानामेना निहिता पदानि ।
वत्से बष्कयेऽधि सप्त तन्तून्वि तत्निरे कवय ओतवा उ ॥ ५ ॥ १४ ॥
अचिकित्वाञ्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान् ।
वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ॥ ६ ॥
इह ब्रवीतु य ईमङ्ग वेदास्य वामस्य निहितं पदं वेः ।
शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ॥ ७ ॥
माता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे ।
सा बीभत्सुर्गर्भरसा निविद्धा नमस्वन्त इदुपवाकमीयुः ॥ ८ ॥
युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वन्तः ।
अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥ ९ ॥

पाकः । पृच्छामि । मनसा । अविऽजानन् । देवानां । एना । निऽहिता । पदानि । वत्से । बष्कये । अधि । सप्त । तंतून् । वि । तत्निरे । कवयः । ओतवै । ऊं इति ॥ ५ ॥ १४ ॥ अचिकित्वान् । चिकितुषः । चित् । अत्र । कवीन् । पृच्छामि । विद्मने । न । विद्वान् । वि । यः । तस्तंभ । षट् । इमा । रजांसि । अजस्य । रूपे । किं । अपि । स्वित् । एकं ॥ ६ ॥ इह । ब्रवीतु । यः । ईं । अंग । वेद । अस्य । वामस्य । निऽहितं । पदं । वेरिति वेः । शीर्ष्णः । क्षीरं । दुह्रते । गावः । अस्य । वव्रिं । वसानाः । उदकं । पदा । अपुः ॥ ७ ॥ माता । पितरं । ऋते । आ । बभाज । धीती । अग्रे । मनसा । सं । हि । जग्मे । सा । बीभत्सुः । गर्भऽरसा । निऽविद्धा । नमस्वंतः । इत् । उपऽवाकं । ईयुः ॥ ८ ॥ युक्ता । माता । आसीत् । धुरि । दक्षिणायाः । अतिष्ठत् । गर्भः । वृजनीषु । अंतरिति । अमीमेत् । वत्सः । अनु । गां । अपश्यत् । विश्वऽरूप्यं । त्रिषु । योजनेषु ॥ ९ ॥

तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति ।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ॥ १० ॥ १५ ॥
द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ॥ ११ ॥
पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम् ॥ १२ ॥
पञ्चारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः ॥ १३ ॥
सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥ १४ ॥

तिस्रः । मातॄः । त्रीन् । पितॄन् । बिभ्रत् । एकः । ऊर्ध्वः । तस्थौ । न । ईम् । अव । ग्लपयंति । मंत्रयंते । दिवः । अमुष्य । पृष्ठे । विश्वऽविदं । वाचं । अविश्वऽमिन्वां ॥ १० ॥ १५ ॥ द्वादशऽअरं । नहि । तत् । जराय । वर्वर्ति । चक्रं । परि । द्यां । ऋतस्य । आ । पुत्राः । अग्ने । मिथुनासः । अत्र । सप्त । शतानि । विंशतिः । च । तस्थुः ॥ ११ ॥ पंचऽपादं । पितरं । द्वादशऽआकृतिं । दिवः । आहुः । परे । अर्धे । पुरीषिणं । अथ । इमे । अन्ये । उपरे । विऽचक्षणं । सप्तऽचक्रे । षट्ऽअरे । आहुः । अर्पितं ॥ १२ ॥ पंचऽअरे । चक्रे । परिऽवर्तमाने । तस्मिन् । आ । तस्थुः । भुवनानि । विश्वा । तस्य । न । अक्षः । तप्यते । भूरिऽभारः । सनात् । एव । न । शीर्यते । सऽनाभिः ॥ १३ ॥ सऽनेमि । चक्रं । अजरं । वि । ववृते । उत्तानायां । दश । युक्ताः । वहंति । सूर्यस्य । चक्षुः । रजसा । एति । आऽवृतं । तस्मिन् । आर्पिता । भुवनानि । विश्वा ॥ १४ ॥

साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः ॥ १५ ॥ १६॥
स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः ।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत् ॥ १६ ॥
अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्धं परागात्क्व स्वित्सूते नहि यूथे अन्तः ॥ १७ ॥
अवः परेण पितरं यो अस्यानुवेद पर एनावरेण ।
कवीयमानः क इह प्र वोचद्देवं मनः कुतो अधि प्रजातम् ॥ १८ ॥
ये अर्वाञ्चस्ताँ उ पराच आहुर्ये पराञ्चस्ताँ उ अर्वाच आहुः ।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ॥ १९ ॥

साकंऽजानां । सप्तथं । आहुः । एकऽजं । षट् । इत् । यमाः । ऋषयः । देवऽजाः । इति । तेषां । इष्टानि । विऽहितानि । धामऽशः । स्थात्रे । रेजंते । विऽकृतानि । रूपऽशः ॥ १५ ॥ १६ ॥ स्त्रियः । सतीः । तान् । ऊं इति । मे । पुंसः । आहुः । पश्यत् । अक्षणऽवान् । न । वि । चेतत् । अंधः । कविः । यः । पुत्रः । सः । ईं । आ । चिकेत । यः । ता । विऽजानात् । सः । पितुः । पिता । असत् ॥ १६ ॥ अवः । परेण । परः । एना । अवरेण । पदा । वत्सं । बिभ्रती । गौः । उत् । अस्थात् । सा । कद्रीची । कं । स्वित् । अर्धं । परा । अगात् । क्व । स्वित् । सूते । नहि । यूथे । अंतः ॥ १७ ॥ अवः । परेण । पितरं । यः । अस्य । अनुऽवेद । परः । एना । अवरेण । कविऽयमानः । कः । इह । प्र । वोचत् । देवं । मनः । कुतः । अधि । प्रऽजातं ॥ १८ ॥ ये । अर्वांचः । तान् । ऊं इति । परांचः । आहुः । ये । परांचः । तान् । ऊं इति । अर्वांचः । आहुः । इंद्रः । च । या । चक्रथुः । सोम । तानि । धुरा । न । युक्ताः । रजसः । वहंति ॥ १९ ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥ २० ॥ १७ ॥
यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ।
इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ॥ २१ ॥
यस्मिन्वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥ २२ ॥
यद्गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः ॥ २३ ॥
गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥ २४ ॥

द्वा । सुऽपर्णा । सऽयुजा । सखाया । समानं । वृक्षं । परि । सस्वजाते इति । तयोः । अन्यः । पिप्पलं । स्वादु । अत्ति । अनश्नन् । अन्यः । अभि । चाकशीति ॥ २० ॥ १७ ॥ यत्र । सुऽपर्णाः । अमृतस्य । भागं । अनिऽमेषं । विदथा । अभिऽस्वरंति । इनः । विश्वस्य । भुवनस्य । गोपाः । सः । मा । धीरः । पाकं । अत्र । आ । विवेश ॥ २१ ॥ यस्मिन् । वृक्षे । मधुऽअदः । सुऽपर्णाः । निऽविशंते । सुवते । च । अधि । विश्वे । तस्य । इत् । आहुः । पिप्पलं । स्वादु । अग्रे । तत् । न । उत् । नशत् । यः । पितरं । न । वेद ॥ २२ ॥ यत् । गायत्रे । अधि । गायत्रं । आऽहितं । त्रैस्तुभात् । वा । त्रैस्तुभं । निःऽअतक्षत । यत् । वा । जगत् । जगति । आऽहितं । पदं । ये । इत् । तत् । विदुः । ते । अमृतऽत्वं । आनशुः ॥ २३ ॥ गायत्रेण । प्रति । मिमीते । अर्कं । अर्केण । साम । त्रैस्तुभेन । वाकं । वाकेन । वाकं । द्विऽपदा । चतुःऽपदा । अक्षरेण । मिमते । सप्त । वाणीः ॥ २४ ॥

जगता सिन्धुं दिव्यस्तभायद्रथंतरे सूर्यं पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ॥ २५ ॥ १८ ॥
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचम् ॥ २६ ॥
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ॥ २७ ॥
गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ।
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥ २८ ॥
अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥ २९ ॥

जगता । सिंधुं । दिवि । अस्तभायत् । रथंऽतरे । सूर्यं । परि । अपश्यत् । गायत्रस्य । संऽइधः । तिस्रः । आहुः । ततः । मह्ना । प्र । रिरिचे । महिऽत्वा ॥ २५ ॥ १८ ॥
उप । ह्वये । सुऽदुघां । धेनुं । एतां । सुऽहस्तः । गोऽधुक् । उत । दोहत् । एनां । श्रेष्ठं । सवं । सविता । साविषत् । नः । अभिऽइद्धः । घर्मः । तत् । ऊं इति । सु । प्र । वोचं ॥ २६ ॥ हिङ्ऽकृण्वती । वसुऽपत्नी । वसूनां । वत्सं । इच्छंती । मनसा । अभि । आ । अगात् । दुहां । अश्विऽभ्यां । पयः । अघ्न्या । इयं । सा । वर्धतां । महते । सौभगाय ॥ २७ ॥ गौः । अमीमेत् । अनु । वत्सं । मिषंतं । मूर्धानं । हिङ् । अकृणोत् । मातवै । ऊं इति । सृक्वाणं । घर्मं । अभि । वावशाना । मिमाति । मायुं । पयते । पयःऽभिः ॥ २८ ॥ अयं । सः । शिंक्ते । येन । गौः । अभिऽवृता । मिमाति । मायुं । ध्वसनौ । अधि । श्रिता । सा । चित्तिऽभिः । नि । हि । चकार । मर्त्यं । विऽद्युत् । भवंती । प्रति । वव्रिं । औहत ॥ २९ ॥

अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ॥ ३० ॥ १९ ॥
अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥ ३१ ॥
य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश ॥ ३२ ॥
द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥ ३३ ॥
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥ ३४ ॥

अनत् । शये । तुरऽगातु । जीवं । एजत् । ध्रुवं । मध्ये । आ । पस्त्यानां ॥ जीवः । मृतस्य । चरति । स्वधाभिः । अमर्त्यः । मर्त्येन । सऽयोनिः ॥ ३० ॥ १९ ॥
अपश्यं । गोपां । अनिऽपद्यमानं । आ । च । परा । च । पथिऽभिः । चरंतं ॥ सः । सध्रीचीः । सः । विषूचीः । वसानः । आ । वरीवर्ति । भुवनेषु । अंतः ॥ ३१ ॥
यः । ईं । चकार । न । सः । अस्य । वेद । यः । ईं । ददर्श । हिरुक् । इत् । नु । तस्मात् ॥ सः । मातुः । योना । परिऽवीतः । अंतः । बहुऽप्रजाः । निःऽऋतिं । आ । विवेश ॥ ३२ ॥
द्यौः । मे । पिता । जनिता । नाभिः । अत्र । बंधुः । मे । माता । पृथिवी । मही । इयं ॥ उत्तानयोः । चम्वोः । योनिः । अंतः । अत्र । पिता । दुहितुः । गर्भं । आ । अधात् ॥ ३३ ॥
पृच्छामि । त्वा । परं । अंतं । पृथिव्याः । पृच्छामि । यत्र । भुवनस्य । नाभिः ॥ पृच्छामि । त्वा । वृष्णः । अश्वस्य । रेतः ॥ पृच्छामि । वाचः । परमं । विऽओम ॥ ३४ ॥

इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ३५ ॥ २० ॥
सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ॥ ३६ ॥
न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि ।
यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः ॥ ३७ ॥
अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्यन्यं चिक्युर्न नि चिक्युरन्यम् ॥३८॥
ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ३९ ॥

इयं । वेदिः । परः । अन्तः । पृथिव्याः । अयं । यज्ञः । भुवनस्य । नाभिः । अयं । सोमः । वृष्णः । अश्वस्य । रेतः । ब्रह्मा । अयं । वाचः । परमं । विऽओम ॥ ३५ ॥ २० ॥ सप्त । अर्धऽगर्भाः । भुवनस्य । रेतः । विष्णोः । तिष्ठन्ति । प्रऽदिशा । विऽधर्मणि । ते । धीतिऽभिः । मनसा । ते । विपःऽचितः । परिऽभुवः । परि । भवन्ति । विश्वतः ॥ ३६ ॥ न । वि । जानामि । यत्ऽइव । इदं । अस्मि । निण्यः । संऽनद्धः । मनसा । चरामि । यदा । मा । आ । अगन् । प्रथमऽजाः । ऋतस्य । आत् । इत् । वाचः । अश्नुवे । भागं । अस्याः ॥ ३७ ॥ अपाङ् । प्राङ् । एति । स्वधया । गृभीतः । अमर्त्यः । मर्त्येन । सऽयोनिः । ता । शश्वन्ता । विषूचीना । विऽयन्ता । नि । अन्यं । चिक्युः । न । नि । चिक्युः । अन्यं ॥ ३८ ॥ ऋचः । अक्षरे । परमे । विऽओमन् । यस्मिन् । देवाः । अधि । विश्वे । निऽसेदुः । यः । तत् । न । वेद । किं । ऋचा । करिष्यति । ये । इत् । तत् । विदुः । ते । इमे । सं । आसते ॥ ३९ ॥

सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥ ४० ॥ २१ ॥
गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ ४१ ॥
तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः ।
ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ॥ ४२ ॥
शकमयं धूममारादपश्यं विषूवता पर एनावरेण ।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ॥ ४३ ॥
त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।
विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥ ४४ ॥

सुयवसऽअत् । भगऽवती । हि । भूयाः । अथो इति । वयं । भगऽवन्तः । स्याम । अद्धि । तृणं । अघ्न्ये । विश्वऽदानीं । पिब । शुद्धं । उदकं । आऽचरन्ती ॥ ४० ॥ २१ ॥ गौरीः । मिमाय । सलिलानि । तक्षती । एकऽपदी । द्विऽपदी । सा । चतुःऽपदी । अष्टाऽपदी । नवऽपदी । बभूवुषी । सहस्रऽअक्षरा । परमे । विऽओमन् ॥ ४१ ॥ तस्याः । समुद्राः । अधि । वि । क्षरन्ति । तेन । जीवन्ति । प्रऽदिशः । चतस्रः । ततः । क्षरति । अक्षरं । तत् । विश्वं । उप । जीवति ॥ ४२ ॥ शकऽमयं । धूमं । आरात् । अपश्यं । विषुऽवता । परः । एना । अवरेण । उक्षाणं । पृश्निं । अपचन्त । वीराः । तानि । धर्माणि । प्रथमानि । आसन् ॥ ४३ ॥ त्रयः । केशिनः । ऋतुऽथा । वि । चक्षते । संवत्सरे । वपते । एकः । एषां । विश्वं । एकः । अभि । चष्टे । शचीभिः । ध्राजिः । एकस्य । ददृशे । न । रूपं ॥ ४४ ॥

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ ४५ ॥
इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥ ४६ ॥ २२ ॥
२८ गौः वत्सं मिषन्तं अनु अमीमेत्, मूर्धानं मातवै उ हिङ् अकृणोत् । (ततः) अस्य सृक्वाणम् घर्मम् सृक्वाणम् अभि वावशाना, मायुं मिमाति, पयोभिः पयते ।

२९ अयं (वत्सोपि) येन गौः अभिवृता सः शिङ्क्ते, (सापि) ध्वसनौ अधि श्रिता मायुं मिमाति । सा चित्तिभिः मर्त्यं (अपि) नि हि चकार, (परं च) विद्युत् भवन्ती वव्रिं प्रति औहत) ।

सांस लेनेवाली, चंचल और सजीव रीतिसे हिलनेवाली कोई वस्तु इस शरी रूपी झूलेमें दृढ रीतिसे गडी हुई है । जीवात्मा भी मृत पदार्थोंके सृष्टि नियमके अनुसार ही चलता है । मरनेवाला शरीर और अमर आत्मा दोनों एकही जगह स्थित है । ३०

शरीरको धारण करनेवाला जी सदा अपने नियमके अनुसार इस संसारमें आता है और फिर चला जाता है । मैं इस बातको देख चुका हूं । उस जीमें संयोग और वियोगका दोनों सामर्थ्य है । वह बारबार संसारमें लौट आता है । ३१

जिसने उस जीको उत्पन्न किया उसको वह नहीं जानता । क्योंकि जो हमेशा इस जीको देखता है वह छिपा हुआ रहता है । इसी कारणही मनुष्य प्राणी अपनी माताके पेटमें लिपटा हुआ रहता है और बारबार जन्म लेकर दुःखसागरमें डूबा हुआ रहता है । ३२

द्यु मेरा पिता है । मुझे उत्पन्न करनेवाला वही है । और मेरे जीवनका आधार वही है । यह विशाल पृथ्वी मेरी माता है । मेरा नातेदार सब कुछ पृथिवी है । सब लोगोंका जन्मस्थान पेटके बीचमेंके पोले प्रदेश में ही है । उसी स्थानमें पिता अपनी कन्याका गर्भकी रखता है । ३३

अब मैं तुझे पूछता हूं कि ' पृथिवीकी अन्तिम सीमा कहा है ' । जगत्का केन्द्र कहा है । सांड घोड़ेका शुक्र कौनसा है ? और वाक्-देवीका अत्यन्त श्रेष्ठ स्थान कौनसा है ? ३४

---

३० अनत्, तुरगातु, जीवम्, एजत् (एतादृशं वस्तु) पस्त्यानाम् मध्ये ध्रुवम् आ शये । जीवः मृतस्य स्वधाभिः चरति अमर्त्यः मर्त्येन सयोनिः ।

३१ (सनोः) गोपां अनिपद्यमानम् पथिभिः आ च परा च चरन्तम् अपश्यम् । स सध्रीचीः स विषूची वसानः भुवनेषु अन्तः आवरीवर्ति ।

३२ यः (ईश्वरः) ईं चकार सः (जीवात्मा) अस्य न वेद । यः ईं ददर्श (सः) तस्मात् हिरुक् इत् । (अतः) मातुः योनौ अन्तः परिवीतः सः बहुप्रजा निर्ऋतिम् आ विवेश ।

३३ अत्र द्यौः मे पिता जनिता नाभिः च, इयं मही (पृथिवी) मे माता बन्धुः च (भवति) उत्तानयोः चम्वोः अन्तः (जगतः) योनिः, अत्र पिता दुहितुः गर्भम् आ अधात् ।

३४ त्वाम् पृथिव्याः परं अन्तं पृच्छामि, यत्र भुवनस्य नाभिः (तत्) पृच्छामि, वृष्णः अश्वस्य रेतः त्वां पृच्छामि, वाचः परमं व्योम च पृच्छामि ।

यह वेदी पृथिवीकी अन्तिम सीमा है । यह यज्ञ सर्व जगतका केन्द्र है । यह सोमरस ही सांड घोडेका शुक्र है । और यह 'ब्रम्ह' वाक्-देवीका श्रेष्ठ स्थान है ।　　३५(२०)

वे सात (सूर्य किरण)–जगत्का अपूर्ण गर्भ–बीजरूपसे रहते हैं । वे विष्णुकी आज्ञाके अनुसार नियमपर चलते हैं । वे बुद्धिमान् हैं; और सब जगत्को व्याप करके रहते हैं । वे ध्यानसे सब वस्तुओंका विचार करते हैं ।　　३६

मैं यह नहीं जानता हूं कि सब कुछ मैं हूं । मैं मनसे बन्धा हुआ हूं । मेरा ध्यान ठिकानेपर नहीं है । मैं हमेशा सञ्चार करता हूं । किन्तु परम तत्वसे उत्पन्न हुआ चैतन्य अब मुझमें प्रकट हुआ तबसे (ईश्वरी) वाक्–देवीका अंश मुझे प्राप्त हुआ ।　　३७

इस आत्माका जीवन उसके हिलनेसेही विदित होता है । वह कभी पीछे हट जाता है और कभी आगे बढ़ता है । वह अमर होनेपरभी मरने वाले शरीरके साथ जन्म लेता है । वे दोनों (शरीर और आत्मा) आपसमें संलग्न होकर रहते हैं । किन्तु वे सब स्थानोंमें नानारूपसे घूमते हुए रहते हैं । किन्तु सब लोग केवल शरीरकोही देखते हैं और आत्माको नहीं देखते ।　　३८

जिसतरह देव स्वर्गके बड़े उच्चस्थानोंमे रहते हैं उसी तरह वेदोंकी ऋचाओंके प्रत्येक अक्षरमें देवोंका रहनेका स्थान है । जो मनुष्य ऋचाओंके अक्षरोंको नहीं जानता उसको वेद पढनेसे कुछभी लाभ नहीं है । जो ऋचाओंके अक्षरोंको जानते हैं वे वेदोंको पढनेसे आनन्दमें इकठे रहते हैं ।　　३९

---

३५ इयं वेदिः पृथिव्याः परः अन्तः, अयं यज्ञः भुवनस्य नाभिः, अयं सोमः वृष्णः अश्वस्य रेतः, अयं ब्रह्मा वाचः परमं व्योम ।

३६ सप्त अर्धगर्भाः (ये) भुवनस्य रेतः (ते) विष्णोः प्रदिशा (स्व) विधर्मणि तिष्ठन्ति । ते विपश्चितः मनसा परिभुवः (सन्तः) विश्वतः (विश्वं) धीतिभिः परि भवन्ति

३७ यदिव इदं अस्मि (इति) न जानामि. (किंतु) निण्यः मनसा संनद्धः चरामि । यदा ऋतस्य प्रथमजाः मा आ अगन् आत् इत् अस्याः वाचः भागं अश्नुवे.

३८ स्वधया गभीतः अमर्त्यः मर्त्येन सयोनिः अपाङ् प्राङ् एति ता शश्वन्ता विषूचीना वियन्ता (सन्तौ) अन्यं चिक्युः, अन्यं न निचिक्युः

३९. परमे व्योमन् (इव) यस्मिन् ऋचः अक्षरे अधि विश्वे देवाः निषेदुः । (तन्हि) यः तत् न वेद ऋचा किं करिष्यति ये इत् तत् विदुः ते इमे समासते

हे धेनु, तुझे खानेके लिये घास चाहिये। वह तृण तुझे प्राप्त होवे और तुमारा भाग्य सदा बना रहे। तुमारे भाग्यके साथ हमभी भाग्यवान् हो जायेंगे। हे अवध्य धेनु, तूं हमारी ओर आ जाव। सदा यहां तृण खा कर जल पी जाव। ४० (२१)

जब यह सफेन तेजस्वी (मेघवाणी रूपी) धेनु जल उत्पन्न करती है तब रांभती है। उसके कभी एक कभी दो, कभी चार, कभी आठ और कभी नौ पैर होते हैं। उसके कभी कभी सहस्र अक्षर भी होते हैं और वह उच्च स्वर्ग लोकमें रहती है। ४१

उस (मेघरूपी) धेनुकेही कारण समुद्र सदा पानीसे पूर्णरूपसे भरा हुआ रहता है। और उसीके कारण पृथिवीके चारों ओरके प्रदेशोंमें सब लोग आनन्दमें जीन्दे रहते हैं। वहांसे ही अमृतकी वर्षा होती है और इस तरह सब विश्वकी रक्षा होती है। ४२

दूर अन्तरपर गोबरका धुआं मैंने दिखाई दिया। एकके पीछे एक ऊपर जानेवाले धुएंके बादल चारों ओर फैले हुवे थे। चित्र विचित्र रंगके बैलको वहां पराक्रमी पुरुष पकाते थे। उसीको पुराणे कालका पहिला धर्म कहते थे। ४३

तीन देव-जिनकी जटाएं दूर तक बढी हुई हैं—अपने अपने समयपर पृथिवीपर आते हैं। उनमेंसे एक हर साल भूस्थानोंको स्वच्छ करता है। उनमेंसे दूसरा अपने सामर्थ्यसे सब विश्वपर देखभाल करता है। उनमेंसे केवल तीसरेको हम प्रत्यक्ष रूपसे जान सकते हैं। उसकी चाल मालुम होती है; किन्तु वह दिखाई नहीं देता। ४४

---

४० सूयवसाद् भगवती हि भूयाः, अथ वयम् भगवन्तः स्याम, हे अघ्न्ये विश्वदानीम् तृणम् अद्धि, आचरन्ती च शुद्धम् उदकम् पिब।

४१ (इयम्) गौरीः सलिलानि तक्षती मिमाय, एकपदी, द्विपदी, चतुष्पदी, (अर्थात्) (तथाहि) अष्टापदी नवपदी सहस्राक्षरा बभूवुषी परमे व्योमन् (वर्तते)

४२ तस्याः समुद्राः अधि वि क्षरन्ति, तेन च चतस्रः प्रदिशः जीवन्ति। ततः अक्षरम् क्षरति, तत् विश्वम् उपजीवति।

४३ शकमयम् धूमम् आरात् अपश्यम्, एना अवरेण विषुवता (परेण) परः, वीराः पृश्निम् उक्षाणम् अपचन्त, (तानि) तानि धर्माणि प्रथमानि आसन्।

४४ त्रयः केशिनः ऋतुथा विचक्षते, (एकस्मिन्) संवत्सरे एषाम् एकः वपते। एकः विश्वम् शचीभिः अभिचष्टे एकस्य ध्राजिः दृश्यते न (तु) रूपम्।

चार प्रकारकी वाक् देवी समझी जाती है । जो ज्ञानवान् ब्राह्मण हैं वे ही केवल वाक्-देवीके चारों प्रकारोंको समझ सकते हैं । उनमेंसे पहले तीन प्रकार गुप्त रहते हैं । वे समझमें नहीं आते । जिसको मनुष्य बोलते हैं वह वाक्-देवीका चौथा प्रकार है । ४५

उस (ईश्वरको) ही इन्द्र, मित्र, वरुण और अग्नि कहते हैं । देवलोकमें रहनेवाला और सुन्दर पंखवाला वही है । सचमुच वह अकेलाही है । तबभी ज्ञानी लोक उसको बहुत प्रकारके नामोंसे पुकारते हैं । उसीको अग्नि, यम अथवा मातरीश्वाभी कहते हैं । ४६ (२२)

आकाशमें जानेका जो एक काले रंगका मार्ग है उस मार्गसे सुवर्ण रंगके सुन्दर पक्षी जलरूप वस्त्र पहिनकर आकाशमें उडते हैं । जब वे अपने निवासस्थानसे लौट आते हैं तब पृथिवी घीकी वर्षासे बिलकुल गीली हो जाती है । ४७

चक्र एक ही होता है । किन्तु उसके बारह डण्ड होते हैं । उसके तीन नाह होते हैं । वे किस प्रकार होते हैं यह बात किसीको विदित नहीं है । उस चक्रके तीन सौ साठ डण्ड होते हैं । वह चक्र शङ्कु की तरह बडे जोरसे घूमता रहता है । ४८

हे सरस्वति, आपका थन अक्षय, और कल्याण करनेवाला है । उस थनके द्वाराही मनोहर वस्तुओंकी सन्दरता बढती है । आपका थन रत्नोंका भण्डार है । आपका थन बडी उदारतासे सबोंकी इच्छा परी करता है । इसलिये आपके थनका दूध हमें पिलाइये । ४९

---

४५ वाक् पदानि चत्वारि परिमिता, ये ब्राह्मणाः मनीषिणः (ते) तानि विदुः । त्रीणि (पदानि) गुहा निहिता न इङ्गयन्ति, वाचः तुरीयं (पदं) मनुष्याः वदन्ति ।

४६ (परमेश्वरम्) इन्द्रं, मित्रं, वरुणं, अग्निं आहुः, अथो सः (एव) दिव्यः सुपर्णः गरुत्मान् । एकम् सन् विप्राः बहुधा वदन्ति, अग्निम् यमम् मातरिश्वानम् आहुः ।

४७ हरयः सुपर्णाः अपः वसानाः कृष्णं नियानं (निर) दिवम् उत्पतन्ति । (यदा) ते ऋतस्य सदनात् आ अववृत्रन्, आत् इत् पृथिवी घृतेन वि उद्यते ।

४८ चक्रम् एकम्, द्वादश प्रधयः, त्रीणि नभ्यानि कः उ तत् चिकेत । तस्मिन् (चक्रे) त्रिशताः साकं षष्टिः (अराः) शंकवः न चलाचलासः (शंकवः) न अर्पिताः ।

४९ हे सरस्वति, ते स्तनः यः शशयः मयोभूः, येन (त्वं) विश्वा वार्याणि पुष्यसि, यः रत्नधाः यः वसुवित्, यः सुदत्रः तम् (स्तनं) इह धातवे कः ।

देवोंने यज्ञपुरुषके द्वारा यज्ञ किया। यदि सच पूछा जाय तो यही सबसे पुराना और पहिला धर्म है। तदनन्तर जहां पुराने और श्रेष्ठ साध्यदेव रहते थे उस स्वर्गलोकमें वे (यज्ञ करनेवाले) देव बनकर रहने लगे। ५०

उदक सब स्थानोंमें एकही प्रकारका होता है। वह उदक भाफके रूपसे ऊपर चला जाता है और पुनः वर्षाके रूपसे नीचे गिरता है। इस प्रकार जलकी वर्षा पृथिवीको हरियाली बनाता है। और यज्ञके अग्निसे आकाश तेजोमय दिखाई देता है। ५१

द्युलोकमें रहनेवाला सरस्वान् देव बड़ा वेगवान् और (बलवान् पक्षी है यही देव उदक का और) वनस्पतियोंका सुन्दर बचा है। जलकी वर्षा करके वह सब लोगोंको बड़ा आनन्द दिलाकर उनको सहज रीतिसे प्रसन्न करता है। वह हम पर कृपा करें और इसलिये मैं उससे प्रार्थना करता हूं। ५२(२३).

अनुवाक २३

सूक्त १६५

॥ ऋषि—आगस्त्य। देवता—मरुत् ॥

समान बलके और एकही स्थानमें रहनेवाले सब मरुत् देवोंकी कान्ति सुन्दर होनेके कारण वे बड़े शोभायमान् दिखाई देते हैं। वे कहांसे और किस उद्देशसे आये होंगे? कुछभी हो। वे हमारे शूर मित्र हैं। उन(से लाभ होनेके लिये हम उन) के सामर्थ्यकी प्रशंसा करते हैं। और बड़े जोरसे उनकी स्तुति हम गाते हैं। १

---

५० देवाः यज्ञेन यज्ञं अयजंत, तानि धर्माणि प्रथमानि आसन्। देवाः ते ह देवा महिमानः नाकं सचंते यत्र पूर्वे साध्याः सन्ति,।

५१ एतत् उदकम् (यत्) अहोभिः उत् च अवच एति तत् समानम्। पर्जन्याः भूमिं जिन्वन्ति, (तथाच) अग्नयः दिवम्, जिन्वन्ति

५२ दिव्यम् वायसं, बृहन्तम्, अपाम् गर्भम्, ओषधीनाम् दर्शतम्। अभीपतः वृष्टिभिः (जगत्) तर्पयन्तं (एतादृशं) सुपर्णम् सरस्वन्तम् अवसे जोहवीमि।

१ (पश्य एते) सवयसः सनीळाः मरुतः कया शुभा समान्या (कान्त्या) सं मिमिक्षुः। कया मती, कुत एता सः, एते (नः) वृषणः वसूया (एतान्) शुष्मं अर्चन्ति।

हे जवान मरुत्, इस समय आप कौनसे भक्तोंकी स्तुतिरसका आस्वाद ले रहे हैं । यज्ञमें मरुत् देवोंको कौनसा भक्त ले गया होगा ? । वह भक्तिकी कौनसी श्रेष्ठ रीति है जिससे श्येन पक्षीकी तरह आकाशमें उडनेवाले मरुत्–देवोंको हम प्रसन्न करेंगे । २

हे इन्द्र, आप बडे श्रेष्ठ हैं । सज्जन लोगोंकी रक्षा करनेवाले आपही हैं । आप अकेले क्यों चले जाते हैं ? सचमुच आप अपने मनमें किस बातका विचार कर रहे हैं ? जब आप अपने विजयी लोगोंके साथ चलते हैं तब आप हमारा स्वास्थ्य पूछते हैं । हरित् रंगके अश्वोंका पालन करनेवाले इन्द्र, आप हमें कहिये कि आप हमारे विषयमें क्या सोचते हैं । ३

स्तोत्रोंका गाना और भक्तिसे प्रार्थना भी मेरे लिये की जाती है । सोमरससे मुझे हो आनन्द होता है । जब मैं अपना वज्र फेंक देता हूं तब वह शत्रुका नाश करता है । भक्त लोग मुझसे सदा प्रार्थना करते हैं । साम गाना मैं पसन्द करता हूं । इसी लिये मेरे अश्व मुझे गानेके स्थानकी ओर ले जाते हैं । ४

हम इसी लिये पराक्रम करते हैं कि हमें सदा विजय प्राप्त होवे और हमारी शोभा बढे । वे अश्व अपनी इच्छासे निजको जोतते हैं और तैयार होते हैं । हे इन्द्र, हमारी इस रीतिको आप अच्छी तरह जानते ही हैं । ५(२४).

---

२ युवानः (मरुतः) कस्य ब्रह्माणि जुजुषुः, मरुतः कः अध्वरे आ ववर्त । श्येनान् इव अंतरिक्षे ध्रजतः मरुतः केन महा मनसा रीरमाम ।

३ हे इन्द्र हे सत्पते त्वं माहिनः सन् एकः कुतः यासि ? ते (मनसि) किं इत्था ? शुभानैः समराणः (नः) सं पृच्छसे (तद्) हे हरिवः यत् ते (मनसि) अस्मे (वर्तते) तत् नः वोचेः ।

४ (इमानि) ब्रह्माणि, मतयश्च मे (भवन्ति,) सुतासः च (मम) शं (भवन्ति) । मे शुष्मः अद्रिः प्रभृतः सन् (अरातीन्) इयर्ति (अपि च भक्तास्तु) उक्था हि (मां एव) आ शासते, प्रति हर्यन्ति इमा नः हरी ता अच्छ वहतः

५ अतः वयमपि अंतमेभिः स्वक्षत्रेभिः तन्वः शुंभमानाः, महोभिः (प्रमत्तैश्च) एतान् उपयुज्महे, हे इन्द्र, त्वं हि (एवां) नः स्वधां अनुबभूथ

हे मरुत् देव, अही राक्षसका वध करनेके लिये तुमने मुझसे प्रार्थना की। उस समय तुमारा सामर्थ्य कहां चला गया था? मैं सचमुच धैर्यवान् हूं और पराक्रमी हूं। इसी लिये हमने अपने भयंकर शस्त्रोंसे जगत्के शत्रुओंका नाश किया। ६

हे पराक्रमी पुरुष, आपने अपने सामर्थ्यसे बड़े बड़े काम किये। आपके पराक्रम सचमुच आपके प्रत्यक्ष अतुल मित्र ही हैं। हे पराक्रमी इन्द्र, अब हमें हमारे सामर्थ्यसे और पराक्रमसे हम चाहे सो काम करने दीजिये। ७

हे मरुत् देव, क्रोधमें आकर बड़े पराक्रमसे हमने वृत्रको मार डाला। हमने मनुके लिये सब विश्वको आनन्द देनेवाले सर्वोदकोंको अपने वज्रसे सहज रीतीसे मुक्त किया। ८

हे उदारशील इन्द्र, आपके सामने किसीके बलका कुछ नहीं चलता। देवोंमें आपके सदृश ज्ञानी दूसरा कोईभी नहीं। हे बलवान् इन्द्र, जिन कामोंको करनेका आपने पण कियाथा उनको अब कीजिये। ९

---

६ हे मरुतः क्व सा वः स्वधा आसीत् यत् माम् एकमेव अहिहत्ये समधत्त। अहं हि उग्रः, तविषः तुविष्मान् (अतएव) विश्वस्य शत्रोः (शत्रूणां) वधस्नैः अनमम्

७ हे वृषभ (इन्द्र) त्वं बलु अस्मे (अस्माभिः) युज्येभिः समानेभिः पुंस्येभिः भूरि चकर्थ। (तर्हि) हे शविष्ठ (वयं) मरुतः क्रत्वा, नु (यथाशक्ति) भूरीणि (वीर्याणि) कृणवाम।

८ हे मरुतः मामेव तविषः वधुरान् स्वेन इन्द्रियेण वृत्रम् व धीम्। एताः विश्वचन्द्राः सुगाः अपः अहम् (एव) वज्रबाहुः (सन्) मनवे चकार।

९ हे मघवन् त्वे अनुत्तम न किः नु, त्वावान् विद्वानः न कः (अपि) देवता, हे प्रवृद्ध न जातः नापि जायमानः (अपि) नशते (तर्हि) यानि करिष्या (तानि) कृणुहि।

यह कहना योग्य होगा कि विश्वको व्याप्त करनेवाला सामर्थ्य (अकेलेमें) मुझमें है। क्यों कि जो काम करनेका मैं निश्चय करता हूं वह काम मैं करके दिखलाता हूं। हे मरुत् देव, मैं भयंकर हूं। मैं ज्ञानी हूं; इस लिये इन्द्रने जो जो वस्तुएं उत्पन्न की हैं उन सब वस्तुओंका मैं स्वामी हूं। १० (२९)

हे पराक्रमी मरुत् देव, आपने जो अभी मेरी स्तुति की और जो मनोहर स्तोत्र आपने गाया उससे मैं आनन्दित हुआ हूं। क्यों कि वीर्यवान् और अत्यन्त पूज्य इन्द्रके लिये—जो तुमारा वड़ा मित्र है और जो तुमारा प्रत्यक्ष प्राण और आत्मा है आपने वड़े प्रेमसे और भक्तिसे एक स्तोत्र गाया है। ११

निष्कलंक, कीर्तिमान् और सामर्थ्यवान् आप प्रत्यक्ष रूपसे मेरे सामने आप खडे हैं। हे मनोहर कान्तिके मरुत्-देव, वड़े ध्यानके द्वारा आपने मुझे प्रसन्न किया है; और अवभी वैसाही मुझे प्रसन्न कीजिये। १२

हे मरुत् देव, इस जगतमें सचमुच आपके गुणोंका वर्णन किसने किया है? हे मित्र, हम आपके मित्र हैं; इस लिये आप हमारी ओर आइये। आपकी कान्ति अद्भुत है। हे मरुत्-देव, सुन्दर स्तुति करनेकी प्रेरणा हमें उत्पन्न कीजिये। सत्यधर्मके अनुसार हम आपकी उपासना करते हैं। इस लिये आप हमारी और ध्यान दीजिये। १३

---

१० हे (मरुत:) विभु ओज: एकस्य मे भवत् अस्तु (यत:) या नु मनीषा दधृष्वान् (तानि) कृणवै हे मरुत: उग्र; विद्वान: अहं- इंद्र: उत्--गानि च्यवम्, एषाम् ईशे हि।

११ हे मरुत: अत्र (व:) स्तोम: माम् अमन्दत (अपिच) हे नर:, यत् श्रुत्यं ब्रह्म मे (यूयं) चक्र सुमखाय, वृष्णे, इंद्राय सख्ये तन्वे मत्रं, यूयं मे सखाय तनूभि: (चकृढ्वे)।

१२ अनवद्य: च, श्रव: इषश्च आ दधाना: एते (यूयं) मा प्रति रोचमाना: एवेत्। हे मरुत: (यथा यूयं) चंद्रवर्णा: (पूर्वं) संचक्ष्य मे अच्छान्त. (तथा) नूनम् अपि छदयथ।

१३ हे मरुत: व: अत्र क: नु ममहे, हे सखाय:, सखीन् (अस्मान्) अच्छ प्र यातन। हे चित्रा: (यूयं) मन्मानि आपिवासयन्त: एषाम् मे ऋतानाम् (उपासनानाम्) नवदा भूत।

जिस तरह विद्वान् कवि एक भक्तके पाससे दूसरे भक्तकी ओर चला जाता है उसी तरह सज्जन लोगोंकी बुद्धिके सामर्थ्यसे हम तुझे (मरुत-देव) अपनी ओर ले आये। हे मरुत् देव, ज्ञान प्राप्त करनेकी इच्छा करनेवाले भक्तलोगोंकी ओर आप अपना ध्यान पहुंचाविये । स्तोत्रोंको गानेवाले भक्तोंने आपके लिये स्तोत्र गाया है । १४(२६) (३)

हे मरुत्-देव, तुमारे माननीय मित्र मान्दार्यने यह स्तोत्र और यह प्रार्थना तुमारे लिये की । इस लिये हमें उत्साह और बल दीजिये । हमारी इच्छा पूरी करनेवाला आपका सामर्थ्य ही हमारे जीवनका आधार है । १५

॥ तृतीय अध्याय समाप्त ॥

१४(हे मरुतः) यत् आ दुवस्यात् दुवसे कारुः न, (मान्यस्य) मेधाः (वः) अस्मान् चक्र । हे मरुतः, इमं विप्रम् अच्छ आ वर्त, इमा ब्रह्माणि जरिता वः अर्चत् ।

१५ हे मरुतः, एष स्तोमः, इयं गीः च, मान्यस्य कारोः मान्दार्यस्य वः (अधिकृत्य प्रार्थिताऽस्ति) (अतः) तन्वे इषा आ यासीष्ट, (वः) वयाम् च विद्याम, जीरदानुं वृजनम् च (भुंजीमहि)

Printed at Vaidya Brothers' Press, Thakurdwar, Bombay No. 2 & published at Shrutibodh Office 47 Kalbadevi Road, Bombay, by Gajanan Bhaskar Vaidya.

हिन्दी, मराठी, गुजराती और अङ्गरेजी चार
भाषाओं में अलग अलग प्रसिद्ध होनेवाला

वेदों का भाषांतर।

प्रति मास में ६४ पृष्ठ; ३२ पृष्ठ संहिता [स्वर और पदपाठ सहित]

* * ३२ पृष्ठ भाषान्तर। * *

वर्ष १] वैशाख संवत १९६९-जून सन १९१२ [अंक १२

वार्षिक मूल्य डाकव्ययसहित रु. ४

हिन्दी

सम्पादक,

रामचंद्र विनायक पटवर्धन, बी. ए. एल् एल्. बी.
अच्युत बलवंत कोल्हटकर, बी. ए. एल् एल्. बी.
दत्तो अप्पाजी तुळजापुरकर, बी. ए. एल् एल्. बी.

स्थाणुरयं भारहारः किलाभूत्।
अधीत्य वेदं न विजानाति योऽर्थम्॥

यास्काचार्य.

'श्रुतिबोध' ऑफिस, ४७, कालकादेवी रोड, बम्बई.

प्रति अंकका मूल्य आठ आने.

॥ अथ द्वितीयाष्टके चतुर्थोऽध्यायः ॥ ४ ॥

॥ १६६ ॥ ऋषिः—अगस्त्यः । देवता—मरुतः । छन्दः—जगती ॥

॥१६६॥ तन्नु वो॑चाम रभ॒साय॒ जन्म॑ने॒ पूर्वं॑ महि॒त्वं वृ॑ष॒भस्य॑ के॒तवे॑ ।
ऐ॒धेव॒ याम॑न्मरुतस्तुविष्वणो यु॒धेव॑ शक्रास्तवि॒षाणि॑ कर्तन ॥ १ ॥
नित्यं॒ न सू॒नुं मधु॒ बिभ्र॑त॒ उप॒ क्रीळ॑न्ति क्री॒ळा वि॒दथे॑षु घृ॒ष्वयः॑ ।
नक्ष॑न्ति रु॒द्रा अव॑सा नम॒स्विनं॒ न म॑र्धन्ति॒ स्वत॑वसो हवि॒ष्कृत॑म् ॥ २ ॥
यस्मा॒ ऊमा॑सो अ॒मृता॒ अरा॑सत रा॒यस्पोषं॑ च ह॒विषा॑ ददा॒शुषे॑ ।
उ॒क्षन्त्य॑स्मै म॒रुतो॑ हि॒ता इ॑व पु॒रू रजां॑सि॒ पय॑सा मयो॒भुवः॑ ॥ ३ ॥
आ ये रजां॑सि॒ तवि॑षीभि॒रव्य॑त॒ प्र व॒ एवा॑सः॒ स्वय॑तासो अध्रजन् ।
भय॑न्ते॒ विश्वा॒ भुव॑नानि ह॒र्म्या॑ चि॒त्रो वो॒ याम॒: प्रय॑तास्वृ॒ष्टिषु॑ ॥ ४ ॥

॥ अथ द्वितीयाष्टके चतुर्थोऽध्यायः ॥ ४ ॥

॥ तत् । नु । वोचाम । रभसाय॑ । जन्म॑ने । पूर्व॑म् । महि॒ऽत्वम् । वृ॒ष॒भस्य॑ । के॒तवे॑ । ऐ॒धाऽइ॑व । याम॑न् । म॒रु॒तः॒ । तु॒वि॒ऽस्व॒नः॒ । यु॒धाऽइ॑व । श॒क्राः॒ । त॒वि॒षाणि॑ । क॒र्त॒न॒ ॥ १ ॥ नित्य॑म् । न । सू॒नुम् । मधु॑ । बिभ्र॑तः । उप॑ । क्रीळ॑न्ति । क्री॒ळाः । वि॒दथे॑षु । घृ॒ष्वयः॑ । नक्ष॑न्ति । रु॒द्राः । अव॑सा । न॒म॒स्विन॑म् । न । म॒र्ध॒न्ति॒ । स्वऽत॑वसः । ह॒विः॒ऽकृत॑म् ॥ २ ॥ यस्मै॑ । ऊमा॑सः । अ॒मृताः॑ । अरा॑सत । रा॒यः । पोष॑म् । च । ह॒विषा॑ । द॒दा॒शुषे॑ । उ॒क्षन्ति॑ । अ॒स्मै॒ । म॒रुतः॑ । हि॒ताःऽइ॑व । पु॒रु । रजां॑सि । पय॑सा । म॒यः॒ऽभुवः॑ ॥ ३ ॥ आ । ये रजां॑सि । तवि॑षीभिः । अव्य॑त । प्र । वः॒ । एवा॑सः । स्वऽय॑तासः । अ॒ध्र॒ज॒न् । भय॑न्ते । विश्वा॑ । भुव॑नानि । ह॒र्म्या॑ । चि॒त्रः । वः॒ । याम॑: । प्रऽय॑तासु । ऋ॒ष्टिषु॑ ॥ ४ ॥

यत्त्वेषयामा नदयन्त पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः ।
विश्वो वो अज्मन्भयते वनस्पती रथीयन्तीव प्र जिहीत ओषधिः ॥५॥१॥
यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन ।
यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा ॥ ६ ॥
प्र स्कम्भदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः ।
अर्चन्त्यर्कं मदिरस्य पीतये विदुर्वीरस्य प्रथमानि पौंस्या ॥ ७ ॥
शतभुजिभिस्तमभिह्रुतेरघात्पूर्भी रक्षता मरुतो यमावत ।
जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु ॥ ८ ॥
विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता ।
अंसेष्वा वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते ॥ ९ ॥

यत् । त्वेषऽयामाः । नदयन्त । पर्वतान् । दिवः । वा । पृष्ठं । नर्याः । अचुच्यवुः । विश्वः । वः । अज्मन् । भयते । वनस्पतिः । रथियन्तीऽइव । प्र । जिहीते । ओषधिः ॥ ५ ॥ १ ॥ यूयं । नः । उग्राः । मरुतः । सुऽचेतुना । अरिष्टऽग्रामाः । सुऽमतिं । पिपर्तन । यत्र । वः । दिद्युत् । रदति । क्रिविःऽदती । रिणाति । पश्वः । सुधिताऽइव । बर्हणा ॥ ६ ॥ प्र । स्कम्भऽदेष्णाः । अनवभ्रऽराधसः । अलातृणासः । विदथेषु । सुऽस्तुताः । अर्चन्ति । अर्कं । मदिरस्य । पीतये । विदुः । वीरस्य । प्रथमानि । पौंस्या ॥ ७ ॥ शतभुजिऽभिः । तं । अभिऽह्रुतेः । अघात् । पूःऽभिः । रक्षत । मरुतः । यं । आवत । जनं । यं । उग्राः । तवसः । विऽरप्शिनः । पाथन । शंसात् । तनयस्य । पुष्टिषु ॥ ८ ॥ विश्वानि । भद्रा । मरुतः । रथेषु । वः । मिथस्पृध्याऽइव । तविषाणि । आऽहिता । अंसेषु । आ । वः । प्रऽपथेषु । खादयः । अक्षः । वः । चक्रा । समया । वि । ववृते ॥ ९ ॥

भूरीणि भद्रा नर्येषु बाहुषु वक्षःसु रुक्मा रभसासो अञ्जयः ।
अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे ॥ १० ॥ २ ॥
महान्तो मह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः ।
मन्द्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इन्द्रे मरुतः परिष्टुभः ॥ ११ ॥
तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव व्रतम् ।
इन्द्रश्चन त्यजसा वि ह्रुणाति तज्जनाय यस्मै सुकृते अराध्वम् ॥ १२ ॥
तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास आवत ।
अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे ॥ १३ ॥
येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा तुरासः ।
आ यत्ततनन्वृजने जनास एभिर्यज्ञेभिस्तदभीष्टिमश्याम् ॥ १४ ॥

भूरीणि । भद्रा । नर्येषु । बाहुषु । वक्षःऽसु । रुक्माः । रभसासः । अंजयः । अंसेषु । एताः । पविषु । क्षुराः । अधि । वयः । न । पक्षान् । वि । अनु । श्रियः । धिरे ॥ १० ॥ २ ॥ महांतः । मह्ना । विऽभ्वः । विऽभूतयः । दूरेऽदृशः । ये । दिव्याःऽइव । स्तृऽभिः । मंद्राः । सुऽजिह्वाः । स्वरितारः । आसऽभिः । संऽमिश्लाः । इंद्रे । मरुतः । परिऽस्तुभः ॥ ११ ॥ तत् । वः । सुऽजाताः । मरुतः । महिऽत्वनं । दीर्घं । वः । दात्रं । अदितेःऽइव । व्रतं । इंद्रः । चन । त्यजसा । वि । ह्रुणाति । तत् । जनाय । यस्मै । सुऽकृते । अराध्वं ॥ १२ ॥ तत् । वः । जामिऽत्वं । मरुतः । परे । युगे । पुरु । यत् । शंसं । अमृतासः । आवत । अया । धिया । मनवे । श्रुष्टिं । आव्य । साकं । नरः । दंसनैः । आ । चिकित्रिरे ॥ १३ ॥ येन । दीर्घं । मरुतः । शूशवाम । युष्माकेन । परीणसा । तुरासः । आ । यत् । ततनन् । वृजने । जनासः । एभिः । यज्ञेभिः । तत् । अभि । इष्टिं । अश्यां ॥ १४ ॥

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ १५ ॥ ३ ॥

॥ १६७ ॥ ऋषिः--अगस्त्यः । देवता--इन्द्रः । छन्दः--त्रिष्टुप् ॥

॥ १६७ ॥ सहस्रं त इन्द्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः ।
सहस्रं रायो मादयध्यै सहस्रिण उप नो यन्तु वाजाः ॥ १ ॥
आ नोऽवोभिर्मरुतो यान्त्वच्छा ज्येष्ठेभिर्वा बृहद्दिवैः सुमायाः ।
अध यदेषां नियुतः परमाः समुद्रस्य चिद्धनयन्त पारे ॥ २ ॥
मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगुपरा न ऋष्टिः ।
गुहा चरन्ती मनुषो न योषा सभावती विदथ्येव सं वाक् ॥ ३ ॥
परा शुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः ।
न रोदसी अप नुदन्त घोरा जुषन्त वृधं सख्याय देवाः ॥ ४ ॥

एषः । वः । स्तोमः । मरुतः । इयं । गीः । मांदार्यस्य । मान्यस्य । कारोः । आ । इषा । यासीष्ट । तन्वे । वयां । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ १५ ॥ ३ ॥

सहस्रं । ते । इंद्र । ऊतयः । नः । सहस्रं । इषः । हरिऽवः । गूर्तऽतमाः । सहस्रं । रायः । मादयध्यै । सहस्रिणः । उप । नः । यंतु । वाजाः ॥ १ ॥ आ । नः । अवःऽभिः । मरुतः । यांतु । अच्छ । ज्येष्ठेभिः । वा । बृहत्ऽदिवैः । सुऽमायाः । अध । यत् । एषां । निऽयुतः । परमाः । समुद्रस्य । चित् । धनयंत । पारे ॥ २ ॥ मिम्यक्ष । येषु । सुऽधिता । घृताची । हिरण्यऽनिर्निक् । उपरा । न । ऋष्टिः । गुहा । चरंती । मनुषः । न । योषा । सभाऽवती । विदथ्याऽइव । सं । वाक् ॥ ३ ॥ परा । शुभ्राः । अयासः । यव्या । साधारण्याऽइव । मरुतः । मिमिक्षुः । न । रोदसी इति । अप । नुदंत । घोराः । जुषंत । वृधं । सख्याय । देवाः ॥ ४ ॥

जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः ।
आ सूर्येव विधतो रथं गात्त्वेषप्रतीका नभसो नेत्या ॥ ५ ॥ ४ ॥
आस्थापयन्त युवतिं युवानः शुभे निमिश्लां विदथेषु पज्राम् ।
अर्को यद्वो मरुतो हविष्मान्गायद्गाथं सुतसोमो दुवस्यन् ॥ ६ ॥
प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो अस्ति ।
सचा यदीं वृषमणा अहंयुः स्थिरा चिज्जनीर्वहते सुभागाः ॥ ७ ॥
पान्ति मित्रावरुणाववद्याच्चयत ईमर्यमो अप्रशस्तान् ।
उत च्यवन्ते अच्युता ध्रुवाणि वावृध ईं मरुतो दातिवारः ॥ ८ ॥
नही नु वो मरुतो अन्त्यस्मे आरात्ताच्चिच्छवसो अन्तमापुः ।
ते धृष्णुना शवसा शूशुवांसोऽर्णो न द्वेषो धृषता परि ष्ठुः ॥ ९ ॥

जोषत् । यत् । ईं । असुर्या । सचध्यै । विसितऽस्तुका । रोदसी । नृऽमनाः । आ । सूर्याऽइव । विधतः । रथं । गात् । त्वेषऽप्रतीका । नभसः । न । इत्या ॥ ५ ॥ ४ ॥ आ । अस्थापयंत । युवतिं । युवानः । शुभे । निऽमिश्लां । विदथेषु । पज्रां । अर्कः । यत् । वः । मरुतः । हविष्मान् । गायत् । गाथं । सुतऽसोमः । दुवस्यन् ॥ ६ ॥ प्र । तं । विवक्मि । वक्म्यः । यः । एषां । मरुतां । महिमा । सत्यः । अस्ति । सचा । यत् । ईं । वृषऽमनाः । अहंऽयुः । स्थिरा । चित् । जनीः । वहते । सुऽभागाः ॥ ७ ॥ पांति । मित्रावरुणौ । अवद्यात् । चयते । ईं । अर्यमो इति । अप्रऽशस्तान् । उत । च्यवंते । अच्युता । ध्रुवाणि । ववृधे । ईं । मरुतः । दातिऽवारः ॥ ८ ॥ नहि । नु । वः । मरुतः । अंति । अस्मे इति । आरात्तात् । चित् । शवसः । अंतं । आपुः । ते । धृष्णुना । शवसा । शुशुऽवांसः । अर्णः । न । द्वेषः । धृषता । परि । स्थुः ॥ ९ ॥

वयमद्येन्द्रस्य प्रेष्ठा वयं श्वो वोचेमहि समर्ये ।
वयं पुरा महि च नो अनु द्यून्तन्न ऋभुक्षा नरामनु ष्यात् ॥ १० ॥
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ ११ ॥ ५ ॥

॥ १६८ ॥ ऋषिः-अगस्त्यः । देवता-मरुतः । छन्दः-जगती ॥

॥१६८॥ यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे ।
आ वोऽर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सुवृक्तिभिः ॥ १ ॥
वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायन्त धूतयः ।
सहस्रियासो अपां नोर्मय आसा गावो वन्द्यासो नोक्षणः ॥ २ ॥
सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते ।
ऐषामंसेषु रम्भिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे ॥ ३ ॥

वयं । अद्य । इंद्रस्य । प्रेष्ठाः । वयं । श्वः । वोचेमहि । सऽमर्ये । वयं । पुरा । महि । च । नः । अनु । द्यून् । तत् । नः । ऋभुक्षाः । नरां । अनु । स्यात् ॥ १० ॥ एषः । वः । स्तोमः । मरुतः । इयं । गीः । मांदार्यस्य । मान्यस्य । कारोः । आ । इषा । यासीष्ट । तन्वे । वयां । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ११ ॥ ५ ॥

यज्ञाऽयज्ञा । वः । समना । तुतुर्वणिः । धियंऽधियं । वः । देवऽयाः । ऊं इति । दधिध्वे । आ । वः । अर्वाचः । सुविताय । रोदस्योः । महे । ववृत्या । अवसे । सुवृक्तिऽभिः ॥ १ ॥ वव्रासः । न । ये । स्वऽजाः । स्वऽतवसः । इषं । स्वः । अभिऽजायंत । धूतयः । सहस्रियासः । अपां । न । ऊर्मयः । आसा । गावः । वंद्यासः । न । उक्षणः ॥ २ ॥ सोमासः । न । ये । सुताः । तृप्तऽअंशवः । हृत्ऽसु । पीतासः । दुवसः । न । आसते । आ । एषां । अंसेषु । रंभिणीऽइव । ररभे । हस्तेषु । खादिः । च । कृतिः । च । सं । दधे ॥ ३ ॥

अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना ।
अरेणवस्तुविजाता अचुच्यवुर्दृळ्हानि चिन्मरुतो भ्राजदृष्टयः ॥ ४ ॥
को वोऽन्तर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया ।
धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्योऽनैतशः ॥ ५ ॥ ६ ॥
क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय ।
यच्च्यावयथ विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवम् ॥ ६ ॥
सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती ।
भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जञ्जती ॥ ७ ॥
प्रति ष्टोभन्ति सिन्धवः पविभ्यो यदभ्रियां वाचमुदीरयन्ति ।
अव स्मयन्त विद्युतः पृथिव्यां यदी घृतं मरुतः प्रुष्णुवन्ति ॥ ८ ॥

अव । स्वऽयुक्ताः । दिवः । आ । वृथा । ययुः । अमर्त्याः । कशया । चोदत । त्मना । अरेणवः । तुविऽजाताः । अचुच्यवुः । दृळ्हानि । चित् । मरुतः । भ्राजत्ऽऋष्टयः ॥ ४ ॥ कः । वः । अंतः । मरुतः । ऋष्टिऽविद्युतः । रेजति । त्मना । हन्वाऽइव । जिह्वया । धन्वऽच्युतः । इषां । न । यामनि । पुरुऽप्रैषाः । अहन्यः । न । एतशः ॥ ५ ॥ ६ ॥ क्व । स्वित् । अस्य । रजसः । महः । परं । क्व । अवरं । मरुतः । यस्मिन् । आऽयय । यत् । च्यवयथ । विथुराऽइव । संऽहितं । वि । अद्रिणा । पतथ । त्वेषं । अर्णवं ॥ ६ ॥ सातिः । न । वः । अमऽवती । स्वःऽवती । त्वेषा । विऽपाका । मरुतः । पिपिष्वती । भद्रा । वः । रातिः । पृणतः । न । दक्षिणा । पृथुऽज्रयी । असुर्याऽइव । जंजती ॥ ७ ॥ प्रति । स्तोभंति । सिंधवः । पविऽभ्यः । यत् । अभ्रियां । वाचं । उत्ऽईरयंति । अव । स्मयंत । विऽद्युतः । पृथिव्यां । यदि । घृतं । मरुतः । प्रुष्णुवंति ॥ ८ ॥

असूंत पृश्निर्महते रणाय त्वेषमयासां मरुतामनीकम् ।
ते सप्सरासोऽजनयन्ताभ्वमादित्स्वधामिषिरां पर्यपश्यन् ॥ ९ ॥
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ १० ॥ ७ ॥

॥ १६९ ॥ ऋषिः—अगस्त्यः । देवता–इन्द्रः । छन्दः त्रिष्टुप् ॥

॥१६९॥ महश्चित्त्वमिन्द्र यत एतान्महश्चिदसि त्यजसो वरूता ।
स नो वेधो मरुतां चिकित्वान्त्सुम्ना वनुष्व तव हि प्रेष्ठा ॥ १ ॥
अयुंजन्त इन्द्र विश्वकृष्टीर्विदानासो निष्षिधो मर्त्यत्रा ।
मरुतां पृत्सुतिर्हासमाना स्वर्मीळ्हस्य प्रधनस्य सातौ ॥ २ ॥
अम्यक्सा त इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति ।
अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं दधति प्रयांसि ॥ ३ ॥

असूंत । पृश्निः । महते । रणाय । त्वेषं । अयासां । मरुतां । अनीकं । ते । सप्सरासः । अजनयंत । अभ्वं । आत् । इत् । स्वधां । इषिरां । परि । अपश्यन् ॥ ९ ॥ एषः । वः । स्तोमः । मरुतः । इयं । गीः । मांदार्यस्य । मान्यस्य । कारोः । आ । इषा । यासीष्ट । तन्वे । वयां । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ १० ॥ ७ ॥

महः । चित् । त्वं । इंद्र । यतः । एतान् । महः । चित् । असि । त्यजसः । वरूता । सः । नः । वेधः । मरुतां । चिकित्वान् । सुम्ना । वनुष्व । तव । हि । प्रेष्ठा ॥ १ ॥ अयुंजन् । ते । इंद्र । विश्वऽकृष्टीः । विदानासः । निःऽसिधः । मर्त्यऽत्रा । मरुतां । पृत्सुतिः । हासमाना । स्वःऽमीळ्हस्य । प्रऽधनस्य । सातौ ॥ २ ॥ अम्यक् । सा । ते । इंद्र । ऋष्टिः । अस्मे इति । सनेमि । अभ्वं । मरुतः । जुनंति । अग्निः । चित् । हि । स्म । अतसे । शुशुक्वान् । आपः । न । द्वीपं । दधति । प्रयांसि ॥ ३ ॥

त्वं तू न इन्द्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिम् ।
स्तुतश्च यास्ते चकनन्त वायोः स्तनं न मध्वः पीपयन्त वाजैः ॥ ४ ॥
त्वे राय इन्द्र तोशतमाः प्रणेतारः कस्य चिदृतायोः ।
ते षु णो मरुतो मृळयन्तु ये स्मा पुरा गातूयन्तीव देवाः ॥ ५ ॥ ८ ॥
प्रति प्र याहीन्द्र मीळ्हुषो नॄन्महः पार्थिवे सदने यतस्व ।
अध यदेषां पृथुबुध्नास एतास्तीर्थे नार्यः पौंस्यानि तस्थुः ॥ ६ ॥
प्रति घोराणामेतानामयासां मरुतां शृण्व आयतामुपब्दिः ।
ये मर्त्यं पृतनायन्तमूमैर्ऋणावानं न पतयन्त सर्गैः ॥ ७ ॥
त्वं मानेभ्य इन्द्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः ।
स्तवानेभिः स्तवसे देव देवैर्विद्यामेषं वृजनं जीरदानुम् ॥ ८ ॥ ९ ॥

त्वं । नु । नः । इंद्र । तं । रयिं । दाः । ओजिष्ठया । दक्षिणयाऽइव । रातिं । स्तुतः । च । याः । ते । चकनंत । वायोः । स्तनं । न । मध्वः । पीपयंत । वाजैः ॥ ४ ॥
त्वे इति । रायः । इंद्र । तोशऽतमाः । प्रऽनेतारः । कस्य । चित् । ऋतऽयोः । ते । सु । नः । मरुतः । मृळयंतु । ये । स्म । पुरा । गातुयंतिऽइव । देवाः ॥ ५ ॥ ८ ॥
प्रति । प्र । याहि । इंद्र । मीळ्हुषः । नॄन् । महः । पार्थिवे । सदने । यतस्व । अध । यत् । एषां । पृथुऽबुध्नासः । एताः । तीर्थे । न । अर्यः । पौंस्यानि । तस्थुः ॥ ६ ॥
प्रति । घोराणां । एतानां । अयासां । मरुतां । शृण्वे । आऽयतां । उपब्दिः । ये । मर्त्यं । पृतनाऽयंतं । ऊमैः । ऋणऽवानं । न । पतयंत । सर्गैः ॥ ७ ॥
त्वं । मानेभ्यः । इंद्र । विश्वऽजन्या । रद । मरुत्ऽभिः । शुरुधः । गोऽअग्राः । स्तवानेभिः । स्तवसे । देव । देवैः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ८ ॥ ९ ॥

॥ १७० ॥ ऋषिः—अगस्त्यः । देवता—इन्द्रः । छन्दः—अनुष्टुप् ॥

॥ १७० ॥ न नूनमस्ति नो श्वः कस्तवेद यदद्भुतम् ।
अन्यस्य चित्तमभि संचरेण्यमुताधीतं वि नश्यति ॥ १ ॥
किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव ।
तेभिः कल्पस्व साधुया मा नः समरणे वधीः ॥ २ ॥
किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे ।
विद्मा हि ते यथा मनोऽस्मभ्यमिन्न दित्ससि ॥ ३ ॥
अरं कृण्वन्तु वेदिं समग्निमिन्धतां पुरः ।
तत्रामृतस्य चेतनं यज्ञं ते तनवावहै ॥ ४ ॥
त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रपते धेष्ठः ।
इन्द्र त्वं मरुद्भिः सं वदस्वाध प्राशान ऋतुथा हवींषि ॥ ५ ॥ १० ॥

न । नूनं । अस्ति । नो इति । श्वः । कः । तत् । वेद । यत् । अद्भुतं । अन्यस्य । चित्तं । अभि । संऽचरेण्यं । उत । आऽधीतं । वि । नश्यति ॥ १ ॥ किं । नः । इंद्र । जिघांससि । भ्रातरः । मरुतः । तव । तेभिः । कल्पस्व । साधुऽया । मा । नः । संऽअरणे । वधीः ॥ २ ॥ किं । नः । भ्रातः । अगस्त्य । सखा । सन् । अति । मन्यसे । विद्म । हि । ते । यथा । मनः । अस्मभ्यं । इत् । न । दित्ससि ॥ ३ ॥ अरं । कृण्वंतु । वेदिं । सं । अग्निं । इंधतां । पुरः । तत्र । अमृतस्य । चेतनं । यज्ञं । ते । तनवावहै ॥ ४ ॥ त्वं । ईशिषे । वसुऽपते । वसूनां । त्वं । मित्राणां । मित्रऽपते । धेष्ठः । इंद्र । त्वं । मरुत्ऽभिः । सं । वदस्व । अध । प्र । अशान । ऋतुऽथा । हवींषि ॥ ५ ॥ १० ॥

॥ १७१ ॥ ऋषिः--अगस्त्यः । देवता--मरुतः । छन्दः--त्रिष्टुप् ॥

॥१७१॥ प्रति व एना नमसाहमेमि सूक्तेन भिक्षे सुमतिं तुराणाम् ।
रराणता मरुतो वेद्याभिर्नि हेळो धत्त वि मुचध्वमश्वान् ॥ १ ॥
एष वः स्तोमो मरुतो नमस्वान्हृदा तष्टो मनसा धायि देवाः ।
उपेमा यात मनसा जुषाणा यूयं हि ष्ठा नमस इद्वृधासः ॥ २ ॥
स्तुतासो नो मरुतो मृळयन्तूत स्तुतो मघवा शम्भविष्ठः ।
ऊर्ध्वा नः सन्तु कोम्या वनान्यहानि विश्वा मरुतो जिगीषा ॥ ३ ॥
अस्मादहं तविषादीषमाण इन्द्राद्भिया मरुतो रेजमानः ।
युष्मभ्यं हव्या निशितान्यासन्तान्यारे चकृमा मृळता नः ॥ ४ ॥

प्रति । वः । एना । नमसा । अहं । एमि । सुऽउक्तेन । भिक्षे । सुऽमतिं । तुराणां । रराणता । मरुतः । वेद्याभिः । नि । हेळः । धत्त । वि । मुचध्वं । अश्वान् ॥ १ ॥ एषः । वः । स्तोमः । मरुतः । नमस्वान् । हृदा । तष्टः । मनसा । धायि । देवाः । उप । ईं । आ । यात । मनसा । जुषाणाः । यूयं । हि । स्थ । नमसः । इत् । वृधासः ॥ २ ॥ स्तुतासः । नः । मरुतः । मृळयंतु । उत । स्तुतः । मघऽवा । शंऽभविष्ठः । ऊर्ध्वा । नः । संतु । कोम्या । वनानि । अहानि । विश्वा । मरुतः । जिगीषा ॥ ३ ॥ अस्मात् । अहं । तविषात् । ईषमाणः । इंद्रात् । भिया । मरुतः । रेजमानः । युष्मभ्यं । हव्या । निऽशितानि । आसन् । तानि । आरे । चकृम । मृळत । नः ॥ ४ ॥

येन मानासश्चितयन्त उस्रा व्युष्टिषु शवसा शश्वतीनाम् ।
स नो मरुद्भिर्वृषभ श्रवो धा उग्र उग्रेभिः स्थविरः सहोदाः ॥ ५ ॥
त्वं पाहीन्द्र सहीयसो नॄन्भवा मरुद्भिरवयातहेळाः ।
सुप्रकेतेभिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥ ११ ॥

॥ १७२ ॥ ऋषिः-अगस्त्यः । देवता-मरुतः । छन्दः-गायत्री ॥

॥ १७२ ॥ चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः ।
मरुतो अहिभानवः ॥ १ ॥
आरे सा वः सुदानवो मरुत ऋञ्जती शरुः ।
आरे अश्मा यमस्यथ ॥ २ ॥
तृणस्कन्दस्य नु विशः परि वृङ्क्त सुदानवः ।
ऊर्ध्वान्नः कर्त जीवसे ॥ ३ ॥ १२ ॥

येन । मानासः । चितयंते । उस्राः । विऽउष्टिषु । शवसा । शश्वतीनां । सः । नः । मरुत्ऽभिः । वृषभ । श्रवः । धाः । उग्रः । उग्रेभिः । स्थविरः । सहःऽदाः ॥ ५ ॥ त्वं । पाहि । इंद्र । सहीयसः । नॄन् । भव । मरुत्ऽभिः । अवयातऽहेळाः । सुऽप्रकेतेभिः । ससहिः । दधानः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ६ ॥ ११ ॥

चित्रः । वः । अस्तु । यामः । चित्रः । ऊती । सुऽदानवः । मरुतः । अहिऽभानवः ॥ १ ॥ आरे । सा । वः । सुऽदानवः । मरुतः । ऋंजती । शरुः । आरे । अश्मा । यं । अस्यथ ॥ २ ॥ तृणऽस्कंदस्य । नु । विशः । परि । वृंक्त । सुऽदानवः । ऊर्ध्वान् । नः । कर्त । जीवसे ॥ ३ ॥ १२ ॥

॥ १७३ ॥ ऋषिः—अगस्त्यः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥१७३॥ गायत्साम नभन्यं यथा वेरर्चाम तद्वावृधानं स्वर्वत् ।
गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं विवासान् ॥ १ ॥
अर्चद्वृषा वृषभिः स्वदुहव्यैर्मृगो नाश्नो अति यज्जुगुर्यात् ।
प्र मन्दयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः ॥ २ ॥
नक्षद्धोता परि सद्म मिता यन्भरद्गर्भमा शरदः पृथिव्याः ।
क्रन्ददश्वो नयमानो रुवद्गौरन्तर्दूतो न रोदसी चरद्वाक् ॥ ३ ॥
ता कर्माषतरास्मै प्र च्यौत्नानि देवयन्तो भरन्ते ।
जुजोषदिन्द्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः ॥ ४ ॥

गायत् । साम । नभन्यं । यथा । वेः । अर्चाम । तत् । ववृधानं । स्वःऽवत् ।
गावः । धेनवः । बर्हिषि । अदब्धाः । आ । यत् । सद्मानं । दिव्यं । विवासान् ॥ १ ॥
अर्चत् । वृषा । वृषऽभिः । स्वऽदुहव्यैः । मृगः । न । अश्नः । अति । यत् । जुगु-
र्यात् । प्र । मंदयुः । मनां । गूर्त । होता । भरते । मर्यः । मिथुना । यजत्रः ॥ २ ॥
नक्षत् । होता । परि । सद्म । मिता । यन् । भरत् । गर्भं । आ । शरदः । पृथिव्याः ।
क्रंदत् । अश्वः । नयमानः । रुवत् । गौः । अंतः । दूतः । न । रोदसी इति । चरत् ।
वाक् ॥ ३ ॥ ता । कर्म । अषऽतरा । अस्मै । प्र । च्यौत्नानि । देवऽयंतः । भरंते ।
जुजोषत् । इंद्रः । दस्मऽवर्चाः । नासत्याऽइव । सुग्म्यः । रथेऽस्थाः ॥ ४ ॥

तमु ष्टुहीन्द्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः ।
प्रतीचश्चिद्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसो विहन्ता ॥ ५ ॥ १३ ॥
प्र यदित्था महिना नृभ्यो अस्त्यरं रोदसी कक्ष्ये३ नास्मै ।
सं विव्य इन्द्रो वृजनं न भूमा भर्ति स्वधावाँ ओपशमिव द्याम् ॥ ६ ॥
समत्सु त्वा शूर सतामुराणं प्रपथिन्तमं परितंसयध्यै ।
सजोषस इन्द्रं मदे क्षोणीः सूरिं चिद्ये अनुमदन्ति वाजैः ॥ ७ ॥
एवा हि ते शं सवना समुद्र आपो यत्त आसु मदन्ति देवीः ।
विश्वा ते अनु जोष्या भूद्गौः सूरींश्चिद्यदि धिषा वेषि जनान् ॥ ८ ॥
असाम यथा सुषखाय एन स्वभिष्टयो नरां न शंसैः ।
असद्यथा न इन्द्रो वन्दनेष्ठास्तुरो न कर्म नयमान उक्था ॥ ९ ॥

तं । ऊं इति । स्तुहि । इंद्रं । यः । ह । सत्वा । यः । शूरः । मघऽवा । यः । रथेऽस्थाः । प्रतीचः । चित् । योधीयान् । वृषण्ऽवान् । ववव्रुषः । चित् । तमसः । विऽहंता ॥ ५ ॥ १३ ॥ प्र । यत् । इत्था । महिना । नृऽभ्यः । अस्ति । अरं । रोदसी इति । कक्ष्ये३ इति । न । अस्मै । सं । विव्ये । इंद्रः । वृजनं । न । भूम । भर्ति । स्वधाऽवान् । ओपशंऽइव । द्यां ॥ ६ ॥ समत्ऽसु । त्वा । शूर । सतां । उराणं । प्रपथिन्ऽतमं । परिऽतंसयध्यै । सऽजोषसः । इंद्रं । मदे । क्षोणीः । सूरिं । चित् । ये । अनुऽमदंति । वाजैः ॥ ७ ॥ एव । हि । ते । शं । सवना । समुद्रे । आपः । यत् । ते । आसु । मदंति । देवीः । विश्वाः । ते । अनु । जोष्या । भूत् । गौः । सूरीन् । चित् । यदि । धिषा । वेषि । जनान् ॥ ८ ॥ असाम । यथा । सुऽसखायः । एन । सुऽअभिष्टयः । नरां । न । शंसैः । असत् । यथा । नः । इंद्रः । वंदनेऽस्थाः । तुरः । नः । कर्म । नयमानः । उक्था ॥ ९ ॥

विष्पर्धसो नरां न शंसैरस्माकासदिन्द्रो वज्रहस्तः

मित्रायुवो न पूर्पतिं सुशिष्टौ मध्यायुव उप शिक्षन्ति यज्ञैः ॥ १० ॥ १४ ॥

यज्ञो हि ष्मेन्द्रं कश्चिदृन्धञ्जुहुराणश्चिन्मनसा परियन् ।

तीर्थे नाच्छा तातृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा ॥ ११ ॥

मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ।

महश्चिद्यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥ १२ ॥

एषः स्तोम इन्द्र तुभ्यमस्मे एतेन गातुं हरिवो विदो नः ।

आ नो ववृत्याः सुविताय देव विद्यामेषं वृजनं जीरदानुम् ॥ १३ ॥ १५ ॥

विऽस्पर्धसः । नरां । न । शंसैः । अस्माक । असत् । इंद्रः । वज्रऽहस्तः । मित्रऽयुवः ।
न । पूःऽपतिं । सुऽशिष्टौ । मध्यऽयुवः । उप । शिक्षंति । यज्ञैः ॥ १० ॥ १४ ॥
यज्ञः । हि । स्म । इंद्रं । कः । चित् । ऋंधन् । जुहुराणः । चित् । मनसा । परिऽयन् ।
तीर्थे । न । अच्छ । ततृषाणं । ओकः । दीर्घः । न । सिध्रं । आ । कृणोति ।
अध्वा ॥ ११ ॥ मो इति । सु । नः । इंद्र । अत्र । पृत्ऽसु । देवैः । अस्ति । हि ।
स्म । ते । शुष्मिन् । अवऽयाः । महः । चित् । यस्य । मीळ्हुषः । यव्या । हविष्मतः ।
मरुतः । वंदते । गीः ॥ १२ ॥ एषः । स्तोमः । इंद्र । तुभ्यं । अस्मे इति । एतेन ।
गातुं । हरिऽवः । विदः । नः । आ । नः । ववृत्याः । सुविताय । देव । विद्याम ।
इषं । वृजनं । जीरऽदानुं ॥ १३ ॥ १५ ॥

॥ १७४ ॥ ऋषिः—अगस्त्यः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥१७४॥ त्वं राजेन्द्र ये च देवा रक्षा नॄन्पाह्यसुर त्वमस्मान् ।
त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहोदाः ॥ १ ॥
दनो विश इन्द्र मृध्रवाचः सप्त यत्पुरः शर्म शारदीर्दर्त् ।
ऋणोरपो अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रन्धीः ॥ २ ॥
अजा वृत इन्द्र शूरपत्नीर्द्यां च येभिः पुरुहूत नूनम् ।
रक्षो अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि वस्तोः ॥ ३ ॥
शेषन्नु त इन्द्र सस्मिन्योनौ प्रशस्तये पवीरवस्य मह्ना ।
सृजदर्णांस्यव यद्युधा गास्तिष्ठद्धरी धृषता मृष्ट वाजान् ॥ ४ ॥

त्वं । राजा । इंद्र । ये । च । देवाः । रक्ष । नॄन् । पाहि । असुर । त्वं । अस्मान् । त्वं । सत्ऽपतिः । मघऽवा । नः । तरुत्रः । त्वं । सत्यः । वसवानः । सहःऽदाः ॥ १ ॥ दनः । विशः । इंद्र । मृध्रऽवाचः । सप्त । यत् । पुरः । शर्म । शारदीः । दर्त् । ऋणोः । अपः । अनवद्य । अर्णाः । यूने । वृत्रं । पुरुऽकुत्साय । रंधीः ॥ २ ॥ अजः । वृतः । इंद्र । शूरऽपत्नीः । द्यां । च । येभिः । पुरुऽहूत । नूनं । रक्षो इति । अग्निं । अशुषं । तूर्वयाणं । सिंहः । न । दमे । अपांसि । वस्तोः ॥ ३ ॥ शेषन् । नु । ते । इंद्र । सस्मिन् । योनौ । प्रऽशस्तये । पवीरवस्य । मह्ना । सृजत् । अर्णांसि । अव । यत् । युधा । गाः । तिष्ठत् । हरी इति । धृषता । मृष्ट । वाजान् ॥ ४ ॥

वह कुत्समिन्द्र यस्मिञ्चाकन्त्स्यूमन्यू ऋज्रा वातस्याश्वा ।
प्र सूरश्चक्रं वृहतादभीकेऽभि स्पृधो यासिषद्वज्रबाहुः ॥ ५ ॥ १६ ॥
जघन्वाँ इन्द्र मित्रेरूञ्चोदप्रवृद्धो हरिवो अदाशून् ।
प्र ये पश्यन्नर्यमणं सचायोस्त्वया शूर्ता वहमाना अपत्यम् ॥ ६ ॥
रपत्कविरिन्द्रार्कसातौ क्षां दासायोपबर्हणीं कः ।
करत्तिस्रो मघवा दानुचित्रा नि दुर्योणे कुयवाचं मृधि श्रेत् ॥ ७ ॥
सना ता त इन्द्र नव्या आगुः सहो नभोऽविरणाय पूर्वीः ।
भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य पीयोः ॥ ८ ॥
त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः ।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥ ९ ॥

वह । कुत्सं । इंद्र । यस्मिन् । चाकन् । स्यूमन्यू इति । ऋज्रा । वातस्य । अश्वा । प्र । सूरः । चक्रं । वृहतात् । अभीके । अभि । स्पृधः । यासिषत् । वज्रऽबाहुः ॥५॥१६॥ जघन्वान् । इंद्र । मित्रेरून् । चोदऽप्रवृद्धः । हरिऽवः । अदाशून् । प्र । ये । पश्यन् । अर्यमणं । सचा । आयोः । त्वया । शूर्ताः । वहमानाः । अपत्यं ॥ ६ ॥ रपत् । कविः । इंद्र । अर्कऽसातौ । क्षां । दासाय । उपऽबर्हणीं । करिति कः । करत् । तिस्रः । मघऽवा । दानुऽचित्राः । नि । दुर्योणे । कुयवाचं । मृधि । श्रेत् ॥ ७ ॥ सना । ता । ते । इंद्र । नव्याः । आ । अगुः । सहः । नभः । अविऽरणाय । पूर्वीः । भिनत् । पुरः । न । भिदः । अदेवीः । ननमः । वधः । अदेवस्य । पीयोः ॥ ८ ॥ त्वं । धुनिः । इंद्र । धुनिऽमतीः । ऋणोः । अपः । सीराः । न । स्रवंतीः । प्र । यत् । समुद्रं । अति । शूर । पर्षि । पारय । तुर्वशं । यदुं । स्वस्ति ॥ ९ ॥

त्वमस्माकमिन्द्र विश्वध स्या अवृकतमो नरां नृपाता ।

स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुम् ॥ १० ॥ १७ ॥

॥ १७५ ॥ ऋषिः—अगस्त्यः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥१७५॥ मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः ।

वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः ॥ १ ॥

आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः ।

सहावाँ इन्द्र सानसिः पृतनाषाळमर्त्यः ॥ २ ॥

त्वं हि शूरः सनिता चोदयो मनुषो रथम् ।

सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥ ३ ॥

त्वं । अस्माकं । इंद्र । विश्वधं । स्याः । अवृकऽतमः । नरां । नृऽपाता । सः । नः । विश्वासां । स्पृधां । सहःऽदाः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ १० ॥ १७ ॥

मत्सि । अपायि । ते । महः । पात्रस्यऽइव । हरिऽवः । मत्सरः । मदः । वृषा । ते । वृष्णे । इंदुः । वाजी । सहस्रऽसातमः ॥ १ ॥ आ । नः । ते । गंतु । मत्सरः । वृषा । मदः । वरेण्यः । सहऽवान् । इंद्र । सानसिः । पृतनाषाट् । अमर्त्यः ॥ २ ॥ त्वं । हि । शूरः । सनिता । चोदयः । मनुषः । रथं । सहऽवान् । दस्युं । अव्रतं । ओषः । पात्रं । न । शोचिषा ॥ ३ ॥

मुषाय सूर्यं कवे चक्रमीशान ओजसा ।

वह शुष्णाय वधं कुत्सं वातस्याश्वैः ॥ ४ ॥

शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।

वृत्रघ्ना वरिवोविदा मंसीष्ठा अश्वसातमः ॥ ५ ॥

यथा पूर्वेभ्यो जरितृभ्य इन्द्र मय इवापो न तृष्यते बभूथ ।

तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥ १८ ॥

॥ १७६ ॥ ऋषिः–अगस्त्यः । देवता–इन्द्रः । छन्दः–अनुष्टुप् ॥

॥ १७६ ॥ मत्सि नो वस्यइष्टय इन्द्रमिन्दो वृषा विश ।

ऋघायमाण इन्वसि शत्रुमन्ति न विन्दसि ॥ १ ॥

मुषाय । सूर्यं । कवे । चक्रं । ईशानः । ओजसा । वह । शुष्णाय । वधं । कुत्सं । वातस्य । अश्वैः ॥ ४ ॥ शुष्मिन्ऽतमः । हि । ते । मदः । द्युम्निन्ऽतमः । उत । क्रतुः । वृत्रऽघ्ना । वरिवःऽविदा । मंसीष्ठाः । अश्वऽसातमः ॥ ५ ॥ यथा । पूर्वेभ्यः । जरितृऽभ्यः । इंद्र । मयःऽइव । आपः । न । तृष्यते । बभूथ । तां । अनु । त्वा । निऽविदं । जोहवीमि । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ६ ॥ १८ ॥

मत्सि । नः । वस्यःऽइष्टये । इंद्रं । इंदो इति । वृषा । आ । विश । ऋघायमाणः । इन्वसि । शत्रुं । अंति । न । विंदसि ॥ १ ॥

तस्मिन्ना वेशया गिरो य एकश्चर्षणीनाम् ।
अनु स्वधा यमुप्यते यवं न चर्कृषद्वृषा ॥ २ ॥

यस्य विश्वानि हस्तयोः पञ्च क्षितीनां वसु ।
स्पाशयस्व यो अस्मध्रुग्दिव्येवाशनिर्जहि ॥ ३ ॥

असुन्वन्तं समं जहि दूणाशं यो न ते मयः ।
अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते ॥ ४ ॥

आवो यस्य द्विबर्हसोऽर्केषु सानुषगसत् ।
आजाविन्द्रस्येन्दो प्रावो वाजेषु वाजिनम् ॥ ५ ॥

यथा पूर्वेभ्यो जरितृभ्य इन्द्र मयइवापो न तृष्यते बभूथ ।
तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥ १९ ॥

तस्मिन् । आ । वेशय । गिरः । यः । एकः । चर्षणीनां । अनु । स्वधा । यं । उप्यते । यवं । न । चर्कृषत् । वृषा ॥ २ ॥ यस्य । विश्वानि । हस्तयोः । पंच । क्षितीनां । वसु । स्पाशयस्व । यः । अस्मऽध्रुक् । दिव्याऽइव । अशनिः । जहि ॥ ३ ॥ असुन्वंतं । समं । जहि । दुःऽनशं । यः । न । ते । मयः । अस्मभ्यं । अस्य । वेदनं । दद्धि । सूरिः । चित् । ओहते ॥ ४ ॥ आवः । यस्य । द्विऽबर्हसः । अर्केषु । सानुषक् । असत् । आजौ । इंद्रस्य । इंदो इति । प्र । आवः । वाजेषु । वाजिनं ॥ ५ ॥ यथा । पूर्वेभ्यः । जरितृऽभ्यः । इंद्र । मयःऽइव । आपः । न । तृष्यते । बभूथ । तां । अनु । त्वा । निऽविदं । जोहवीमि । विद्याम । इषं । वृजनं । जीरदानुं ॥ ६ ॥ १९ ॥

॥ १७७ ॥ ऋषिः–अगस्त्यः । देवता–इन्द्रः । छन्दः–त्रिष्टुप् ॥

॥१७७॥ आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इन्द्रः ।
स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणा याह्यर्वाङ् ॥ १ ॥
ये ते वृषणो वृषभास इन्द्र ब्रह्मयुजो वृषरथासो अत्याः ।
ताँ आ तिष्ठ तेभिरा याह्यर्वाङ् हवामहे त्वा सुत इन्द्र सोमे ॥ २ ॥
आ तिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिषिक्ता मधूनि ।
युक्त्वा वृषभ्यां वृषभ क्षितीनां हरिभ्यां याहि प्रवतोप मद्रिक् ॥ ३ ॥
अयं यज्ञो देवया अयं मियेध इमा ब्रह्माण्ययमिन्द्र सोमः ।
स्तीर्णं बर्हिरा तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह ॥ ४ ॥

आ । चर्षणिऽप्राः । वृषभः । जनानां । राजा । कृष्टीनां । पुरुऽहूतः । इंद्रः । स्तुतः । श्रवस्यन् । अवसा । उप । मद्रिक् । युक्त्वा । हरी इति । वृषणा । आ । याहि । अर्वाङ् ॥ १ ॥ ये । ते । वृषणः । वृषभासः । इंद्र । ब्रह्मऽयुजः । वृषऽरथासः । अत्याः । तान् । आ । तिष्ठ । तेभिः । आ । याहि । अर्वाङ् । हवामहे । त्वा । सुते । इंद्र । सोमे ॥ २ ॥ आ । तिष्ठ । रथं । वृषणं । वृषा । ते । सुतः । सोमः । परिऽसिक्ता । मधूनि । युक्त्वा । वृषऽभ्यां । वृषभ । क्षितीनां । हरिऽभ्यां । याहि । प्रऽवता । उप । मद्रिक् ॥ ३ ॥ अयं । यज्ञः । देवऽयाः । अयं । मियेधः । इमा । ब्रह्माणि । अयं । इंद्र । सोमः । स्तीर्णं । बर्हिः । आ । तु । शक्र । प्र । याहि । पिब । निऽसद्य । वि । मुच । हरी इति । इह ॥ ४ ॥

ओ सुष्टुत इन्द्र याह्यर्वाङुप ब्रह्माणि मान्यस्य कारोः ।
विद्याम वस्तोरवसा गृणन्तो विद्यामेषं वृजनं जीरदानुम् ॥ ५ ॥ २० ॥

॥ १७८ ॥ ऋषिः—अगस्त्यः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥१७८॥ यद्ध स्या त इन्द्र श्रुष्टिरस्ति यया बभूथ जरितृभ्य ऊती ।
मा नः कामं महयन्तमा धग्विश्वा ते अश्यां पर्याप आयोः ॥ १ ॥
न घा राजेन्द्र आ दभन्नो या नु स्वसारा कृणवन्त योनौ ।
आपश्चिदस्मै सुतुका अवेषन्गमन्न इन्द्रः सख्या वयश्च ॥ २ ॥
जेता नृभिरिन्द्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः ।
प्रभर्ता रथं दाशुष उपाक उद्यन्ता गिरो यदि च त्मना भूत् ॥ ३ ॥

ओ इति । सुऽस्तुतः । इंद्र । याहि । अर्वाङ् । उप । ब्रह्माणि । मान्यस्य । कारोः ।
विद्याम । वस्तोः । अवसा । गृणंतः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ५ ॥ २० ॥

यत् । ह । स्या । ते । इंद्र । श्रुष्टिः । अस्ति । यया । बभूथ । जरितृऽभ्यः । ऊती । मा । नः । कामं । महयंतं । आ । धक् । विश्वा । ते । अश्यां । परि । आपः । आयोः ॥ १ ॥ न । घ । राजा । इंद्रः । आ । दभत् । नः । या । नु । स्वसारा । कृणवंत । योनौ । आपः । चित् । अस्मै । सुऽतुकाः । अवेषन् । गमत् । नः । इंद्रः । सख्या । वयः । च ॥ २ ॥ जेता । नृऽभिः । इंद्रः । पृत्ऽसु । शूरः । श्रोता । हवं । नाधमानस्य । कारोः । प्रऽभर्ता । रथं । दाशुषः । उपाके । उत्ऽयंता । गिरः । यदि । च । त्मना । भूत् ॥ ३ ॥

एवा नृभिरिन्द्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत्।
समर्य इषः स्तवते विवाचि सत्राकरो यजमानस्य शंसः ॥ ४ ॥
त्वया वयं मघवन्निन्द्र शत्रूनभि ष्याम महतो मन्यमानान्।
त्वं त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुम् ॥ ५ ॥ २१ ॥

॥ १७९ ॥ ऋषिः—अगस्त्यः । देवता—रतिः । छन्दः—त्रिष्टुप् ॥

॥ १७९ ॥ पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः।
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः ॥ १ ॥
ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिरवदन्नृतानि।
ते चिदवासुर्नह्यन्तमापुः समू नु पत्नीर्वृषभिर्जगम्युः ॥ २ ॥

एव । नृऽभिः । इंद्रः । सुऽश्रवस्या । प्रऽखादः । पृक्षः । अभि । मित्रिणः । भूत् । सऽमर्ये । इषः । स्तवते । विऽवाचि । सत्राऽकरः । यजमानस्य । शंसः ॥ ४ ॥ त्वया । वयं । मघऽवन् । इंद्र । शत्रून् । अभि । स्याम । महतः । मन्यमानान् । त्वं । त्राता । त्वं । ऊं इति । नः । वृधे । भूः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ५ ॥ २१ ॥

पूर्वीः । अहं । शरदः । शश्रमाणा । दोषाः । वस्तोः । उषसः । जरयंतीः । मिनाति । श्रियं । जरिमा । तनूनां । अपि । ऊं इति । नु । पत्नीः । वृषणः । जगम्युः ॥ १ ॥ ये । चित् । हि । पूर्वे । ऋतऽसापः । आसन् । साकं । देवेभिः । अवदन् । ऋतानि । ते । चित् । अव । असुः । नहि । अंतं । आपुः । सं । ऊं इति । नु । पत्नीः । वृषऽभिः । जगम्युः ॥ २ ॥

न मृषा श्रान्तं यदवन्ति देवा विश्वा इत्स्पृधो अभ्यश्नवाव ।
जयावेदत्र शतनीथमाजिं यत्सम्यञ्चा मिथुनावभ्यजाव ॥ ३ ॥
नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित् ।
लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसन्तम् ॥ ४ ॥
इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे ।
यत्सीमागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः ॥ ५ ॥
अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।
उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥ ६ ॥ २२ ॥ २३ ॥

न । मृषा । श्रान्तं । यत् । अवन्ति । देवाः । विश्वाः । इत् । स्पृधः । अभि । अश्नवाव । जयाव । इत् । अत्र । शतऽनीथं । आजिं । यत् । सम्यञ्चा । मिथुनौ । अभि । अजाव ॥ ३ ॥ नदस्य । मा । रुधतः । कामः । आ । अगन् । इतः । आऽजातः । अमुतः । कुतः । चित् । लोपामुद्रा । वृषणं । निः । रिणाति । धीरं । अधीरा । धयति । श्वसन्तं ॥ ४ ॥ इमं । नु । सोमं । अन्तितः । हृत्ऽसु । पीतं । उप । ब्रुवे । यत् । सीं । आगः । चकृम । तत् । सु । मृळतु । पुलुऽकामः । हि । मर्त्यः ॥ ५ ॥ अगस्त्यः । खनमानः । खनित्रैः । प्रऽजां । अपत्यं । बलं । इच्छमानः । उभौ । वर्णौ । ऋषिः । उग्रः । पुपोष । सत्याः । देवेषु । आऽशिषः । जगाम ॥ ६ ॥ २२ ॥ २३ ॥

॥ चतुर्विंशोऽनुवाकः ॥

॥ १८० ॥ ऋषिः–अगस्त्यः । देवता–अश्विनौ । छन्दः–त्रिष्टुप् ।

॥१८०॥ युवो रजांसि सुयमासो अश्वा रथो यद्वां पर्यर्णांसि दीयत् ।
हिरण्यया वां पवयः प्रुषायन्मध्वः पिबन्ता उषसः सचेथे ॥ १ ॥
युवमत्यस्याव नक्षथो यद्विपत्मनो नर्यस्य प्रयज्योः ।
स्वसा यद्वां विश्वगूर्ती भराति वाजायेट्टे मधुपाविषे च ॥ २ ॥
युवं पय उस्रियायामधत्तं पक्वमामायामव पूर्व्यं गोः ।
अन्तर्यद्वनिनो वामृतप्सू ह्वारो न शुचिर्यजते हविष्मान् ॥ ३ ॥
युवं ह घर्मं मधुमन्तमत्रयेऽपो न क्षोदोऽवृणीतमेषे ।
तद्वां नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यन्ति मध्वः ॥ ४ ॥

युवोः । रजांसि । सुऽयमासः । अश्वाः । रथः । यत् । वां । परि । अर्णांसि । दीयत् । हिरण्ययाः । वां । पवयः । प्रुषायन् । मध्वः । पिबंतौ । उषसः । सचेथे इति ॥ १ ॥ युवं । अत्यस्य । अव । नक्षथः । यत् । विऽपत्मनः । नर्यस्य । प्रऽयज्योः । स्वसा । यत् । वां । विश्वगूर्ती इति विश्वऽगूर्ती । भराति । वाजाय । ईट्टे । मधुऽपौ । इषे । च ॥ २ ॥ युवं । पयः । उस्रियायां । अधत्तं । पक्वं । आमायां । अव । पूर्व्यं । गोः । अंतः । यत् । वनिनः । वां । ऋतप्सू इत्यृतऽप्सू । ह्वारः । न । शुचिः । यजते । हविष्मान् ॥ ३ ॥ युवं । ह । घर्मं । मधुऽमंतं । अत्रये । अपः । न । क्षोदः । अवृणीतं । एषे । तत् । वां । नरौ । अश्विना । पश्वःऽइष्टिः । रथ्याऽइव । चक्रा । प्रति । यंति । मध्वः ॥ ४ ॥

आ वां दानाय ववृतीय दस्रा गोरोहेण तौग्र्यो न जिव्रिः ।
अपः क्षोणी सचते माहिना वां जूर्णो वामक्षुरंहसो यजत्रा ॥ ५ ॥ २३ ॥
नि यद्युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिम् ।
प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजम् ॥ ६ ॥
वयं चिद्धि वां जरितारः सत्या विपन्यामहे वि पणिर्हितावान् ।
अधा चिद्धि ष्माश्विनावनिन्द्या पाथो हि ष्मा वृषणावन्तिदेवम् ॥ ७ ॥
युवां चिद्धि ष्माश्विनावनु द्यून्विरुद्रस्य प्रस्रवणस्य सातौ ।
अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः ॥ ८ ॥

आ । वां । दानाय । ववृतीय । दस्रा । गोः । ओहेन । तौग्र्यः । न । जिव्रिः ।
अपः । क्षोणी इति । सचते । माहिना । वां । जूर्णः । वां । अक्षुः । अंहसः ।
यजत्रा ॥ ५ ॥ २३ ॥ नि । यत् । युवेथे इति । निऽयुतः । सुदानू इति सुऽदानू ।
उप । स्वधाभिः । सृजथः । पुरंऽधिं । प्रेषत् । वेषत् । वातः । न । सूरिः । आ ।
महे । ददे । सुऽव्रतः । न । वाजं ॥ ६ ॥ वयं । चित् । हि । वां । जरितारः ।
सत्याः । विपन्यामहे । वि । पणिः । हितऽवान् । अध । चित् । हि । स्म । अश्विनौ ।
अनिंद्या । पाथः । हि । स्म । वृषणौ । अंतिऽदेवं ॥ ७ ॥ युवां । चित् । हि । स्म ।
अश्विनौ । अनु । द्यून् । विऽरुद्रस्य । प्रऽस्रवणस्य । सातौ । अगस्त्यः । नरां । नृषु ।
प्रऽशस्तः । काराधुनीऽइव । चितयत् । सहस्रैः ॥ ८ ॥

प्र यद्वहेथे महिना रथस्य प्र स्यन्द्रा याथो मनुषो न होता ।
धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम ॥ ९ ॥
तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यं ।
अरिष्टनेमिं परि द्यामियानं विद्यामेषं वृजनं जीरदानुम् ॥ १० ॥ २४ ॥

॥ १८१ ॥ ऋषिः—अगस्त्यः । देवता—अश्विनौ । छन्दः—त्रिष्टुप् ॥

॥१८१॥ कदु प्रेष्ठाविषां रयीणामध्वर्यन्ता यदुन्निनीथो अपाम् ।
अयं वां यज्ञो अकृत प्रशस्तिं वसुधिती अवितारा जनानाम् ॥ १ ॥
आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः ।
मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहन्तु ॥ २ ॥
आ वां रथोऽवनिर्न प्रवत्वान्त्सृप्रवन्धुरः सुविताय गम्याः ।
वृष्णः स्थातारा मनसो जवीयानहम्पूर्वो यजतो धिष्ण्या यः ॥ ३ ॥

प्र । यत् । वहेथे इति । महिना । रथस्य । प्र । स्यंद्रा । याथः । मनुषः । न । होता ।
धत्तं । सूरिऽभ्यः । उत । वा । सुऽअश्व्यं । नासत्या । रयिऽसाचः । स्याम ॥ ९ ॥
तं । वां । रथं । वयं । अद्य । हुवेम । स्तोमैः । अश्विना । सुविताय । नव्यं ।
अरिष्टऽनेमिं । परि । द्यां । इयानं । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ १० ॥ २४ ॥

१ हे इंद्र यया जरितृभ्य ऊती बभूथ सा यद्ध श्रुष्टिः ते अस्ति (तद्) नो महयन्तम् कामं मा आधक्, आयोः (च) विश्वा आपः ते परि अश्याम् ।

२ या नु स्वसारा योनौ नः (अर्थं) कृणवन्त, ता राजा इंद्रः न घ आ दभन् । सुतुकाः चित् आपः अस्मै अवेषन् । (स) नः सख्या वयश्च गमत् ।

३ शूरः इंद्रः नृभिः पृत्सु जेता नाधमानस्य कारोः हवं श्रोता । दाशुषः उपाके रथं प्रभर्ता, यदि च त्मना भूत् (देव्याः) गिरः उद्यन्ता ।

इन्द्र स्वयं सामर्थ्यका अलंकार है। जब इन्द्र अपने भक्तोंकी स्तुति सुनता है तब वह अपनी सेनाके साथ अपने प्रिय भक्तोंकी ओर चला आता है। जब घमासान युद्ध चलता है तब भी यजमानकी सत्य स्तोत्र-वाणी इन्द्रके अपूर्व गुणोंका वर्णन करती है। ४

हे ऐश्वर्यसम्पन्न इन्द्र, आपहीके बलके कारण घमण्डी और पापी शत्रुओंको हम सहज रीतिसे जीत सकते हैं। हमारी रक्षा करनेवाले आपही हैं। आपही हमारी उन्नति करते हैं। आपहीके आधारसे हमारे मनोरथ शीघ्रतासे सफल होते हैं और हमारा उत्साह बढ़ जाता है। ५ (२१)

सूक्त १७९.

॥ ऋषि–अगस्त्य । देवता–रति ॥

मैं बहुत वर्षोंसे लगातार रातदिन कष्ट उठाता हूं। दिनपरदिन बुढ़ापा पास आ जाता है। बुढ़ापेमें शरीरका प्रत्येक अवयव ढीला पड़ जाता है और शरीरका मोह नष्ट होता है। इस अवस्थामें क्या पुरुष अपनी स्त्रीके साथ समागमसुखका अनुभव न लेवे ? १

देखिये। प्राचीन समयमें जो सत्य बात करनेवाले महात्मा पुरुष थे और प्रत्यक्ष देवोंके साथ सच्ची बात करनेवाले महात्मा पुरुष थे वे भी अपने जन्मतक ब्रह्मचर्यव्रतका पालन कर नहीं सके। इस लिये यह बात उचितही है कि स्त्री भी अपने पतिके साथ समागम-सुखका अनुभव ले लेवे। २

---

४ एष (अयं) इंद्रः पृत्सु प्रसाहः, नृभिः मिमिक्षः अभिभूत्। विवाचि सपर्यं (अपि) यजमानस्य सत्राकरः शंसः (अस्य) हवः स्तवते।

५ हे मघवन् वयं त्वया महतः मन्यमानान् शत्रून् अभिष्याम, त्वं (नः) त्राता त्वमु नः वृधे भूः (येन) इषं जीरदानुं वृजनं विद्याम।

१ पूर्वीः शरदः अहं शश्रमाणाः, दोषाः वस्तोः उषसः जरयन्तीः (एव); जरिमा (च) तनूनां श्रियं मिनाति, (एवं सत्यपि) वृषणः स्वपत्नीः संजगम्युः नु (किम्)।

२ येचित् हि पूर्वे ऋतसापः आसन् (येच) देवेभिः साकं ऋतानि अवदन्, ते चित् अव असुः, (व्रतस्य) अन्तम् नहि आपुः (अतः) पत्नीः वृषभिः सं जगम्युः नु।

इस तरह मत समझना कि ब्रह्मचर्यव्रत पालन करनेके कष्ट हमने मुफ्त उठाये। क्योंकि देव स्वयं हमारी रक्षा करते हैं। देवोंकी कृपासे हमने अपने शत्रुओंको जीत लिया है। (इससे अधिक हम क्या चाहते हैं?) यदि तुम और हम एक मतसे संसारसुखका अनुभव लेंगे तो हम सहज रीतिसे उससे सैकडों लाभ उठावेंगे और सुगमतासे संसारकी कठिनताओंको झेलेंगे। ३

जब महानदीका जल रोका जाता है तब उस नदीको बाढ आ जाती है। जिस तरह उस बाढको कोई रोक नहीं सकता उसी तरह मैं अपने इच्छाको दबा नहीं सकता। मैं लोपामुद्राके सम्बन्धमें इतना मोहित हो रहा हूं कि मेरा वीर्य, बुद्धि, और धैर्य भी सब भ्रष्ट हो गये हैं। लोपामुद्रा अबला है किन्तु उसने मेरे बलका हरण किया है। ४

जिस सोमतत्त्वको हम अपने शरीरमें इकट्ठे करते हैं उसीके सामने खडे रहकर मैं प्रार्थना करता हूं कि जो पाप मैंने किया होगा उसके लिये आप क्षमा कीजिये। क्योंकि मनुष्य प्राणीही ऐसा है जिसके मनमें सैकडों अच्छे और बुरे विचार उत्पन्न होते हैं। ५

जिस तरह जमीन खोदनेसे कष्ट होते हैं उसी तरह तपश्चर्या करनेमें अगस्त्य ऋषिको कष्ट उठाने पडे। नाश न होनेवाले बल और सन्तानकी इच्छा अगस्त्य ऋषिकी थी। जब अगस्त्य ऋषिको सामर्थ्य प्राप्त हुआ तब आपने दोनों पक्षोंकी उन्नति की। इस समय इसीके सत्य आशीर्वादका फल भी देव लोकमें आपको मिला। ६ (२२) (५३)

---

३ न मृषा श्रान्तम् यत् (नः) देवाः अवन्ति, विश्वाः स्पृधः इत् अभ्यश्नवाव (च); यत् सम्यञ्चा मिथुनौ (आवाम्) अभि अजाव, (तत्) अत्र शतनीथम् आजिम् जयाव इत्।

४ रुधतः नदस्य कामः मा आ अगन्, इतः अमुतः कुतश्चित् (अपि) आजातः, (इव) लोपामुद्रा अधीरा (सत्यपि) धीरं वृषणं मां निरिणाति, श्वसन्तम् धयति।

५ इमं नु हृत्सु पीतम् (अतः) अन्तितः (वर्तमानं) सोमम् उप ब्रुवे, यत् सीम् आगः चकृम तत् (सः) सु मृळतु। मर्त्यः हि पुलुकामः।

६ अगस्त्यः ऋषिः खनित्रैः (इव तपसा) खनमानः, अपत्यं, प्रजां, बलम् (च) इच्छमानः, उग्रः सन् उभौ वर्णौ पुपोष। देवेषु (च) सत्याः आशिषः जगाम।

अनुवाक २४.

सूक्त १८०.

॥ ऋषि–अगस्त्य । देवता–अश्विन ॥

हे अश्विदेव, जब आपका रथ अन्तरिक्षरूपी रजोमय समुद्रके आसपास इधर उधर सञ्चार करता है तब भी आपके अश्व सीधे और सरल मार्गसे ही चलते हैं। आपके सुवर्णमय चक्रके धुरासे अमृतके बिन्दु इधर उधर उडते हैं। आप भी मधुर रस प्राशन करके उषाके साथ इधर आते हैं। १

शीघ्रतासे दौडनेवाले, लोगोंका लाभ करनेवाले, पवित्र और वेगवान् सूर्यके पहिले अश्विदेव उषाके साथ आते हैं। जब आप आते हैं तब भक्तलोग इस उद्देश्यसे आपकी स्तुति करते हैं कि आपकी भगिनी उषा आपको अपने साथ ले आवे और हमें दिव्य सामर्थ्य और उत्साहका लाभ होवे। २

दिव्य धेनुके अपक्व और प्रकाशमय स्तनमें आपने परिपक्व और उत्कृष्ट अमृतत्त्व रखा है। हे सत्यस्वरूप अश्विदेव, जिस तरह अरण्यके बीचमें टेढे मार्गसे चलनेवाला वायु पवित्र होता है उसी तरह पवित्र हृदयसे मैं (जो आपका भक्त हूं) आपकी सेवा करता हूं। ३

हे पराक्रमी अश्विदेव अत्रिऋषिके लिये आपने जलके प्रवाहकी तरह तीव्र उष्णताको ठण्डा और मधुर कर दिया। इसी लिये हे अश्विदेव, आपके लिये पशु-यज्ञ किया जाता है और मधुर रस हमारी ओर रथके चक्रकी तरह दौडता चला आता है। ४

---

१ हे (अश्विनौ) यत् युवोः रथः रजांसि अर्णांसि परि दीयत (तदपि) वाम् अश्वाः सुयमासः, वाम् हिरण्ययाः पवयः (पीयूष) प्रुषायन्, (हे अश्विनौ) मध्वः पिबन्ता उषसः सचेथे।

२ यत् युवम् अत्यस्य, विपत्मनः नर्यस्य प्रयज्योः (सूर्यस्य) अव नक्षथः, (तदा) हे विश्वगूर्ती, हे मधुपौ (स्तोता) ईट्टे यत् वाम् स्वसा वाजाय, इषं च (वाम्) भराति।

३ युवम् (विश्वाया) गोः आमायाम् उस्रियायाम् (वक्षणायां) पक्व पूर्व्यं च पयः यत् अधत्तम्। हे ऋतप्सू वनिनः अन्तः ह्वारः (व्रातः) न शुचिः हविष्मान वाम् यजत।

४ युवम् ह घर्मं अत्रये, घर्मं अपः क्षोदः न मधुमन्तम् अवृणीतम्। तत् हे नरौ, अश्विनौ वाम् पश्व इष्टिः, (अतश्च) मध्वः रथ्या चक्रा इव (नः) प्रतियन्ति।

हे अद्भुत कर्म करनेवाले अश्वीदेव, जिस तरह बुड्ढे हुए तुग्रपुत्रने आपको मोहित किया उसी तरह आपको घीकी आहुति देकर मैं आपका मन मोहित करता हूं और आपका आशीर्वाद प्राप्त करनेकी इच्छा करता हूं। आपके बलने आकाश और पृथिवीको व्याप्त किया है। हे पूजनीय देव, जो पापके ढेर लगे हुए थे उनका आपने बिलकुल नाश कर डाला। ५

हे उदार अश्वीदेव, जब भक्तोंकी ओर आनेके लिये आप अपने अश्वोंको जोतते हैं तब आपके प्रभावसे आपके भक्त बुद्धिमान् होते हैं। बुद्धिमान् भक्त आपको सन्तुष्ट करके वायुकी तरह चारों ओर सञ्चार करते है। सत्कर्म करनेवाला जो भक्त है उसका बल बढानेके लिये आप उसको पवित्र सामर्थ्य अर्पण करते हैं। ६

हम आपकी स्तुति करनेवाले सच्चे भक्त हैं। हम आपके गुणोंका वर्णन करते हैं। धनी मनुष्य यदि धर्मको माननेवाला न हो और कञ्जूस हो तो हम उसकी ओर ध्यान भी नहीं देते। हे निष्कलंक और वीर्यवान् अश्वीदेव, सदा ईश्वरका चिन्तन करनेवाले भक्तोंकी आप रक्षा करते हैं। ७

हे अश्वीदेव, सब पुरुषोंमें अगस्त्य ऋषि बड़े श्रेष्ठ है। ज्ञानरूपी जलका प्रचण्ड प्रवाह प्राप्त होनेके लिये सबसे श्रेष्ठ अगस्त्यऋषि भी प्रत्येक दिन प्रातःकालको आपको जगाते हैं और 'काराधुनी' नामके सुन्दर बाद्यसे आपकी मनोहर स्तुति गाते हैं। इस तरह वे आपकी प्रार्थना सदा करते रहते हैं। ८

---

५ हे दस्रा, जिव्रिः तौग्र्यो न, (अहं) वां दानाय, गोः ओहेन च आववृतीय । आपः क्षोणी च वाम् महिना सचते, हे यजत्रा, अंहसः अमुः वाम् (पुरा) जूर्णः (एव) ।

६ हे सुदानू यद् नियुतः नि युंक्थे (तदैव) स्वधाभिः (भक्तहृदि) पुरंधिम् सृजथः । (ततः) सूरिः (सः) वातः न वेषत् (वाम्) प्रेषत् (स) सुव्रतः न (अस्य) महे वाजम् आद दे ।

७ वयं वाम् जरितारः सत्याः चित् हि, विपन्यामहे, पणिः वि हितवान् । अधा चित् हि स्म हे अनिन्द्यौ वृषणौ अश्विनौ (तं) अंति देवम् पाथः हि स्म ।

८ हे अश्विनौ विद्रस्य (ज्ञानस्य) प्रस्रवणस्य सातौ, नरां नृषु प्रशस्तः अगस्त्यः कराधुनीव (मंजुघोषैः) सहस्रैः (शंसैः) युवां चित् हि अक्तून् चितयत् स्म ।

सब जगह सञ्चार करनेवाले हे अश्विदेव, आपका रथ स्वर्गमें भी जा सकता है। आप अपने रथमें बैठकर आज इधर आते हैं। किन्तु जब आप हमारी ओर आते हैं तब किसी मनुष्यका रूप धारण करके होता बनकर आते हैं। इस लिये हमारे यजमानको आप बुद्धिरूपी उत्तम अश्व अर्पण कीजिये। हे नासत्य, हम भी आपके ऐश्वर्यके भागी होंगे। ९

हे अश्विदेव, आपके रथचक्र कभी नहीं टूटता है। आपका रथनक्षत्र लोकके चारों ओर सञ्चार करता है। ऐसे आपके यशस्वी रथको हमारे कल्याणके लिये हम स्तोत्रोंके द्वारा बुलाते हैं। इस तरह इच्छाको शीघ्रतासे सफल करनेवाला और हमारा उत्साह बढ़ानेवाला आपका सहारा हमें प्राप्त होगा। १० (२४)

सूक्त १८१.

॥ ऋषि–अगस्त्य । देवता–अश्विन ॥

हे अश्विदेव, आप बड़े दयाशील हैं। सात्विक सम्पत्ति देनेवाले और सात्विक प्रेम करनेवाले आपही हैं। स्वर्गके जलका अंश आप कब लायेंगे? हे दिव्य सम्पत्ति देनेवाले अश्विदेव, इस यज्ञके द्वारा हम आपके गुणोंकी प्रशंसा करते हैं। १

आपके रथके पवित्र और दिव्य अश्व अन्नका प्राशन करनेवाले वायुकी तरह बलवान्, मनकी तरह वेगवान, वीर्यवान, हृष्टपुष्ट, और निजके तेजसे प्रकाशित होनेवाले हैं। वे अश्व आपको हमारी ओर बड़ी शीघ्रतासे ले आवें। २

जिस तरह ढालू जमीनपरसे जलका प्रवाह बड़े वेगसे बहता है उसी तरह आपका रथ बड़े जोरसे चलता है। रथ हांकनेवालेका जो स्थान उस रथपर बना हुआ है वह भी बड़ा चौड़ा है। हमारा कल्याण करनेके लिये वह रथ हमारी ओर आवे। ध्यान और चिन्तन करनेयोग्य हे अश्विदेव, मन सबसे चञ्चल है; किन्तु आपका पवित्र रथ मनसे भी अधिक चञ्चल है। आपका रथ बड़े ठाठसे सबके आगे चलता है। ३

---

९ हे स्पन्द्रा, यत् रथस्य महिना प्रवहेथे, (तदा) (कश्चित्) मनुषः होता न (अस्मान्) प्र याथः। उत वा हे नासत्या (नः) सूरिभ्यः (प्रशामय) सु अश्व्यम् धनम् (येन वयमपि) रयिवन्तः स्याम।

१० हे अश्विनौ वाम् तम् नव्यम् अरिष्टनेमिम् द्याम् परि इयानम् रथम् वयम् अद्य (नः) सुविताय स्तोमैः हुवेम, (येन) इषम् जीरदानुम् वृजनम् च विद्याम।

१ प्रेष्ठौ, इषां रयीणां च अध्वर्यन्तौ युवाम् यत् अपाम् उत् निनीथः (तत्) कत् उ? हे वसुधिती हे जनानां अवितारौ, अयम् यज्ञः वाम् प्रशस्तिम् अकृत।

२ वाम् अश्वाः शुचयः पयस्पाः वातरंहसः, दिव्यासः, अत्याः, मनोजुवः, वृषणः वीतपृष्ठाः स्वराजः (अश्वाः) हे अश्विना युवाम् आ वहन्तु।

३ (अस्माकम्) प्रवत्वान् अवनिः न, वाम् रथः सुप्रवन्धुरः (नः) सुविताय आ गम्याः। हे स्थातारौ, हे धिष्ण्यौ यः (रथः) अहंपूर्वः, वृष्णः मनसः (अपि) जवीयान्।

इस यज्ञमें प्रकट होनेवाले अश्वीदेव, आपके गुणोंका वर्णन सब लोग बारबार करते हैं। आपकी मूर्ति निष्कलंक और कीर्ति पवित्र है। इस लिये आपका स्तोत्र सब लोक गाते हैं। इससे यह विदित होता है कि आप दोनोंमेंसे एक हमारे यशका नेता है और दूसरा द्युलोकका भाग्यवान पुत्र है। ४

बड़े वेगसे नीचे दौड़नेवाला और उच्च उच्च शिखरका आपका सुवर्णमय रथ, आपकी इच्छासे आपके भक्तोंकी ओर आवे। हे अश्वीदेव, आप दोनोंमेंसे एककी स्तुति करनेसे भी स्तोताको सामर्थ्य प्राप्त होता है। रथके अश्व हृष्टपुष्ट हो जाते हैं और अपने हिनहिनानेसे अन्तरिक्षको व्याप्त करते हैं। ५ (२५)

शरदृतुमें धान्यरूपी सम्पत्ति आपके रथमें रखी जाती है। आपका रथ भी उत्साह देनेवाले अमृतके बिन्दुओंकी वर्षा करता है और इधर उधर सञ्चार करता है। जब हम आप दोनोंमेंसे एककी स्तुति करते हैं तब हमें सामर्थ्य प्राप्त होता है, बड़ी बड़ी नदीयोंको बाढ़ आती है और जलके प्रवाह हमारी ओर बहते हैं। ६

सबको नियमके अनुसार चलानेवाले अश्वीदेव, आपकी पुरानी स्तुतिका प्रवाह बड़े जोरसे मेरे मुहसे बाहर निकलता है। उस स्तुतिसे आप सन्तुष्ट हुजिये और हमपर कृपा कीजिये क्योंकि मैं आपका भक्त हूं। जब आप सञ्चार करते हैं और विश्रान्ति लेते हैं तब भी मेरी ओर ध्यान दीजिये। ७

---

४ इह इहेव जाताः (यत्) अवावशीताम् (तत्) अरेपसा तन्वा, स्वैः नामभिः (च) वाम् अन्यः (नः) सुमखस्य जिष्णुः सूरिः (भवति) अन्यः दिवः सुभगः पुत्रः (इति) ऊहे ।

५ वाम् निम्नगः, ककुहः, हिरण्यरूपः (रथः वाम्) वशां अनु (नः) सद्मानि प्र गम्याः । हे अश्विना, (वाम्) अन्यस्य वाजैः हरी पीपयन्त, मथ्रा (च तौ) घोषैः रजांसि वि (आप्यायतः) ।

६ वाम् (रथः) शरद्वान् न वृषभः निष्पाट् (च), मध्वः इषम् पृक्षः इषः प्र चरति । (वाम्) अन्यस्य एवैः वाजैः (याः) पीपयन्त, (ताः) ऊर्ध्वाः वहन्तीः नद्यः नः आ अगुः ।

७ हे वेधसा अश्विना, त्रेधा वाचा इह क्षरन्ती स्थविरा (च) वाम् धीः असर्जि । (अस्माकम्) उपस्तुती (युवाम्) नाधमानम् अवतम्, यामन् अयामन् (च) मे हवं शृणुतम् ।

यज्ञगृहमें तीन दर्भासन रखे जाते हैं। वहां आपके उज्वल और तेजोमयरूपकी स्तुति की जाती है। उस समय भक्तोंके हृदयमें आपके लिये प्रेम उत्पन्न होता है। हे वीर पुरुष, जब आप हमारे मनोरथ पूर्ण करते हैं तब आप ज्ञानरूपकी वर्षा करते हैं और मनुष्योंकी इच्छा सफल करके उनका ऐश्वर्य बढाते हैं। ८

हे अश्वीदेव, पुषादेवके समान आप भी सब लोगोंकी रक्षा करते हैं। ज्ञानवान् भक्त आपको हवि अर्पण करते हैं और वे जिस तरह अग्नि और उषाकी स्तुति करते हैं उस तरह वे आपकी भी स्तुति करते हैं। सब प्रेमसे मैं आपकी स्तुति और प्रार्थना करता हूं। इस लिये आप ऐसी कृपा हमपर कीजिये जिससे हमारी इच्छा सफल होवे और हमारा उत्साह बढ़े। ९

सूक्त १८२.

॥ ऋषि—अगस्त्य । देवता—अश्विन ॥

देखिये; अश्वीदेवोंके आनेका चिन्ह दिखाई देने लगा; चलो; आगे चलो । देखिये वहां पराक्रमी पुरुषोंका रथ खडा है । हे ज्ञानवान् भक्तलोग, अश्वीदेवोंको सन्तुष्ट कीजिये। सद्बुद्धि देनेवाले आपही है। मनुष्य जातिको दयारूपी सम्पत्ति देनेका सामर्थ्य आपके पास है। आप ध्यान करने योग्य हैं। द्युलोकसे वे प्रकट होते हैं। केवल पुण्यवान् पुरुष आपके पवित्र सत्वका अनुभव ले सकते हैं। १

हे अश्वीदेव, (पराक्रममें) इन्द्र और आप एकसे ही है। आप चिन्तन करने योग्य हैं। मरुतोंकी तरह आप शत्रुओंका नाश करनेवाले और अपूर्व काम करनेवाले हैं। आप रथपर आरूढ होते हैं। हे अश्वीदेव, अमृत—रससे भरे हुए रथमें बैठकर हवि अर्पण करनेवाले भक्तोंकी ओर आप चले जाते हैं। २

---

८ उत त्रिबर्हिषि सदने वाम् रुशत: वप्सस: त्या गी: (प्रयतान्) नॄन् पिन्वते । हे वृषणा, (अवम्) वाम् वृषा (वरद) मेघ: गो: सेके न मनुष: दशस्यन् (तान्) पीपाय ।

९ हे अश्विना युवाम् पूषेव अग्नि उषाम् न पुरन्धि: हविष्मान् (वाम्) अरते । यत् (अहम्) वरिवस्या गृणान: वाम् हुवे (तत्) इषम् जीरदानु वृजनम् विद्याम ।

१ (पश्यत जना:) इदं (अश्विनो: वयुनम् (पुरत:) अभूत्, ओ सु भूषत, (अयं) वृषण्वान् रथ:, हे मनीषिण: (ऋत्विज: एतान्) मदत । (इमावपि) धियं जिन्वा धिष्ण्या, विश्पलावसू, दिव: नपाता, सुकृते शुचिव्रता (च)।

२ (युवाम्) इन्द्रतमा, धिष्ण्या हि, (युवाम् च) मरुत्तमा दस्रा, दंसिष्ठा, रथ्या रथीतमा, पूर्णं रथं मध्व: आ वहेथे, तेन च हे अश्विना दाश्वांसम् उप याथ: ।

हे सामर्थ्यवान् देव, आप क्या करते हैं ? आप क्यों ठेरे हुए हैं ? यहांके लोक देवोंको हवि अर्पण करनेके बदले अपने घमण्डमें मग्न हुए हैं। इस लिये उनको छोड़ देना चाहिये। धर्मभ्रष्ट और दुष्ट लोगोंकी आयुको घटाकर देवोंके गुणोंका वर्णन करनेवाले भक्त लोगोंको ज्ञानरूपी प्रकाश आप अर्पण करें। ३

(सज्जन लोगोंको) गाली देनेवाले लोगोंका आप नाश कीजिये। सत्पुरुषोंके शत्रुओंका भी आप नाश कीजिये। हे अश्विदेव, आप सब बातें जानते ही हैं। (हमारी ओरसे प्रार्थना करनेकी कुछ आवश्यकता नहीं है)। स्तुति करनेवाले लोगोंकी प्रार्थना सफल होवे। हे सत्यस्वरूप अश्विदेव, आप दोनों मेरे स्तोत्रोंको सफल करें। ४

तुग्रपुत्रोंके लिये आपने महासमुद्रमें एक आनन्द देनेवाली और सजीव नौका–जिसके पंख थे–तैयार की। आप उडनेमें बडे कुशल हैं। ईश्वरकी ओर ध्यान लगानेवाले भक्तोंके साथ आप अपने उस नावमें उदककी उछलनेवाली लहरोंके ऊपर समुद्रके परे उड गये। ५

तुग्रपुत्र जब महासागरमें फेंका गया था तब वह गाढ अनन्त अन्धेरेमें डुब गया था। अश्विदेव निजकी प्रेरणासे समुद्रमें उन चार नावोंको चलाते थे। समुद्रमें उन चार नावोंका बहुतही उपयोग होता है। वे (नाव) समुद्रके परे उसको ले जाते हैं। ६

---

३ हे दस्रा अत्र किम् कृणुथः, किम् आसाथे, (अत्र) जनः यः कश्चित् अहविः महीयते (च) (तद्) अति क्रमिष्टम्, पणेः असु जरतम्, वचस्यवे विप्राय (मे) ज्योतिः कृणुतम्।

४ रायतः शुनः अभितः जंभयतम्, हतम् मृधः, हे अश्विना, (ए) तानि विदथुः। जरितुः वाचं वाचं रत्निनीम् कृतम्, हे नासत्या (युवाम्) उभा मम शंसम् अवतम्।

५ युवम् तौग्र्याय सिन्धुषु, आत्मन्वन्तम् पक्षिणम् प्लवम् (एतम्) कम् चक्रथुः। येन सुपप्तनी (युवाम्) महः क्षोदसः पेतथुः देवत्रा मनसा (भक्तेन सह च) निरूहथुः।

६ अप्स्वन्तः अवविद्धं तौग्र्यम् अनारंभणे तमसि च प्रविद्धम् जठलस्य जुष्टाः अश्विभ्याम् इषिताः चतस्रः नावः उत् पारयन्ति (पश्य)।

जिस तरह जलमें डुबे हुए मनुष्यको वृक्षका आधार मिलता है उसी तरह घबरे हुए तुग्रपुत्रको समुद्रमें आपहीका (मानों बलवान वृक्षका) आधार मिला; मानों नीचे गिरते हुए पशुको उड़नेके लिये पंख प्राप्त हुए। हे अश्वीदेव, आपने तुग्रपुत्रकी रक्षा की। इस लिये आपकी कीर्ति बहुत दूरतक फैली हुई है। ७

वीर्यशाली सत्यस्वरूप अश्वीदेव, मानपुत्रोंने आपकी जो स्तुति की है वह आपको प्रिय होवे। जब हम आपको सोम अर्पण करते हैं तब आपकी कृपासे हमारी इच्छा शीघ्रतासे सफल होवे और हमारा उत्साह बढ़े। ८ (२८)

सूक्त १८३.

॥ ऋषि–अगस्त्य । देवता–अश्विन ॥

हे वीर्यशाली अश्विदेव, आप अपना रथ जोतकर तैयार कीजिये। आपका रथ मनसे भी अधिक वेगवान् है। उसमें बैठनेके लिये तीन स्थान हैं और उसके तीन चक्र हैं। जिस तरह पक्षी अपने पखोंसे उड़ता है उसी तरह आप भी अपने रथमें—जिसके तीन तत्वरूपी चक्र होते हैं—बैठकर अपने भक्तोंके घर चले आते हैं। १

जब आप अपनी दयाका सामर्थ्य दिखलानेके लिये रथमें बैठकर आते हैं तब आपका रथ बड़ी शीघ्रतासे और सीधे मार्गसे पृथिवीकी ओर आता है। जिस तरह आप आकाश-कन्या–उषाके साथ चले आते हैं उसी तरह हमारी सुन्दर स्तुति भी आपके साथ शीघ्रतासे दौड़े। २

---

७ यम् नाधितः तौग्र्यः पर्यषस्वजत् (सः) अर्णसः मध्ये निष्ठितः वृक्षः कस्वित्? (येन) पतत्रैः मृगस्य आरभे पर्णा इव (अभवत्), हे अश्विना (एवम् युवाम् स्व) श्रोमताय (एन) कम् उत् ऊहथुः।

८ हे नरा नासत्या यत् मानासः वाम् उचथम् अवोचन् तत् वाम् अनुस्यात्। अद्य अस्मात् सोम्यस्य सदसः, इषम् जीरदानुम् वृजनम् विद्याम।

१ हे वृषणा मनसः यः जवीयान यः त्रिवन्धुरः त्रिचक्रश्च (रथः) तं युञ्जाथाम्। येन त्रिधातुना (रथेन) विः पर्णी न, (युवाम्) पतथः, सुकृतः दुरोणम् च उपयाथः।

२ यत् कत्मन्ता (युवाम) पृथ्वी अनुतिष्ठतः (तत् सः) रथः (अपि) अभिक्षाम यत् सुवृत् वर्तते। (यथा युवाम) वपुष्या दिवः दुहित्रा उषसा सचेथे (तथा) इयम् गीः (वः) वपुः सचताम्।

भक्तोंने अर्पण किये हुए हवियोंसे भरा हुआ आपका रथ आपकी आज्ञाके अनुसार सीधे मार्गसे चलता है । उसी रथमें आप बैठिये । हे शूर—सत्यस्वरूप अश्वीदेव, उपर्युक्त रथमें बैठकर आप अपने भक्तों और उनके पुत्रों और पौत्रोंको जागृत करके उनको बुद्धि अर्पण करनेके लिये उनके घर चले जाते हैं। ३

हे अश्वीदेव, आपका (क्रोधरूप) भेड़ियां और भेडी दोनों हमारा नाश न करें । आप हमारा त्याग मत कीजिये । हमें छोड़कर दूसरी जगह मत् जाइये । देखिये; आपके लिये यहां हविर्भाग रखा हुआ है । हे महापराक्रमी अश्वीदेव, मधुर सोमरससे भरे हुए बरतन भी आपके सामने रखे हुए है । ४

हे अद्भुत् पराक्रम करनेवाले अश्वीदेव, गौतमऋषि, पुरुमिळह, और अत्रिऋषि भी आपकी कृपा प्राप्त करनेके लिये आपको हवि अर्पण करते हैं और आपकी स्तुति करते हैं । हे नासत्य, जिस तरह नियमके अनुसार चलनेवाला मनुष्य अपनी इच्छा सफल करनेके लिये सीधे मार्गसे चलता है उसी—तरह आप भी मेरी इच्छा सफल करनेके लिये सरल मार्गसे मेरी ओर आइये । ५

अब हम (अज्ञानरूपी) अन्धकारके परे पहुंचे हैं । इस लिये, हे अश्वीदेव, हमने जो आपके गुणोंका वर्णन किया है वह हम आपहीको अर्पण करते हैं । जिस मार्गसे देव चलते हैं उसी मार्गसे आप हमारी ओर आइये । हमारी इच्छा शीघ्रतासे सफल करके आप हमारा उत्साह बढावें । ६ (२६) (४)

---

३ यो (स्यम्) वाम् रथः हविष्मान् व्रतानि अनुवर्तते (तम्) सुवृतम् आ तिष्ठतम् । हे नरा नासत्या, येन (भक्तस्य) वर्तिः, त्मने तनयाय त्मने इव वर्ध्यै याथः ।

४ वाम् (क्रोधः) वृकः (अस्मान्) मा, वृकी (अवकृपा अपि) मा आ दधर्षीत्, मा परिवृक्तम् उत मा अति धक्तम् । अयं वां भागः निहितः इयम् गीः, हे दस्रौ इमे वाम् मधूनाम् निधयः ।

५ हे दस्रा, गोतमः पुरुमीळ्हः अत्रिश्च हविष्मान् युवाम् अवसे हवते । यन्ता ऋजुयेव दिशम् दिशा न हे नासत्या, मे हवम् उप आयातम् ।

६ वयम् अस्य तमसः पारम् अतारिष्म, हे अश्विना, (अयम्) स्तोमो (वि) वाम् प्रति अधायि । (तद्) देवयानैः पथिभिः इह आ यातम्, (येन) इषम् वृजनम् जीरदानुं विद्याम ।

॥ चौथा अध्याय समाप्त ॥ ४ ॥

Printed at Vaidya Brothers' Press Tankardwar, Bombay No. 2 & published at Shrutibodh Office 47 Kalbadevi Road, Bombay, by Gajanan Bhaskar Vaidya.

हिन्दी

श्रुतिबोध.

हिन्दी, मराठी, गुजराती और अङ्गरेजी
चार भाषाओंमें अलग अलग
प्रसिद्ध होनेवाला
वेदोंका भाषांतर।

प्रति मासमें ६४ पृष्ठ; ३२ पृष्ठ संहिता [स्वर और पदपाठ सहित]
३२ पृष्ठ भाषान्तर

प्रबन्ध २] ज्येष्ठ संवत् १९७०—जून सन १९१३ [अंक १२

सम्पादक,
रामचंद्र विनायक पटवर्धन, बी. ए., एल् एल्. बी.
अच्युत बलवंत कोल्हटकर, बी. ए., एल् एल्. बी.
[illegible], बी. ए., एल् एल्. बी.

वार्षिक मूल्य
डा. व्य. सहित. रु. ४

'श्रुतिबोध'
ऑफिस,
५० कालबादेवी.
बम्बई.

प्रति अंकका मूल्य
आठ आने.

॥ अथ द्वितीयाष्टके पंचमोऽध्यायः ॥ ५ ॥

॥ १८४ ॥ ऋषिः-अगस्त्यः । देवता-अश्विनौ । छन्दः-त्रिष्टुप् ।

॥ १८४ ॥ ता वामद्य तावपरं हुवेमोच्छन्त्यामुषसि वह्निरुक्थैः ।
नासत्या कुह चित्सन्तावर्यो दिवो नपाता सुदास्तराय ॥ १ ॥
अस्मे ऊ षु वृषणा मादयेथामुत्पणीँर्हतमूर्म्या मदन्ता ।
श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः ॥ २ ॥
श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः ।
वच्यन्ते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः ॥ ३ ॥
अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः ।
अनु यद्वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदन्ति ॥ ४ ॥

॥ अथ द्वितीयाष्टके पंचमोऽध्यायः ॥ ५ ॥

ता । वाम् । अद्य । तौ । अपरम् । हुवेम । उच्छन्त्याम् । उषसि । वह्निः । उक्थैः । नासत्या । कुह । चित् । सन्तौ । अर्यः । दिवः । नपाता । सुदाःऽतराय ॥ १ ॥ अस्मे इति । ऊँ इति । सु । वृषणा । मादयेथाम् । उत् । पणीन् । हतम् । ऊर्म्या । मदन्ता । श्रुतम् । मे । अच्छोक्तिऽभिः । मतीनाम् । एष्टा । नरा । निऽचेतारा । च । कर्णैः ॥ २ ॥ श्रिये । पूषन् । इषुकृताऽइव । देवा । नासत्या । वहतुम् । सूर्यायाः । वच्यन्ते । वाम् । ककुहाः । अप्ऽसु । जाताः । युगा । जूर्णाऽइव । वरुणस्य । भूरेः ॥ ३ ॥ अस्मे इति । सा । वाम् । माध्वी इति । रातिः । अस्तु । स्तोमम् । हिनोतम् । मान्यस्य । कारोः । अनु । यत् । वाम् । श्रवस्या । सुदानू इति सुऽदानू । सुऽवीर्याय । चर्षणयः । मदन्ति ॥ ४ ॥

एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति ।
यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदन्ता ॥ ५ ॥
अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥ १ ॥

॥ १८५ ॥ ऋषि-अगस्त्य । देवता-द्यावापृथिव्यौ । छन्दः-त्रिष्टुप् ॥

॥१८५॥ कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ।
विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥ १ ॥
भूरिं द्वे अचरन्ती चरन्तं पद्वन्तं गर्भमपदी दधाते ।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ २ ॥

एषः । वां । स्तोमः । अश्विनौ । अकारि । मानेभिः । मघऽवाना । सुऽवृक्ति । यातं । वर्तिः । तनयाय । त्मने । च । अगस्त्ये । नासत्या । मदन्ता ॥ ५ ॥ अतारिष्म । तमसः । पारं । अस्य । प्रति । वां । स्तोमः । अश्विनौ । अधायि । आ । इह । यातं । पथिऽभिः । देवऽयानैः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ६ ॥ १ ॥

कतरा । पूर्वा । कतरा । अपरा । अयोः । कथा । जाते इति । कवयः । कः । वि । वेद । विश्वं । त्मना । बिभृतः । यत् । ह । नाम । वि । वर्तेते इति । अहनी इति । चक्रियाऽइव ॥ १ ॥ भूरिं । द्वे इति । अचरन्ती इति । चरन्तं । पद्ऽवन्तं । गर्भं । अपदी इति । दधाते इति । नित्यं । न । सूनुं । पित्रोः । उपऽस्थे । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ २ ॥

अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत् ।
तद्रोदसी जनयतं जरित्रे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ३ ॥
अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे ।
उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ४ ॥
संगच्छमाने युवती समन्ते स्वसारा जामी पित्रोरुपस्थे ।
अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ५ ॥ २ ॥
उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री ।
दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ६ ॥

अनेहः । दात्रं । अदितेः । अनर्वं । हुवे । स्वःऽवत् । अवधं । नमस्वत् । तत् । रोदसी इति । जनयतं । जरित्रे । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ३ ॥ अतप्यमाने इति । अवसा । अवंती इति । अनु । स्याम । रोदसी इति । देवपुत्रे इति देवऽपुत्रे । उभे इति । देवानां । उभयेभिः । अह्नां । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ४ ॥ संगच्छमाने इति संऽगच्छमाने । युवती इति । समंते इति संऽअंते । स्वसारा । जामी इति । पित्रोः । उपऽस्थे । अभिजिघ्रंती इत्यभिऽजिघ्रंती । भुवनस्य । नाभिं । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ५ ॥ २ ॥ उर्वी इति । सद्मनी इति । बृहती इति । ऋतेन । हुवे । देवानां । अवसा । जनित्री इति । दधाते इति । ये इति । अमृतं । सुप्रतीके इति सुऽप्रतीके । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ६ ॥

उर्वी पृथ्वी बहुले दूरेअन्ते उप ब्रुवे नमसा यज्ञे अस्मिन् ।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ७ ॥
देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा ।
इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ८ ॥
उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम् ।
भूरि चिदर्यः सुदास्तरायेषा मदन्त इषयेम देवाः ॥ ९ ॥
ऋतं दिवे तदवोचं पृथिव्या अभिश्रावाय प्रथमं सुमेधाः ।
पातामवद्याद्दुरितादभीके पिता माता च रक्षतामवोभिः ॥ १० ॥
इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम् ।
भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुम् ॥ ११ ॥ ३ ॥

उर्वी इति । पृथ्वी इति । बहुले इति । दूरेअन्ते इति दूरेऽअन्ते । उप । ब्रुवे । नमसा । यज्ञे । अस्मिन् । दधाते इति । ये इति । सुभगे इति सुऽभगे । सुप्रतूर्ती इति सुऽप्रतूर्ती । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ७ ॥ देवान् । वा । यत् । चकृम । कत् । चित् । आगः । सखायं । वा । सदं । इत् । जाःऽपतिं । वा । इयं । धीः । भूयाः । अवऽयानं । एषां । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ८ ॥ उभा । शंसा । नर्या । मां । अविष्टां । उभे इति । मां । ऊती इति । अवसा । सचेतां । भूरि । चित् । अर्यः । सुदाःऽतराय । इषा । मदन्तः । इषयेम । देवाः ॥ ९ ॥ ऋतं । दिवे । तत् । अवोचं । पृथिव्यै । अभिऽश्रावाय । प्रथमं । सुऽमेधाः । पातां । अवद्यात् । दुःऽइतात् । अभीके । पिता । माता । च । रक्षतां । अवःऽभिः ॥ १० ॥ इदं । द्यावापृथिवी इति । सत्यं । अस्तु । पितः । मातः । यत् । इह । उपऽब्रुवे । वां । भूतं । देवानां । अवमे इति । अवःऽभिः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ११ ॥ ३ ॥

॥ १८६ ॥ ऋषिः–अगस्त्यः । देवता–विश्वेदेवाः । छन्दः–त्रिष्टुप् ॥

॥१८६॥ आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥ १ ॥
आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः ।
भुवन्यथा नो विश्वे वृधासः करन्त्सुषाहा विथुरं न शवः ॥ २ ॥
प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः ।
असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिः ॥ ३ ॥
उप व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनुः ।
समाने अहन्विमिमानो अर्कं विषुरूपे पयसि सस्मिन्नूधन् ॥ ४ ॥

आ । नः । इळाभिः । विदथे । सुऽशस्ति । विश्वानरः । सविता । देवः । एतु । अपि । यथा । युवानः । मत्सथ । नः । विश्वम् । जगत् । अभिऽपित्वे । मनीषा ॥ १ ॥ आ । नः । विश्वे । आस्क्राः । गमंतु । देवाः । मित्रः । अर्यमा । वरुणः । सऽजोषाः । भुवन् । यथा । नः । विश्वे । वृधासः । करन् । सुऽसहा । विथुरं । न । शवः ॥ २ ॥ प्रेष्ठं । वः । अतिथिं । गृणीषे । अग्निं । शस्तिऽभिः । तुर्वणिः । सऽजोषाः । असत् । यथा । नः । वरुणः । सुऽकीर्तिः । इषः । च । पर्षत् । अरिऽगूर्तः । सूरिः ॥ ३ ॥ उप । वः । आ । ईषे । नमसा । जिगीषा । उषसानक्ता । सुदुघाऽइव । धेनुः । समाने । अहन् । विऽमिमानः । अर्कं । विषुऽरूपे । पयसि । सस्मिन् । ऊधन् ॥ ४ ॥

उत नोऽहिर्बुध्न्यो३ मयस्कः शिशुं न पिप्युषीव वेति सिन्धुः ।
येन नपातमपां जुनाम मनोजुवो वृषणो यं वहन्ति ॥ ५ ॥ ४ ॥
उत न ईं त्वष्टा गन्त्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः ।
आ वृत्रहेन्द्रश्चर्षणिप्रास्तुविष्टमो नरां न इह गम्याः ॥ ६ ॥
उत न ईं मतयोऽश्वयोगाः शिशुं न गावस्तरुणं रिहन्ति ।
तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसन्त ॥ ७ ॥
उत न ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदन्तु ।
पृषदश्वासोऽवनयो न रथा रिशादसो मित्रयुजो न देवाः ॥ ८ ॥
प्र नु यदेषां महिना चिकित्रे प्र युञ्जते प्रयुजस्ते सुवृक्ति ।
अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायन्त सेनाः ॥ ९ ॥

उत । नः । अहिः । बुध्न्यः । मयः । करिति कः । शिशुं । न । पिप्युषीऽइव । वेति । सिंधुः । येन । नपातं । अपां । जुनाम । मनःऽजुवः । वृषणः । यं । वहंति ॥ ५ ॥ ४ ॥ उत । नः । ईं । त्वष्टा । आ । गंतु । अच्छ । स्मत् । सूरिऽभिः । अभिऽपित्वे । सऽजोषाः । आ । वृत्रऽहा । इंद्रः । चर्षणिऽप्राः । तुविःऽतमः । नरां । नः । इह । गम्याः ॥ ६ ॥ उत । नः । ईं । मतयः । अश्वऽयोगाः । शिशुं । न । गावः । तरुणं । रिहंति । तं । ईं । गिरः । जनयः । न । पत्नीः । सुरभिःऽतमं । नरां । नसंत ॥ ७ ॥ उत । नः । ईं । मरुतः । वृद्धऽसेनाः । स्मत् । रोदसी इति । सऽमनसः । सदंतु । पृषत्ऽअश्वासः । अवनयः । न । रथाः । रिशादसः । मित्रऽयुजः । न । देवाः ॥ ८ ॥ प्र । नु । यत् । एषां । महिना । चिकित्रे । प्र । युंजते । प्रऽयुजः । ते । सुऽवृक्ति । अध । यत् । एषां । सुऽदिने । न । शरुः । विश्वं । आ । इरिणं । प्रुषायंत । सेनाः ॥ ९ ॥

प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि सन्ति ।
अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ॥ १० ॥
इयं सा वो अस्मे दीधितिर्यजत्रा अपिप्राणी च सदनी च भूयाः ।
नि या देवेषु यतते वसूयुर्विद्यामेषं वृजनं जीरदानुम् ॥ ११ ॥ ५ ॥

॥ १८७ ॥ ऋषिः–अगस्त्यः । देवता–अन्नस्तुतिः । छन्दः–गायत्री ॥

॥ १८७ ॥ पितुं नु स्तोषं महो धर्माणं तविषीम् ।
यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥ १ ॥
स्वादो पितो मधो पितो वयं त्वा ववृमहे ।
अस्माकमविता भव ॥ २ ॥

प्रो इति । अश्विनौ । अवसे । कृणुध्वं । प्र । पूषणं । स्वऽतवसः । हि । संति । अद्वेषः । विष्णुः । वातः । ऋभुक्षाः । अच्छ । सुम्नाय । ववृतीय । देवान् ॥ १० ॥ इयं । सा । वः । अस्मे इति । दीधितिः । यजत्राः । अपिऽप्राणी । च । सदनी । च । भूयाः । नि । या । देवेषु । यतते । वसुऽयुः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ११ ॥ ५ ॥

पितुं । नु । स्तोषं । महः । धर्माणं । तविषीं । यस्य । त्रितः । वि । ओजसा । वृत्रं । विऽपर्वं । अर्दयत् ॥ १ ॥ स्वादो इति । पितो इति । मधो इति । पितो इति । वयं । त्वा । ववृमहे । अस्माकं । अविता । भव ॥ २ ॥

उप नः पितवा चर शिवः शिवाभिरूतिभिः ।
मयोभुरद्विषेण्यः सखा सुशेवो अद्वयाः ॥ ३ ॥

तव त्ये पितो रसा रजांस्यनु विष्ठिताः ।
दिवि वाता इव श्रिताः ॥ ४ ॥

तव त्ये पितो ददतस्तव स्वादिष्ठ ते पितो ।
प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते ॥ ५ ॥ ६ ॥

त्ये पितो महानां देवानां मनो हितम् ।
अकारि चारु केतुना तवाहिमवसावधीत् ॥ ६ ॥

यददो पितो अजगन्विवस्व पर्वतानाम् ।
अत्रा चिन्नो मधो पितोऽरं भक्षाय गम्याः ॥ ७ ॥

यदपामोषधीनां परिंशमारिशामहे ।
वातापे पीव इद्भव ॥ ८ ॥

उप । नः । पितो इति । आ । चर । शिवः । शिवाभिः । ऊतिऽभिः । मयःऽभुः । अद्विषेण्यः । सखा । सुऽशेवः । अद्वयाः ॥ ३ ॥ तव । त्ये । पितो इति । रसाः । रजांसि । अनु । विऽस्थिताः । दिवि । वाताःऽइव । श्रिताः ॥ ४ ॥ तव । त्ये । पितो इति । ददतः । तव । स्वादिष्ठ । ते । पितो इति । प्र । स्वाद्मानः । रसानां । तुविग्रीवाःऽइव । ईरते ॥ ५ ॥ ६ ॥ त्ये इति । पितो इति । महानां । देवानां । मनः । हितं । अकारि । चारु । केतुना । तव । अहिं । अवसा । अवधीत् ॥ ६ ॥ यत् । अदः । पितो इति । अजगन् । विवस्व । पर्वतानां । अत्र । चित् । नः । मधो इति । पितो इति । अरं । भक्षाय । गम्याः ॥ ७ ॥ यत् । अपां । ओषधीनां । परिंशं । आऽरिशामहे । वातापे । पीवः । इत् । भव ॥ ८ ॥

यत्ते सोम गवाशिरो यवाशिरो भजामहे ।
वातापे पीव इद्भव ॥ ९ ॥
करम्भ ओषधे भव पीवो वृक्क उदारथिः ।
वातापे पीव इद्भव ॥ १० ॥
तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम ।
देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ॥ ११ ॥ ७ ॥

॥ १८८ ॥ ऋषिः अगस्त्य । देवता-आप्रियः । छन्दः-गायत्री ॥

॥ १८८ ॥ समिद्धो अद्य राजसि देवो देवैः सहस्रजित् ।
दूतो हव्या कविर्वह ॥ १ ॥
तनूनपादृतं यते मध्वा यज्ञः समज्यते ।
दधत्सहस्रिणीरिषः ॥ २ ॥
आजुह्वानो न ईड्यो देवाँ आ वक्षि यज्ञियान् ।
अग्ने सहस्रसा असि ॥ ३ ॥

यत् । ते । सोम । गोऽआशिरः । यवऽआशिरः । भजामहे । वातापे । पीवः । इत् । भव ॥ ९ ॥ करंभः । ओषधे । भव । पीवः । वृक्कः । उदारथिः । वातापे । पीवः । इत् । भव ॥ १० ॥ तं । त्वा । वयं । पितो इति । वचःऽभिः । गावः । न । हव्या । सुसूदिम । देवेभ्यः । त्वा । सधऽमादं । अस्मभ्यं । त्वा । सधऽमादं ॥ ११ ॥ ७ ॥

संऽइद्धः । अद्य । राजसि । देवः । देवैः । सहस्रऽजित् । दूतः । हव्या । कविः । वह ॥ १ ॥ तनूऽनपात् । ऋतं । यते । मध्वा । यज्ञः । सं । अज्यते । दधत् । सहस्रिणीः । इषः ॥ २ ॥ आऽजुह्वानः । नः । ईड्यः । देवान् । आ । वक्षि । यज्ञियान् । अग्ने । सहस्रऽसाः । असि ॥ ३ ॥

प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन् । यत्रादित्या विराजथ ॥ ४ ॥
विराट् सम्राड्विभ्वीः प्रभ्वीर्बह्वीश्च भूयसीश्च याः ।
दुरो घृतान्यक्षरन् ॥ ५ ॥ ८ ॥
सुरुक्मे हि सुपेशसाधि श्रिया विराजतः । उषासावेह सीदताम् ॥ ६ ॥
प्रथमा हि सुवाचसा होतारा दैव्या कवी ।
यज्ञं नो यक्षतामिमम् ॥ ७ ॥
भारतीळे सरस्वति या वः सर्वा उपब्रुवे । ता नश्चोदयत श्रिये ॥ ८ ॥
त्वष्टा रूपाणि हि प्रभुः पशून्विश्वान्त्समानजे ।
तेषां नः स्फातिमा यज ॥ ९ ॥
उप त्मन्या वनस्पते पाथो देवेभ्यः सृज । अग्निर्हव्यानि सिष्वदत् ॥ १० ॥
पुरोगा अग्निर्देवानां गायत्रेण समज्यते । स्वाहाकृतीषु रोचते ॥ ११ ॥ ९ ॥

प्राचीनं । बर्हिः । ओजसा । सहस्रऽवीरं । अस्तृणन् । यत्र । आदित्याः । विऽराजथ ॥ ४ ॥ विऽराट् । सम्ऽराट् । विऽभ्वीः । प्रऽभ्वीः । बह्वीः । च । भूयसीः । च । याः । दुरः । घृतानि । अक्षरन् ॥ ५ ॥ ८ ॥ सुरुक्मे इति सुऽरुक्मे । हि । सुऽपेशसा । अधि । श्रिया । विऽराजतः । उषसौ । आ । इह । सीदतां ॥ ६ ॥ प्रथमा । हि । सुऽवाचसा । होतारा । दैव्या । कवी इति । यज्ञं । नः । यक्षतां । इमं ॥ ७ ॥ भारति । इळे । सरस्वति । याः । वः । सर्वाः । उपऽब्रुवे । ताः । नः । चोदयत । श्रिये ॥ ८ ॥ त्वष्टा । रूपाणि । हि । प्रऽभुः । पशून् । विश्वान् । सम्ऽआनजे । तेषां । नः । स्फातिं । आ । यज ॥ ९ ॥ उप । त्मन्या । वनस्पते । पाथः । देवेभ्यः । सृज । अग्निः । हव्यानि । सिस्वदत् ॥ १० ॥ पुरःऽगाः । अग्निः । देवानां । गायत्रेण । सं । अज्यते । स्वाहाऽकृतीषु । रोचते ॥ ११ ॥ ९ ॥

॥ १८९ ॥ ऋषिः—अगस्त्यः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥१८९॥ अग्ने नयं सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमंउक्तिं विधेम ॥ १ ॥
अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥ २ ॥
अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः ।
पुनरस्मभ्यं सुवितायं देव क्षां विश्वेभिरमृतेभिर्यजत्र ॥ ३ ॥
पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्वान् ।
मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं सहस्वः ॥ ४ ॥
मा नो अग्नेऽव सृजो अघायाविष्यवे रिपवे दुच्छुनायै ।
मा दत्वते दशते मादते नो मा रीषते सहसावन्परा दाः ॥ ५ ॥ १० ॥

अग्ने । नयं । सुऽपथा । राये । अस्मान् । विश्वानि । देव । वयुनानि । विद्वान् । युयोधि । अस्मत् । जुहुराणं । एनः । भूयिष्ठां । ते । नमःऽउक्तिं । विधेम ॥ १ ॥ अग्ने । त्वं । पारय । नव्यः । अस्मान् । स्वस्तिऽभिः । अति । दुःऽगानि । विश्वा । पूः । च । पृथ्वी । बहुला । नः । उर्वी । भव । तोकाय । तनयाय । शं । योः ॥ २ ॥ अग्ने । त्वं । अस्मत् । युयोधि । अमीवाः । अनग्निऽत्राः । अभिऽअमंत । कृष्टीः । पुनः । अस्मभ्यं । सुवितायं । देव । क्षां । विश्वेभिः । अमृतेभिः । यजत्र ॥ ३ ॥ पाहि । नः । अग्ने । पायुऽभिः । अजस्रैः । उत । प्रिये । सदने । आ । शुशुक्वान् । मा । ते । भयं । जरितारं । यविष्ठ । नूनं । विदत् । मा । अपरं । सहस्वः ॥ ४ ॥ मा । नः । अग्ने । अव । सृजः । अघाय । अविष्यवे । रिपवे । दुच्छुनायै । मा । दत्वते । दशते । मा । अदते । नः । मा । रिषते । सहसाऽवन् । परा । दाः ॥ ५ ॥ १० ॥

वि घ त्वावाँ ऋतजात यंसद्गृणानो अग्ने तन्वे३ वरूथम् ।
विश्वाद्रिरिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट् ॥ ६ ॥
त्वं ताँ अग्न उभयान्वि विद्वान्वेषि प्रपित्वे मनुषो यजत्र ।
अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर्नाक्रः ॥ ७ ॥
अवोचाम निवचनान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ ।
वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुम् ॥ ८ ॥ ११ ॥

॥ १९० ॥ ऋषिः—अगस्त्यः । देवता—बृहस्पतिः । छन्दः त्रिष्टुप् ॥

॥ १९० ॥ अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः ।
गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः ॥ १ ॥
तमृत्विया उप वाचः सचन्ते सर्गो न यो देवयतामसर्जि ।
बृहस्पतिः स ह्यञ्जो वरांसि विभ्वाभवत्समृते मातरिश्वा ॥ २ ॥

वि । घ । त्वाऽवान् । ऋतऽजात । यंसत् । गृणानः । अग्ने । तन्वे । वरूथं ।
विश्वात् । रिरिक्षोः । उत । वा । निनित्सोः । अभिऽह्रुतां । असि । हि । देव ।
विष्पट् ॥ ६ ॥ त्वं । तान् । अग्ने । उभयान् । वि । विद्वान् । वेषि । प्रऽपित्वे ।
मनुषः । यजत्र । अभिऽपित्वे । मनवे । शास्यः । भूः । मर्मृजेन्यः । उशिक्ऽभिः ।
न । अक्रः ॥ ७ ॥ अवोचाम । निऽवचनानि । अस्मिन् । मानस्य । सूनुः । सह-
साने । अग्नौ । वयं । सहस्रं । ऋषिऽभिः । सनेम । विद्याम । इषं । वृजनं ।
जीरऽदानुं ॥ ८ ॥ ११ ॥

अनर्वाणं । वृषभं । मंद्रऽजिह्वं । बृहस्पतिं । वर्धय । नव्यं । अर्कैः । गाथान्यः ।
सुऽरुचः । यस्य । देवाः । आऽशृण्वंति । नवमानस्य । मर्ताः ॥ १ ॥ तं । ऋत्वियाः ।
उप । वाचः । सचंते । सर्गः । न । यः । देवऽयता । असर्जि । बृहस्पतिः । सः ।
हि । अंजः । वरांसि । विऽभ्वा । अभवत् । सं । ऋते । मातरिश्वा ॥ २ ॥

उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत्सवितेव प्र बाहू ।
अस्य क्रत्वाहन्यो३यो अस्ति मृगो न भीमो अरक्षसस्तुविष्मान् ॥ ३ ॥
अस्य श्लोको दिवीयते पृथिव्यामत्यो न यंसद्यक्षभृद्विचेताः ।
मृगाणां न हेतयो यन्ति चेमा बृहस्पतेरहिमायाँ अभि द्यून् ॥ ४ ॥
ये त्वा देवोस्रिकं मन्यमानाः पापा भद्रमुपजीवन्ति पज्राः ।
न दूढ्ये३अनु ददासि वामं बृहस्पते चयस इत्पियारुम् ॥ ५ ॥ १२ ॥
सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्रः ।
अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवन्तो अस्थुः ॥ ६ ॥
सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।
स विद्वाँ उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः ॥ ७ ॥

उपऽस्तुतिं । नमसः । उत्ऽयतिं । च । श्लोकं । यंसत् । सविताऽइव । प्र । बाहू इति । अस्य । क्रत्वा । अहन्यः । यः । अस्ति । मृगः । न । भीमः । अरक्षसः । तुविष्मान् ॥ ३ ॥ अस्य । श्लोकः । दिवि । ईयते । पृथिव्या । अत्यः । न । यंसत् । यक्षऽभृत् । विऽचेताः । मृगाणां । न । हेतयः । यन्ति । च । इमाः । बृहस्पतेः । अहिऽमायान् । अभि । द्यून् ॥ ४ ॥ ये । त्वा । देव । उस्रिकं । मन्यमानाः । पापाः । भद्रं । उपऽजीवन्ति । पज्राः । न । दुःऽध्ये । अनु । ददासि । वामं । बृहस्पते । चयसे । इत् । पियारुं ॥ ५ ॥ १२ ॥ सुऽप्रैतुः । सुऽयवसः । न । पन्थाः । दुःऽनियन्तुः । परिऽप्रीतः । न । मित्रः । अनर्वाणः । अभि । ये । चक्षते । नः । अपिऽवृताः । अपऽऊर्णुवन्तः । अस्थुः ॥ ६ ॥ सं । यं । स्तुभः । अवनयः । न । यन्ति । समुद्रं । न । स्रवतः । रोधऽचक्राः । सः । विद्वान् । उभयं । चष्टे । अन्तः । बृहस्पतिः । तरः । आपः । च । गृध्रः ॥ ७ ॥

एवा महस्तुविजातस्तुविष्मान्बृहस्पतिर्वृषभो धायि देवः ।
स नः स्तुतो वीरवद्धातु गोमद्विद्यामेषं वृजनं जीरदानुम् ॥ ८ ॥ १३ ॥

॥ १९१ ॥ ऋषि–अगस्त्यः । देवता सूर्यः । छन्द अनुष्टुप् ॥

॥१९१॥ कङ्कतो न कङ्कतोऽथो सतीनकङ्कतः ।
द्वाविति प्लुषी इति न्यदृष्टा अलिप्सत ॥ १ ॥
अदृष्टान्हन्त्यायत्यथो हन्ति परायती ।
अथो अवघ्नती हन्त्यथो पिनष्टि पिंषती ॥ २ ॥
शरासः कुशरासो दर्भासः सैर्या उत ।
मौञ्जा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत ॥ ३ ॥
नि गावो गोष्ठे असदन्नि मृगासो अविक्षत ।
नि केतवो जनानां न्यदृष्टा अलिप्सत ॥ ४ ॥
एत उ त्ये प्रत्यदृश्रन्प्रदोषं तस्करा इव ।
अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ॥ ५ ॥ १४ ॥

एव । महः । तुविऽजातः । तुविष्मान् । बृहस्पतिः । वृषभः । धायि । देवः । सः । नः । स्तुतः । वीरऽवत् । धातु । गोऽमत् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ८ ॥ १३ ॥

कङ्कतः । न । कङ्कतः । अथो इति । सतीनऽकङ्कतः । द्वौ । इति । प्लुषी इति । इति । नि । अदृष्टाः । अलिप्सत ॥ १ ॥ अदृष्टान् । हन्ति । आऽयती । अथो इति । हन्ति । पराऽयती । अथो इति । अवऽघ्नती । हन्ति । अथो इति । पिनष्टि । पिंषती ॥ २ ॥ शरासः । कुऽशरासः । दर्भासः । सैर्याः । उत । मौञ्जाः । अदृष्टाः । वैरिणाः । सर्वे । साकम् । नि । अलिप्सत ॥ ३ ॥ नि । गावः । गोऽस्थे । असदन् । नि । मृगासः । अविक्षत । नि । केतवः । जनानाम् । नि । अदृष्टाः । अलिप्सत ॥ ४ ॥ एते । ऊं इति । त्ये । प्रति । अदृश्रन् । प्रऽदोषम् । तस्कराःऽइव । अदृष्टाः । विश्वऽदृष्टाः । प्रतिऽबुद्धाः । अभूतन ॥ ५ ॥ १४ ॥

द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा ।

अदृष्टा विश्वदृष्टास्तिष्ठतेलयता सु कम् ॥ ६ ॥

ये अंस्या ये अङ्ग्याः सूचीका ये प्रकङ्कताः ।

अदृष्टाः किं चनेह वः सर्वे साकं नि जस्यत ॥ ७ ॥

उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा ।

अदृष्टान्त्सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥ ८ ॥

उदपप्तदसौ सूर्यः पुरु विश्वानि जूर्वन् ।

आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥ ९ ॥

सूर्ये विषमा सजामि दृतिं सुरावतो गृहे । सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १० ॥ १९ ॥

इयत्तिका शकुन्तिका सका जघास ते विषम् । सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ ११ ॥

द्यौः । वः । पिता । पृथिवी । माता । सोमः । भ्राता । अदितिः । स्वसा । अदृष्टाः । विश्वऽदृष्टाः । तिष्ठत । इलयत । सु । कं ॥ ६ ॥ ये । अंस्याः । ये । अङ्ग्याः । सूचीकाः । ये । प्रऽकङ्कताः । अदृष्टाः । किं । चन । इह । वः । सर्वे । साकं । नि । जस्यत ॥ ७ ॥ उत् । पुरस्तात् । सूर्यः । एति । विश्वऽदृष्टः । अदृष्टऽहा । अदृष्टान् । सर्वान् । जम्भयन् । सर्वाः । च । यातुऽधान्यः ॥ ८ ॥ उत् । अपप्तत् । असौ । सूर्यः । पुरु । विश्वानि । जूर्वन् । आदित्यः । पर्वतेभ्यः । विश्वऽदृष्टः । अदृष्टऽहा ॥ ९ ॥ सूर्ये । विषं । आ । सजामि । दृतिं । सुराऽवतः । गृहे । सः । चित् । नु । न । मराति । नो इति । वयं । मराम । आरे । अस्य । योजनं । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ १० ॥ १९ ॥ इयत्तिका । शकुन्तिका । सका । जघास । ते । विषं । सो इति । चित् । नु । न । मराति । नो इति । वयं । मराम । आरे । अस्य । योजनं । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ ११ ॥

त्रिः सप्त विष्पुलिङ्गका विषस्य पुष्यमक्षन् ।　　ताश्चिन्नु न मरन्ति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १२ ॥
नवानां नवतीनां विषस्य रोपुषीणाम् ।
सर्वासामग्रभं नामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १३ ॥
त्रिः सप्त मयूर्यः सप्त स्वसारो अग्रुवः ।
तास्ते विषं वि जभ्रिर उदकं कुम्भिनीरिव ॥ १४ ॥
इयत्तकः कुषुम्भकस्तकं भिनद्म्यश्मना ।
ततो विषं प्र वावृते पराचीरनु संवतः ॥ १५ ॥
कुषुम्भकस्तदब्रवीद्गिरेः प्रवर्तमानकः ।
वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम् ॥ १६ ॥ १६ ॥ २४ ॥ १ ॥

त्रिः । सप्त । विष्पुलिंगकाः । विषस्यं । पुष्यं । अक्षन् । ताः । चित् । नु । न । मरंति । नो इति । वयं । मराम । आरे । अस्य । योजनं । हरिऽस्थाः । मधुं । त्वा । मधुला । चकार ॥ १२ ॥ नवानां । नवतीनां । विषस्यं । रोपुंषीणां । सर्वासां । अग्रभं । नामं । आरे । अस्य । योजनं । हरिऽस्थाः । मधुं । त्वा । मधुला । चकार ॥ १३ ॥ त्रिः । सप्त । मयूर्यः । सप्त । स्वसारः । अग्रुवः । ताः । ते । विषं । वि । जभ्रिरे । उदकं । कुंभिनीःऽइव ॥ १४ ॥ इयत्तकः । कुषुंभकः । तकं । भिनद्मि । अश्मना । ततः । विषं । प्र । ववृते । पराचीः । अनु । संऽवतः ॥ १५ ॥ कुषुंभकः । तत् । अब्रवीत् । गिरेः । प्रऽवर्तमानकः । वृश्चिकस्य । अरसं । विषं । अरसं । वृश्चिक । ते । विषं ॥ १६ ॥ १६ ॥ २४ ॥ १ ॥

॥ इति चतुर्विंशोऽनुवाकः । प्रथमं मंडलं समाप्तं ॥

॥ अथ द्वितीयं मण्डलम् ॥

॥ प्रथमोऽनुवाकः ॥

॥ १ ॥ ऋषिः—आङ्गिरसः । देवता—अग्निः । छन्दः—जगती ॥

॥ १ ॥ त्वम॑ग्ने द्युभि॒स्त्वमा॑शुशु॒क्षणि॒स्त्वम॒द्भ्यस्त्वमश्म॑न॒स्परि॑ ।
त्वं वने॑भ्य॒स्त्वमोष॑धीभ्य॒स्त्वं नृ॒णां नृ॑पते जायसे॒ शुचि॑ः ॥ १ ॥
तवा॑ग्ने हो॒त्रं तव॑ पो॒त्रमृ॒त्विय॒ं तव॑ ने॒ष्ट्रं त्वम॒ग्निदृ॑ताय॒तः ।
तव॑ प्रशा॒स्त्रं त्वम॑ध्वरीयसि ब्र॒ह्मा चासि॑ गृ॒हप॑तिश्च नो॒ दमे॑ ॥ २ ॥
त्वम॑ग्न॒ इन्द्रो॑ वृष॒भः स॒ताम॑सि॒ त्वं विष्णु॑रुरुगा॒यो न॑म॒स्य॑ः ।
त्वं ब्र॒ह्मा र॑यि॒विद्ब्र॑ह्मणस्पते॒ त्वं वि॑धर्तः सचसे॒ पुरं॑ध्या ॥ ३ ॥

त्वं । अ॒ग्ने । द्यु॒ऽभिः॑ । त्वं । आ॒ऽशु॒शु॒क्षणि॑ः । त्वं । अ॒त्ऽभ्यः । त्वं । अश्म॑नः । परि॑ । त्वं । वने॑भ्यः । त्वं । ओष॑धीभ्यः । त्वं । नृ॒णां । नृ॒ऽप॒ते॒ । जा॒य॒से॒ । शुचि॑ः ॥ १ ॥ तव॑ । अ॒ग्ने॒ । हो॒त्रं । तव॑ । पो॒त्रं । ऋ॒त्विय॑ं । तव॑ । ने॒ष्ट्रं । त्वं । अ॒ग्नित् । ऋ॒त॒ऽय॒तः । तव॑ । प्र॒ऽशा॒स्त्रं । त्वं । अ॒ध्व॒रि॒ऽय॒सि॒ । ब्र॒ह्मा । च॒ । असि॑ । गृ॒हऽप॑तिः । च॒ । नः॒ । दमे॑ ॥ २ ॥ त्वं । अ॒ग्ने॒ । इंद्रः॑ । वृ॒ष॒भः । स॒तां । अ॒सि॒ । त्वं । विष्णु॑ः । उ॒रु॒ऽगा॒यः । न॒म॒स्य॑ः । त्वं । ब्र॒ह्मा । र॒यि॒ऽवित् । ब्र॒ह्म॒णः॒ । प॒ते॒ । त्वं । विध॑र्त॒रिति॑ विऽध॑र्तः । स॒च॒से॒ । पुरं॑ऽध्या ॥ ३ ॥

त्वम॑ग्ने॒ राजा॒ वरु॑णो धृ॒तव्र॑त॒स्त्वं मि॒त्रो भ॑वसि द॒स्म ईड्यः॑ ।
त्वम॑र्य॒मा सत्प॑ति॒र्यस्य॑ स॒म्भुजं॒ त्वमंशो॑ वि॒दथे॑ देव भाज॒युः ॥ ४ ॥
त्वम॑ग्ने॒ त्वष्टा॑ विध॒ते सु॒वीर्यं॒ तव॒ ग्नावो॑ मित्रमहः सजा॒त्य॑म् ।
त्वमा॑शु॒हेमा॑ ररिषे॒ स्वश्व्यं॒ त्वं न॒रां शर्धो॑ असि पु॒रु॒वसुः॑ ॥ ५ ॥ १७ ॥
त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वस्त्वं शर्धो॒ मारु॑तं पृ॒क्ष ई॑शिषे ।
त्वं वातै॑ररु॒णैर्या॑सि शङ्ग॒यस्त्वं पू॒षा वि॑ध॒तः पा॑सि॒ नु त्मना॑ ॥ ६ ॥
त्वम॑ग्ने द्रविणो॒दा अ॑रं॒कृते॒ त्वं दे॒वः स॑वि॒ता र॑त्न॒धा अ॑सि ।
त्वं भगो॑ नृपते॒ वस्व॑ ईशिषे॒ त्वं पा॒युर्दमे॒ यस्तेऽवि॑धत् ॥ ७ ॥

त्वं । अ॒ग्ने॒ । राजा॑ । वरु॑णः । धृ॒तऽव्र॑तः । त्वं । मि॒त्रः । भ॒व॒सि॒ । द॒स्मः । ईड्यः॑ ।
त्वं । अ॒र्य॒मा । सत्ऽप॑तिः । यस्य॑ । स॒म्ऽभुज॑म् । त्वं । अंशः॑ । वि॒दथे॑ । दे॒व॒ ।
भा॒ज॒युः ॥ ४ ॥ त्वं । अ॒ग्ने॒ । त्वष्टा॑ । वि॒ध॒ते । सु॒ऽवीर्य॑म् । तव॑ । ग्नावः॑ । मि॒त्र॒ऽम॒हः॒ ।
स॒ऽजा॒त्य॑म् । त्वं । आ॒शु॒ऽहेमा॑ । र॒रि॒षे॒ । सु॒ऽअश्व्य॑म् । त्वं । न॒राम् । शर्धः॑ । अ॒सि॒ ।
पु॒रु॒ऽवसुः॑ ॥ ५ ॥ १७ ॥ त्वं । अ॒ग्ने॒ । रु॒द्रः । असु॑रः । म॒हः । दि॒वः । त्वं । शर्धः॑ ।
मारु॑तम् । पृ॒क्षः । ई॒शि॒षे॒ । त्वं । वातैः॑ । अ॒रु॒णैः । या॒सि॒ । शं॒ऽग॒यः । त्वं । पू॒षा ।
वि॒ध॒तः । पा॒सि॒ । नु । त्मना॑ ॥ ६ ॥ त्वं । अ॒ग्ने॒ । द्र॒वि॒णः॒ऽदाः । अ॒र॒म्ऽकृते॑ । त्वं ।
दे॒वः । स॒वि॒ता । र॒त्न॒ऽधाः । अ॒सि॒ । त्वं । भगः॑ । नृ॒ऽप॒ते॒ । वस्वः॑ । ई॒शि॒षे॒ । त्वं ।
पा॒युः । दमे॑ । यः । ते॒ । अवि॑धत् ॥ ७ ॥

त्वाम॑ग्ने॒ दम॒ आ वि॒श्पतिं॑ वि॒शस्त्वां राजा॑नं सुवि॒दत्र॑मृञ्जते ।
त्वं विश्वा॑नि स्वनीक पत्यसे॒ त्वं स॒हस्रा॑णि श॒ता द॒श प्रति॑ ॥ ८ ॥
त्वाम॑ग्ने पि॒तर॑मि॒ष्टिभि॒र्नर॒स्त्वां भ्रा॒त्राय॒ शम्या॑ तनू॒रुच॑म् ।
त्वं पु॒त्रो भ॑वसि॒ यस्तेऽवि॑ध॒त्त्वं सखा॑ सु॒शेवः॑ पास्या॒धृषः॑ ॥ ९ ॥
त्वम॑ग्न ऋ॒भुरा॒के न॑म॒स्य॑१॒॑स्त्वं वाज॑स्य क्षु॒मतो॑ रा॒य ई॑शिषे ।
त्वं वि भा॒स्यनु॑ दक्षि दा॒वने॒ त्वं वि॒शिक्षु॑रसि य॒ज्ञमा॒तनिः॑ ॥ १० ॥ १८ ॥
त्वम॑ग्ने॒ अदि॑तिर्देव दा॒शुषे॒ त्वं होत्रा॒ भार॑ती वर्धसे गि॒रा ।
त्वमिळा॑ श॒तहि॑मासि॒ दक्ष॑से॒ त्वं वृ॑त्र॒हा व॑सुपते॒ सर॑स्वती ॥ ११ ॥

त्वां । अ॒ग्ने॒ । दमे॑ । आ । वि॒श्पति॑म् । विशः॑ । त्वाम् । राजा॑नम् । सु॒ऽवि॒दत्र॑म् । ऋ॒ञ्ज॒ते॒ ।
त्वम् । विश्वा॑नि । सु॒ऽअ॒नी॒क॒ । प॒त्य॒से॒ । त्वम् । स॒हस्रा॑णि । श॒ता । द॒श । प्रति॑ ॥ ८ ॥
त्वाम् । अ॒ग्ने॒ । पि॒तर॑म् । इ॒ष्टिऽभिः॑ । नरः॑ । त्वाम् । भ्रा॒त्राय॑ । शम्या॑ । त॒नू॒ऽरुच॑म् । त्वम् ।
पु॒त्रः । भ॒व॒सि॒ । यः । ते॒ । अवि॑धत् । त्वम् । सखा॑ । सु॒ऽशेवः॑ । पा॒सि॒ । आ॒ऽधृषः॑ ॥ ९ ॥
त्वम् । अ॒ग्ने॒ । ऋ॒भुः । आ॒के । न॒म॒स्यः॑ । त्वम् । वाज॑स्य । क्षु॒ऽमतः॑ । रा॒यः । ई॒शि॒षे॒ ।
त्वम् । वि । भा॒सि॒ । अनु॑ । ध॒क्षि॒ । दा॒वने॑ । त्वम् । वि॒ऽशिक्षुः॑ । अ॒सि॒ । य॒ज्ञम् ।
आ॒ऽतनिः॑ ॥ १० ॥ १८ ॥ त्वम् । अ॒ग्ने॒ । अदि॑तिः । दे॒व॒ । दा॒शुषे॑ । त्वम् । होत्रा॑ ।
भार॑ती । व॒र्ध॒से॒ । गि॒रा । त्वम् । इळा॑ । श॒तऽहि॑मा । अ॒सि॒ । दक्ष॑से । त्वम् । वृ॒त्र॒ऽहा ।
व॒सु॒ऽप॒ते॒ । सर॑स्वती ॥ ११ ॥

त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ सन्दृशि श्रियः ।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥ १२ ॥
त्वामग्न आदित्यास आस्यं त्वां जिह्वां शुचयश्चक्रिरे कवे ।
त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम् ॥ १३ ॥
त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्याहुतम् ।
त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः ॥ १४ ॥
त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे ।
पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे ॥ १५ ॥

त्वं । अग्ने । सुऽभृतः । उत्ऽतमं । वयः । तव । स्पार्हे । वर्णे । आ । संऽदृशि । श्रियः । त्वं । वाजः । प्रऽतरणः । बृहन् । असि । त्वं । रयिः । बहुलः । विश्वतः । पृथुः ॥ १२ ॥ त्वां । अग्ने । आदित्यासः । आस्यं । त्वां । जिह्वां । शुचयः । चक्रिरे । कवे । त्वां । रातिऽसाचः । अध्वरेषु । सश्चिरे । त्वे इति । देवाः । हविः । अदंति । आऽहुतं ॥ १३ ॥ त्वे इति । अग्ने । विश्वे । अमृतासः । अद्रुहः । आसा । देवाः । हविः । अदंति । आऽहुतं । त्वया । मर्तासः । स्वदंते । आऽसुतिं । त्वं । गर्भः । वीरुधां । जज्ञिषे । शुचिः ॥ १४ ॥ त्वं । तान् । सं । च । प्रति । च । असि । मज्मना । अग्ने । सुऽजात । प्र । च । देव । रिच्यसे । पृक्षः । यत् । अत्र । महिना । वि । ते । भुवत् । अनु । द्यावापृथिवी इति । रोदसी इति । उभे इति ॥ १५ ॥

ये स्तोतृभ्यो गोअंग्रामश्वंपेशसमग्ने रातिमुंपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वंदेम विदथे सुवीराः ॥ १६ ॥ १९ ॥

॥ २ ॥ ऋषिः—गृत्समदः । देवता—अग्निः । छन्दः—जगती ॥

॥ २ ॥ यज्ञेनं वर्धत जातवेदसमग्निं यंजध्वं हविषा तनां गिरा ।
समिधानं सुंप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदम् ॥ १ ॥
अभि त्वा नक्तीरुषसों ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः ।
दिव इवेदरतिर्मानुषा युगा क्षपों भासि पुरुवार संयतः ॥ २ ॥
तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्यैरिरे ।
रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यम् ॥ ३ ॥

ये । स्तोतृऽभ्यः । गोऽअंग्राम् । अश्वंऽपेशसम् । अग्ने । रातिम् । उपऽसृजन्ति । सूरयः । अस्मान् । च । तान् । च । प्र । हि । नेषि । वस्यः । आ । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १६ ॥ १९ ॥

यज्ञेन । वर्धत । जातऽवेदसम् । अग्निम् । यजध्वम् । हविषा । तना । गिरा । सम्ऽइधानम् । सुऽप्रयसम् । स्वःऽनरम् । द्युक्षम् । होतारम् । वृजनेषु । धूःऽसदम् ॥ १ ॥ अभि । त्वा । नक्तीः । उषसः । ववाशिरे । अग्ने । वत्सम् । न । स्वसरेषु । धेनवः । दिवःऽइव । इत् । अरतिः । मानुषा । युगा । आ । क्षपः । भासि । पुरुऽवार । सम्ऽयतः ॥ २ ॥ तम् । देवाः । बुध्ने । रजसः । सुऽदंससम् । दिवःपृथिव्योः । अरतिम् । नि । एरिरे । रथंऽइव । वेद्यम् । शुक्रऽशोचिषम् । अग्निम् । मित्रम् । न । क्षितिषु । प्रऽशंस्यम् ॥ ३ ॥

तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः ।
पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु ॥ ४ ॥
स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष ऋञ्जते गिरा ।
हिरिशिप्रो वृधसानासु जर्भुरद्द्यौर्न स्तृभिश्चितयद्रोदसी अनु ॥ ५ ॥ २० ॥
स नो रेवत्समिधानः स्वस्तये सन्ददस्वान्रयिमस्मासु दीदिहि ।
आ नः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये ॥ ६ ॥
दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि ।
प्राची द्यावापृथिवी ब्रह्मणा कृधि स्वर्ण शुक्रमुषसो वि दिद्युतः ॥ ७ ॥

तं । उक्षमाणं । रजसि । स्वे । आ । दमे । चन्द्रम्ऽइव । सुऽरुचं । ह्वारे । आ । दधुः ।
पृश्न्याः । पतरं । चितयन्तं । अक्षऽभिः । पाथः । न । पायुं । जनसी इति । उभे इति ।
अनु ॥ ४ ॥ सः । होता । विश्वं । परि । भूतु । अध्वरं । तं । ऊं इति । हव्यैः ।
मनुषः । ऋञ्जते । गिरा । हिरिऽशिप्रः । वृधसानासु । जर्भुरत् । द्यौः । न । स्तृऽभिः ।
चितयत् । रोदसी इति । अनु ॥ ५ ॥ २० ॥ सः । नः । रेवत् । सम्ऽइधानः ।
स्वस्तये । सम्ऽददस्वान् । रयिं । अस्मासु । दीदिहि । आ । नः । कृणुष्व । सुविताय ।
रोदसी इति । अग्ने । हव्या । मनुषः । देव । वीतये ॥ ६ ॥ दाः । नः । अग्ने ।
बृहतः । दाः । सहस्रिणः । दुरः । न । वाजं । श्रुत्यै । अप । वृधि । प्राची इति ।
द्यावापृथिवी इति । ब्रह्मणा । कृधि । स्वः । न । शुक्रं । उषसः । वि । दिद्युतः ॥ ७ ॥

स ईधान उषसो राम्या अनु स्वर्ण दीदेदरुषेण भानुना ।
होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे ॥ ८ ॥
एवा नो अग्ने अमृतेषु पूर्व्य धीष्पीपाय बृहद्दिवेषु मानुषा ।
दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि ॥ ९ ॥
वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति ।
अस्माकं द्युम्नमधि पञ्च कृष्टिषूच्चा स्वर्ण शुशुचीत दुष्टरम् ॥ १० ॥
स नो बोधि सहस्य प्रशंस्यो यस्मिन्त्सुजाता इषयन्त सूरयः ।
यमग्ने यज्ञमुपयन्ति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे ॥ ११ ॥

सः । इधानः । उषसः । राम्याः । अनु । स्वः । न । दीदेत् । अरुषेण । भानुना । होत्राभिः । अग्निः । मनुषः । सुऽअध्वरः । राजा । विशाम् । अतिथिः । चारुः । आयवे ॥ ८ ॥ एव । नः । अग्ने । अमृतेषु । पूर्व्य । धीः । पीपाय । बृहत्ऽदिवेषु । मानुषा । दुहाना । धेनुः । वृजनेषु । कारवे । त्मना । शतिनम् । पुरुऽरूपम् । इषणि ॥ ९ ॥ वयम् । अग्ने । अर्वता । वा । सुऽवीर्यम् । ब्रह्मणा । वा । चितयेम । जनान् । अति । अस्माकम् । द्युम्नम् । अधि । पञ्च । कृष्टिषु । उच्चा । स्वः । न । शुशुचीत । दुस्तरम् ॥ १० ॥ सः । नः । बोधि । सहस्य । प्रऽशंस्यः । यस्मिन् । सुऽजाताः । इषयन्त । सूरयः । यम् । अग्ने । यज्ञम् । उपऽयन्ति । वाजिनः । नित्ये । तोके । दीदिऽवांसम् । स्वे । दमे ॥ ११ ॥

उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि ।
वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः ॥ १२ ॥
ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥ १३ ॥ २१ ॥

॥ ३ ॥ ऋषिः–गृत्समदः । देवता–अग्नयः । छन्दः–त्रिष्टुप् ॥

॥ ३ ॥ समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भुवनान्यस्थात् ।
होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन् ॥ १ ॥
नराशंसः प्रति धामान्यञ्जन् तिस्रो दिवः प्रति मह्ना स्वर्चिः ।
घृतप्रुषा मनसा हव्यमुन्दन्मूर्धन्यज्ञस्य समनक्तु देवान् ॥ २ ॥

अन्तरिक्षमें (दिनपर दिन) बढ़नेवाले चन्द्रमाकी तरह अग्निकी कान्ति मनोहर है। जिस तरह सुवर्णका नीधि गुप्त स्थानमें रखा जाता है उसी तरह तेजस्वी अग्नि भी वेदीके स्थानमें स्थापित किया जाता है। अग्निदेव चित्र विचित्र रंगकी मेघमालामें मानों एक सुन्दर पक्षी बनकर रहता है। जिस तरह नदीके जलपर पूल सदा स्थित रहता है उसी तरह द्यु और पृथिवी दोनों लोकोंपर आपकी दृष्टि सदा-अटल रहती है। ४

अग्निदेव होताका रूप धारण करें और सबको व्याप्त करनेवाले यज्ञकी चारों ओरसे रक्षा करें। सब लोग हवियोंसे और स्तुतियोंसे आपहीको विभूषित करते हैं। अग्निदेव वनौषधीयोंके अरण्यमें बड़े ठाठसे सञ्चार करते हैं। जिस तरह नक्षत्रोंके कारण आकाश चमकता हुआ दिखाई देता है उसी तरह अग्निदेव भी अपनी ज्वालाओंसे अन्तरिक्षके प्रदेशको प्रकाशित करता है। ५ (२०)

हे अग्निदेव, आप बड़े उदार हैं। इस लिये हमारा कल्याण करनेके लिये आप दिव्य सम्पत्तिरूपी प्रभासे प्रज्वलित हूजिये और उस सम्पत्तिकी वर्षा हमपर कीजिये। आप प्रकाशित हूजिये और हमारा कल्याण करनेके लिये मैं जैसे दीन मनुष्यके हविर्भागका आप स्वीकार कीजिये। इसी लिये द्यु और पृथिवी दोनोंको इधर आप ले आईये। ६

हे अग्निदेव, जो सम्पत्ति श्रेष्ठ है उन सबको आप हमें अर्पण कीजिये। जो सबसे बड़ी और श्रेष्ठ सम्पत्ति है वह भी हमें अर्पण कीजिये। जिस तरह द्वार खोलनेसे भीतरका मार्ग दिखाई देता है उसी तरह (सात्त्विक) सामर्थ्य प्राप्त करनेका भी मार्ग आप हमें दिखलाइये जिससे आपकी कीर्ति सबदूर फैले। आप ऐसा कीजिये जिससे द्यावापृथिवीकी कृपा हमपर सदा बनी रहे और हमारी प्रार्थना सफल होवे। तेजस्वी सूर्यकी तरह उषा भी प्रकाशित होवे। ७

---

४ रजसि उक्षमाण, (चन्द्रमिव सुरुचं अग्निम) ह्वारे सुरुच चंद्रमिव स्वं दमे आ तम आदधुः । पृश्न्याः पतरम , पाथः पायुम् न, उभे जननी अक्षभिः अनु चितयन्तम् (तम् आ दधुः)।

५ स होता विश्व अध्वर परिभूतु, तमु मनुषः हव्यैः गिरा च ऋञ्जते हिरिशिप्रः वृधसानासु जर्भुरत (अथ अग्निः) द्यौः स्तृभिः न, रोदसी अनुचितयत ।

६ स त्वम् सदद्स्वान , नः स्वस्तये रेवत् समिधानः रयिम् अस्मासु दीदिहि । नः सुविताय च, हे अग्ने देव. मनुषः मे हव्या वीतये, रोदसी आ कृणुष्व ।

७ हे अग्ने बृहतः दाः, सहस्रिणः (अपि) दाः, श्रुत्यै दुरः न वाजम् अप वृधि । ब्रह्मणा द्यावा पृथिवी प्राची कृधि, शुक स्वः न उषसः वि दिद्युतुः ।

रात्रिका और उषाका उदय होतेही सब लोग अग्निको प्रज्वलित करते हैं। अग्नि भी सूर्यकी तरह अपनी लाल प्रभासे प्रकाशित होते हैं। जब भक्त लोग अग्निकी स्तुति करते हैं तब यज्ञकी सिद्धि भी अच्छी तरह सफल होती है। अग्निदेव, सब देवोंका राजाही है; किन्तु भक्त जनोंका कभी न भानेवाला प्यारा महिमान् है। ८

हे अग्निदेव, आप अमर देवोंमें बड़े श्रेष्ठ हैं। इस तरह हम जैसे मनुष्योंकी ध्यानबुद्धि परम दीप्तिमान् देवोंकी ओर लगी हुई है। उसी कारण स्वर्ग लोककी धेनुएं हमारी इच्छाके अनुसार पृथिवीमें आती हैं और सैकड़ों प्रकारकी और अच्छे स्वरूपकी वस्तुएं अपने स्तनोंसे निकालकर हमें अर्पण करती हैं। ९

हे अग्निदेव, आपकी कृपाके कारण और हमारी प्रार्थनाके कारण हमारे पुरुषार्थ (सामर्थ्य)का प्रभाव सब लोगोंमें दिखाई देवे। आप ऐसा कीजिये जिससे हमारा प्रताप सूर्यकी तरह असह्य होकर पांच प्रकारके लोकोंमें उच्च स्थानपर चमकता हुआ दिखाई देवे। १०

हे पराक्रमी अग्निदेव, जिन महात्माओंका जन्म उच्चकुलमें हुआ है वे भी आपकी कृपाकी इच्छा करते हैं। आप प्रशंसा करने योग्य हैं। आप पूजा करने योग्य हैं। इस लिये सामर्थ्यवान् लोग भी आपकी सेवा करते हैं। आप हमें अपने प्यारे बालबच्चे समझकर हमारे वेदीके स्थानपर प्रकाशित होते हैं। आप हमें अपनाइये और सब प्रकार हमारा कल्याण कीजिये। ११

---

८ राम्या उषसश्चानु इधानः सः स्वः न अरुणेन भानुना दीदेत्। अग्निः होत्राभिः मनुषः स्वध्वरः (भवति), विशां राजा (सन्नपि) आयवे सः चारुः अतिथिः।

९ हे अमृतेषु पूर्व्य अग्ने, नः मानुषाधीः बृहद्दिवेषु (देवेषु) एव पीपाय। (तेन) धेनुः वृजनेषु (आगत्य) इर्वाणि शतिन च पुरुरूपं च (अभीष्टं) कारवे त्मना दुहाना (भवति)

१० हे अग्ने वयं नः सुवीर्यं अर्वता वा ब्राह्मणा वा जनां अति चितयेम। अस्माकं द्युम्नं पंच कृष्टिषु अधि उच्चा कृधि, तत्र स्वन दुष्टरं शुशुचीत।

११ हे सहस्य सुजाताः सूरयः यस्मिन् (त्वयि) इषयन्त (स त्वं) प्रशंस्यः। हे अग्ने वाजिनः यं (त्वम्) यज्ञं उपयान्ति, (अस्मत्सदृशे) नित्ये तोके दीदिवांसं (उपयन्ति) स त्वम् स्वेदमे नः बोधि।

हे सर्वज्ञ अग्निदेव, आप हमें ऐसा आशीर्वाद दीजिये जिससे हम जैसे आपके भक्त लोक और हमारे यजमान दोनों आनन्दमें रहें। आप हमें ऐसा उत्कृष्ट ऐश्वर्य दीजिये जिससे हमें आनन्द, बहुत सन्तान, और पुत्रपौत्रका लाभ होवे। १२

जो बड़े बड़े उदार महात्मा आपकी स्तुति करनेवाले लोगोंको, ज्ञानरूपी गोधन और बुद्धिरूपी अश्वका दान देते हैं उन्हें और उनके साथ हमें भी आप आनन्द देनेवाली वस्तुओंकी ओर ले जाइये। आपकी कृपासे हम और हमारे पराक्रमी और विजयी वीर यज्ञसभामें आपके यशका वर्णन करते हैं। १३ (२१)

सूक्त ३.

॥ ऋषि–गृत्समद । देवता–अग्नि ॥

देखिये; पृथिवीपर अथवा वेदीमें स्थापित किया हुआ अग्नि प्रज्वलित होकर सब भुवनोंके सामने खड़ा हुआ है। सनातन, परम पवित्र, महाप्रज्ञावान, देदीप्यमान, और वंदनीय अग्नि सब देवोंको हवियोंसे सन्तुष्ट करें। १

हे अग्निदेव, सब लोग आपकी स्तुति करते हैं और आपकी ज्वालाएं बड़ी सुन्दर दिखाई देती हैं। उन दीप्तिमान् ज्वालाओंके कारण आप तीनों स्थानोंको अथवा तीनों द्युलोकोंको प्रकाशित करके जगत्को स्पष्टरूपसे दिखाई देते हैं। जब लोग आपकी स्तुति करते हैं और यज्ञकुण्डमें घीकी धाराएं बहती हैं तब आप हमारे स्तुतियुक्त हवियोंको यज्ञके पहिले देवोंको अर्पण करके उन्हें विभूषित कीजिये। २

---

१२ हे जातवेदाः अग्ने, वय ते स्तोतारः (अस्माकं) सूरयः च उभयासः शर्मणि स्याम। पुरुचन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य वस्वः रायः नः शग्धि।

१३ हे अग्ने ये सूरयः स्तोतृभ्यः गो अग्रां अश्व पेशसं रातिम् उपसृजन्ति तान् च अस्मान् च वस्य आ प्र नेषिहि (वयं च) सुवीराः (सत) विदथे बृहत् वदेम।

१ पृथिव्यां निहितः (अयं) अग्निः समिद्धः (सन्) विश्वानि भुवनानि प्रत्यङ् अस्थात्। प्रदिवः पावकः सुमेधाः देवः अर्हन् (च अयं) अग्निः होता देवान् यजतु।

२ शुचिर्चिः नराशंसः (स्व) मह्ना (स्वानि) धामानि तिस्रः दिवश्च प्रति अञ्जन् (वर्तते) घृतप्रुषा मनसा हव्य उन्दन्; यज्ञस्य मूर्धन् देवान् समनक्तु।

हे अग्निदेव, आप पूजा करने योग्य हैं। आप सबसे पुराने हैं। हम आपकी हार्दिक स्तुति करते हैं। इस लिये आप देवोंको हविर्दानसे सन्तुष्ट कीजिये। जो कभी युद्धमें पीछे नहीं हटते ऐसे मरुत्–गणोंको आप ले आइये। हे ऋत्विज, कुशासनपर बैठे हुए इन्द्रकी आप पूजा कीजिये। ३

हे देदीप्यमान् कुशासन, दिव्य ऐश्वर्यकी प्राप्ति होनेके लिये हमने आपको अग्निके वेदीपर बिछाया है। आप वीर्य देनेवाले हैं, उन्नति करनेवाले हैं, और सम्पति बढानेवाले हैं। आप मक्खनकी तरह मुलाइम भी हैं। इस लिये हे वसुदेव, हे पूजा करने योग्य आदित्यदेव, हे देवगण, आप सब मिलकर इस आसनपर विराजमान् हूजिये। ४

जब हम नमस्कार और प्रार्थना करते हैं तब यज्ञ–शालाका लम्बा और चौड़ा दिव्य द्वार खुल जावे। कभी न टूटनेवाला यज्ञमण्डपका चौडा द्वार अब खुल जावे। यह बात सबको विदित ही है कि बड़े बड़े शूर पुरुष आपकी सेवा करते हैं; इस लिये आप अपने भक्तोंकी रक्षा करके उनको पवित्र करते हैं। ५ (२२)

देखिये, युवा रात और उषा सुन्दर पक्षीकी तरह मनोहर दिखाई देती है। वे आपसमें चिपके हुए (संलग्न) दिखाई देती है। प्रेमसे इच्छारूपी दूध देनेवाले आपही हैं। आपमें प्रेमरूपी रस पूर्ण रीतिसे भरा हुआ है। (कालरूप) सूत सबदूर फैला हुआ है और उसीका धागा आप सदा बीनती रहती हैं। हमारे यज्ञका स्वरूप और हमारा सत्कर्म आप सदा बढानेवाले हैं। ६

हमारे यज्ञके दो दिव्य यज्ञहोता सबसे पुराने बडे ज्ञानवान् और तेजस्वी हैं। आप हमारा यज्ञ ऋक्–स्तोत्रोंसे योग्य रीतिसे समाप्त करते हैं। आप योग्य समयपर देवोंका यजन करते हैं। पृथिवीके बीचमें (यज्ञवेदीपर) तीन उच्च आसनोंपर उन देवोंको बिठलाकर आप उनको विभूषित करते हैं। ७

---

३ अग्ने अर्हन् (त्वम्) मानुषात् पूर्वः मनसा ईळितः अद्य नः देवान् यक्षि। स त्वम् मरुतां अच्युतम् शर्धः आ वह, हे नराः बर्हिषदं इंद्र च यजध्वम्।

४ हे देव बर्हिः (त्वम्) राये अस्यां वेदी स्तीर्णम्। (त्वंच) वर्धमानं, सुवीरं, सुभरं घृतेन अक्तम् (इव पेशलं, तद) हे वसवः, हे विश्वे देवाः, यज्ञियासः आदित्याः इदं सीदत।

५ सुप्रायणाः द्वारो देवीः नमोभिः हूयमानाः उर्विया वि श्रयन्ताम्। सुवीरम् यशसम् (आर्य) वर्णम् पुनानाः अजुर्याः व्यचस्वतीश्च वि प्रथन्ताम्।

६ (इमे) उक्षिते वय्येव रण्वितं उषसानक्ता, समीची सुदुघे पयस्वती ततं (काल) तन्तु संवयन्ती, नः यज्ञस्य पेशः अपांसि च साधु (कृण्वाताम्)।

७ प्रथमा विदुष्टरा वपुष्टरा, दैव्या होतारा ऋचा ऋजु सम् यक्षतः। (तौ) देवान् ऋतुथा यजन्तौ (तान्) पृथिव्याः नाभा त्रिषु सानुषु अधि सम् अञ्जतः।

हमारा ध्यान सफल करनेवाली सरस्वति, देदीप्यमान् इळा और जगत्पर अधिकार चलानेवाली भारती तीनों देवी हमेशाकी तरह कुशासनपर बैठे हमें अपनी सहायता देवें और हमारी रक्षा करें। ८

देखिये; सुवर्णकी तरह कान्तिमान् और हृष्टपुष्ट वीर प्रकट होता है। आप प्रत्यक्ष यौवनका निधी ही हैं। त्वष्टादेव सब लोगोंकी प्रार्थनाको सुनते हैं। सब देवोंके आप प्यारे हैं। आपकी कृपासे हमारे कुलमें एक ऐसा (वीर) पुरुष उत्पन्न होवे जो सब कुलकी उन्नति करें और अन्तमें देवलोकको चले जाय। ९

यह वनस्पति यूप पास खडे रहकर (मेध्य हवि) को (मुक्त करें) छोड दे। जब ध्यान-स्तोत्र शुरू होते हैं तब अग्निदेव उसको पकायेंगे। देवलोकमें रहनेवाला और वहांकी रीतिका जाननेवाला शमिता (जो पशुका वध करता है) तीन बार सिञ्चित किये हुए हवियोंको देवोंकी ओर ले जावे। १०

इस अग्निमें घी सिञ्चित किया हुआ है। क्यों कि घीसे अग्नि प्रज्वलित होता है। घीमें अग्नि रहता है और घी अग्निका तेज है। हे इच्छाको सफल करनेवाले अग्नि, आप अपने स्वभावके अनुसार आनन्दित हूजिये और स्वाहा शब्दका उच्चारण करके हमने अर्पण किये हुए हवियोंको देवोंकी ओर पहुंचाइये। ११ (२३)

---

८ नः धियं साधयन्ती सरस्वती, देवी इळा, विश्वतूर्तिः भारती, (एताः) तिस्रः देवीः स्वधया इदं बर्हिः आ निषद्य, (इदं) शरणं अच्छिद्रम् पान्तु।

९ पिशंगरूपः सुभरः वीरः जायते (सः) श्रुष्टी, देवकामः च। अथ (सोयं) त्वष्टा अस्मे प्रजां वि स्यतु नाभिं च (यथा) सः देवानाम् पाथः अपि एतु।

१० वनस्पतिः (हव्यं) अवसृजन् उप अस्थात्, (ततः) अग्निः धीभिः हविः प्र सूदयाति। दैव्यः शमिता प्रजानन् तत् त्रिधा समनक्तं हव्यं देवेभ्यः उपनयतु।

११ घृतं मिमिक्षे, घृतम् अस्य योनिः, (अयं) घृते श्रितः, घृतम् उ अस्य धाम (भवति)। हे वृषभ (अग्ने) अनुष्वधं मादयस्व, स्वाहाकृतं हव्यम् वक्षि, (तस्मात् तद् देवेभ्यः) आ वह।

सूक्त ४.

॥ ऋषि–सोमाहुति । देवता–अग्नि ॥

अग्निका प्रकाश बहुतही उज्ज्वल है । आप पवित्र हैं । आप प्रत्यक्ष आनन्दकी मूर्ति हैं । आप सब लोगोंके महिमान् हैं । तुमारे कल्याणके लिये मैं तुमको आहुति अर्पण करता हूं । सब भक्तिवान लोग मित्रकी तरह सर्वज्ञ अग्निसे प्रेम करते हैं । १

भृगुऋषियोंने दिव्य उदकके निवास स्थानमें पहिले पहल अग्निदेव की सेवा की । उसके अनन्तर उन्होंने अग्निदेवको दो स्थानोंमें स्थापित किया । अग्निका बुद्धिरूप अश्व बडा वेगवान् है । देवोंके नियमके अनुसार चलनेवाले अग्निदेवका सब भुवनोंमें जय हो । २

अग्निदेवको मनुष्यलोकमें रहनेकी इच्छा हुई । इस लिये देवोंने मनुष्यलोकमें आपको स्थापित किया । सब देव आपसे बडा प्रेम करते हैं । दानी भक्त बडी नम्रतासे आपका सम्मान करते हैं । अग्निदेव उत्सुक रात्रियोंको प्रकाशित करते हैं । ३

जब अग्निदेव सब दूर फलते हैं तब आपकी कल्याण करनेवाली उन्नति होती हुई दिखाई देती है । जब आप प्रज्वलित होते हैं तब भी आपका दर्शन मनोहर होता है । जिस तरह जोरसे दौडनेवाला घोडा अपनी जिव्हाको (मुंहसे बारबार बाहर निकालकर) और अपनी पुच्छको हिलाता है उसी तरह अग्निदेव जब वनस्पतिमें प्रवेश करते हैं तब वनस्पति भी उसके बलसे हिलने लगती हैं । ४

---

१ सुद्योत्मानं, सुवृक्तिं, सुप्रयसं विशां अतिथिम् अग्निम् वः हुवे । यः जातवेदाः देवः आदेवे जने मित्र इव दिधिषाय्यः भूत् ।

२ इमं अपां सधस्थे विधन्तः भृगवः (इमं) आयोः विक्षु द्विता अदधुः । एषः जीराश्वः देवानां अरतिः अग्निः विश्वानि भूम अभि अस्तु ।

३ मानुषीषु विक्षु क्षेष्यन्तः देवासः अग्निं प्रियं मित्रं न (अत्र) धुः । यः दास्वते दक्षाय्यः, सः दमे आ उशतीः ऊर्म्याः दीदयत् ।

४ अस्य पुष्टिः स्वस्येव रण्वा, अस्य हियानस्य दक्षोः सम् दृष्टिः (रण्वा एव) । यः रथ्यः अत्यः न जिव्हाम् वारान् दोधवीति, ओषधीषु वि भरिभ्रत् ।

अग्निने अपने भयंकर सामर्थ्यसे पापरूप अरण्यको जलाया। कवियोंने मेरे पास आपके सामर्थ्यका वर्णन किया। जब आपकी स्तुति की जाती है तब आप भक्तोंके सामने प्रकट होते हैं और अपना सामर्थ्य दिखलाते हैं। जब अग्निदेवके स्वरूपका नाश (भस्म) होता है (बुझा हुआ दिखाई देता है) तब फिर आप बडे सुन्दर तेजसे प्रकाशमान् दिखाई देते हैं। ५

जब अग्नि बडे तेजसे प्रकाशमान् होते हैं तब मानों, ऐसा विदित होता है कि आप किसी अरण्यको जलानेके लिये तैयार हुए हैं। जिस तरह मार्गसे वेगसे बहते हुए जलके प्रवाहका बडा आवाज होता है अथवा जोरसे चलते हुए रथका भी बडा आवाज होता है, उसी तरह अग्नि भी अरण्यको जलाते समय बडा आवाज करते हैं। अग्निदेवका मार्ग काला है किन्तु आपका स्वरूप उज्वल और आनन्द देनेवाला है; जिस तरह मेघोंसे आकाश हंसता हुआ दिखाई देता है उसी तरह अग्निका मुख भी हंसता हुआ दिखाई देता है। ६

जब अग्निदेव (अरण्यको जलाकर) सब दूर फैलते हैं तब आप विस्तीर्ण पृथिवीको भी जलाते हैं। बनके पशुओंकी तरह स्वतन्त्र रीतिसे चारों ओर सञ्चार करते हैं। आपका मार्ग काला है, आप बडे देदीप्यमान् हैं और आपकी ध्वजा भी काली है। जब आप बनके वनस्पतियोंको जलाते हैं तब यह बात विदित होती है कि उसके बहानेसे मानों, आप सब पृथिवीको जलानेको तैयार हुए हैं। ७

प्राचीन कालमें आपने हमपर जो कृपा की है उस कृतज्ञताका स्मरण करके इस तीसरे यज्ञसभामें हम आपकी स्तुति करते हैं। इस लिये, हे अग्निदेव, हमपर कृपा करके आप हमे ऐसा ऐश्वर्य दीजिये जिससे हमें सज्जन, श्रेष्ठ, प्रतापवान् और सात्विक सुपुत्र प्राप्त होवे। ८

हे अग्निदेव, हम आपकी स्तुति और भक्ति एकाग्र ध्यानसे करते हैं। जो दुष्ट शत्रु हमारे सामने खडे हुए हैं उनका नाश करनेके लिये आपकी कृपासे ऐसे सामर्थ्य और पराक्रमका अपूर्व लाभ हम जैसे भक्त और यजमान दोनोंको सदा होवे जो युवा अवस्थामें प्राप्त होता है। ९ (२५)

---

५ यत् (अस्य) वनदः अभ्वम् आ पनन्त, (असौ) उशिग्भ्यो न (स्वीयं) वर्णम् मे अमिमीत। (तद्) यः जुजुर्वान् मुहुः आ युवा भूत् सः (अग्निः अयं) चित्रेण भामा रम्यः चिकित।

६ यः वना तातृषाणः न आ भाति, पथः वाः न, रथः इव स्वानीत् (अयं) कृष्णाध्वा तपुः रण्वः, नभः इव स्मयमानः द्यौरिव चिकेत।

७ यः वि अस्थात् उर्वीम् अभि वक्षत् सः अगोपाः पशुः न स्वयुः एति। (सः अयम्) शोचिष्मान् अतसानि उष्णन् कृष्णव्यथिः अग्निः भूम अस्वदयन् न।

८ ते पूर्वस्य अवसा अधीतौ तृतीये विदथे नु (इदं) मन्म शंसि। (अतः) हे अग्ने संयद्वीरं बृहन्तम् क्षुमन्तं वाजम् स्वपत्यं रयिम् अस्मे दाः।

९ हे अग्ने (त्वा) गुहा वनन्तः वय गृत्समदासः उपरा त्वया यथा अभि स्युः (यथा च) सुवीरासः अभिमातिषाहः (भवेम तथा) स्मत् सूरिभ्यो गृणते च तत् वयः धाः।

सूक्त ५.

॥ ऋषि–सोमाहुति । देवता–अग्नि ॥

यज्ञके होता, चैतन्य देनेवाला और जगत्‌के पिता अग्नि हमारे पितरपर कृपा करनेके लिये प्रकट हुए हैं। हमें कल्याण और विजय प्राप्त करानेके लिये आप हमारे यज्ञका स्वीकार करते हैं। इस लिये पराक्रमी और सात्विक अग्निको हम इस यज्ञमें पहिले बुलाते हैं। १

अग्निदेव यज्ञके नेता है। सातकर्मोंका सूत्र आपहीके अधिकारमें है। आप अब पोता बनकर देवोंके विषयमें आठवा कर्म भी मनुराजके घरकी तरह यहां भी करते हैं। २

जो हविर्भाग ऋत्विज अर्पण करते हैं जो प्रशंसायुक्त स्तोत्र ऋत्विज प्रेमसे गाते हैं उन् सब कर्मोंको आप जानते ही हैं। जिस तरह चक्रके चारों ओर धुरी होती है उसी तरह ऋत्विक कर्मोंका ज्ञान आपहीमें भरा हुआ है। ३

पवित्र यज्ञ कर्मके साथ पवित्र अग्नि सब लोगोंको मार्ग दिखलानेके लिये प्रकट हुए हैं। आपके कर्मके प्रचारमें कभी भी परिवर्तन नहीं होता है। वृक्षकी शाखाकी तरह कर्मके ज्ञानको जाननेवाला विद्वान ऋत्विज अग्निके सकल ज्ञानका एक छोटासा हिस्साही है। ४

जो तीन बहिन यज्ञकर्ममें उपस्थित थीं उनसे अधिक मनोहर बिजली रूपी चञ्चल धेनु अग्निरूपी नटकी कान्तिसे मोहित हुई। ५

जब बहिन घी हाथमें लेकर (अग्निमें डालनेके लिये) माताके पास खड़ी रहती है अथवा जिस तरह बोये हुए अनाजको जल गिरनेसे आनन्द होता है उसी तरह दोनों बहिनोंके आनेसे अध्वर्यु (अग्नि)को आनन्द होता है। ६

---

१ (अयं) चेतनः (जगतः) पिता च होता जेन्यं वसु प्रयक्षन् पितृभ्य ऊतये अजनिष्ट, तत् (अस्य) वाजिनः यमम् शकेम ।

२ यस्मिन् यज्ञस्य नेतरि सप्त रश्मयः आ तताः (सः) पोता मनुष्वत् तत् अष्टमं विश्वं दैव्यम् (कर्म) इन्वति (एव)।

३ यत् वा ईम् दधन्वे, यत् ब्रह्माणि (वा) वोचत् तत् वेः उ। (यतः) विश्वानि काव्यः नेमिः चक्रमिव परि अभवत् ।

४ (अयं) शुचिः प्रशास्ता शुचिनाहि क्रतुना साकं अजनि । अस्य ध्रुवा व्रता विद्वाँ, वयाःइव अनु रोहते ।

५ याः स्वसारः इदं ययुः याभ्यः च तिसृभ्यः (य) आ वरं ताः आयुवः धेनवः अस्य नेष्टुः वर्ण सचन्त ।

६ यदि घृतं भरन्ती स्वसा, मातुः उप अस्थित, (तदा) तासां आगतौ, यवः वृष्टी इव, अध्वर्युः मोदते ।

अग्नि निजको सन्तुष्ट करनेके लिये स्वयं पुरोहित बन जाय और ऋत्विजका कार्य अच्छी तरह समाप्त करें। आपका वर्णन करनेसे हमारा आनन्द बढेगा और हम भी यह यज्ञ आपहीको अर्पण करेंगे। ७

हे ज्ञानवान्, अग्निदेव, सब माननीय देवोंको सन्तुष्ट करनेके लिये हमने यह यज्ञ किया है। हे अग्निदेव, यह यज्ञ आपहीको अर्पण होवे। ८ (२६)

सूक्त ६.

॥ ऋषि–सोमाहुति । देवता–अग्नि ॥

हे अग्निदेव, मैंने अर्पण की हुई समिधा और उपासनाका आप प्रेमसे स्वीकार कीजिये। मैं आपकी जो स्तुति करता हूं उसको भी आप आनन्दसे सुनिये। १

हे तपस्तेजके कारण प्रकट होनेवाले अग्निदेव, बुद्धिरूप अश्व आपके बड़े प्यारे हैं। योग्य रीतिसे आपकी सेवा करनेका मुझे अवसर मिले। हे ज्ञानवान् देव, इस स्तुतिके द्वारा मैं आपकी सेवा करता हूं। २

हे देव, आपको स्तुति बड़ी प्यारी है। इस लिये स्तुतिके द्वारा आपकी सेवा करना हम चाहते हैं। हे सामर्थ्य और सम्पत्ति देनेवाले देव, आप भक्तिरूप सम्पत्तिकी इच्छा करते हैं। इस लिये भक्तिके द्वारा आपकी सेवा करनेकी हमारी इच्छा है। ३

हे धनके स्वामी, आप दिव्य धन देनेवाले हैं। कृपारूपी दान देनेवाले आप हमारे यजमान हूजिये। आप हमारे शत्रुओंका और द्वेष करनेवाले दुष्ट लोगोंका नाश कीजिये। ४

हे अग्निदेव, आप आकाशसे वर्षा कीजिये। नाश न होनेवाले सत्व-सामर्थ्य आप हमें अर्पण कीजिये। आप ऐसा कीजिये जिससे सैंकड़ों प्रकारका बल हमें प्राप्त होवे। ५

---

७ (अयम्) ऋत्विक् स्वः स्वाय धायसे ऋत्विजम् कृणुताम्। आत् वयं (अद्य) स्तोमं वनेम, यज्ञं च अरम् करिम।

८ यथा विद्वान् (अग्निः) विश्वेभ्यः यजतेभ्यः अरम् करत् (तथा) हे अग्ने यम् (इमं) यज्ञं वयम् चकृम (सः) अयं त्वे अपि (अर्पितः स्यात्)।

१ हे अग्ने इमां मे समिधं, इमां उपसदम् (इमौ च) वनेः उत च इमाः गिरः सु श्रुधि।

२ अग्ने, हे ऊर्जः नपात्, अश्वमिष्टेः अया ते विधेम, हे सुजात एना सूक्तेनापि (विधेम)।

३ तं त्वा गिर्वणसं गीर्भिः, हे द्रविणोदः, द्रविणस्यु (त्वां) वयं सपर्यवः सपर्येम।

४ हे वसुपते, वसुदावन, स त्वं मघवा सूरिः च बोधि, द्वेषांसि अस्मत् युयोधि।

५ स (त्वम्) नः दिवस्परि वृष्टिम् (कृणुहि), स (त्वं) नः अनर्वाणम् वाजम्, स (त्वं) नः सहस्रिणीः इषश्च (देहि)।

हे यौवनकी मूर्ति, हे देव प्रतिनिधि, हे पूजा करने योग्य पुरोहित, हमारी स्तुतियोंसे आप सन्तुष्ट हूजिये। आपके गुणोंका वर्णन-करनेवाले और आपकी कृपाकी इच्छा करनेवाले भक्तोंकी ओर आप आइये। ६

हे प्रज्ञावान् अग्नि, आप सर्वज्ञ है। आप निजके लोगोंका और दूसरे लोगोंका भी कल्याण करनेवाले हैं। देव और मनुष्यजाति दोनों प्रकारके लोगों में आप एकसा हेलमेलका बर्ताव करते हैं। ७

आप सब बातोंको जानतेही हैं। इस लिये आप ऐसा कीजिये जो देवोंको प्रिय है। हे ज्ञानवान् देव, यज्ञसे आप सब देवोंको यथेष्ट सन्तुष्ट कीजिये। आप इस कुशासनपर विराजमान् हूजिये। ८ (२७)

सूक्त ७.

॥ ऋषि–सोमाहुति । देवता–अग्नि ॥

हे तरुण अग्निदेव, हे भारत, आप बड़े श्रेष्ठ और तेजस्वी हैं। आप ऐसी सम्पत्ति ले आइये जिससे सब लोक लालसित होते हैं। १

हे अग्निदेव, देवों और माननीय मनुष्योंका सन्मान न करनेकी दुर्बुद्धिका प्रभाव हमपर न पड़े। सज्जन लोगोंका द्वेष करनेवाले और दुष्ट लोगोंके चंगुलसे हमें आप मुक्त कीजिये (छोड़ दीजिये)। २

जिस तरह पानीके छोटे नालेके परे मनुष्य सहज रीतिसे जा सकता हैं उसी तरह आपकी कृपासे सज्जन लोगोंका द्वेष करनेवाले शत्रुओंका नाश हम सहज रीतिसे करें। ३

हे परम पवित्र अग्नि, आप पवित्र और पूजा करने योग्य हैं। जब घीकी आहुति आपको अर्पण की जाती है तब आप अधिक प्रज्वलित होते हैं। ४

हे भारतके लोगोंपर प्रेम करनेवाले अग्निदेव, जब हम आपकी हार्दिक प्रार्थना करते हैं और सब आनन्द बढ़ानेवाले सामगायनोंसे और छन्दयुक्त ऋचाओंसे आपकी उपासना करते हैं तब आप हमको अपनाते हैं (हमारा कल्याण करते हैं)। ५

---

६ हे यविष्ठ दूत, हे यजिष्ठ होतः, (त्वम्) नः गिरा अवस्यवे (त्वां) ईळानाय आ गहि।

७ हे अग्ने हे कवे, (त्वम्) उभया जन्म विद्वान्, जन्याइव मित्र्यः दूतः (सन्, उभयोः) अन्तः ईयसे हि।

८ स (त्वम्) विद्वान (देवान्) आ च पिप्रयः हे चिकित्वः (तान्) आनुषक् यक्षि, अस्मिन् च बर्हिषि सत्सि।

१ हे यविष्ठ, हे भारत अग्ने, हे वसो श्रेष्ठं द्युमन्तम् पुरुस्पृह रयिम् आ भर।

२ देवस्य मर्त्यस्य च (विषयका) अरातिः नः मा ईशत, तस्याः उत द्विषश्च अति पर्षि (नः)।

३ उत त्वया उदन्या धारा इव विश्वाः द्विषः अति गाहेमहि।

४ हे पावक अग्ने, शुचिः वन्द्यः त्वम् घृतेभिः आहुतः (सन्) बृहत विरोचसे।

५ हे भारत अग्ने, त्व वशाभिः उक्षभिः अष्टापदीभिः आहुतः (सन्) नः असि।

हे अग्निदेव, वनस्पति आपका अन्न है; घी आपका पेय है। आप यज्ञके प्राचीन, उत्कृष्ट होता हैं। आप तपके सामर्थ्यसे प्रकट होनेवाले अद्भुत विभूति हैं। ६ (२८)

सूक्त ८.

॥ ऋषि–गृत्समद । देवता–अग्नि ॥

जिस तरह युद्धको जानेवाला योद्धा अपने रथका और बड़े बड़े घोडोंका वर्णन करता है उसी तरह हमको (हे भक्त), अग्निके अद्भुत दानका भी वर्णन करना चाहिये। १

अग्निदेव दान देनेवाले भक्तोंको अच्छी तरह मार्ग दिखलाते हैं। धर्मके अनुसार न चलनेवाले लोगोंको आप कष्ट देते हैं। किन्तु आपको कोई भी कष्ट नहीं दे सकता। आपका स्वरूप बहुत मनोहर है। इस लिये अग्निदेवको हम हवि अर्पण करते हैं। २

हे अग्निदेव, जब आपकी स्तुति की जाती है तब मानों, हर एक घरमें प्रातःकाल और सायंकालमें अग्निरूपी ईश्वरके वैभवका स्तवन किया जाता है। ३

जिस तरह सूर्य अपने रश्मियोंसे देदीप्यमान् होता है उसी तरह आप भी अपनी प्रभासे तेजःपुंज दिखाई देते हैं। आपकी नाश न होनेवाली ज्वालाओंके कारण सब वस्तुएं स्पष्ट-रूपसे दिखाई देती हैं। ४

सब वस्तुओंको खानेवाले (भक्षण करनेवाले) अग्निका (अखण्डपर) साम्राज्य है (वे अधिकार चलाते है)। उस महत्वके अनुसार सामगानसे हम आपके यशका वर्णन करते हैं और उसको बढ़ाते हैं। क्यों कि सब प्रकारका ऐश्वर्य आपहीमें इकट्ठा हुआ है। ५

अग्नि, इन्द्र, सोम, और अन्य देवताओंकी कृपासे हमें कोई भी कष्ट न दे सके। सज्जन) लोगोंके शत्रुओंका और उनकी सेनाका पराभव होवे। ६ (२९) (५

---

६ अन्नः सर्पिरासुतिः प्रत्नः वरेण्यः सहसः पुत्रः (अथ) होता अद्भुतः (खलु)।

१ वाजयन् रथान् इव नु यशतमस्य मीळ्हुषः अग्नेः योगान् उपस्तुहि।

२ यः दाशुषे सुनीथः (स्वयं) अजुर्यः अरिम् जम्भयन् चारुप्रतीकः (च सः) आहुतः।

३ यः उ दमेषु आ दोषोषसि श्रिया प्रशस्यते यस्य च व्रत न मीयते (सः आहुतः)।

४ यः स्वः न भानुना (रोचिष्मान) अर्चिषा च अजरः अभि अग्रानः चित्रः विभाति।

५ (इम) अग्निम् अत्रिम् (अस्य) स्वराज्यम् अनु, उक्थानि वव्रधुः, सः विश्वाः श्रियः अधि दधे।

६ अग्नेः इन्द्रस्य सोमस्य, देवानां ऊतिभिश्च वयम अरिष्यन्तः, पृतन्यतः अभिष्याम।

॥ इति द्वितीयाष्टके पंचमोऽध्याय ॥ ५ ॥

हिन्दी श्रुतिबोध.

हिन्दी, मराठी, गुजराती और अङ्गरेजी
चार भाषाओंमें अलग अलग
प्रसिद्ध होनेवाला
वेदोंका भाषांतर।

प्रति मासमें ६४ पृष्ठ; ३२ पृष्ठ संहिता [स्वर और पदपाठ सहित]
३२ पृष्ठ भाषान्तर

प्रबन्ध २] आषाढ संवत् १९७० - आगष्ट सन १९१३ [अंक १४

सम्पादक,
रामचंद्र विनायक पटवर्धन, बी. ए., एल एल. बी.
अच्युत बलवंत कोल्हटकर, बी. ए., एल एल. बी.
दत्तो अप्पाजी तुलजापुरकर, बी. ए. एल एल. बी.

वार्षिक मूल्य
डा. व्य. सहित. रु. ४

'श्रुतिबोध'
ऑफिस,
४७ कालबादेवी,
बम्बई.

प्रति अंकका मूल्य
आठ आने.

Printed at Shruti Bodh Printing Press & Published at Shruti-Bodh Office, 47, Kalbadevi, Bombay by Narayan Vasudeo Mahajani

॥ अथ द्वितीयाष्टके षष्ठोऽध्यायः ॥ ६ ॥

॥ ९ ॥ ऋषिः—गृत्समदः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ ९ ॥ नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत्सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः ॥ १ ॥
त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः ॥ २ ॥
विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ॥ ३ ॥
अग्ने यजस्व हविषा यजीयाञ्छ्रुष्टी देष्णमभि गृणीहि राधः ।
त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥ ४ ॥

नि । होता । होतृऽसदने । विदानः । त्वेषः । दीदिऽवान् । असदत् । सुऽदक्षः । अदब्धव्रतऽप्रमतिः । वसिष्ठः । सहस्रम्ऽभरः । शुचिऽजिह्वः । अग्निः ॥१॥ त्वं । दूतः । त्वं । ऊं इति । नः । परःऽपाः । त्वं । वस्यः । आ । वृषभ । प्रऽनेता । अग्ने । तोकस्य । नः । तने । तनूनां । अप्रऽयुच्छन् । दीद्यत् । बोधि । गोपाः ॥ २ ॥ विधेम । ते । परमे । जन्मन् । अग्ने । विधेम । स्तोमैः । अवरे । सधऽस्थे । यस्मात् । योनेः । उत्ऽआरिथ । यजे । तं । प्र । त्वे इति । हवींषि । जुहुरे । संऽइद्धे ॥ ३ ॥ अग्ने । यजस्व । हविषा । यजीयान् । श्रुष्टी । देष्णं । अभि । गृणीहि । राधः । त्वं । हि । असि । रयिऽपतिः । रयीणां । त्वं । शुक्रस्य । वचसः । मनोता ॥ ४ ॥

उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ।
कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः ॥ ५ ॥
सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥ ६ ॥ १ ॥

॥ १० ॥ ऋषिः—गृत्समदः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ १० ॥ जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्समिद्धः ।
श्रियं वसानो अमृतो विचेता मर्मृजेन्यः श्रवस्यः स वाजी ॥ १ ॥
श्रूया अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो विचेताः ।
श्यावा रथं वहतो रोहिता वोतारुषाह चक्रे विभृत्रः ॥ २ ॥
उत्तानायामजनयन्त्सुषूतं भुवदग्निः पुरुपेशासु गर्भः ।
शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेताः ॥ ३ ॥

उभयं । ते । न । क्षीयते । वसव्यं । दिवेऽदिवे । जायमानस्य । दस्म । कृधि । क्षुऽमंतं । जरितारं । अग्ने । कृधि । पतिं । सुऽअपत्यस्य । रायः ॥ ५ ॥ सः । एना । अनीकेन । सुऽविदत्रः । अस्मे इति । यष्टा । देवान् । आऽयजिष्ठः । स्वस्ति । अदब्धः । गोपाः । उत । नः । परःऽपाः । अग्ने । द्युऽमत् । उत । रेवत् । दिदीहि ॥ ६ ॥ १ ॥

जोहूत्रः । अग्निः । प्रथमः । पिताऽइव । इळः । पदे । मनुषा । यत् । संऽइद्धः । श्रियं । वसानः । अमृतः । विऽचेताः । मर्मृजेन्यः । श्रवस्यः । सः । वाजी ॥ १ ॥ श्रूयाः । अग्निः । चित्रऽभानुः । हवं । मे । विश्वाभिः । गीःऽभिः । अमृतः । विऽचेताः । श्यावा । रथं । वहतः । रोहिता । वा । उत । अरुषा । अह । चक्रे । विऽभृत्रः ॥ २ ॥ उत्तानायां । अजनयन् । सुऽसूतं । भुवत् । अग्निः । पुरुऽपेशासु । गर्भः । शिरिणायां । चित् । अक्तुना । महःऽभिः । अपरिऽवृतः । वसति । प्रऽचेताः ॥ ३ ॥

जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम् ॥ ४ ॥
आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा३ जर्भुराणः ॥ ५ ॥
ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम ।
अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि ॥ ६ ॥ २ ॥

॥ ११ ॥ ऋषिः–गृत्समदः । देवता–इन्द्रः । छन्दः–त्रिष्टुप् ॥

॥ ११ ॥ श्रुधी हवमिन्द्र मा रिषण्यः स्याम ते दावने वसूनाम् ।
इमा हि त्वामूर्जो वर्धयन्ति वसूयवः सिन्धवो न क्षरन्तः ॥ १ ॥
सृजो महीरिन्द्र या अपिन्वः परिष्ठिता अहिना शूर पूर्वीः ।
अमर्त्यं चिद्दासं मन्यमानमवाभिनदुक्थैर्वावृधानः ॥ २ ॥

जिघर्मि । अग्नि । हविषा । घृतेन । प्रतिऽक्षियंतं । भुवनानि । विश्वा । पृथुं । तिरश्चा । वयसा । बृहंतं । व्यचिष्ठं । अन्नैः । रभसं । दृशानं ॥ ४ ॥ आ । विश्वतः । प्रत्यंचं । जिघर्मि । अरक्षसा । मनसा । तत् । जुषेत । मर्यऽश्रीः । स्पृहयत्ऽवर्णः । अग्निः । न । अभिऽमृशे । तन्वा । जर्भुराणः ॥ ५ ॥ ज्ञेयाः । भागं । सहसानः । वरेण । त्वाऽदूतासः । मनुऽवत् । वदेम । अनूनं । अग्नि । जुह्वा । वचस्या । मधुऽपृचं । धनऽसाः । जोहवीमि ॥ ६ ॥ २ ॥

श्रुधि । हवं । इंद्र । मा । रिषण्यः । स्याम । ते । दावने । वसूनां । इमाः । हि । त्वां । ऊर्जः । वर्धयंति । वसुऽयवः । सिंधवः । न । क्षरंतः ॥ १ ॥ सृजः । महीः । इंद्र । याः । अपिन्वः । परिऽस्थिताः । अहिना । शूर । पूर्वीः । अमर्त्यं । चित् । दासं । मन्यमानं । अव । अभिनत् । उक्थैः । वावृधानः ॥ २ ॥

उक्थेष्विन्नु शूर येषु चाकन्स्तोमेष्विन्द्र रुद्रियेषु च ।
तुभ्येदेता यासु मन्दसानः प्र वायवे सिस्रते न शुभ्राः ॥ ३ ॥
शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वोर्दधानाः ।
शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ॥ ४ ॥
गुहा हितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियन्तम् ।
उतो अपो द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येण ॥ ५ ॥ ३ ॥
स्तवा नु त इन्द्र पूर्व्या महान्युत स्तवाम नूतना कृतानि ।
स्तवा वज्रं बाह्वोरुशन्तं स्तवा हरी सूर्यस्य केतू ॥ ६ ॥
हरी नु त इन्द्र वाजयन्ता घृतश्चुतं स्वारमस्वार्ष्टाम् ।
वि समना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन् ॥ ७ ॥

उक्थेषु । इत् । नु । शूर । येषु । चाकन् । स्तोमेषु । इंद्र । रुद्रियेषु । च । तुभ्यं । इत् । एताः । यासु । मंदसानः । प्र । वायवे । सिस्रते । न । शुभ्राः ॥ ३ ॥ शुभ्रं । नु । ते । शुष्मं । वर्धयंतः । शुभ्रं । वज्रं । बाह्वोः । दधानाः । शुभ्रः । त्वं । इंद्र । वावृधानः । अस्मे इति । दासीः । विशः । सूर्येण । सह्याः ॥ ४ ॥ गुहा । हितं । गुह्यं । गूळ्हं । अपऽसु । अपिऽवृतं । मायिनं । क्षियंतं । उतो इति । अपः । द्यां । तस्तभ्वांसं । अहन् । अहिं । शूर । वीर्येण ॥ ५ ॥ ३ ॥ स्तवं । नु । ते । इंद्र । पूर्व्या । महानि । उत । स्तवाम । नूतना । कृतानि । स्तवं । वज्रं । बाह्वोः । उशंतं । स्तवं । हरी इति । सूर्यस्य । केतू इति ॥ ६ ॥ हरी इति । नु । ते । इंद्र । वाजयंता । घृतऽश्चुतं । स्वारं । अस्वार्ष्टां । वि । समना । भूमिः । अप्रथिष्ट । अरंस्त । पर्वतः । चित् । सरिष्यन् ॥ ७ ॥

नि पर्वतः साद्यप्रयुच्छन्त्सं मातृभिर्वावशानो अक्रान् ।
दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिं पप्रथन्नि ॥ ८ ॥
इन्द्रो महां सिन्धुमाशयानं मायाविनं वृत्रमस्फुरन्निः ।
अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ॥ ९ ॥
अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वीत् ।
नि मायिनो दानवस्य माया अपादयत्पपिवान्त्सुतस्य ॥ १० ॥ ४ ॥
पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः ।
पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव ॥ ११ ॥
त्वे इन्द्राप्यभूम विप्रा धियं वनेम ऋतया सपन्तः ।
अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम ॥ १२ ॥

नि । पर्वतः । सादि । अप्रऽयुच्छन् । सं । मातृऽभिः । वावशानः । अक्रान् । दूरे । पारे । वाणीं । वर्धयंतः । इंद्रऽइषितां । धमनिं । पप्रथन् । नि ॥ ८ ॥ इंद्रः । महां । सिंधुं । आऽशयानं । मायाऽविनं । वृत्रं । अस्फुरत् । निः । अरेजेतां । रोदसी इति । भियाने इति । कनिक्रदतः । वृष्णः । अस्य । वज्रात् ॥ ९ ॥ अरोरवीत् । वृष्णः । अस्य । वज्रः । अमानुषं । यत् । मानुषः । निऽजूर्वीत् । नि । मायिनः । दानवस्य । मायाः । अपादयत् । पपिऽवान् । सुतस्य ॥ १० ॥ ४ ॥ पिबऽपिब । इत् । इंद्र । शूर । सोमं । मंदंतु । त्वा । मंदिनः । सुतासः । पृणंतः । ते । कुक्षी इति । वर्धयंतु । इत्था । सुतः । पौरः । इंद्रं । आव ॥ ११ ॥ त्वे इति । इंद्र । अपि । अभूम । विप्राः । धियं । वनेम । ऋतऽया । सपंतः । अवस्यवः । धीमहि । प्रऽशस्तिं । सद्यः । ते । रायः । दावने । स्याम ॥ १२ ॥

स्याम ते त इन्द्र ये त ऊती अवस्यव ऊर्जं वर्धयन्तः ।
शुष्मिन्तमं यं चाकनाम देवास्मे रयिं रासि वीरवन्तम् ॥ १३ ॥
रासि क्षयं रासि मित्रमस्मे रासि शर्ध इन्द्र मारुतं नः ।
सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम् ॥ १४ ॥
व्यन्त्विन्नु येषु मन्दसानस्तृपत्सोमं पाहि द्रह्यदिन्द्र ।
अस्मान्त्सु पृत्स्वा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः ॥ १५ ॥ ५ ॥
बृहन्त इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान् ।
स्तृणानासो बर्हिः पस्त्यावत्त्वोता इदिन्द्र वाजमग्मन् ॥ १६ ॥
उग्रेष्विन्नु शूर मन्दसानस्त्रिकद्रुकेषु पाहि सोममिन्द्र ।
प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम् ॥ १७ ॥

स्याम । ते । ते । इंद्र । ये । ते । ऊती । अवस्यवः । ऊर्जं । वर्धयंतः । शुष्मिन्ऽतमं । यं । चाकनाम । देवाः । अस्मे इति । रयिं । रासि । वीरऽवंतं ॥ १३ ॥ रासि । क्षयं । रासि । मित्रं । अस्मे इति । रासि । शर्धः । इंद्र । मारुतं । नः । सऽजोषसः । ये । च । मंदसानाः । प्र । वायवः । पांति । अग्रऽनीतिं ॥ १४ ॥ व्यंतु । इत् । नु । येषु । मंदसानः । तृपत् । सोमं । पाहि । द्रह्यत् । इंद्र । अस्मान् । सु । पृत्ऽसु । आ । तरुत्र । अवर्धयः । द्यां । बृहत्ऽभिः । अर्कैः ॥ १५ ॥ बृहंतः । इत् । नु । ये । ते । तरुत्र । उक्थेभिः । वा । सुम्नं । आऽविवासान् । स्तृणानासः । बर्हिः । पस्त्यऽवत् । त्वाऽऊताः । इत् । इंद्र । वाजं । अग्मन् ॥ १६ ॥ उग्रेषु । इत् । नु । शूर । मंदसानः । त्रिऽकद्रुकेषु । पाहि । सोमं । इंद्र । प्रऽदोधुवत् । श्मश्रुषु । प्रीणानः । याहि । हरिऽभ्यां । सुतस्य । पीतिं ॥ १७ ॥

धिष्वा शवः शूर येन वृत्रमवाभिनद्दानुमौर्णवाभम् ।
अपावृणोर्ज्योतिरार्याय नि सव्यतः सादि दस्युरिन्द्र ॥ १८ ॥
सनेम ये त ऊतिभिस्तरन्तो विश्वाः स्पृध आर्येण दस्यून् ।
अस्मभ्यं तत्त्वाष्ट्रं विश्वरूपमरन्धयः साख्यस्य त्रितायं ॥ १९ ॥
अस्य सुवानस्य मन्दिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः ।
अवर्तयत्सूर्यो न चक्रं भिनद्वलमिन्द्रो अङ्गिरस्वान् ॥ २० ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥२१॥६॥१॥

॥ द्वितीयोऽनुवाकः ॥

॥ १२ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ १२ ॥ यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥ १ ॥

धिष्व । शवः । शूर । येन । वृत्रं । अवऽअभिनत् । दानुं । और्णऽवाभं । अप । अवृणोः । ज्योतिः । आर्याय । नि । सव्यतः । सादि । दस्युः । इंद्र ॥ १८ ॥ सनेम । ये । ते । ऊतिऽभिः । तरंतः । विश्वाः । स्पृधः । आर्येण । दस्यून् । अस्मभ्यं । तत् । त्वाष्ट्रं । विश्वऽरूपं । अरंधयः । साख्यस्य । त्रितायं ॥ १९ ॥ अस्य । सुवानस्य । मंदिनः । त्रितस्य । नि । अर्बुदं । ववृधानः । अस्तरित्यस्तः । अवर्तयत् । सूर्यः । न । चक्रं । भिनत् । वलं । इंद्रः । अंगिरस्वान् ॥ २० ॥ नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ २१ ॥ १ ॥

यः । जातः । एव । प्रथमः । मनस्वान् । देवः । देवान् । क्रतुना । परिऽअभूषत् । यस्य । शुष्मात् । रोदसी इति । अभ्यसेतां । नृम्णस्य । मह्ना । सः । जनासः । इंद्रः ॥ १ ॥

यः पृथिवीं व्यथमानामदृंहद्यः पर्वतान्प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः ॥ २ ॥
यो हत्वाहिमरिणात्सप्त सिन्धून्यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजान संवृक्समत्सु स जनास इन्द्रः ॥ ३ ॥
येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँ लक्षमाददर्यः पुष्टानि स जनास इन्द्रः ॥ ४ ॥
यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनास इन्द्रः ॥ ५ ॥ ७ ॥
यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्राव्णो योऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः ॥ ६ ॥

यः । पृथिवीं । व्यथमानां । अदृंहत् । यः । पर्वतान् । प्रऽकुपितान् । अरम्णात् । यः । अन्तरिक्षं । विऽममे । वरीयः । यः । द्यां । अस्तभ्नात् । सः । जनासः । इंद्रः ॥ २ ॥ यः हत्वा । अहिं । अरिणात् । सप्त । सिंधून् । यः । गाः । उत्ऽआजत् । अपऽधा । वलस्य । यः । अश्मनोः । अंतः । अग्निं । जजान । संऽवृक् । समत्ऽसु । सः । जनासः । इंद्रः ॥ ३ ॥ येन । इमा । विश्वा । च्यवना । कृतानि । यः । दासं । वर्णं । अधरं । गुहा । अकरित्यकः । श्वघ्नीऽइव । यः । जिगीवान् । लक्षं । आदत् । अर्यः । पुष्टानि । सः । जनासः । इंद्रः ॥ ४ ॥ यं । स्म । पृच्छंति । कुह । सः । इति । घोरं । उत । ईं । आहुः । न । एषः । अस्ति । इति । एनं । सः । अर्यः । पुष्टीः । विजःऽइव । आ । मिनाति । श्रत् । अस्मै । धत्त । सः । जनासः । इंद्रः ॥ ५ ॥ ७ ॥ यः । रध्रस्य । चोदिता । यः । कृशस्य । यः । ब्रह्मणः । नाधमानस्य । कीरेः । युक्तऽग्राव्णः । यः । अविता । सुऽशिप्रः । सुतऽसोमस्य । सः । जनासः । इंद्रः ॥ ६ ॥

यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः ।
यः सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः ॥ ७ ॥
यं क्रन्दसी संयती विह्वयेते परेऽवर उभया अमित्राः ।
समानं चिद्रथमातस्थिवांसा नाना हवेते स जनास इन्द्रः ॥ ८ ॥
यस्मान्न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत्स जनास इन्द्रः ॥ ९ ॥
यः शश्वतो मह्येनो दधानानमन्यमानाञ्छर्वा जघान ।
यः शर्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः ॥ १० ॥ ८ ॥
यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥ ११ ॥

यस्य । अश्वासः । प्रऽदिशि । यस्य । गावः । यस्य । ग्रामाः । यस्य । विश्वे । रथासः । यः । सूर्यं । यः । उषसं । जजान । यः । अपां । नेता । सः । जनासः । इंद्रः ॥ ७ ॥ यं । क्रंदसी इति । संयती इति संऽयती । विह्वयेते इति विऽह्वयेते । परे । अवरे । उभयाः । अमित्राः । समानं । चित् । रथं । आतस्थिऽवांसा । नाना । हवेते इति । सः । जनासः । इंद्रः ॥ ८ ॥ यस्मात् । न । ऋते । विऽजयंते । जनासः । यं । युध्यमानाः । अवसे । हवंते । यः । विश्वस्य । प्रतिऽमानं । बभूव । यः । अच्युतऽच्युत् । सः । जनासः । इंद्रः ॥ ९ ॥ यः । शश्वतः । महि । एनः । दधानान् । अमन्यमानान् । शर्वा । जघान । यः । शर्धते । न । अनुऽददाति । शृध्यां । यः । दस्योः । हंता । सः । जनासः । इंद्रः ॥ १० ॥ ८ ॥ यः । शंबरं । पर्वतेषु । क्षियंतं । चत्वारिंश्यां । शरदि । अनुऽअविंदत् । ओजायमानं । यः । अहिं । जघान । दानुं । शयानं । सः । जनासः । इंद्रः ॥ ११ ॥

यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः ॥ १२ ॥
द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इन्द्रः ॥ १३ ॥
यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः ॥ १४ ॥
यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥ १५ ॥ ९ ॥

॥ १३ ॥ ऋषिः—गृत्समदः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥१३॥ ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते ।
तदाहना अभवत्पिप्युषी पयोंऽशोः पीयूषं प्रथमं तदुक्थ्यम् ॥ १ ॥

यः । सप्तऽरश्मिः । वृषभः । तुविष्मान् । अवऽअसृजत् । सर्तवे । सप्त । सिन्धून् । यः । रौहिणं । अस्फुरत् । वज्रऽबाहुः । द्यां । आऽरोहंतं । सः । जनासः । इंद्रः ॥ १२ ॥ द्यावा । चित् । अस्मै । पृथिवी इति । नमेते इति । शुष्मात् । चित् । अस्य । पर्वताः । भयंते । यः । सोमऽपाः । निऽचितः । वज्रऽबाहुः । यः । वज्रऽहस्तः । सः । जनासः । इंद्रः ॥ १३ ॥ यः । सुन्वंतं । अवति । यः । पचंतं । यः । शंसंतं । यः । शशमानं । ऊती । यस्य । ब्रह्म । वर्धनं । यस्य । सोमः । यस्य । इदं । राधः । सः । जनासः । इंद्रः ॥ १४ ॥ यः । सुन्वते । पचते । दुध्रः । आ । चित् । वाजं । दर्दर्षि । सः । किल । असि । सत्यः । वयं । ते । इंद्र । विश्वह । प्रियासः । सुऽवीरासः । विदथं । आ । वदेम ॥ १५ ॥ ९ ॥

ऋतुः । जनित्री । तस्याः । अपः । परि । मक्षु । जातः । आ । अविशत् । यासु । वर्धते । तत् । आहनाः । अभवत् । पिप्युषी । पयः । अंशोः । पीयुषं । प्रथमं । तत् । उक्थ्यं ॥ १ ॥

सध्रीमा यन्ति परि बिभ्रतीः पयो विश्वप्स्न्याय प्र भरन्त भोजनम् ।
समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥ २ ॥
अन्वेको वदति यद्ददाति तद्रूपा मिनन्तदपा एक ईयते ।
विश्वा एकस्य विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥ ३ ॥
प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।
असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥ ४ ॥
अधाकृणोः पृथिवीं सन्दृशे दिवे यो धौतीनामहिहन्नारिणक्पथः ।
तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्यः ॥ ५ ॥ १० ॥
यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ ।
सः शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ॥ ६ ॥

सध्री । ईं । आ । यंति । परिं । बिभ्रतीः । पयः । विश्वऽप्स्न्याय । प्र । भरंत । भोजनं । समानः । अध्वा । प्रऽवतां । अनुऽस्यदे । यः । ता । अकृणोः । प्रथमं । सः । असि । उक्थ्यः ॥ २ ॥ अनु । एकः । वदति । यत् । ददाति । तत् । रूपा । मिनन् । तत्ऽअपाः । एकः । ईयते । विश्वाः । एकस्य । विऽनुदः । तितिक्षते । यः । ता । अकृणोः । प्रथमं । सः । असि । उक्थ्यः ॥ ३ ॥ प्रऽजाभ्यः । पुष्टिं । विऽभजंतः । आसते । रयिंऽइव । पृष्ठं । प्रऽभवंतं । आऽयते । असिन्वन् । दंष्ट्रैः । पितुः । अत्ति । भोजनं । यः । ता । अकृणोः । प्रथमं । सः । असि । उक्थ्यः ॥४॥ अध । अकृणोः । पृथिवीं । संऽदृशे । दिवे । यः । धौतीनां । अहिऽहन् । अरिणक् । पथः । तं । त्वा । स्तोमेभिः । उदऽभिः । न । वाजिनं । देवं । देवाः । अजनन् । सः । असि । उक्थ्यः ॥ ५ ॥ १० ॥ यः । भोजनं । च । दयसे । च । वर्धनं । आर्द्रात् । आ । शुष्कं । मधुऽमत् । दुदोहिथ । सः । शेवऽधिं । नि । दधिषे । विवस्वति । विश्वस्य । एकः । ईशिषे । सः । असि । उक्थ्यः ॥ ६ ॥

यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्य१वनीरधारयः ।
यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः ॥ ७ ॥
यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः ।
ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः ॥ ८ ॥
शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ ।
अरज्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः ॥ ९ ॥
विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम् ।
षळस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्युक्थ्यः ॥ १०॥११॥
सुप्रवाचनं तव वीर वीर्य१ं यदेकेन क्रतुना विन्दसे वसु ।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः ॥ ११ ॥

यः । पुष्पिणीः । च । प्रऽस्वः । च । धर्मणा । अधि । दाने । वि । अवनीः । अधारयः । यः । च । असमाः । अजनः । दिद्युतः । दिवः । उरुः । ऊर्वान् । अभितः । सः । असि । उक्थ्यः ॥ ७ ॥ यः । नार्मरं । सहऽवसुं । निऽहन्तवे । पृक्षाय । च । दासऽवेशाय । च । अवहः । ऊर्जयन्त्याः । अपरिऽविष्टं । आस्यं । उत । एव । अद्य । पुरुऽकृत् । सः । असि । उक्थ्यः ॥ ८ ॥ शतं । वा । यस्य । दश । साकं । आ । अद्यः । एकस्य । श्रुष्टौ । यत् । ह । चोदं । आविथ । अरज्जौ । दस्यून् । सं । उनप् । दभीतये । सुप्रऽअव्यः । अभवः । सः । असि । उक्थ्यः ॥ ९ ॥ विश्वा । इत् । अनु । रोधनाः । अस्य । पौंस्यं । ददुः । अस्मै । दधिरे । कृत्नवे । धनं । षट् । अस्तभ्नाः । विऽस्तिरः । पञ्च । संऽदृशः । परि । परः । अभवः । सः । असि । उक्थ्यः ॥ १० ॥ ११ ॥ सुऽप्रवाचनं । तव । वीर । वीर्यं । यत् । एकेन । क्रतुना । विन्दसे । वसु । जातूऽस्थिरस्य । प्र । वयः । सहस्वतः । या । चकर्थ । सः । इन्द्र । विश्वा । असि । उक्थ्यः ॥ ११ ॥

अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिम् ।
नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्त्सास्युक्थ्यः ॥ १२ ॥
अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥ १३ ॥ १२ ॥

॥ १४ ॥ ऋषिः गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ १४ ॥ अध्वर्यवो भरतेन्द्राय सोममामत्रेभिः सिञ्चता मद्यमन्धः ।
कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि ॥ १ ॥
अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम् ।
तस्मा एतं भरत तद्वशायँ एष इन्द्रो अर्हति पीतिमस्य ॥ २ ॥
अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः ।
तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः ॥ ३ ॥

अरमयः । सरःऽअपसः । तराय । कं । तुर्वीतये । च । वय्याय । च । स्रुतिं । नीचा । सन्तं । उत् । अनयः । पराऽवृजं । प्र । अंधं । श्रोणं । श्रवयन् । सः । असि । उक्थ्यः ॥ १२ ॥ अस्मभ्यं । तत् । वसो इति । दानाय । राधः । सं । अर्थयस्व । बहु । ते । वसव्यं । इंद्र । यत् । चित्रं । श्रवस्याः । अनु । द्यून् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १३ ॥ १२ ॥

अध्वर्यवः । भरत । इंद्राय । सोमं । आ । अमत्रेभिः । सिंचत । मद्यं । अंधः । कामी । हि । वीरः । सदं । अस्य । पीतिं । जुहोत । वृष्णे । तत् । इत् । एषः । वष्टि ॥ १ ॥ अध्वर्यवः । यः । अपः । वव्रिऽवांसं । वृत्रं । जघान । अशन्याऽइव । वृक्षं । तस्मै । एतं । भरत । तत्ऽवशाय । एषः । इंद्रः । अर्हति । पीतिं । अस्य ॥ २ ॥ अध्वर्यवः । यः । दृभीकं । जघान । यः । गाः । उत्ऽआजत् । अप । हि । वलं । वरिति वः । तस्मै । एतं । अंतरिक्षे । न । वातं । इंद्रं । सोमैः । आ । ऊर्णुत । जूः । न । वस्त्रैः ॥ ३ ॥

अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून् ।
यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत ॥ ४ ॥
अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम् ।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत ॥ ५ ॥
अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः ।
यो वर्चिनः शतमिन्द्रः सहस्रमपावपद्भरता सोममस्मै ॥ ६ ॥ १३ ॥
अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान् ।
कुत्सस्यायोरतिथिग्वस्य वीरान्न्यवृणग्भरता सोममस्मै ॥ ७ ॥
अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे ।
गभस्तिपूतं भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत ॥ ८ ॥

अध्वर्यवः । यः । उरणं । जघानं । नवं । चख्वांसं । नवतिं । च । बाहून् । यः ।
अर्बुदं । अवं । नीचा । बबाधे । तं । इंद्रं । सोमस्य । भृथे । हिनोत ॥ ४ ॥
अध्वर्यवः । यः । सु । अश्नं । जघानं । यः । शुष्णं । अशुषं । यः । विऽअंसं । यः ।
पिप्रुं । नमुचिं । यः । रुधिऽक्रां । तस्मै । इंद्राय । अंधसः । जुहोत ॥ ५ ॥ अध्वर्यवः ।
यः । शतं । शंबरस्य । पुरः । बिभेदं । अश्मनाऽइव । पूर्वीः । यः । वर्चिनः । शतं ।
इंद्रः । सहस्रं । अपऽअवपत् । भरत । सोमं । अस्मै ॥ ६ ॥ १३ ॥ अध्वर्यवः । यः ।
शतं । आ । सहस्रं । भूम्याः । उपऽस्थे । अवपत् । जघन्वान् । कुत्सस्य । आयोः ।
अतिथिऽग्वस्य । वीरान् । नि । अवृणक् । भरत । सोमं । अस्मै ॥ ७ ॥ अध्वर्यवः ।
यत् । नरः । कामयाध्वे । श्रुष्टी । वहंतः । नशथ । तत् । इंद्रे । गभस्तिऽपूतं । भरत ।
श्रुताय । इंद्राय । सोमं । यज्यवः । जुहोत ॥ ८ ॥

अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम् ।
जुषाणो हस्त्यमभि वावशे व इन्द्राय सोमं मदिरं जुहोत ॥ ९ ॥
अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिन्द्रम् ।
वेदाहमस्य निभृतं म एतद्दित्सन्तं भूयो यजतश्चिकेत ॥ १० ॥
अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा ।
तमूर्दरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु ॥ ११ ॥
अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥ १२ ॥ १४ ॥

॥ १५ ॥ ऋषि-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥१५॥ प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।
त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान ॥ १ ॥

अध्वर्यवः । कर्तन । श्रुष्टिं । अस्मै । वने । निऽपूतं । वने । उत् । नयध्वं । जुषाणः । हस्त्यं । अभि । वावशे । वः । इंद्राय । सोमं । मदिरं । जुहोत ॥ ९ ॥ अध्वर्यवः । पयसा । ऊधः । यथा । गोः । सोमेभिः । ईं । पृणत । भोजं । इंद्रं । वेद । अहं । अस्य । निऽभृतं । मे । एतत् । दित्संतं । भूयः । यजतः । चिकेत ॥ १० ॥ अध्वर्यवः । यः । दिव्यस्य । वस्वः । यः । पार्थिवस्य । क्षम्यस्य । राजा । तं । ऊर्दरं । न । पृणत । यवेन । इंद्रं । सोमेभिः । तत् । अपः । वः । अस्तु ॥ ११ ॥ अस्मभ्यं । तत् । वसो इति । दानाय । राधः । सं । अर्थयस्व । बहु । ते । वसव्यं । इंद्र । यत् । चित्रं । श्रवस्याः । अनु । द्यून् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १२ ॥ १४ ॥

प्र । घ । नु । अस्य । महतः । महानि । सत्या । सत्यस्य । करणानि । वोचं । त्रिऽकद्रुकेषु । अपिबत् । सुतस्य । अस्य । मदे । अहिं । इंद्रः । जघान ॥१॥

अवंशे द्यामस्तभायद्बृहन्तमा रोदसी अपृणदन्तरिक्षम् ।
स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार ॥ २ ॥
सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम् ।
वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार ॥ ३ ॥
स प्रवोळ्हॄन्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ ।
सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार ॥ ४ ॥
स ईं महीं धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति ।
त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इन्द्रश्चकार ॥ ५ ॥ १५ ॥
सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ।
अजवसो जविनीभिर्विवृश्चन्त्सोमस्य ता मद इन्द्रश्चकार ॥ ६ ॥

अवंशे । द्यां । अस्तभायत् । बृहंतं । आ । रोदसी इति । अपृणत् । अंतरिक्षं । सः । धारयत् । पृथिवीं । पप्रथत् । च । सोमस्य । ता । मदे । इंद्रः । चकार ॥ २ ॥ सद्मऽइव । प्राचः । वि । मिमाय । मानैः । वज्रेण । खानि । अतृणत् । नदीनां । वृथा । असृजत् । पथिऽभिः । दीर्घऽयाथैः । सोमस्य । ता । मदे । इंद्रः । चकार ॥ ३ ॥ सः । प्रऽवोळ्हॄन् । परिऽगत्य । दभीतेः । विश्वं । अधाक् । आयुधं । इद्धे । अग्नौ । सं । गोभिः । अश्वैः । असृजत् । रथेभिः । सोमस्य । ता । मदे । इंद्रः । चकार ॥४॥ सः । ईं । महीं । धुनिं । एतोः । अरम्णात् । सः । अस्नातॄन् । अपारयत् । स्वस्ति । ते । उत्ऽस्नाय । रयिं । अभि । प्र । तस्थुः । सोमस्य । ता । मदे । इंद्रः । चकार ॥ ५ ॥ १५ ॥ सः । उदंचं । सिंधुं । अरिणात् । महिऽत्वा । वज्रेण । अनः । उषसः । सं । पिपेष । अजवसः । जविनीभिः । विऽवृश्चन् । सोमस्य । ता । मदे । इंद्रः । चकार ॥ ६ ॥

स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्पराक्षुक् ।
प्रति श्रोणः स्थाद्व्यनगचष्ट सोमस्य ता मद इन्द्रश्चकार ॥ ७ ॥
भिनद्वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत् ।
रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार ॥ ८ ॥
स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः ।
रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार ॥ ९ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ १० ॥ १६ ॥

॥ १६ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥१६॥ प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे ।
इन्द्रमजुर्यं जरयन्तमुक्षितं सनाद्युवानमवसे हवामहे ॥ १ ॥

सः । विद्वान् । अपऽगोहं । कनीनां । आविः । भवन् । उत् । अतिष्ठत् । पराऽवृक् ।
प्रति । श्रोणः । स्थात् । वि । अनक् । अचष्ट । सोमस्य । ता । मदे । इंद्रः ।
चकार ॥ ७ ॥ भिनत् । वलं । अंगिरःऽभिः । गृणानः । वि । पर्वतस्य । दृंहितानि ।
ऐरत् । रिणक् । रोधांसि । कृत्रिमाणि । एषां । सोमस्य । ता । मदे । इंद्रः ।
चकार ॥ ८ ॥ स्वप्नेन । अभिऽउप्य । चुमुरिं । धुनिं । च । जघंथ । दस्युं । प्र ।
दभीतिं । आवः । रंभी । चित् । अत्र । विविदे । हिरण्यं । सोमस्य । ता । मदे ।
इंद्रः । चकार ॥ ९ ॥ नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा ।
मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम ।
विदथे । सुऽवीराः ॥ १० ॥ १६ ॥

प्र । वः । सतां । ज्येष्ठऽतमाय । सुऽस्तुतिं । अग्नौऽइव । संऽइधाने । हविः ।
भरे । इंद्रं । अजुर्यं । जरयंतं । उक्षितं । सनात् । युवानं । अवसे । हवामहे ॥ १ ॥

यस्मादिन्द्राद्बृहतः किं चनेमृते विश्वान्यस्मिन्त्सम्भृताधि वीर्या ।
जठरे सोमं तन्वी३सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुम् ॥ २ ॥
न क्षोणीभ्यां परिभ्वे त इन्द्रियं न समुद्रैः पर्वतैरिन्द्र ते रथः ।
न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु ॥ ३ ॥
विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरन्ति वृषभाय सश्चते ।
वृषा यजस्व हविषा विदुष्टरः पिबेन्द्र सोमं वृषभेण भानुना ॥ ४ ॥
वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे ।
वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ॥ ५ ॥ १७ ॥
वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।
वृष्णो मदस्य वृषभ त्वमीशिष इन्द्र सोमस्य वृषभस्य तृप्णुहि ॥ ६ ॥

यस्मात् । इंद्रात् । बृहतः । किं । चन । ईं । ऋते । विश्वानि । अस्मिन् । संऽभृता । अधि । वीर्या । जठरे । सोमं । तन्वि । सहः । महः । हस्ते । वज्रं । भरति । शीर्षणि । क्रतुं ॥ २ ॥ न । क्षोणीभ्यां । परिऽभ्वे । ते । इंद्रियं । न । समुद्रैः । पर्वतैः । इंद्र । ते । रथः । न । ते । वज्रं । अनु । अश्नोति । कः । चन । यत् । आशुऽभिः । पतसि । योजना । पुरु ॥ ३ ॥ विश्वे । हि । अस्मै । यजताय । धृष्णवे । क्रतुं । भरंति । वृषभाय । सश्चते । वृषा । यजस्व । हविषा । विदुःऽतरः । पिब । इंद्र । सोमं । वृषभेण । भानुना ॥ ४ ॥ वृष्णः । कोशः । पवते । मध्वः । ऊर्मिः । वृषभऽअन्नाय । वृषभाय । पातवे । वृषणा । अध्वर्यू इति । वृषभासः । अद्रयः । वृषणं । सोमं । वृषभाय सुस्वति ॥ ५ ॥ १७ ॥ वृषा । ते । वज्रः । उत । ते । वृषा । रथः । वृषणा । हरी इति । वृषभाणि । आयुधा । वृष्णः । मदस्य । वृषभ । त्वं । ईशिषे । इंद्र । सोमस्य । वृषभस्य । तृप्णुहि ॥ ६ ॥

प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।
कुविन्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ॥ ७ ॥
पुरा सम्बाधादभ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी ।
सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ॥ ८ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ १८ ॥

॥ १७ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥१७॥ तदस्मै नव्यमङ्गिरस्वदर्चत शुष्मा यदस्य प्रत्नथोदीरते ।
विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दृंहितान्यैरयत् ॥ १ ॥
स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत् ।
शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महिना प्रत्यमुञ्चत ॥ २ ॥

प्र । ते । नावं । न । समने । वचस्युवं । ब्रह्मणा । यामि । सवनेषु । दधृषिः । कुवित् । नः । अस्य । वचसः । निऽबोधिषत् । इंद्रं । उत्सं । न । वसुनः । सिचामहे ॥ ७ ॥ पुरा । संऽबाधात् । अभि । आ । ववृत्स्व । नः । धेनुः । न । वत्सं । यवसस्य । पिप्युषी । सकृत् । सु । ते । सुमतिऽभिः । शतक्रतो इति शतऽक्रतो । सं । पत्नीभिः । न । वृषणः । नसीमहि ॥ ८ ॥ नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥ १८ ॥

तत् । अस्मै । नव्यं । अंगिरस्वत् । अर्चत । शुष्माः । यत् । अस्य । प्रत्नऽथा । उत्ऽईरते । विश्वा । यत् । गोत्रा । सहसा । परिऽवृता । मदे । सोमस्य । दृंहितानि । ऐरयत् ॥ १ ॥ सः । भूतु । यः । ह । प्रथमाय । धायसे । ओजः । मिमानः । महिमानं । आ । अतिरत् । शूरः । यः । युत्ऽसु । तन्वं । परिऽव्यत । शीर्षणि । द्यां । महिना । प्रति । अमुंचत ॥ २ ॥

अधाकृणोः प्रथमं वीर्यं महद्यदस्याग्रे ब्रह्मणा शुष्ममैरयः ।
रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्यक् पृथक् ॥ ३ ॥
अधा यो विश्वा भुवनाभि मज्मनेशानकृत्प्रवया अभ्यवर्धत ।
आद्रोदसी ज्योतिषा वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत् ॥ ४ ॥
स प्राचीनान्पर्वताँ दृंहदोजसाधराचीनमकृणोदपामपः ।
अधारयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः ॥ ५ ॥ १९ ॥
सास्मा अरं बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेदसस्परि ।
येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः ॥ ६ ॥
अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम् ।
कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो३ येन मामहः ॥ ७ ॥

अध । अकृणोः । प्रथमं । वीर्यं । महत् । यत् । अस्य । अग्रे । ब्रह्मणा । शुष्मं । ऐरयः । रथेऽस्थेन । हरिऽअश्वेन । विऽच्युताः । प्र । जीरयः । सिस्रते । सध्र्यक् । पृथक् ॥ ३ ॥ अध । यः । विश्वा । भुवना । अभि । मज्मना । ईशानऽकृत् । प्रऽवयाः । अभि । अवर्धत । आत् । रोदसी इति । ज्योतिषा । वह्निः । आ । अतनोत् । सीव्यन् । तमांसि । दुधिता । सं । अव्ययत् ॥ ४ ॥ सः । प्राचीनान् । पर्वतान् । दृंहत् । ओजसा । अधराचीनं । अकृणोत् । अपां । अपः । अधारयत् । पृथिवीं । विश्वऽधायसं । अस्तभ्नात् । मायया । द्यां । अवऽस्रसः ॥ ५ ॥ १९ ॥ सः । अस्मै । अरं । बाहुऽभ्यां । यं । पिता । अकृणोत् । विश्वस्मात् । आ । जनुषः । वेदसः । परि । येन । पृथिव्यां । नि । क्रिविं । शयध्यै । वज्रेण । हत्वी । अवृणक् । तुविऽस्वनिः ॥ ६ ॥ अमाजूःऽइव । पित्रोः । सचा । सती । समानात् । आ । सदसः । त्वा । इये । भगं । कृधि । प्रऽकेतं । उप । मासि । आ । भर । दद्धि । भागं । तन्वः । येन । ममहः ॥ ७ ॥

भोजं त्वामिन्द्र वयं हुवेम दुदिष्ट्वमिन्द्रापांसि वाजान् ।
अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्द्र वस्यसो नः ॥ ८ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ २० ॥

॥ १८ ॥ ऋषिः–गृत्समदः । देवता–इन्द्रः । छन्दः–त्रिष्टुप् ॥

॥ १८ ॥ प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः ।
दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत् ॥ १ ॥
सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता ।
अन्यस्या गर्भमन्य ऊं जनन्त सो अन्येभिः सचते जेन्यो वृषा ॥ २ ॥
हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन ।
मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्यजमानासो अन्ये ॥ ३ ॥

भोजं । त्वां । इंद्र । वयं । हुवेम । ददिः । त्वं । इंद्र । अपांसि । वाजान् । अविड्ढि । इंद्र । चित्रया । नः । ऊती । कृधि । वृषन् । इंद्र । वस्यसः । नः ॥ ८ ॥ नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥ २० ॥

प्रातरिति । रथः । नवः । योजि । सस्निः । चतुःऽयुगः । त्रिऽकशः । सप्तऽरश्मिः । दशऽअरित्रः । मनुष्यः । स्वःऽसाः । सः । इष्टिऽभिः । मतिऽभिः । रंह्यः । भूत् ॥ १ ॥ सः । अस्मै । अरं । प्रथमं । सः । द्वितीयं । उतो इति । तृतीयं । मनुषः । सः । होता । अन्यस्याः । गर्भं । अन्ये । ऊं इति । जनंत । सः । अन्येभिः । सचते । जेन्यः । वृषा ॥ २ ॥ हरी इति । नु । कं । रथे । इंद्रस्य । योजं । आऽयै । सुऽउक्तेन । वचसा । नवेन । मो इति । सु । त्वां । अत्र । बहवः । हि । विप्राः । नि । रीरमन् । यजमानासः । अन्ये ॥ ३ ॥

आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः ।
आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥ ४ ॥
आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः ।
आ पञ्चाशता सुरथेभिरिन्द्रा षष्ट्या सप्तत्या सोमपेयम् ॥ ५ ॥ २१ ॥
आशीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः ।
अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ॥ ६ ॥
मम ब्रह्मेन्द्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य ।
पुरुत्रा हि विहव्यो बभूथास्मिञ्छूर सवने मादयस्व ॥ ७ ॥
न म इन्द्रेण सख्यं वि योषदस्मभ्यमस्य दक्षिणा दुहीत ।
उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये जिगीवांसः स्याम ॥ ८ ॥

आ । द्वाभ्यां । हरिऽभ्यां । इंद्र । याहि । आ । चतुःऽभिः । आ । षट्ऽभिः । हूयमानः । आ । अष्टाभिः । दशऽभिः । सोमऽपेयं । अयं । सुतः । सुऽमख । मा । मृधः । करिति कः ॥ ४ ॥ आ । विंशत्या । त्रिंशता । याहि । अर्वाङ् । आ । चत्वारिंशता । हरिऽभिः । युजानः । आ । पंचाशता । सुऽरथेभिः । इंद्र । आ । षष्ट्या । सप्तत्या । सोमऽपेयं ॥ ५ ॥ २१ ॥ आ । अशीत्या । नवत्या । याहि । अर्वाङ् । आ । शतेन । हरिऽभिः । उह्यमानः । अयं । हि । ते । शुनऽहोत्रेषु । सोमः । इंद्र । त्वाऽया । परिऽसिक्तः । मदाय ॥ ६ ॥ मम । ब्रह्म । इंद्र । याहि । अच्छ । विश्वा । हरी इति । धुरि । धिष्व । रथस्य । पुरुऽत्रा । हि । विऽहव्यः । बभूथ । अस्मिन् । शूर । सवने । मादयस्व ॥ ७ ॥ न । मे । इंद्रेण । सख्यं । वि । योषत् । अस्मभ्यं । अस्य । दक्षिणा । दुहीत । उप । ज्येष्ठे । वरूथे । गभस्तौ । प्रायेऽप्राये । जिगीवांसः । स्याम ॥ ८ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ २२ ॥

॥ १९ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ १९ ॥ अपाय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः ।
यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः ॥ १ ॥
अस्य मन्दानो मध्वो वज्रहस्तोऽहिमिन्द्रो अर्णोवृतं वि वृश्चत् ।
प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त ॥ २ ॥
स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम् ।
अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत् ॥ ३ ॥
सो अप्रतीनि मनवे पुरूणीन्द्रो दाशद्दाशुषे हन्ति वृत्रम् ।
सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातौ ॥ ४ ॥

नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥ २२ ॥

अपायि । अस्य । अंधसः । मदाय । मनीषिणः । सुवानस्य । प्रयसः । यस्मिन् । इंद्रः । प्रऽदिवि । ववृधानः । ओकः । दधे । ब्रह्मण्यंतः । च । नरः ॥ १ ॥
अस्य । मंदानः । मध्वः । वज्रऽहस्तः । अहिं । इंद्रः । अर्णःऽवृतं । वि । वृश्चत् । प्र । यत् । वयः । न । स्वसराणि । अच्छ । प्रयांसि । च । नदीनां । चक्रमंत ॥ २ ॥
सः । माहिनः । इंद्रः । अर्णः । अपां । प्र । ऐरयत् । अहिऽहा । अच्छ । समुद्रं । अजनयत् । सूर्यं । विदत् । गाः । अक्तुना । अह्नां । वयुनानि । साधत् ॥ ३ ॥
सः । अप्रतीनि । मनवे । पुरूणि । इंद्रः । दाशत् । दाशुषे । हंति । वृत्रं । सद्यः । यः । नृऽभ्यः । अतसाय्यः । भूत् । पस्पृधानेभ्यः । सूर्यस्य । सातौ ॥ ४ ॥

स सुन्वत इन्द्रः सूर्यमा देवो रिणङ्मर्त्याय स्तवान् ।
आ यद्रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ॥ ५ ॥ २३ ॥
स रन्धयत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय ।
दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य ॥ ६ ॥
एवा त इन्द्रोचथमहेम श्रवस्या न त्मना वाजयन्तः ।
अश्याम तत्साप्तमाशुषाणा ननमो वधरदेवस्य पीयोः ॥ ७ ॥
एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः ।
ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः ॥ ८ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ २४ ॥

सः । सुन्वते । इंद्रः । सूर्यं । आ । देवः । रिणक् । मर्त्याय । स्तवान् । आ । यत् । रयिं । गुहत्ऽअवद्यं । अस्मै । भरत् । अंशं । न । एतशः । दशस्यन् ॥ ५ ॥ २३ ॥ सः । रंधयत् । सऽदिवः । सारथये । शुष्णं । अशुषं । कुयवं । कुत्साय । दिवःऽदासाय । नवतिं । च । नव । इंद्रः । पुरः । वि । ऐरत् । शंबरस्य ॥ ६ ॥ एव । ते । इंद्र । उचथं । अहेम । श्रवस्या । न । त्मना । वाजयंतः । अश्याम । तत् । साप्तं । आशुषाणाः । ननमः । वधः । अदेवस्य । पीयोः ॥ ७ ॥ एव । ते । गृत्सऽमदाः । शूर । मन्म । अवस्यवः । न । वयुनानि । तक्षुः । ब्रह्मण्यंतः । इंद्र । ते । नवीयः । इषं । ऊर्जं । सुऽक्षितिं । सुम्नं । अश्युः ॥ ८ ॥ नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥ २४ ॥

॥ २० ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ २० ॥ वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर्न रथम् ।
विपन्यवो दीध्यतो मनीषा सुम्नमियक्षन्तस्त्वावतो नॄन् ॥ १ ॥
त्वं न इन्द्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान् ।
त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा ॥ २ ॥
स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता ।
यः शंसन्तं यः शशमानमूती पचन्तं च स्तुवन्तं च प्रणेषत् ॥ ३ ॥
तमु स्तुष इन्द्रं तं गृणीषे यस्मिन्पुरा वावृधुः शाशदुश्च ।
स वस्वः कामं पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ॥ ४ ॥
सो अङ्गिरसामुचथा जुजुष्वान्ब्रह्मा तूतोदिन्द्रो गातुमिष्णन् ।
मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥ ५ ॥ २५ ॥

वयं । ते । वयः । इंद्र । विद्धि । सु । नः । प्र । भरामहे । वाजऽयुः । न । रथं । विपन्यवः । दीध्यतः । मनीषा । सुम्नं । इयक्षंतः । त्वाऽवतः । नॄन् ॥ १ ॥ त्वं । नः । इंद्र । त्वाभिः । ऊती । त्वाऽयतः । अभिष्टिऽपा । असि । जनान् । त्वं । इनः । दाशुषः । वरूता । इत्थाऽधीः । अभि । यः । नक्षति । त्वा ॥ २ ॥ सः । नः । युवा । इंद्रः । जोहूत्रः । सखा । शिवः । नरां । अस्तु । पाता । यः । शंसंतं । यः । शशमानं । ऊती । पचंतं । च । स्तुवंतं । च । प्रऽनेषत् ॥ ३ ॥ तं । ऊं इति । स्तुषे । इंद्रं । तं । गृणीषे । यस्मिन् । पुरा । वबृधुः । शाशदुः । च । सः । वस्वः । कामं । पीपरत् । इयानः । ब्रह्मण्यतः । नूतनस्य । आयोः ॥ ४ ॥ सः । अंगिरसां । उचथा । जुजुष्वान् । ब्रह्म । तूतोत् । इंद्रः । गातुं । इष्णन् । मुष्णन् । उषसः । सूर्येण । स्तवान् । अश्नस्य । चित् । शिश्नथत् । पूर्व्याणि ॥ ५ ॥ २५ ॥

स ईं श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः ।
अव प्रियमर्शसानस्य साह्वाञ्छिरो भरद्दासस्य स्वधावान् ॥ ६ ॥
स वृत्रहेन्द्रः कृष्णयोनीः पुरन्दरो दासीरैरयद्वि ।
अजनयन्मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत् ॥ ७ ॥
तस्मै तवस्यमनु दायि सत्रेन्द्राय देवेभिरर्णसातौ ।
प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत् ॥ ८ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ २६ ॥

॥ २१ ॥ ऋषिः–गृत्समदः । देवता–इन्द्रः । छन्दः–त्रिष्टुप् ॥

॥२१॥ विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते ।
अश्वजिते गोजिते अब्जिते भरेन्द्राय सोमं यजताय हर्यतम् ॥ १ ॥

सः । ह । श्रुतः । इंद्रः । नाम । देवः । ऊर्ध्वः । भुवत् । मनुषे । दस्मऽतमः । अव । प्रियं । अर्शसानस्य । सह्वान् । शिरः । भरत् । दासस्य । स्वधाऽवान् ॥ ६ ॥ सः । वृत्रऽहा । इंद्रः । कृष्णऽयोनीः । पुरम्ऽदरः । दासीः । ऐरयत् । वि । अजनयत् । मनवे । क्षां । अपः । च । सत्रा । शंसं । यजमानस्य । तूतोत् ॥ ७ ॥ तस्मै । तवस्यं । अनु । दायि । सत्रा । इंद्राय । देवेभिः । अर्णऽसातौ । प्रति । यत् । अस्य । वज्रं । बाह्वोः । धुः । हत्वी । दस्यून् । पुरः । आयसीः । नि । तारीत् ॥ ८ ॥ नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥ २६ ॥ विश्वऽजिते । धनऽजिते । स्वःऽजिते । सत्राऽजिते । नृऽजिते । उर्वराऽजिते । अश्वऽजिते । गोऽजिते । अप्ऽजिते । भर । इंद्राय । सोमं । यजताय । हर्यतं ॥ १ ॥

अभिभुवेऽभिभङ्गाय वन्वतेऽषाळ्हाय सहमानाय वेधसे ।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत ॥ २ ॥
सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः ।
वृतंचयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या ॥ ३ ॥
अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः ।
रध्रचोदः श्नथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषसः स्वर्जनत् ॥ ४ ॥
यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः ।
अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत ॥ ५ ॥
इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ॥ ६ ॥ २७ ॥

अभिऽभुवे । अभिऽभंगाय । वन्वते । अषाळ्हाय । सहमानाय । वेधसे । तुविऽग्रये । वह्नये । दुस्तरीतवे । सत्राऽसहे । नमः । इंद्राय । वोचत ॥ २ ॥ सत्राऽसहः । जनऽभक्षः । जनंऽसहः । च्यवनः । युध्मः । अनु । जोषं । उक्षितः । वृतंऽचयः । सहुरिः । विक्षु । आरितः । इंद्रस्य । वोचं । प्र । कृतानि । वीर्या ॥ ३ ॥ अनानुऽदः । वृषभः । दोधतः । वधः । गंभीरः । ऋष्वः । असमष्टऽकाव्यः । रध्रऽचोदः । श्नथनः । वीळितः । पृथुः । इंद्रः । सुऽयज्ञः । उषसः । स्वः । जनत् ॥ ४ ॥ यज्ञेन । गातुं । अप्ऽतुरः । विविद्रिरे । धियः । हिन्वानाः । उशिजः । मनीषिणः । अभिऽस्वरा । निऽसदा । गाः । अवस्यवः । इंद्रे । हिन्वानाः । द्रविणानि । आशत ॥ ५ ॥ इंद्र । श्रेष्ठानि । द्रविणानि । धेहि । चित्तिं । दक्षस्य । सुभगऽत्वं । अस्मे इति । पोषं । रयीणां । अरिष्टिं । तनूनां । स्वाद्मानं । वाचः । सुदिनऽत्वं । अह्नां ॥ ६ ॥ २७ ॥

॥ २२ ॥ ऋषिः—गृत्समदः । देवता—इन्द्रः । छन्दः—अष्टिः ॥

॥ २२ ॥ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् । स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ १ ॥

अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे । अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ २ ॥

साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः । दाता राधः स्तुवते काम्यं वसु सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ ३ ॥

तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यद्देवस्य शवसा प्रारिणा असुं रिणन्नपः ।
भुवद्विश्वमभ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषम् ॥ ४ ॥ २८ ॥ २ ॥

त्रिऽकद्रुकेषु । महिषः । यवऽआशिरं । तुविऽशुष्मः । तृपत् । सोमं । अपिबत् । विष्णुना । सुतं । यथा । अवशत् । सः । ईं । ममाद । महि । कर्म । कर्तवे । महां । उरुं । सः । एनं । सश्चत् । देवः । देवं । सत्यं । इंद्रं । सत्यः । इंदुः ॥ १ ॥ अध । त्विषिऽमान् । अभि । ओजसा । क्रिविं । युधा । अभवत् । आ । रोदसी इति । अपृणत् । अस्य । मज्मना । प्र । ववृधे । अधत्त । अन्यं । जठरे । प्र । ईं । अरिच्यत । सः । एनं । सश्चत् । देवः । देवं । सत्यं । इंद्रं । सत्यः । इंदुः ॥ २ ॥ साकं । जातः । क्रतुना । साकं । ओजसा । ववक्षिथ । साकं । वृद्धः । वीर्यैः । ससहिः । मृधः । विऽचर्षणिः । दाता । राधः । स्तुवते । काम्यं । वसु । सः । एनं । सश्चत् । देवः । देवं । सत्यं । इंद्रं । सत्यः । इंदुः ॥ ३ ॥ तव । त्यत् । नर्यं । नृतो इति । अपः । इंद्र । प्रथमं । पूर्व्यं । दिवि । प्रऽवाच्यं । कृतं । यत् । देवस्य । शवसा । प्र । अरिणाः । असुं । रिणन् । अपः । भुवत् । विश्वं । अभि । अदेवं । ओजसा । विदात् । ऊर्जं । शतऽक्रतुः । विदात् । इषं ॥ ४ ॥ २८ ॥

॥ त्रितीयोऽनुवाकः ॥

॥ २३ ॥ ऋषिः—गृत्समदः । देवता—बृहस्पतिः । छन्दः—जगती ॥

॥२३॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ १ ॥
देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः ।
उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥ २ ॥
आ विबाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि ।
बृहस्पते भीमममित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम् ॥ ३ ॥
सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् ॥ ४ ॥

गणानां । त्वा । गणऽपतिं । हवामहे । कविं । कवीनां । उपमश्रवःऽतमं । ज्येष्ठऽराजं । ब्रह्मणां । ब्रह्मणः । पते । आ । नः । शृण्वन् । ऊतिऽभिः । सीद । सदनं ॥ १ ॥ देवाः । चित् । ते । असुर्य । प्रऽचेतसः । बृहस्पते । यज्ञियं । भागं । आनशुः । उस्राःऽइव । सूर्यः । ज्योतिषा । महः । विश्वेषां । इत् । जनिता । ब्रह्मणां । असि ॥ २ ॥ आ । विऽबाध्य । परिऽरपः । तमांसि । च । ज्योतिष्मंतं । रथं । ऋतस्य । तिष्ठसि । बृहस्पते । भीमं । अमित्रऽदंभनं । रक्षःऽहनं । गोत्रऽभिदं । स्वःऽविदं ॥ ३ ॥ सुनीतिऽभिः । नयसि । त्रायसे । जनं । यः । तुभ्यं । दाशात् । न । तं । अंहः । अश्नवत् । ब्रह्मऽद्विषः । तपनः । मन्युऽमीः । असि । बृहस्पते । महि । तत् । ते । महिऽत्वनं ॥ ४ ॥

न तमंहो न दुरितं कुत॑श्चन नारा॑तयस्तितिरुर्न द्वया॒विन॑ः ।
विश्वा॒ इद॑स्माध्व॒रसो॒ वि बा॑धसे॒ यं सु॑गो॒पा रक्ष॑सि ब्रह्मणस्पते ॥ ५ ॥ २९॥
त्वं नो॑ गो॒पाः प॑थि॒कृद्वि॑चक्ष॒णस्तव॑ व्र॒ताय॑ म॒तिभि॑र्जरामहे ।
बृह॑स्पते॒ यो नो॑ अ॒भि ह्वरो॑ द॒धे स्वा तं म॑र्मर्तु दु॒च्छुना॒ हर॑स्वती ॥ ६ ॥
उ॒त वा॒ यो नो॑ म॒र्चया॒दना॑गसोऽराती॒वा मर्तः॑ सानु॒को वृकः॑ ।
बृह॑स्पते॒ अप॒ तं व॑र्तया प॒थः सु॒गं नो॑ अ॒स्यै दे॒ववी॑तये कृधि ॥ ७ ॥
त्रा॒तारं॑ त्वा त॒नूनां॑ हवाम॒हेऽव॑स्पर्तरधिव॒क्तार॑मस्म॒युम् ।
बृह॑स्पते देव॒निदो॒ नि ब॑र्हय॒ मा दु॒रेवा॒ उत्त॑रं सु॒म्नमुन्न॑शन् ॥ ८ ॥
त्वया॑ व॒यं सु॒वृधा॑ ब्रह्मणस्पते स्पा॒र्हा वसु॑ मनु॒ष्या द॑दीमहि ।
या नो॑ दू॒रे त॒ळितो॒ या अरा॑तयो॒ऽभि सन्ति॑ ज॒म्भया॒ ता अ॑न॒प्नसः॑ ॥ ९ ॥

न । तं । अंहः॑ । न । दुः॒ऽइ॒तं । कुत॑ः । च॒न । न । अरा॑तयः । ति॒ति॒रुः॒ । न । द्व॒या॒विन॑ः । विश्वा॑ः । इत् । अ॒स्मा॒त् । ध्व॒रस॑ः । वि । बा॒ध॒से॒ । यं । सु॒ऽगो॒पाः । रक्ष॑सि । ब्रह्म॑णः । प॒ते॒ ॥ ५ ॥ २९ ॥ त्वं । नः॒ । गो॒पाः । प॒थि॒ऽकृत् । वि॒ऽच॒क्ष॒णः । तव॑ । व्र॒ताय॑ । म॒तिऽभि॑ः । ज॒रा॒म॒हे॒ । बृह॑स्पते । यः । नः॒ । अ॒भि । ह्वर॑ः । द॒धे । स्वा । तं । म॒र्म॒र्तु॒ । दु॒च्छुना॑ । हर॑स्वती ॥ ६ ॥ उ॒त । वा॒ । यः । नः॒ । म॒र्चया॑त् । अना॑गसः । अ॒रा॒ति॒ऽवा । मर्त॑ः । सा॒नु॒कः । वृकः॑ । बृह॑स्पते । अप॑ । तं । व॒र्त॒य॒ । प॒थः । सु॒ऽगं । नः॒ । अ॒स्यै । दे॒वऽवी॑तये । कृ॒धि॒ ॥ ७ ॥ त्रा॒तार॑ं । त्वा॒ । त॒नूना॑ं । ह॒वा॒म॒हे॒ । अव॑ऽस्पर्तः । अ॒धि॒ऽव॒क्तार॑ं । अ॒स्म॒ऽयुं । बृह॑स्पते । दे॒व॒ऽनिद॑ः । नि । ब॒र्ह॒य॒ । मा । दुः॒ऽएवा॑ः । उत्ऽत॑रं । सु॒म्नं । उत् । न॒श॒न् ॥ ८ ॥ त्वया॑ । व॒यं । सु॒ऽवृधा॑ । ब्र॒ह्म॒णः॒ । प॒ते॒ । स्पा॒र्हा । वसु॑ । म॒नु॒ष्या॑ । आ । द॒दी॒म॒हि॒ । याः । नः॒ । दू॒रे । त॒ळित॑ः । याः । अरा॑तयः । अ॒भि । सन्ति॑ । ज॒म्भय॑ । ताः । अ॒न॒प्नस॑ः ॥ ९ ॥

त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।
मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहि ॥१०॥३०॥
अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासहिः ।
असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चिद्दमिता वीळुहर्षिणः ॥ ११ ॥
अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति ।
बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः ॥ १२ ॥
भरेषु हव्यो नमसोपसद्यो गन्ता वाजेषु सनिता धनंधनम् ।
विश्वा इदर्यो अभिदिप्स्वो३मृधो बृहस्पतिर्वि ववर्हा रथाँ इव ॥ १३ ॥
तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवीर्यम् ।
आविस्तत्कृष्व यदसत्त उक्थ्यं१ बृहस्पते वि परिरापो अर्दय ॥ १४ ॥

त्वया । वयं । उत्ऽतमं । धीमहे । वयः । बृहस्पते । पप्रिणा । सस्निना । युजा । मा । नः । दुःऽशंसः । अभिऽदिप्सुः । ईशत । प्र । सुऽशंसाः । मतिऽभिः । तारिषीमहि ॥ १० ॥ ३० ॥ अननुऽदः । वृषभः । जग्मिः । आऽहवं । निःऽतप्ता । शत्रुं । पृतनासु । ससहिः । असि । सत्यः । ऋणऽयाः । ब्रह्मणः । पते । उग्रस्य । चित् । दमिता । वीळुऽहर्षिणः ॥ ११ ॥ अदेवेन । मनसा । यः । रिषण्यति । शासां । उग्रः । मन्यमानः । जिघांसति । बृहस्पते । मा । प्रणक् । तस्य । नः । वधः । नि । कर्म । मन्युं । दुःऽएवस्य । शर्धतः ॥ १२ ॥ भरेषु । हव्यः । नमसा । उपऽसद्यः । गंता । वाजेषु । सनिता । धनंऽधनं । विश्वाः । इत् । अर्यः । अभिऽदिप्स्वः । मृधः । बृहस्पतिः । वि । ववर्ह । रथान्ऽइव ॥ १३ ॥ तेजिष्ठया । तपनी । रक्षसः । तप । ये । त्वा । निदे । दधिरे । दृष्टऽवीर्यं । आविः । तत् । कृष्व । यत् । असत् । ते । उक्थ्यं । बृहस्पते । वि । परिऽरपः । अर्दय ॥ १४ ॥

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ १५ ॥ ३१ ॥
मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥ १६ ॥
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ १७ ॥
तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः ।
इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥ १८ ॥
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ १९ ॥ ३२ ॥ ६ ॥

बृहस्पते । अति । यत् । अर्यः । अर्हात् । द्युऽमत् । विऽभाति । क्रतुंऽमत् । जनेषु । यत् । दीदयत् । शवसा । ऋतऽप्रजात । तत् । अस्मासु । द्रविणं । धेहि । चित्रं ॥ १५ ॥ ३१ ॥ मा । नः । स्तेनेभ्यः । ये । अभि । द्रुहः । पदे । निरामिणः । रिपवः । अन्नेषु । जगृधुः । आ । देवानां । ओहते । वि । व्रयः । हृदि । बृहस्पते । न । परः । साम्नः । विदुः ॥ १६ ॥ विश्वेभ्यः । हि । त्वा । भुवनेभ्यः । परि । त्वष्टा । अजनत् । साम्नःऽसाम्नः । कविः । सः । ऋणऽचित् । ऋणऽयाः । ब्रह्मणः । पतिः । द्रुहः । हंता । महः । ऋतस्य । धर्तरि ॥ १७ ॥ तव । श्रिये । वि । वि । अजिहीत । पर्वतः । गवां । गोत्रं । उत्ऽअसृजः । यत् । अंगिरः । इंद्रेण । युजा । तमसा । परिऽवृतं । बृहस्पते । निः । अपां । औब्जः । अर्णवं ॥ १८ ॥ ब्रह्मणः । पते । त्वं । अस्य । यंता । सुऽउक्तस्य । बोधि । तनयं । च । जिन्व । विश्वं । तत् । भद्रं । यत् । अवंति । देवाः । बृहत् । वदेम । विदथे । सुवीराः ॥ १९॥

॥ इति द्वितीयाष्टके षष्ठोऽध्यायः ॥ ६ ॥

अध्याय ६.

सूक्त १

॥ ऋषि--गृत्समद । देवता--अग्नि ॥

हे अग्नि, आप बड़े ज्ञानवान्, उग्र, देदीप्यमान्, और बडे कुशल यज्ञ--होता है। होतामें आपही अधिष्ठित हुये हैं। भक्तोंकी रक्षा करनेका काम आप सदा करते रहते हैं। आप बड़े मनोहर हैं। सैंकडों प्रकारसे आप अपने भक्तोंका लाभ कराते हैं। आपकी भाषा बड़ी पवित्र है। १

स्वर्गमें ले जानेवाले आप हमारे नेता हैं। आप स्वर्ग--लोकमें हमारी रक्षा करते हैं। हमारी इच्छा पूरी करनेवाले अग्निदेव, जिन वस्तुओंकी हम इच्छा करते हैं उनकी ओर हमें आपही ले जाते हैं। हे अग्निदेव, हमारी और हमारे पुत्र और पौत्रोंकी उन्नति करनेके लिये आप प्रकाशित होते हैं। आप हमे कभी भी नहीं भूलते हैं। आप हमारी रक्षा करनेवाले हैं। २

हे अग्नि, जिस उंचे लोकमें आप प्रकट होते हैं वहांभी हम आपकी सेवा करेंगे। नीचेके भूलोकमेंभी हम स्तुतियोंके द्वारा आपका भजन करेंगे। जिन जिन स्थानोंपर आपका जन्म होता है वहां मैं आपकी पूजा करता हूं। इसी लिये आप प्रज्वलित होते हैं। जब आप प्रज्वलित होते हैं तब ऋत्विज आपको हवि अर्पण करते हैं। ३

हे अग्निदेव, आप भक्तलोगोंकी प्रार्थना सुनते हैं। आप यज्ञ--कर्म करनेमें बड़े कुशल हैं। इसलिये हवियोंसे देवोंके लिये आप यजन कीजिये। आपको अर्पण करनेके योग्य हमारे पास जो सम्पत्ति है वह यही है। इसलिये आप उस हविरूपी सम्पत्तिका आनन्दसे स्वीकार कीजिये और उसकी प्रशंसा कीजिये। सच पूछा जाय तो आपको किसी बातकी कमी नहीं है। आप भूलोक और स्वर्गलोकके वैभवके स्वामी है। हमारे अन्तःकरणमें उत्तम कविता उत्पन्न करनेकी प्रेरणा आपही कराते हैं। ४

---

१ विद्वान् त्वेषः दीदिवान् सुदक्षः (अयम्) होता होतृ सदने असदत्। (सः अयम्) अग्निः अदब्धव्रतप्रमतिः वसिष्ठः सहस्रंभरः शुचि जिह्वः।

२ त्वम् नः दूतः त्वमु (नः) परस्पाः, वृषभ त्वम् वस्य आ प्रणेता असि। हे अग्ने नः (नः) तोकस्य च तनूनाम् तने (त्वम्) दीद्यत् अप्रयुच्छन् गोपाः बोधि।

३ अग्ने, ते परमे जन्मन् (त्वा) विधेम, अवरे सधस्थे स्तोमैः विधेम। (यतः) यस्मात् योनेः त्वम् उदारिथ तं (स्थानं अधिकृत्य) यजे, (अतः) समिद्धे त्वे (ऋत्विजः) हवींषि प्र जुहुरे।

४ अग्ने, श्रुष्टी यजीयान् च त्वम् हविषा (देवान्) यजस्व, इदं (एव) देष्णम् राधः (तद्) अभिगृणीहि। (किम् अनवाप्तम् त्वया) त्वम् हि रयीणाम् रयीपतिरसि, त्वम् शुक्रस्य वचसः च मनोता।

हे पराक्रमी देव, भक्तोंको दान करनेके लिये आप प्रत्येक दिन प्रकट होते हैं। तबभी स्वर्गलोक और भूलोककी सम्पत्तिकी जो पुञ्जी आपके पास है वह कभी घट नहीं जाती। हे अग्नि, आप अपने भक्तोंको पराक्रमी बनाइये। आप उनको ऐसा वैभव अर्पण कीजिये जिसपर किसीका अधिकार नहीं चल सकता है। ५

हे अग्निदेव, आप बड़े दयाशील है। यज्ञ कर्ममें भी आप बड़े कुशल है। हमारा कल्याण करनेके लिये आप अपने प्रज्वलित मुखसे देवोंको सन्तुष्ट करते हैं। आप ऐसे होशियार हैं कि आपके सामने किसीकी चालाखी नहीं चलती। पृथ्वीपर आप हमारी रक्षा करनेवाले हैं। इतनाही नहीं; किन्तु स्वर्गलोकमें भी हमारा कल्याण करनेवाले आपही हैं। इस लिये, हे अग्निदेव, आप इस तरह प्रकाशित हूजिये जिस तरह आपके प्रकाशके द्वारा हमें ऐश्वर्य प्राप्त होवे और हमारी उन्नति होवे। ६

सूक्त १०.

॥ ऋषि—गृत्समद। देवता—अग्नि ॥

हे अग्निदेव, सब विश्वको उत्पन्न करनेवाले आपही है। इसलिये आपकी जय हो। जब हमारे ऋत्विज आपको उत्तर—वेदीपर प्रज्वलित करते हैं तब अमर और महाज्ञानी (अग्नि) अपने तेजोरूप वैभवसे विभूषित होते हैं। सब तरहसे आप सेवा करने योग्य है। आप बड़े पुण्यवान हैं और सत्वगुण आपमें दिखाई देता हैं। १

मनोहर अग्नि सब प्रकारके स्तोत्रोंके द्वारा हमारी पुकार सुने। आप अमर हैं। सबको जाननेवाले आपही हैं। आप अपने रथको कभी कभी काले रंगके, कभी कभी लाल रंगके और हरे रंगके घोड़ोंको जोतते हैं। ऐसे रथमें बैठकर आप नाना प्रकारके यज्ञमें चले जाते हैं। २

अग्निकुण्ड जैसे पवित्रस्थानमें ही अग्नि उत्पन्न होता है और प्रकट होता है। नानाप्रकारकी वनस्पतियोंके पेटमे आप सदा सूक्ष्म रूपसे रहते हैं। इस लिये सक्त जाड़ेके दिनोंमेंभी अन्धेरी रातमें महा प्रज्ञावान् अग्नि अपने तेजसे प्रकट होता है। आप कभी अन्धेरेसे ढक नहीं जाते और आप सब स्थानोंमें रहते हैं। ३

---

५ हे दस्म, (भक्तानुग्रहाय) दिवे दिवे जायमानस्य ते उभयम वसव्यम न क्षीयते। अग्ने जरितारं ते क्षुमन्तं कृधि, स्वपत्य च राय. पात कृधि।

६ सुविदत्रः आर्यजिष्ठश्च स त्वम अस्मे स्वस्ति, एना अनीकेन देवान यक्षि। हे अग्ने अदब्धः त्वम नः गोपाः उत पस्पाः (सन) द्युमत् उत रेवत दीदिहि।

१ अग्नि. प्रथम. पिता (इति) जोहूत्र. (सः) यत इळस्पदे मनुषा समिद्धः (भवति तदा सः) अमतः विचेताः श्रियं वसानः (भवति), (स) मर्मृजन्यः (सः) श्रवस्यः सः वाजी।

२ (अयं) चित्रभानुः अग्निः विश्वाभिः गीर्भिः मे हवं श्रुयाः सः अमृतः विचेताश्च। (अस्य) रथं श्यावा रोहिता वा उत रुपा (अश्वौ) वहतः अह (सः) विभृत्रः चक्रे।

३ सप्तृनाम (अग्निम्) उत्तानायाम (अरण्याम्) अजनयन, (यतः सः) अग्निः पुरुपेशासु (ओषधीषु) गर्भे भुवन। शिरियाणाम चित (स.) प्रचेताः अग्निः स्वमहोभिः अक्तुना अपरिवृतः वसति ?

ऐसे अग्निपर अब मैं हविर्द्रव्यसे और घीसे वर्षा करताहूं। सब भुवनमें हरएक स्थानमें आप रहते हैं। आपका शरीर बड़ा चौडा है। आपका सामर्थ्य बहुत बडा है। आप सब स्थानोंको व्याप्त करके रहते हैं। सब प्रकारकी अनाजरूपी सम्पत्ति आपके पास है। इस लिये आप बड़े सुन्दर दिखाई देते हैं। ४

हे अग्नि, आप सब प्रकारसे श्रेष्ठ हैं। मैं अब घी की वर्षा करता हूं। मुझपर आप कृपा करके अंत:करणसे हमारी सेवाका आप स्वीकार कीजिये। नयी स्त्रीके पराक्रमी और युवा पतिके समान अग्निके शरीरकी कान्ति बडी तेज और सुन्दर दिखाई देती है। जब आपका तीव्र तेज सब दूर फैलता है तब आपको कोई स्पर्श नहीं कर सकता। ५

हे अग्नि, आप अपने उत्कृष्ट सामर्थ्यसे सब लोगोंपर अधिकार चलाते हैं। इस लिये आप हमारे हवियोंका स्वीकार कीजिये। आप हमारे नेता हैं। इस लिये जिस तरह मनु राजाने आपके यज्ञका वर्णन किया है उसी तरह हम भी आपके यज्ञका वर्णन करेंगे। आपके शरीरका अवयव टूटा हुआ नहीं है। आप अपने भक्तोंपर मधुर रस की वर्षा करते हैं। सब प्रकारकी सम्पत्तिकी इच्छा करके स्तुति द्वारा मैं अग्निका स्वागत करता हूं और आपको घीकी आहुति अर्पण करताहूं। ६ (२)

सूक्त ११.

॥ ऋषि-गृत्समद। देवता-इन्द्र ॥

हे इन्द्र, आप हमारी पुकार सुनिये; आप हमारा तिरस्कार मत कीजिये; आपकी कृपासे स्वर्गकी सम्पत्तिका लाभ हमें प्राप्त होवे; धनकी इच्छासे हमारी स्तुति लालसित हुई है। इस लिये हमारी स्तुति नदीके प्रवाहकी तरह बडे आनन्दसे शीघ्रताके साथ आपकी ओर दौडती चली जाती है। १

हे शूर इन्द्र, उस दुष्ट भुजंगने अथाह और अपार जलको चारों ओरसे रोक रखा था। उछलती हुई जलकी लहरोंको आपने भूमीपर छोड दिया (गिराया)। सामगीतके द्वारा आपकी स्तुति की गयी और आप बडे आनन्दित हो गये। निजको अमर समझकर घमण्डमें रहने वाले राक्षसको आपने भूमिपर गिरा दिया और उसको चीरफाड कर उसका नाश कर डाला। २

---

४ (इमम्) विश्वा भुवनानि प्रति क्षियन्तम् अग्निम् हविषा घृतेन च जिघर्मि। तिरश्चा पृथु, वयसा बृहन्तम्, व्यचिष्ठम्, अन्नैः रभसं दृशानं च (जिघर्मि)। ५ विश्वतः प्रत्यंचम (इमम्) अग्निम जिघर्मि, (सः) अरक्षसा मनसा तज्जुषेत। मर्यश्रीः स्पृहयद्वर्णोऽपि (अयम) अग्निः जर्भुराणः, तन्वा न अभिमृशे। ६ वरेण (गुणेन सर्वं) सहमानः (स्वीयं) भागं ज्ञेयाः, त्वादूतासः मनुवत् (स्तोमं) वदेम। (इमम) अनूनम् मधुपृचम, अग्निम् धनसाः (अहम्) जुह्वा वचस्या च जोहवीमि। १ हे इन्द्र त्वं (नः) श्रुधि, मा रिषण्यः, ते वसूनाम् दावने स्याम। इमाः हि ऊर्जः वसुयवः सिन्धवः न क्षरन्तः त्वाम् वर्धयन्ति। २ हे शूर इन्द्र, याः महीः पूर्वाः च (आपः) अहिना परिस्थिताः (ताः) त्वं अपिन्वः असृजः च (तदा) उक्थैः वावृधानः सन अमर्त्यं चित (आत्मानं) मन्यमानम दासम् त्वम् अवाभिनत्।

हे शूर इन्द्र, जिन सामगान और रुद्रपुत्र-मरुत स्तुतियुक्त स्तोत्रोंको आप चाहते हैं उन स्तुतियोंसे आप आनन्दित होते हैं। वे ही पवित्र और वन्दनीय स्तुतियां वायुकेसे वेगमे आपकी ओर शीघ्रतासे दौड़ती चली जाती है। ३

हे शूर इन्द्र, आपके अपूर्व और निष्कलंक प्रतापकी कीर्ति हम चारों ओर फैलाते हैं। आपका चमकनेवाला वज्रभि हम आपके कन्धेपर रखते हैं। हे इन्द्र, आप बड़े पवित्र है। आप अपने सामर्थ्य और वीर्यके कारण आनन्दित होते हैं। हमारा कल्याण करनेके लिये सूर्यकी तरह आप अपने तीव्र वज्रमे अधर्मी और अनार्य शत्रुओंका नाश कीजिये। ४

हे शूर इन्द्र, आप अपने पराक्रमसे उस दुष्ट राक्षसका वध कीजिये जो पोले आकाशमें (शून्य स्थानमें) रहता है, जो वहांके जलमें डुबकर छिपा हुआ रहता है, जो अदृश्य और माया रूपमें रहता है, जो सब स्वर्गलोकको ढांकता है और जो मेघोदकोंको रोक लेता है। ५

हे इन्द्र, जिस तरह प्राचीन कालमें आपने किये हुए पराक्रमोंका हमने बर्णन किया उसी तरह आजकल आपने किये हुए पराक्रमोंका भी हम वर्णन करेंगे। आपके कन्धेपर रखे हुए और युद्धके लिये तैयार हुए आपके तीव्र और चमकनेवाले वज्रके प्रतापका जिस तरह हम वर्णन करते हैं उसी तरह आपके तेजोमय और पीले रंगके दोनों अश्वोंकाभी [जो, मानो, सूर्यकी देदीप्यमान ध्वजाही है] हम वर्णन करेंगे। ६

हे इन्द्र, जब आपकी गम्भीर घोषणा होती है तब अग्निमें घीकी आहुति अर्पण की जाती है और पृथिवीपर जलकी वर्षा होती है। जब आपके तेजोरूप अश्वोंने अपने सामर्थ्यसे इस प्रकारका सिंहनाद (घोषणा) किया तब सब दूर पृथिवीपर सन्नाटा छा गया और मेघरूप पहाड एक क्षणमें चुपकसा स्थिर हो गया। ७

---

३ हे शूर इन्द्र येषु उक्थेषु स्तोमेषु वा रुद्रियेषु (गानेषु) चाकन, यासु च त्वं मंदसानः (ताः) एताः शुभ्रा वायवे न तुभ्य इत प्र सिस्रते।

४ ते शुभ्रं शुष्मं (वयं) वर्धयन्तः नु, (उत च) शुभ्रं वज्रं ते बाह्वोः दधानाः (सन्तः वर्तामहे)। (अतः) हे इन्द्र, शुभ्रस्त्वं वावृधानः सन अस्मे सूर्येण वज्रेण दासीः विशः सद्याः।

५ (स्वर) गुहा हितम, (तत्रत्येषु) अप्सु अपीवृतम् तत्रैव गूळ्हं क्षियन्तम (अपि) गुह्यं मायिनं, उत च अपः द्यां च तस्तभ्वांसं अहिं दानुं, हे शूर त्वम् वीर्येण अहन।

६ हे इन्द्र ते पूर्व्या महानि (कृतानि) स्तव, उत नूतना कृतानि स्तवाम। (संग्रामम्) उशन्तं तव बाह्वो वज्रं स्तवाम। सूर्यस्य केतू (इव ते) हरी (अपि) स्तव।

७ हे इन्द्र ते हरी घृतश्चुतं स्वारं अस्वार्ष्टाम नु, (एतस्मिन्नेवावसरे) भूमिः समना वि अप्रतिष्ठ, पर्वतश्चित सरिष्यन (अपि) अरंस्त।

पर्वत एक क्षणमें गिर गया। किन्तु वह मेघरूपी पर्वत उदकरूपी माताओंके साथ घोषणा करते करते इधर उधर घुम रहा था। भक्तलोगोंने उस दिव्य घोषणाका महिमा पृथिवीके दूरदूरके देशोंमें सब दूर फैलाया। मानों, इन्द्रकी प्रेरणासे उत्पन्न हुए गम्भीर घोषणाका आवाज (प्रतिध्वनी) चारों ओर फैला। ८

चुपचाप महासागरमें छिपकर पडे हुए, महासागरको सामर्थ्यसे रोकनेवाले, और नाना प्रकारकी कुटिलनीतिसे वर्ताव करनेवाले वृत्रको इन्द्रने फेक दिया और उसका नाश किया। भयंकर घोषणा करनेवाले इन्द्रके वज्रसे डरकर आकाश और पृथिवी थरथर कांपने लगी। ९

मनुष्य जातिका कल्याण करनेवाले पराक्रमी इन्द्रने अपने वज्रसे जब मनुष्य जातिका द्वेष करनेवाले वृत्रका नाश किया तब उस तीव्र वज्रकी भयंकर घोषणा हो रही थी। भक्तलोगोंने जो सोमरस इन्द्रको अर्पण किया था उसका प्राशन (पान) जब आपने किया तब मायारूपी राक्षसकी कपटनीतिका आपने नाश कर डाला। १०

हे पराक्रमी इन्द्र, कृपा करके आप सोमरसका पान कीजिये। यह पवित्र और आनन्द देनेवाला रस आपको आनन्दित करें। सोमरसका यथेष्ठ पान कर आपकी शूरता बढे। आप हमारी प्रार्थना सुनिये और सोमरससे आपका मन शान्त होवे। ११

हे इन्द्र, आपके गुणोंका वर्णन करनेवाले हम जैसे भक्तजन आपकी शरण लेते हैं। सत्यधर्मसे हम आपकी उपासना करते हैं। इस लिये आपकी कृपासे हमारा मन आपकी ओर आकर्षित होवें। आपकी कृपाकी हम आशा करते हैं और आपके यशका हम वर्णन करते हैं। इस लिये हमें आपकी दिव्य सम्पत्तिका लाभ होवे। १२

---

८ पर्वतः अप्रयुच्छन् नि सादि, (ततः प्राक् सः) मातृभिः सं वावशानः अक्रान्। (भक्ता अपि) दूरे [illegible]रे (तां) वाणीं वर्धयन्तः, इंद्रेषिताम् (एव) धमनिं नु पप्रथन्।

९ महां सिन्धुं आशयानं मायाविनं वृत्रम् इंद्रः निः अस्फुरत्। (एतस्मिन् अवसरे) अस्य वृष्णः (इंद्रस्य) कनिक्रदतः वज्रात् भियानो रोदसी अरेजताम्।

१० मानुषः वृष्णः अस्य (इंद्रस्य) वज्रः यत् अमानुषम् (वृत्रं) निजूर्वात् (तदा सः वज्रः अपि) [illegible]रवीत्। (एवम्) सुतस्य पपिवान् इंद्रः मायिनः दानवस्य मायाः निरपादयत्।

११ हे शूर इन्द्र (इमं) सोमं पिब पिब इत् मन्दिनः सुतासः त्वा मन्दन्तु। कुक्षी ते पृणन्तः (इमे सोमाः [illegible]म्) वर्धयन्तु। पौरः सुत (अयं) इत्था इंद्रम् आव।

१२ हे इन्द्र विप्राः (वयं) त्वे अपि अभूम। ऋतया (त्वां) सपन्तः धियं (त्वयि) वनेम (इति आशास्महे) अवस्यवः (वयं, तव) प्रशस्तं यशः धीमहि, सद्यः ते रायः दावने (पात्रीभूताः) स्याम।

हे इन्द्र, आपकी कृपारूपी प्रसादकी हम इच्छा करते हैं। आपकी कृपाके कारण ही आपके तेजोमय प्रतापकी कीर्ति दिन प्रतिदिन हम बढाते हैं। इस लिये अब आप हमें अपनाइये। हे भगवन, आप ऐसा कीजिये जिससे हमें उत्तम शौर्यका लाभ होवे, और जिसमे हमें वैभव और वीर पुरुषोंके संगतिका भी लाभ होवे। १३

हे इन्द्र, हमें शान्ति अर्पण कीजिये। हे सन्मित्र, हमें मरुत्-देवोंकी सेनाका आश्रय दीजिये। आपकी कृपासे आनन्द देनेवाले, प्रेम करनेवाले, और सोमरसका आस्वाद लेनेवाले वायुकी भी अनुकूलता हमें प्राप्त होवें। १४

जिन मरुत्-देवोंको देखकर आप आनन्दित होते हैं वे मरुत्-देव सोमरसका पान करें। आपको कभी प्यास नहीं लगती और आप बड़े सामर्थ्यवान भी हैं; आप सदा सन्तुष्ट रहते हैं; तबभी कृपा करके आप सोमरसका प्राशन कीजिये। आप लोगोंकी रक्षा करनेवाले हैं; युद्धमें हमारी कीर्ति आपने ही बढाई। जब हम उच्च स्वरसे आपके गुणोंका वर्णन करते हैं अथवा अर्कका (सूर्य) गान गाकर आकाशमें चिल्लाहट मचाते हैं तब भी आप हमारा गौरव बढाते हैं। १५

हे जगतकी रक्षा करनेवाले देव, सचमुच वे लोक धन्य हैं जिन लोगोंने बड़े प्रेमसे आपकी स्तुति की और जिनको आपकी कृपासे शान्ति सुखका लाभ हुआ। यज्ञ सभामें जो लोक लम्बा चौडा कुशासन आपके लिये बिछाते हैं केवल उनको ही सात्विक सामर्थ्यका लाभ होता है और उनको आप कृपारूपी प्रसाद अर्पण करते हैं। १६

हे वीर पुरुष, भयंकर काम करनेके समय भी आप आनन्दित होते हैं। इस लिये 'त्रिकद्रुक' नामक उत्सवमें आप सोमरसका प्राशन कीजिये। जिस रथको पीले रंगके तेजस्वी अश्व जोते हुए हैं ऐसे रथमें बैठकर और अपने मूंछपर हाथ फिराते हुए प्रसन्न होकर सोमरसका प्राशन करनेके लिये आप इधर आइये। १७

---

१३ हे इन्द्र, अवस्यवः ये (वयं) ते ऊर्ती (एव) ऊर्जम् वर्धयन्तः (सन्तः) ते (वयं) ते स्याम। हे देव शुष्मितमं, वीरवन्तम् यम् च चाकनाम तम रयिम् अस्मे रासि।

१४ (सुम्नस्य) क्षयं रासि, अस्मे मित्रं रासि, हे इन्द्र मारुतं शर्धः नः रासि। सजोषसः मन्दसानाः च ये वायवः अप्रणीतिम पान्ति (तानपि रासि)

१५ येषु (त्वं) मंदमानः (ते मरुतः) नु व्यन्तु इत्। परं च हे इन्द्र तृपन द्रप्सत् च सोमं पाहि। (अपि च) हे तरुत्र अस्मान पृत्सु आ सु (अवर्धयः खलु परं) बृहत् भिः अर्कैः द्याम् चापि अवर्धयः।

१६ (अपि च) हे तरुत्र, ये ते सुम्नम् उक्थैः आविवासान् ते इत् बृहन्तः नु। अथ वा हे इन्द्र ये पस्त्यावत बर्हिः स्तृणानासः (तेपि) त्वोताः वाजम् अग्मन।

१७ हे शूर इन्द्र उग्रेषु इत् (कर्मसु) मन्दसानः त्वं त्रिकद्रुकेषु सोमं पाहि। (अपि च) श्मश्रुषु प्रदोधुवत् प्रीणानः सन् हरिभ्यां सुतस्य पीतिम् याहि।

हे इन्द्र, जिस सामर्थ्यसे आपने वृत्रको और और्णभाव राक्षसको कुचल डाला वह सामर्थ्य आप अब प्रकट कीजिये। हे देव, हम जैसे आर्यलोगोंके लिये आपने दिव्य प्रकाश प्रकट किया। दिव्य प्रकाशको रोकनेवाला अधर्मी और पापी दुष्ट राक्षस आपकी बायी ओर मर हुआ पड़ा है। १८

आपकी कृपासे हमारे कुल पापी और अधर्मी शत्रुओंका नाश होवे। जो जो आर्यलोग अपने पराक्रमसे हमारे शत्रुओंका नाश करते हैं उनकी सहायताका लाभ हमें प्राप्त होवे। हमारे साथ मित्रकासा वर्ताव करनेवाले लोगोंके त्रित नेता होते हैं। हमारे लिये ही त्वष्टाके पुत्र विश्वरूपको आपने, उसके आधीन करा दिया। १९

त्रित नामक भक्त इन्द्रको स्वच्छ वस्त्रमें छाना हुआ और आनन्द देनेवाला सोमरस अर्पण करता है। उसीके लिये इन्द्रने विशाल रूप धारण किया और अर्बुद राक्षसको मिट्टीमें मिला दिया। इन्द्र अंगिराऋषीके पक्षपाती हैं। जिस तरह सूर्य अपना तेजस्वी चक्र घुमता है उसी तरह इन्द्रने अपना वज्र घुमाकर बल राक्षसका नाश किया। २०

हे इन्द्र, आपकी प्रसिद्ध दयालु और उदार बुद्धिरूपी धेनू अपने भक्तोंको मनोरथरूपी दूध पिलावे और उनको सन्तुष्ट करें। आप अपने सब भक्तोंको वैसाही दूध पिलाइये। आपही हमारे कल्याण करनेवाले हैं। हमारा तिरस्कार मत् कीजिये। हम अपने वीर पुत्रोंके साथ यज्ञसभामें आपके यशका वर्णन करेंगे। २१

सूक्त १४.

॥ ऋषि-गृत्समद । देवता-इन्द्र ॥

हे सज्जन लोग, जिसके प्रकट होते ही और जिसके प्रताप और वीर्यरूपी तेजके कारण आकाश और पृथ्वी डर गयी वही इन्द्र है। आपके प्रकट होतेही आप सब विश्वके स्वामी और सब देवोंके श्रेष्ठ अधिपति बन गये। आप अपने करतूतसे देवोंके अलंकार बन गये। १

---

१८ हे शूर, येन वृत्रम् च और्णवाभं च दानुम् अवाभिनत् (तत्) शवः (अधुना) धिष्व। हे इन्द्र (यत्) त्वम् आर्याय ज्योतिः अप अवृणोः (तदा एव) दस्युः सव्यतः नि सादि।

१९ विश्वाः स्पृधः दस्यून ते (एव) ऊतिभिः (परं च) आर्येण (ओजसा) ये तरुन्तः (तान) सनमे। (अतः), साख्यस्य त्रिताय त्वाष्ट्रम् विश्वरूपम् यत् अरंधयः तत् अस्मभ्यम् एव।

२० मन्दिनः (सोमान्) सुवानस्य अस्य त्रितस्य (हेतोः) वावृधानः (इन्द्रः) अर्बुदं निरस्तः। (तथा च अंगिरस्वान् इन्द्रः सूर्यः (स्वरथ) चकं न वज्रम् अवर्तयत् वलम् च भिनत्।

२१ नूनं हे इंद्र ते सा (विश्रुता) मघोनी दक्षिणा मतिः जरित्रे वरं प्रति दुहीयत्। (तदेव) स्तोतृभ्यो शिक्ष, मा नः अति धक्, भगोसि नः सुवीराः (सन्तः) विदथे ते बृहत् (यशः) वदेम।

१ यः जातः एव प्रथमः मनस्वान् च देवो (भूत्वा) देवान् क्रतुना पर्यभूषत्। यस्य शुष्मात् नृम्णस्य मन्हा च रोदसी अभ्यसेताम्, हे जनासः स इन्द्रः।

जिसने हिलनेवाली पृथिवीको दृढ किया और जिसने काम्पित होनेवाले पर्वतको भी स्थित किया, जिसने विशाल अन्तरिक्षके प्रदेशको भी व्याप्त किया और जिसने आकाशके नक्षत्रोंको भी स्थिर किया वही यह इन्द्र है। २

जिसने अहि नामक महाभुजंगका बध करके सात नदीयोंको बन्धनसे मुक्त किया जिसने प्रकाशरूपी गौओंको बलराक्षसके बन्धनसे छुडा लिया, जिसने कडेसे कडे पत्थरके पेटमेंभी अग्निको उत्पन्न किया और युद्धमें सज्जन लोगोंके शत्रुओंका जिसने नाश किया वही इन्द्र है। ३

जिसने सब अस्थिर भुवनोंको उत्पन्न किया. जिसने आर्यजनके पापी और दुष्ट शत्रुओंका नाश करके उनको गुफाकी ओर हकाल दिया और जिसने शिकारीकी तरह पराक्रमी और विजयी सज्जन लोगोंके शत्रुओंको परास्त करके उनकी घमण्ड उतार दी और उनका वैभव छीन लिया वही यह इन्द्र है। ४

कुछ नास्तिक लोग पूंछते हैं कि वह भयंकर इन्द्र कहां है? कई लोग इन्द्रको मानतेही नहीं। किन्तु यह उनकी भूल है। क्यों कि पक्षीयोंको हकाल देनेका काम जैसा सहज है वैसे इन्द्रदेव सज्जन लोगोंके शत्रुओंका नाश सहज रीतिसे करते हैं। इस लिये इन्द्रदेवकी प्रेमसे स्तुति करनी चाहिये। वही यह इन्द्र है। ५

कोई भी मनुष्य श्रीमान हो, दीन हो, ज्ञानी हो, नम्रतासे प्रार्थना करनेवाला हो अथवा कवि हो, सबको प्रेरणा करनेवाले आपही हैं। सोमवल्लीको पीस डालनेके लिये पत्थरको लेनेवाले और सोमरसको निचोडनेवाले दोनों पुरुषोंकी रक्षा करनेवाले इन्द्र आप ही हैं। ६

---

२ यः व्यथमानां पृथिवीं अदृंहत, यः प्र कुपितान् पर्वतान् अरम्णात। यः वरीयः अन्तरिक्षं विममे, द्याम् अस्तभ्नात्, हे जनासः स इन्द्रः।

३ यः अहिम् हत्वा सप्त सिन्धून् आरिणात्, यः बलस्य अपधा गाः उदाजत्। यः अश्मनः अन्तः अग्निम् जजान समत्सु च (सताम् शत्रूणां) संवृक् (भवति) हे जनासः सः इन्द्र।

४ येन इमा विश्वा च्यवना भुवनानि कृतानि, यः दासं वर्णम् गुहा अधरम् अकः। श्वघ्नीव यः जिगीवान अर्यः पुष्टानि लक्षम् च आदत्, हे जनासः सः इन्द्रः।

५ स कुहेति यं घोरम् (अधिकृत्य) पृच्छन्ति स्म, उत एष नास्तीति एनम् आहुः। (परं च) विजः इव यः अर्य पुष्टीः (लीलया) आ मिनाति अस्मै श्रत् धत्त (एव), अतः हे जनासः इन्द्रः।

६ यो रध्रस्य चोदिता, यः कृशस्य, यो ब्रह्मणः (वा) नाधमानस्य कीरेः (वा)। यः युक्तग्राव्णः सुत सोमस्य च सुशिप्रः अविता (भवति), हे जनासः स इन्द्रः।

जिसकी आज्ञाके अनुसार सब (बुद्धिरूप) अश्व चलते हैं, जिसकी आज्ञाके अनुसार सब (प्रकाशरूपी) धेनूएं चलती है, जिसका शासन (इन्द्रियरूप) गांवपर चलता है, जिसकी आज्ञाके अनुसार मनोरूप रथ चलता है, जिसने सूर्य और उषाको उत्पन्न किया, और जिसके कथनके अनुसार दिव्य उदक वर्षा करते हैं, हे सज्जन, वही इन्द्र है । ७

आपसमें लढनेवाली, परस्परके ऊपर चढाई करनेवाली, परस्परका द्वेष करनेवाली दोनों पक्षोंके शत्रुओंकी सेना जिसकी सहायताकी इच्छा करके जिसको पुकारती हैं, और विजयकी इच्छा करके दोनों पक्षोंके लोक जिसको निजकी ओर बुलाते हैं, हे सज्जन लोग, वही इन्द्र हैं । ८

बिना जिसकी कृपाके किसीको जयका लाभ नहीं होता है, युद्धमें लढते समय निजकी रक्षाके लिये सब लोग जिसको पुकारते हैं, जिसके रूपके अनुसार सब विश्वका आकार बन गया है, और जो अचल वस्तुकोभी उलट पुलटकर चल कर सकता है, हे सज्जन, वही इन्द्र है । ०

भयंकर पाप करनेवाले और उद्दण्डतासे वर्ताव करनेवाले दुष्ट लोगोंका जो अपने वज्रसे नाश करता है, सज्जन लोगोंका अपमान करनेवाले लोगोंको जो कभी क्षमा नहीं करता है और जो अधर्मी दुष्ट लोगोंका सदा नाश ही करता है, हे सज्जन, वही इन्द्र है ।१०

पर्वतकी गुहामें चुपचाप छिपे हुए शंबरासुर राक्षसका तलाश करके जिसने उसका वध कर डाला और शरद ऋतुके चालिसवे दिन नीचे गिरनेपरभी पराक्रम दिखानेका बहाना करनेवाले अहि राक्षसका जिसने नाश किया, वही, हे सज्जन, इन्द्र है ।११

---

७ यस्य प्रदिशि (सर्वे) अश्वासः, यस्य (प्रदिशि सर्वे) गावः यस्य (प्रदिशि) ग्रामाः, यस्य (प्रदिशि) विश्वे रथासः । यः सूर्यम् , यः उषसं जजान, यो अपां नेता, हे जनासः स इन्द्रः ।

८ क्रंदसी (परस्परं) संयती (अनीके) यं विव्हयेते, परे अवरे च उभयाः अमित्राः यं (आव्हयन्ति)। समानं (मन्तं) रथम् आतस्थिवांसा (द्वावपि यं) नाना हवेते, हे जनासः स इन्द्रः ।

९ यस्मा ऋते जनासः न विजयन्ते, युध्यमानाः यं अवसे हवन्ते । यः विश्वस्य प्रतिमानं बभूव, यो अच्युतच्युत् हे जनासः स इन्द्र ।

१० शश्वतः महि एनो दधानान अमन्यमानान् (नृशंसान्) यः शर्वा जघान । यः शर्धते शुध्याम यः न अनुददाति, यः दस्योः हन्ता हे जनासः स इन्द्रः ।

११ पर्वतेषु क्षियन्तं शंबरम् यः शरदि चत्वारिंश्यां तिथौ अन्वविन्दत् । यः शयानम् अपि ओजायमानं अहिम् दानुम जघान हे जनासः सः इन्द्रः

नानाप्रकारके सात रश्मियोंसे जो विभूषित होता है, जिस बड़े पराक्रमी वीरने अपने बड़े सामर्थ्यसे महानदीयोंके जल प्रवाहोंको पृथ्वीपर बन्धनसे मुक्त किया, स्वर्गपर चढ़ाई करनेवाले रौहिणी राक्षसको, अपने वज्रकी तरह कडे हाथोंसे फेक दिया, हे सज्जन, वही इन्द्र है । १२

पृथिवी और आकाश जिसको नमस्कार करते हैं, जिसके डरके कारण सब पर्वतभी कांपने लगते हैं, भक्तोंने अर्पण किये हुए सोमरसका जो प्राशन करता है, जिसके बाहु वज्रकी तरह बडे कडे होते हैं और जिसके हाथमें वज्र रहता है, हे सज्जन, वही इन्द्र है । १३

सोमरसको निचोडकर छाननेवाले ऋत्विजोंकी जो रक्षा करता है, हविरन्न पकानेवाले, स्तोत्र पढनेवाले और निजके गुणोंकी प्रशंसा करनेवाले लोगोंपर कृपा करके जो उनकी रक्षा करता है, सोमरसका प्राशन करके जो आनन्दित होता है और जिसको हवि अर्पण किया जाता है, हे सज्जन, वही इन्द्र है । १४

किसीके अन्तःकरणको आपके स्वरूपका पता नहीं लगता है । किन्तु आपको हविरन्न अर्पण करनेवाले भक्तोंको आप सत्व सामर्थ्य प्रदान करते हैं । इसमें सन्देह नहीं कि उस समय आप अपना स्वरूप सामर्थ्यके द्वारा प्रकट करते हैं, हे इन्द्र, हम आपसे प्रेम करते हैं । इस लिये हम अपने शूर पुत्रोंके साथ आपके यशका वर्णन करते रहेंगे । १५

वर्षाऋतुही सोमलताकी माता है । वर्षाऋतुके उदकसे सोम उत्पन्न हुआ है । जिस आकाशके उदकमें सोम उत्पन्न होता है उसीमें सोम प्रवेश करता है । इस लिये सोमलता तेजोमय और हृष्टपुष्ट दिखाई देती हैं । सोमलताका रस दूधकी तरह सफेत दिखाई देता है और ऊपर उछलता है, सोमलतासे जो अमृत निकाला जाता है वह यही है । इस लिये पहिले आपके बड़े कामकी प्रशंसा करनी चाहिये । १

---

१२ सप्तरश्मिः वृषभः तुविष्मान च यः सप्त सिन्धून सर्तवे अवासृजन् । यः वज्रबाहुः द्याम् आरोहन्तं रौहिणम अस्फुरत् हे जनासः स इंद्रः ।

१३ अस्मै द्यावापृथिवी चित् नमेते, अस्य शुष्मात् पर्वताः चित् भयन्ते । यः सोमपाः निचितः वज्रबाहुः (अपि) वज्र हस्तः हे जनासः स इन्द्रः ।

१४ यः सुन्वन्तम्, यः पचन्तम्, यः शंसन्तं, यः शशमानम् (अपि) ऊती अवति । यस्य ब्रह्म वर्धनं (भवति) यस्य सोमः, यस्य इदम् राधः (अपि) वर्धनं (भवति) हे जनासः सः इन्द्रः ।

१५ यः त्वम दुध्रः (सन्) चित् सुन्वते पचते वाजं आ दर्दषि, सः किल सत्योसि, (अतः) हे इन्द्र वयं विश्वहा ते प्रियासः (संतः) सुवीरासः विदथम् आवदेम ।

१ (वर्षा) ऋतुः (सोमस्य) जनित्री, तस्या परिजातः यासु (सः) वर्धते (ताः) अपः मक्षु आ अविशत् । तत् (सा वल्लिः) आहनाः पयः पिप्युषी अभवत्, (तत् एव) अंशोः पीयूषं भवति । तत् (ते महत्कर्म) प्रथमं उक्थ्यम् एव ।

पूर्णरीतिसे जलसे भरी हुई सब नदीयां चारों ओरसे आपकी ओर आती है। सब जगत्‌का पोषण करनेके लिये जलरूप अनाज वे (नदीयां) अपने साथ ले आती है। आकाशसे नीचे आनेवाले प्रवाहोंका, समुद्रकी ओर बहनेका मार्ग एकही है। ये सब वस्तुएं आपहींने उत्पन्न की है; इस लिये सबसे पहिले आपहीका स्तवन करना चाहिये। २

ईश्वर जो कुछ अर्पण करता है वह जीव है। आकार नष्ट करनेका काम केवल मृत्युका ही है। और वह सबका नाश करके सब स्थानोंमें सञ्चार करती है। प्रत्येक प्राणीकी चेष्टाओंको-चाहे भली हो अथवा बुरी हो-केवल पृथ्वी ही सहती है। आपहीने सब वस्तुएं उत्पन्न की है। इस लिये पहिले आपकी स्तुति करनी चाहिये। ३

जिस तरह याचकने स्विकार किया हुआ बहुत धन वह अपने कन्धेपर ले नहीं जा सकता उसी तरह सब प्राणी पृथिवी भरके सब अनाजका उपयोग नहीं कर सकते। चाहे जितना अनाज उत्पन्न करनेके लिये (मेघ) तैयार रहता है। जगतके पिताने दूधरूपी अन्नभी बच्चोंके लिये उत्पन्न किया है। क्योंकि बच्चे चाब नहीं सकते। दूधको चाबनेकी आवश्यकता नहीं है। आपहींने सब वस्तुओंको उत्पन्न किया है। इस लिये सबसे पहिले आपहीका स्तवन करना चाहिये। ४

आपने जो पृथिवी उत्पन्न की है उसकी शोभा बढानेके लिये आपने नक्षत्र युक्त आकाश भी उत्पन्न किया। वृत्र राक्षसका वध करनेवाले आप ही हैं। पवित्र जलके बन्द किये हुए मार्गको भी आपने खोल रखे हैं। जिस तरह प्यासे वीर पुरुषको जल देकर सन्तुष्ट किया जाता है उसी तरह स्तोत्रोंके द्वारा आपके यज्ञका वर्णन करके आपको भी प्रसन्न किया जाता है। इस तरह आपका उत्साह और बढता है। आपहीने सब वस्तुओंको उत्पन्न किया है। इस लिये सबसे पहिले आपहीका स्तवन करना चाहिये। ५(१०

हे इन्द्र, केवल आपही हमें अनाज और सम्पत्ति देकर हमारी उन्नति करते हैं। गीले जमीनसे सूखा अनाज उत्पन्न करनेकी आपहीकी करतूत है। आपने अपने दिव्य सम्पत्तिका सञ्चय सूर्यमण्डलमें ही रखा है। उपर्युक्त सब वस्तुओंके आप अकेले ही स्वामी है। इस लिये सबसे पहिले आपका स्तवन करना चाहिये। ६

---

२ पयः परि बिभ्रतीः (नद्यः) सध्री ईम् आ यन्ति, विश्वपस्न्याय भोजनं च प्र भरन्त। प्रवतां (उदधिं प्रति) अनुष्यदे अध्वा समानः, यः ता (वीर्याणि) अकृणोः सः प्रथममेव उक्थ्योसि।

३ यदेकः (ईश्वरः) ददाति तत् (अपरः जीवः) अनुवदति, तदपाः एकः (वस्तु) रूपा मिनन् ईयते। एकस्य विश्वाः विनुदः (एका) तितिक्षते, यः ता (वीर्याणि) अकृणोः सः प्रथममेव उक्थ्योसि।

४ पृष्ठं प्रभवन्तं रयिं आयते (ददति) इव प्रजाभ्यः पुष्टिम् विभजन्त आसते। (जगत्) पितुः भोजनं दंष्ट्रैः आसिन्वन्नेव (अर्भकः) अत्ति, यः ता (वीर्याणि) अकृणोः सः प्रथममेव उक्थ्योसि।

५ अध्र दिवे संदृशे पृथिवीम् अकृणोः, हे अहि हन् यः (त्वम्) धीतिना पथः अरिणक्। वाजिनम् उदभिः न तं त्वा देवम् देवाः स्तोमेभिः अजनन् सः (त्वम्) उक्थ्योसि।

६ यः (त्वं नः) भोजनं च वर्धनं च दयसे, (अपि च) आर्द्रात् (क्षेत्रात्) आ शुष्कं मधुमच्च दुदोहिथ। सः त्वं विवस्वति शेवधिं नि दधिषे, एक एव विश्वस्य ईशिषे स (त्वं) उक्थ्योसि।

सृष्टिनियमके अनुसार जिसके सामर्थ्यसे फल और फूलोंसे भरे हुए वृक्ष उत्पन्न होते हैं जिसके सामर्थ्यसे जलके प्रवाह भिन्न भिन्न स्थानोंमें बहते हैं, जिसके तेजके तुल्य कोई भी वस्तु नहीं है, जिसने आकाशमें बिजली उत्पन्न की, जो विस्तीर्ण सागरको घेरता है ऐसे केवल आप, हे इन्द्र, अकेले ही है। इस लिये आप स्तुति करने योग्य है। ७

भक्तोंको सामर्थ्य प्रदान करनेके लिये और पापी दुष्टोंका नाश करनेके लिये आपने नार्मर राक्षसको मार डाला और उसके वैभवका नाश किया। इस तरह आपने अपनी उज्वल तलवारका तेज प्रकट किया। इतनाही नहीं; किन्तु इससेभी अपूर्व काम आप करते हैं। इस लिये पहिलेकी तरह अबभी आप स्तुति करने योग्य है। ८

हे इन्द्र, अपने भक्तोंकी पुकार सुनते ही आप अपने रथको घोडोंको जोतते हैं और उसकी रक्षा करनेके लिये शीघ्र ही चले जाते हैं। दभीति नामके भक्तकी रक्षा करनेके लिये आपने उसके शत्रुको ऐसे स्थानमें रखा जहांसे वह किसी तरह छुट नहीं सका। इस तरह आप भक्तोंकी रक्षा करनेमें सदा तैयार रहते हैं। सचमुच इस लिये आप स्तुति करने योग्य है। ९

उदक-प्रवाहको रोकनेके लिये तैयार हुई सब प्रकारकी शक्तियोंका आपके सामर्थ्यके सामने कुछ भी नहीं चला। बड़ा काम करनेमें आप बडे कुशल हैं। छः लोकोंको और पांच दिशाओंको आपने नियत स्थानमें स्थापित किया। सबको व्याप्त करके आप फिर भी बाकी है। इस लिये यह निसन्देह बात है कि आप स्तुति करने योग्य हैं। १०

हे शूर इन्द्र, केवल एक बड़ा काम करके आप सब सम्पत्तिको हरण करते हैं। जातुष्ठिर सरीखे बलवान् और जवान राक्षसकी भी घमण्ड आप उतार देते हैं। इस लिये आपके पराक्रमका गौरव बढे उतनाही अच्छा है। हे इन्द्र, सब बड़े बड़े काम आपहीने किये हैं। इस लिये सचमुच आप स्तुति करने योग्य है। ११

---

७ यः (त्वं) पुष्पिणीः च प्रस्वः अवनीः च दाने अधि धर्मणा वि अधारयः। यः च दिवः असमाः दिद्युतः अजनः उरुः (सन्) ऊर्वान (उदधीन) अभितः (असि) सः उक्थः असि।

८ पृक्षाय च दासवेशाय च यः त्वम नार्मरं सहवसुं निहन्तवे अवहः। ऊर्जयन्त्याश्च (असिलतायाः) आस्यम अपरिविष्टम. (कृतम्, नच एता वन्येव ते वीर्याणि) उत पुरुकृत एव सः त्वम् अघ उक्थोसि।

९ यद्ध एकस्य श्रुष्टौ, शतं वा दश (हरीन) साकं यस्य (ते रथे) आयः, चोदम् च आविथ। दभीतये दस्यून् अरज्जौ सम् उनप, (एवं) सुप्राव्यो अभवः सः उक्थोसि।

१० विश्वाः इत् रोधनाः यस्य पौंस्यम अनुदद्ुः अस्मै च कृत्नवे धनम् (अनु) दधिरे. (यः तत) षड् विष्टरः पंच संदृशश्च अस्तभ्राः पर परि अभवः, सः उक्थोसि।

११ हे वीर, एकेनैव क्रतुना वसु विन्दसे, सहस्वतः जातुष्ठिरस्य वयः प्र (विन्दसे च) तत तव वीर्यम् सुप्रवाचनम (भवति), या (एता) विश्वा त्वं चकर्थ स त्वम् (उक्थोसि)

हे इन्द्र, आपने जोरसे बहनेवाले नदीके प्रवाहको इस लिये रोक लिया कि **तुर्वीति** और **वय्य** सहज रीतिसे तैरकर पार जा सके। लङ्गडे और अन्धे **परावृजकी** उन्नति करके आपने उसकी कीर्ति चारों और बढा दी। इस लिये सचमुच आप स्तुति करने योग्य है। १२

हे दिव्यनिधे इन्द्र, आपका कृपारूपी धन हमें इसतरह प्रदान कीजिये जिससे आप उसको सदा बढातेही रहेंगे। आपके पास अच्छी अच्छी सम्पत्ति बाकी है। वह सम्पत्ति प्राप्त करनेके लिये हम अपने वीरपुत्रोंके साथ यज्ञसभामें आपके यशका वर्णन करते रहेंगे। १३ (१२)

सूक्त १४.

॥ ऋषि--गृत्समद। देवता--इंद्र ॥

हे अध्वर्यू, इन्द्रको अर्पण करनेके लिये सोमरस ले आइये। उस आनन्द देनेवाले सोमरसको पानी पीनेके बरतानमें डालो। शूर इन्द्र सोमरसका प्राशन करनेके लिये लालसित होते है। इस लिये पराक्रमी इन्द्रको सोमरस अर्पण कीजिये। क्योंकि वे उसीकी इच्छा करते हैं। १

हे अध्वर्यू, जिस तरह बिजली किसी वृक्षको कांट डालती है उसी तरह इन्द्रभी अपने वज्रसे दिव्य उदकोंको चारों ओरसे रोकनेवाले वृत्रको कांट डालते हैं। इन्द्र देव, सोमरसको बहुत चाहते हैं। इस लिये आपको सोमरस अर्पण करना चाहिये। सोमरस प्राशन करनेके लिये इन्द्र-देव बडे योग्य है। २

अच्छ । ब्रह्माणाऽइव । विदथें । उक्थऽशासां । दूताऽइव । हव्यां । जन्यां ।
पुरुऽत्रा ॥ १ ॥ प्रातःऽयावांना । रथ्याऽइव । वीरा । अजाऽइव । यमा । वरं । आ ।
सचेथे इतिं । मेनें इवेति मेनेऽइव । तन्वा । शुंभमाने इतिं । दंपती इवेति दंपतीऽइव ।
क्रतुऽविदां । जनेषु ॥ २ ॥

शृङ्गेव नः प्रथमा गन्तमर्वाक् शफाविव जर्भुराणा तरोभिः ।
चक्रवाकेव प्रति वस्तोरुस्रार्वाञ्चा यातं रथ्येव शक्रा ॥ ३ ॥
नावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव ।
श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान् ॥ ४ ॥
वातेवाजुर्या नद्येव रीतिरक्षी इव चक्षुषा यातमर्वाक् ।
हस्ताविव तन्वे३ शम्भविष्ठा पादेव नो नयतं वस्यो अच्छ ॥ ५ ॥ ४ ॥
ओष्ठाविव मध्वास्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः ।
नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे ॥ ६ ॥

शृंगाऽइव । नः । प्रथमा । गंतं । अर्वाक् । शफाऽइव । जर्भुराणा । तरःऽभिः ।
चक्रवाकाऽइव । प्रति । वस्तोः । उस्रा । अर्वाचा । यातं । रथ्याऽइव । शक्रा ॥ ३ ॥
नावाऽइव । नः । पारयतं । युगाऽइव । नभ्याऽइव । नः । उपधी इवेत्युपधीऽइव ।
प्रधी इवेति प्रधीऽइव । श्वानाऽइव । नः । अरिषण्या । तनूनां । खृगलाऽइव । विऽस्रसः ।
पातं । अस्मान् ॥ ४ ॥ वाताऽइव । अजुर्या । नद्याऽइव । रीतिः । अक्षी इवेत्यक्षीऽइव ।
चक्षुषा । आ । यातं । अर्वाक् । हस्तौऽइव । तन्वे । शंऽभविष्ठा । पादाऽइव । नः ।
नयतं । वस्यः । अच्छ ॥ ५ ॥ ४ ॥ ओष्ठाऽइव । मधु । आस्ने । वदंता ।
स्तनाऽइव । पिप्यतं । जीवसे । नः । नासाऽइव । नः । तन्वः । रक्षितारा । कर्णाऽइव ।
सुऽश्रुता । भूतं । अस्मे इति ॥ ६ ॥

हस्तेव शक्तिमभि संददी नः क्षामेव नः समजतं रजांसि ।
इमा गिरो अश्विना युष्मयन्तीः क्ष्णोत्रेणेव स्वधितिं सं शिशीतम् ॥ ७ ॥
एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन् ।
तानि नरा जुजुषाणोप यातं बृहद्वदेम विदथे सुवीराः ॥ ८ ॥ ५ ॥

॥ ४० ॥ ऋषिः–गृत्समदः । देवता–सोमापूषणौ । छन्दः–जगती ॥

॥४०॥ सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।
जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ॥ १ ॥
इमौ देवौ जायमानौ जुषन्तेमौ तमांसि गूहतामजुष्टा ।
आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु ॥ २ ॥

हस्ताऽइव । शक्तिं । अभि । संददी इति संऽददी । नः । क्षामऽइव । नः । सं । अजतं । रजांसि । इमाः । गिरः । अश्विना । युष्मऽयंतीः । क्ष्णोत्रेणऽइव । स्वऽधितिं । सं । शिशीतं ॥ ७ ॥ एतानि । वां । अश्विना । वर्धनानि । ब्रह्म । स्तोमं । गृत्सऽमदासः । अक्रन् । तानि । नरा । जुजुषाणा । उप । यातं । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ८ ॥ ५ ॥

सोमापूषणा । जनना । रयीणां । जनना । दिवः । जनना । पृथिव्याः । जातौ । विश्वस्य । भुवनस्य । गोपौ । देवाः । अकृण्वन् । अमृतस्य । नाभिं ॥ १ ॥ इमौ । देवौ । जायमानौ । जुषंत । इमौ । तमांसि । गूहतां । अजुष्टा । आभ्यां । इंद्रः । पक्वं । आमासु । अंतरिति । सोमापूषऽभ्यां । जनत् । उस्रियासु ॥ २ ॥

सोमापूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वम् ।

विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पञ्चरश्मिम् ॥ ३ ॥

दिव्यन्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे ।

तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे ॥ ४ ॥

विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति ।

सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम ॥ ५ ॥

धियं पूषा जिन्वतु विश्वमिन्वो रयिं सोमो रयिपतिर्दधातु ।

अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः ॥ ६ ॥ ६ ॥

सोमापूषणा । रजसः । विऽमानं । सप्तऽचक्रं । रथं । अविश्वऽमिन्वं । विषुऽवृतं । मनसा । युज्यमानं । तं । जिन्वथः । वृषणा । पंचऽरश्मिं ॥ ३ ॥ दिवि । अन्यः । सदनं । चक्रे । उच्चा । पृथिव्यां । अन्यः । अधि । अंतरिक्षे । तौ । अस्मभ्यं । पुरुऽवारं । पुरुऽक्षुं । रायः । पोषं । वि । स्यता । नाभिं । अस्मे इति ॥ ४ ॥ विश्वानि । अन्यः । भुवना । जजान । विश्वं । अन्यः । अभिऽचक्षाणः । एति । सोमापूषणौ । अवतं । धियं । मे । युवाभ्यां । विश्वाः । पृतनाः । जयेम ॥ ५ ॥ धियं । पूषा । जिन्वतु । विश्वंऽइन्वः । रयिं । सोमः । रयिऽपतिः । दधातु । अवतु । देवी । अदितिः । अनर्वा । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ६ ॥ ६ ॥

॥ ४१ ॥ ऋषिः—गृत्समदः । देवता—वायुः । छन्दः—गायत्री ॥

॥ ४१ ॥ वायो ये ते सहस्रिणो रथासस्तेभिरा गहि ।

नियुत्वान्त्सोमपीतये ॥ १ ॥

नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते ।

गन्तासि सुन्वतो गृहम् ॥ २ ॥

शुक्रस्याद्य गवाशिर इन्द्रवायू नियुत्वतः ।

आ यातं पिबतं नरा ॥ ३ ॥

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।

ममेदिह श्रुतं हवम् ॥ ४ ॥

राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे ।

सहस्रस्थूण आसाते ॥ ५ ॥ ७ ॥

वायो इति । ये । ते । सहस्रिणः । रथासः । तेभिः । आ । गहि । नियुत्वान् । सोमऽपीतये ॥ १ ॥ नियुत्वान् । वायो इति । आ । गहि । अयं । शुक्रः । अयामि । ते । गंता । असि । सुन्वतः । गृहं ॥ २ ॥ शुक्रस्य । अद्य । गोऽआशिरः । इंद्रवायू इति । नियुत्वतः । आ । यातं । पिबतं । नरा ॥ ३ ॥ अयं । वां । मित्रावरुणा । सुतः । सोमः । ऋतऽवृधा । मम । इत् । इह । श्रुतं । हवं ॥ ४ ॥ राजानौ । अनभिऽद्रुहा । ध्रुवे । सदसि । उत्ऽतमे । सहस्रऽस्थूणे । आसाते इति ॥ ५ ॥ ७ ॥

ता सम्राजा घृतासुती आदित्या दानुनस्पती ।

सचेते अनवह्वरं ॥ ६ ॥

गोमदू षु नासत्याश्वावद्यातमश्विना ।

वर्ती रुद्रा नृपाय्यम् ॥ ७ ॥

न यत्परो नान्तर आदधर्षद्वृषण्वसू ।

दुःशंसो मर्त्यो रिपुः ॥ ८ ॥

ता न आ वोळ्हमश्विना रयिं पिशङ्गसंदृशम् ।

धिष्ण्या वरिवोविदम् ॥ ९ ॥

इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत् ।

स हि स्थिरो विचर्षणिः ॥ १० ॥ ८ ॥

ता । संऽराजा । घृतासुती इति घृतऽआसुती । आदित्या । दानुनः । पती इति । सचेते इति । अनवऽह्वरं ॥ ६ ॥ गोऽमत् । ऊं इति । सु । नासत्या । अश्वऽवत् । यातं । अश्विना । वर्तिः । रुद्रा । नृऽपाय्यं ॥ ७ ॥ न । यत् । परः । न । अंतरः । आऽदधर्षत् । वृषण्वसू इति वृषण्ऽवसू । दुःऽशंसः । मर्त्यः । रिपुः ॥ ८ ॥ ता । नः । आ । वोळ्हं । अश्विना । रयिं । पिशंगऽसंदृशं । धिष्ण्या । वरिवःऽविदं ॥ ९ ॥ इंद्रः । अंग । महत् । भयं । अभि । सत् । अप । चुच्यवत् । सः । हि । स्थिरः । विऽचर्षणिः ॥ १० ॥ ८ ॥

इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत् ।

भद्रं भवाति नः पुरः ॥ ११ ॥

इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् ।

जेता शत्रून्विचर्षणिः ॥ १२ ॥

विश्वे देवास आ गत शृणुता म इमं हवम् ।

एदं बर्हिर्नि षीदत ॥ १३ ॥

तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः ।

एतं पिबत काम्यम् ॥ १४ ॥

इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः ।

विश्वे मम श्रुता हवम् ॥ १५ ॥ ९ ॥

अम्बितमे नदीतमे देवितमे सरस्वति ।

अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नस्कृधि ॥ १६ ॥

इंद्रः । च । मृळयाति । नः । न । नः । पश्चात् । अघं । नशत् । भद्रं । भवाति । नः । पुरः । ॥ ११ ॥ इंद्रः । आशाभ्यः । परि । सर्वाभ्यः । अभयं । करत् । जेता । शत्रून् । विऽचर्षणिः ॥ १२ ॥ विश्वे । देवासः । आ । गत । शृणुत । मे । इमं । हवं । आ । इदं । बर्हिः । नि । सीदत ॥ १३ ॥ तीव्रः । वः । मधुऽमान् । अयं । शुनऽहोत्रेषु । मत्सरः । एतं । पिबत । काम्यं ॥ १४ ॥ इंद्रऽज्येष्ठाः । मरुत्ऽगणाः । देवासः । पूषऽरातयः । विश्वे । मम । श्रुत । हवं ॥ १५ ॥ ९ ॥ अंबिऽतमे । नदीऽतमे । देविऽतमे । सरस्वति । अप्रशस्ताःऽइव । स्मसि । प्रऽशस्ति । अंब । नः । कृधि ॥ १६ ॥

त्वे विश्वा सरस्वति श्रितायूंषि देव्याम् ।

शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥ १७ ॥

इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति ।

या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति ॥ १८ ॥

प्रेतां यज्ञस्य शम्भुवा युवामिदा वृणीमहे ।

अग्निं च हव्यवाहनम् ॥ १९ ॥

द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम् ।

यज्ञं देवेषु यच्छताम् ॥ २० ॥

आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः ।

इहाद्य सोमपीतये ॥ २१ ॥ १० ॥

त्वे इति । विश्वा । सरस्वति । श्रिया । आयूंषि । देव्या । शुनऽहोत्रेषु । मत्स्व । प्रऽजा । देवि । दिदिड्ढि । नः ॥ १७ ॥ इमा । ब्रह्म । सरस्वति । जुषस्व । वाजिनीऽवति । या । ते । मन्म । गृत्सऽमदाः । ऋतऽवरि । प्रिया । देवेषु । जुह्वति ॥ १८ ॥ प्र । इतां । यज्ञस्य । शंऽभुवा । युवां । इत् । आ । वृणीमहे । अग्निं । च । हव्यऽवाहनं ॥ १९ ॥ द्यावा । नः । पृथिवी इति । इमं । सिध्रं । अद्य । दिविऽस्पृशं । यज्ञं । देवेषु । यच्छतां ॥ २० ॥ आ । वां । उपऽस्थं । अद्रुहा । देवाः । सीदंतु । यज्ञियाः । इह । अद्य । सोमऽपीतये ॥ २१ ॥ १० ॥

॥ ४२ ॥ ऋषिः–गृत्समदः । देवता–इन्द्रः । छन्दः–त्रिष्टुप् ॥

॥ ४२ ॥ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम् ।
सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत् ॥ १ ॥
मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता ।
पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवादी वदेह ॥ २ ॥
अव क्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते ।
मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ॥ ३ ॥ ११ ॥

कनिक्रदत् । जनुषं । प्रऽब्रुवाणः । इयर्ति । वाचं । अरिताऽइव । नावं ।
सुऽमंगलः । च । शकुने । भवासि । मा । त्वा । का । चित् । अभिऽभा । विश्व्या ।
विदत् ॥ १ ॥ मा । त्वा । श्येनः । उत् । वधीत् । मा । सुऽपर्णः । मा । त्वा ।
विदत् । इषुऽमान् । वीरः । अस्ता । पित्र्यां । अनु । प्रऽदिशं । कनिक्रदत् ।
सुऽमंगलः । भद्रऽवादी । वद । इह ॥ २ ॥ अव । क्रंद । दक्षिणतः । गृहाणां ।
सुऽमंगलः । भद्रऽवादी । शकुंते । मा । नः । स्तेनः । ईशत । मा । अघऽशंसः ।
बृहत् । वदेम । विदथे । सुऽवीराः ॥ ३ ॥ ११ ॥

॥ ४३ ॥ ऋषिः–गृत्समदः । देवता–इन्द्रः । छन्दः–जगती ॥

॥४३॥ प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः ।
उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति ॥ १ ॥
उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ।
वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद
विश्वतो नः शकुने पुण्यमा वद ॥ २ ॥
आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः ।
यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥ ३ ॥ १२ ॥ ४ ॥ २ ॥

प्रऽदक्षिणित् । अभि । गृणंति । कारवः । वयः । वदंतः । ऋतुऽथा । शकुंतयः । उभे इति । वाचौ । वदति । सामगाःऽइव । गायत्रं । च । त्रैस्तुभं । च । अनु । राजति ॥ १ ॥ उद्गाताऽइव । शकुने । साम । गायसि । ब्रह्मऽपुत्रःऽइव । सवनेषु । शंससि । वृषाऽइव । वाजी । शिशुऽमतीः । अपिऽइत्य । सर्वतः । नः । शकुने । भद्रं । आ । वद । विश्वतः । नः । शकुने । पुण्यं । आ । वद ॥ २ ॥ आऽवदन् । त्वं । शकुने । भद्रं । आ । वद । तूष्णीं । आसीनः । सुऽमतिं । चिकिद्धि । नः । यत् । उत्ऽपतन् । वदसि । कर्करिः । यथा । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ३ ॥ १२ ॥ ४ ॥ २ ॥

॥ इति चतुर्थोऽनुवाकः । द्वितीयं मंडलं समाप्तं ॥

॥ अथ तृतीयं मण्डलम् ॥

॥ प्रथमोऽनुवाकः ॥

॥ १ ॥ ऋषिः-विश्वामित्रः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ १ ॥ सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै ।
देवाँ अच्छा दीद्यद्युञ्जे अद्रिं शमाये अग्ने तन्वं जुषस्व ॥ १ ॥
प्राञ्चं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन् ।
दिवः शशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः ॥ २ ॥
मयो दधे मेधिरः पूतदक्षो दिवः सुबन्धुर्जनुषा पृथिव्याः ।
अविन्दन्नु दर्शतमप्स्वन्तर्देवासो अग्निमपसि स्वसॄणाम् ॥ ३ ॥

सोमस्य । मा । तवसं । वक्षि । अग्ने । वह्निं । चकर्थ । विदथे । यजध्यै ।
देवान् । अच्छ । दीद्यत् । युंजे । अद्रिं । शंऽआये । अग्ने । तन्वं । जुषस्व ॥ १ ॥
प्राचं । यज्ञं । चकृम । वर्धतां । गीः । समित्ऽभिः । अग्निं । नमसा । दुवस्यन् ।
दिवः । शशासुः । विदथा । कवीना । गृत्साय । चित् । तवसे । गातुं । ईषुः ॥ २ ॥
मयः । दधे । मेधिरः । पूतऽदक्षः । दिवः । सुऽबंधुः । जनुषा । पृथिव्याः ।
अविंदन् । ऊं इति । दर्शतं । अप्ऽसु । अंतः । देवासः । अग्निं । अपसि ।
स्वसॄणां ॥ ३ ॥

अवर्धयन्त्सुभगं सप्त यह्वीः श्वेतं जज्ञानमरुषं महित्वा ।
शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन्वपुष्यन् ॥ ४ ॥

शुक्रेभिरङ्गै रज आततन्वान् क्रतुं पुनानः कविभिः पवित्रैः ।
शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः ॥ ५ ॥ १३ ॥

वव्राजा सीमनदतीरदब्धा दिवो यह्वीरवसाना अनग्नाः ।
सना अत्र युवतयः सयोनीरेकं गर्भं दधिरे सप्त वाणीः ॥ ६ ॥

स्तीर्णा अस्य संहतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनाम् ।
अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची ॥ ७ ॥

बभ्राणः सूनो सहसो व्यद्यौद्दधानः शुक्रा रभसा वपूंषि ।
श्चोतन्ति धारा मधुनो घृतस्य वृषा यत्र वावृधे काव्येन ॥ ८ ॥

अवर्धयन् । सुऽभगं । सप्त । यह्वीः । श्वेतं । जज्ञानं । अरुषं । महिऽत्वा । शिशुं । न । जातं । अभि । आरुः । अश्वाः । देवासः । अग्निं । जनिमन् । वपुष्यन् ॥ ४ ॥ शुक्रेभिः । अङ्गैः । रजः । आऽततन्वान् । क्रतुं । पुनानः । कविऽभिः । पवित्रैः । शोचिः । वसानः । परि । आयुः । अपां । श्रियः । मिमीते । बृहतीः । अनूनाः ॥ ५ ॥ १३ ॥ वव्राजं । सीं । अनदतीः । अदब्धाः । दिवः । यह्वीः । अवसानाः । अनग्नाः । सनाः । अत्र । युवतयः । सऽयोनीः । एकं । गर्भं । दधिरे । सप्त । वाणीः ॥ ६ ॥ स्तीर्णाः । अस्य । संऽहतः । विश्वऽरूपाः । घृतस्य । योनौ । स्रवथे । मधूनां । अस्थुः । अत्र । धेनवः । पिन्वमानाः । मही इति । दस्मस्य । मातरा । समीची इति संऽईची ॥ ७ ॥ बभ्राणः । सूनो इति । सहसः । वि । अद्यौत् । दधानः । शुक्रा । रभसा । वपूंषि । श्चोतन्ति । धाराः । मधुनः । घृतस्य । वृषा । यत्र । ववृधे । काव्येन ॥ ८ ॥

पितुश्चिदूधर्जनुषा विवेद व्यस्य धारा असृजद्वि धेनाः।
गुहा चरन्तं सखिभिः शिवेभिर्दिवो यह्वीभिर्न गुहा बभूव ॥ ९ ॥
पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पीप्यानाः।
वृष्णे सपत्नी शुचये सबन्धू उभे अस्मै मनुष्ये३नि पाहि ॥ १० ॥ १४ ॥
उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः।
ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि स्वसॄणाम् ॥ ११ ॥
अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः सूनवे भाऋजीकः।
उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः ॥ १२ ॥
अपां गर्भं दर्शतमोषधीनां वना जजान सुभगा विरूपम्।
देवासश्चिन्मनसा सं हि जग्मुः पनिष्ठं जातं तवसं दुवस्यन् ॥ १३ ॥

पितुः। चित्। ऊधः। जनुषा। विवेद। वि। अस्य। धाराः। असृजत्। वि। धेनाः। गुहा। चरन्तं। सखिऽभिः। शिवेभिः। दिवः। यह्वीभिः। न। गुहा। बभूव ॥ ९ ॥ पितुः। च। गर्भं। जनितुः। च। बभ्रे। पूर्वीः। एकः। अधयत्। पीप्यानाः। वृष्णे। सपत्नी इति सऽपत्नी। शुचये। सबंधू इति सऽबंधू। उभे इति। अस्मै। मनुष्ये३ इति। नि। पाहि ॥ १० ॥ १४ ॥ उरौ। महान्। अनिऽबाधे। ववर्ध। आपः। अग्निं। यशसः। सं। हि। पूर्वीः। ऋतस्य। योनौ। अशयत्। दमूनाः। जामीनां। अग्निः। अपसि। स्वसॄणां ॥ ११ ॥ अक्रः। न। बभ्रिः। संऽइथे। महीनां। दिदृक्षेयः। सूनवे। भाःऽऋजीकः। उत्। उस्रियाः। जनिता। यः। जजान। अपां। गर्भः। नृऽतमः। यह्वः। अग्निः ॥ १२ ॥ अपां। गर्भं। दर्शतं। ओषधीनां। वना। जजान। सुऽभगा। विऽरूपं। देवासः। चित्। मनसा। सं। हि। जग्मुः। पनिष्ठं। जातं। तवसं। दुवस्यन् ॥ १३ ॥

बृहन्त इद्भानवो भाऋजीकमग्निं सचन्त विद्युतो न शुक्राः ।
गुहेव वृद्धं सदसि स्वे अन्तरपार ऊर्वे अमृतं दुहानाः ॥ १४ ॥
ईळे च त्वा यजमानो हविर्भिरीळे सखित्वं सुमतिं निकामः ।
देवैरवो मिमीहि सं जरित्रे रक्षा च नो दम्येभिरनीकैः ॥ १५ ॥ १५ ॥
उपक्षेतारस्तव सुप्रणीतेऽग्ने विश्वानि धन्या दधानाः ।
सुरेतसा श्रवसा तुञ्जमाना अभि ष्याम पृतनायूँरदेवान् ॥ १६ ॥
आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि काव्यानि विद्वान् ।
प्रति मर्ताँ अवासयो दमूना अनु देवान्रथिरो यासि साधन् ॥ १७ ॥

बृहंतः । इत् । भानवः । भाःऽऋजीकं । अग्निं । सचंत । विऽद्युतः । न । शुक्राः ।
गुहाऽइव । वृद्धं । सदसि । स्वे । अंतः । अपारे । ऊर्वे । अमृतं । दुहानाः ॥ १४ ॥
ईळे । च । त्वा । यजमानः । हविःऽभिः । ईळे । सखिऽत्वं । सुऽमतिं । निऽकामः ।
देवैः । अवः । मिमीहि । सं । जरित्रे । रक्ष । च । नः । दम्येभिः । अनीकैः ॥१५॥१५॥
उपऽक्षेतारः । तव । सुऽप्रनीते । अग्ने । विश्वानि । धन्या । दधानाः । सुऽरेतसा ।
श्रवसा । तुंजमानाः । अभि । स्याम । पृतनाऽयून् । अदेवान् ॥ १६ ॥ आ ।
देवानां । अभवः । केतुः । अग्ने । मंद्रः । विश्वानि । काव्यानि । विद्वान् । प्रति ।
मर्तान् । अवासयः । दमूनाः । अनु । देवान् । रथिरः । यासि । साधन् ॥ १७ ॥

नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन् ।
घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान् ॥ १८ ॥
आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ।
अस्मे रयिं बहुलं सन्तरुत्रं सुवाचं भागं यशसं कृधी नः ॥ १९ ॥
एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचं ।
महान्ति वृष्णे सवना कृतेमा जन्मञ्जन्मन् निहितो जातवेदाः ॥ २० ॥
जन्मञ्जन्मन् निहितो जातवेदा विश्वामित्रेभिरिध्यते अजस्रः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ २१ ॥

नि । दुरोणे । अमृतः । मर्त्यानां । राजा । ससाद । विदथानि । साधन् ।
घृतऽप्रतीकः । उर्विया । वि । अद्यौत् । अग्निः । विश्वानि । काव्यानि । विद्वान् ॥ १८ ॥
आ । नः । गहि । सख्येभिः । शिवेभिः । महान् । महीभिः । ऊतिऽभिः । सरण्यन् ।
अस्मे इति । रयिं । बहुलं । संऽतरुत्रं । सुऽवाचं । भागं । यशसं । कृधि । नः ॥ १९ ॥
एता । ते । अग्ने । जनिम । सनानि । प्र । पूर्व्याय । नूतनानि । वोचं । महान्ति ।
वृष्णे । सवना । कृता । इमा । जन्मन्ऽजन्मन् । निऽहितः । जातऽवेदाः ॥ २० ॥
जन्मन्ऽजन्मन् । निऽहितः । जातऽवेदाः । विश्वामित्रेभिः । इध्यते । अजस्रः । तस्य ।
वयं । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ॥ २१ ॥

इमं यज्ञं संहसावन् त्वं नो देवत्रा धेहि सुक्रतो ररांणः ।
प्र यंसि होतर्बृहतीरिषो नोऽग्ने महि द्रविणमा यंजस्व ॥ २२ ॥
इळांमग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवंमानाय साध ।
स्यान्नः सूनुस्तनंयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ २३ ॥ १६ ॥

॥ २ ॥ ऋषिः—विश्वामित्रः । देवता—अग्निः । छन्दः—जगती ॥

॥ २ ॥ वैश्वानरायं धिषणांमृतावृधें घृतं न पूतमग्नयें जनामसि ।
द्विता होतांरं मनुंषश्च वाघतों धिया रथं न कुलिंशः समृंण्वति ॥ १ ॥
स रोंचयज्जनुषा रोदंसी उभे स मात्रोरंभवत्पुत्र ईड्यः ।
हव्यवाळग्निरजरश्चनोंहितो दूळभों विशामतिथिर्विभावंसुः ॥ २ ॥

इमं । यज्ञं । सहसाऽवन् । त्वं । नः । देवऽत्रा । धेहि । सुक्रतो इतिं सुऽक्रतो । ररांणः । प्र । यंसि । होतः । बृहतीः । इषः । नः । अग्ने । महिं । द्रविंणं । आ । यजस्व ॥ २२ ॥ इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवंमानाय । साध । स्यात् । नः । सूनुः । तनंयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इतिं ॥ २३ ॥ १६ ॥

वैश्वानरायं । धिषणां । ऋतऽवृधें । घृतं । न । पूतं । अग्नयें । जनामसि । द्विता । होतांरं । मनुंषः । च । वाघतः । धिया । रथं । न । कुलिंशः । सं । ऋण्वति ॥ १ ॥ सः । रोचयत् । जनुषा । रोदंसी इतिं । उभे इतिं । सः । मात्रोः । अभवत् । पुत्रः । ईड्यः । हव्यऽवाट् । अग्निः । अजरः । चनंःऽहितः । दुःऽदभंः । विशां । अतिंथिः । विभाऽवंसुः ॥ २ ॥

क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जनयन्त चित्तिभिः ।
रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यन्नुप ब्रुवे ॥ ३ ॥
आ मन्द्रस्य सनिष्यन्तो वरेण्यं वृणीमहे अह्रयं वाजमृग्मियम् ।
रातिं भृगूणामुशिजं कविक्रतुमग्निं राजन्तं दिव्येन शोचिषा ॥ ४ ॥
अग्निं सुम्नाय दधिरे पुरो जना वाजश्रवसमिह वृक्तबर्हिषः ।
यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसाम् ॥ ५ ॥ १७ ॥
पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तबर्हिषो नरः ।
अग्ने दुव इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः ॥ ६ ॥

क्रत्वा । दक्षस्य । तरुषः । विऽधर्मणि । देवासः । अग्निं । जनयंत । चित्तिऽभिः । रुरुचानं । भानुना । ज्योतिषा । महां । अत्यं । न । वाजं । सनिष्यन् । उप । ब्रुवे ॥ ३ ॥ आ । मंद्रस्य । सनिष्यंतः । वरेण्यं । वृणीमहे । अह्रयं । वाजं । ऋग्मियं । रातिं । भृगूणां । उशिजं । कविऽक्रतुं । अग्निं । राजंतं । दिव्येन । शोचिषा ॥ ४ ॥ अग्निं । सुम्नाय । दधिरे । पुरः । जनाः । वाजऽश्रवसं । इह । वृक्तऽबर्हिषः । यतऽस्रुचः । सुऽरुचं । विश्वऽदेव्यं । रुद्रं । यज्ञानां । साधत्ऽइष्टिं । अपसां ॥ ५ ॥ १७ ॥ पावकऽशोचे । तव । हि । क्षयं । परि । होतः । यज्ञेषु । वृक्तऽबर्हिषः । नरः । अग्ने । दुवः । इच्छमानासः । आप्यं । उप । आसते । द्रविणं । धेहि । तेभ्यः ॥ ६ ॥

आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन् ।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥ ७ ॥
नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसम् ।
रथीर्ऋतस्य बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहितः ॥ ८ ॥
तिस्रो यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः ।
तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः ॥ ९ ॥
विशां कविं विश्पतिं मानुषीरिषः सं सीमकृण्वन्त्स्वधितिं न तेजसे ।
स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु दीधरत् ॥ १० ॥ १८ ॥
स जिन्वते जठरेषु प्रजज्ञिवान्वृषा चित्रेषु नानदन्न सिंहः ।
वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे ॥ ११ ॥

आ । रोदसी इति । अपृणत् । आ । स्वः । महत् । जातं । यत् । एनं । अपसः । अधारयन् । सः । अध्वराय । परि । नीयते । कविः । अत्यः । न । वाजऽसातये । चनःऽहितः ॥ ७ ॥ नमस्यत । हव्यऽदातिं । सुऽअध्वरं । दुवस्यत । दम्यं । जातऽवेदसं । रथीः । ऋतस्य । बृहतः । विऽचर्षणिः । अग्निः । देवानां । अभवत् । पुरःऽहितः ॥ ८ ॥ तिस्रः । यह्वस्य । संऽइधः । परिऽज्मनः । अग्नेः । अपुनन् । उशिजः । अमृत्यवः । तासां । एकां । अदधुः । मर्त्ये । भुजं । ऊं इति । लोकं । ऊं इति । द्वे इति । उप । जामिं । ईयतुः ॥ ९ ॥ विशां । कविं । विश्पतिं । मानुषीः । इषः । सं । सीं । अकृण्वन् । स्वऽधितिं । न । तेजसे । सः । उत्ऽवतः । निऽवतः । याति । वेविषत् । सः । गर्भं । एषु । भुवनेषु । दीधरत् ॥ १० ॥ १८ ॥ सः । जिन्वते । जठरेषु । प्रजज्ञिऽवान् । वृषा । चित्रेषु । नानदत् । न । सिंहः । वैश्वानरः । पृथुऽपाजाः । अमर्त्यः । वसु । रत्ना । दयमानः । वि । दाशुषे ॥ ११ ॥

वैश्वानरः प्रत्नथा नाकमारुहद्दिवस्पृष्ठं भन्दमानः सुमन्मभिः ।
स पूर्ववज्जनयञ्जन्तवे धनं समानमज्मं पर्येति जागृविः ॥ १२ ॥
ऋतावानं यज्ञियं विप्रमुक्थ्यमा यं दधे मातरिश्वा दिवि क्षयम् ।
तं चित्रयामं हरिकेशमीमहे सुदीतिमग्निं सुविताय नव्यसे ॥ १३ ॥
शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधम् ।
अग्निं मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत् ॥ १४ ॥
मन्द्रं होतारं शुचिमद्वयाविनं दमूनसमुक्थ्यं विश्वचर्षणिम् ।
रथं न चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे ॥ १५ ॥ १९ ॥

वैश्वानरः । प्रत्नऽथा । नाकं । आ । अरुहत् । दिवः । पृष्ठं । भंदमानः । सुमन्मऽभिः । सः । पूर्वऽवत् । जनयन् । जंतवे । धनं । समानं । अज्मं । परि । एति । जागृविः ॥ १२ ॥ ऋतऽवानं । यज्ञियं । विप्रं । उक्थ्यं । आ । यं । दधे । मातरिश्वा । दिवि । क्षयं । तं । चित्रऽयामं । हरिऽकेशं । ईमहे । सुऽदीतिं । अग्निं । सुविताय । नव्यसे ॥ १३ ॥ शुचिं । न । यामन् । इषिरं । स्वःऽदृशं । केतुं । दिवः । रोचनऽस्थां । उषःऽबुधं । अग्निं । मूर्धानं । दिवः । अप्रतिऽस्कुतं । तं । ईमहे । नमसा । वाजिनं । बृहत् ॥ १४ ॥ मंद्रं । होतारं । शुचिं । अद्वयाविनं । दमूनसं । उक्थ्यं । विश्वऽचर्षणिं । रथं । न । चित्रं । वपुषाय । दर्शतं । मनुःऽहितं । सदं । इत् । रायः । ईमहे ॥ १५ ॥ १९ ॥

॥ ३ ॥ ऋषिः–विश्वामित्रः । देवता–अग्निः । छन्दः–जगती ॥

॥ ३ ॥ वैश्वानराय पृथुपाजसे विपो रत्ना विधन्त धरुणेषु गातवे ।
अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत् ॥ १ ॥
अन्तर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ।
क्षयं बृहन्तं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥ २ ॥
केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः ।
अपांसि यस्मिन्नधि सन्दधुर्गिरस्तस्मिन्त्सुम्नानि यजमान आ चके ॥ ३ ॥
पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघताम् ।
आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः ॥ ४ ॥
चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम् ।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ॥ ५ ॥ २० ॥

वैश्वानराय । पृथुऽपाजसे । विपः । रत्ना । विधंत । धरुणेषु । गातवे । अग्निः । हि । देवान् । अमृतः । दुवस्यति । अथ । धर्माणि । सनता । न । दूदुषत् ॥ १ ॥ अंतः । दूतः । रोदसी इति । दस्मः । ईयते । होता । निऽसत्तः । मनुषः । पुरःऽहितः । क्षयं । बृहंतं । परि । भूषति । द्युऽभिः । देवेभिः । अग्निः । इषितः । धियाऽवसुः ॥ २ ॥ केतुं । यज्ञानां । विदथस्य । साधनं । विप्रासः । अग्निं । महयंत । चित्तिऽभिः । अपांसि । यस्मिन् । अधि । संऽदधुः । गिरः । तस्मिन् । सुम्नानि । यजमानः । आ । चके ॥ ३ ॥ पिता । यज्ञानां । असुरः । विपःऽचितां । विऽमानं । अग्निः । वयुनं । च । वाघतां । आ । विवेश । रोदसी इति । भूरिऽवर्पसा । पुरुऽप्रियः । भंदते । धामऽभिः । कविः ॥ ४ ॥ चंद्रं । अग्निं । चंद्रऽरथं । हरिऽव्रतं । वैश्वानरं । अप्सुऽसदं । स्वःऽविदं । विऽगाहं । तूर्णिं । तविषीभिः । आऽवृतं । भूर्णिं । देवासः । इह । सुऽश्रियं । दधुः ॥ ५ ॥ २० ॥

अग्निर्देवेभिर्मनुषश्च जन्तुभिस्तन्वानो यज्ञं पुरुपेशसं धिया ।
रथीरन्तरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ॥ ६ ॥
अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः ।
वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपाम् ॥ ७ ॥
विश्पतिं यह्वमतिथिं नरः सदा यन्तारं धीनामुशिजं च वाघताम् ।
अध्वराणां चेतनं जातवेदसं प्र शंसन्ति नमसा जूतिभिर्वृधे ॥ ८ ॥
विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः ।
तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः ॥ ९ ॥
वैश्वानर तव धामान्या चके येभिः स्वर्विदभवो विचक्षण ।
जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना ॥ १० ॥

अग्निः । देवेभिः । मनुषः । च । जंतुऽभिः । तन्वानः । यज्ञं । पुरुऽपेशसं । धिया । रथीः । अंतः । ईयते । साधदिष्टिऽभिः । जीरः । दमूनाः । अभिशस्तिऽचातनः ॥६॥ अग्ने । जरस्व । सुऽअपत्ये । आयुनि । ऊर्जा । पिन्वस्व । सं । इषः । दिदीहि । नः । वयांसि । जिन्व । बृहतः । च । जागृवे । उशिक् । देवानां । असि । सुऽक्रतुः । विप्राणां ॥ ७ ॥ विश्पतिं । यह्वं । अतिथिं । नरः । सदा । यंतारं । धीनां । उशिजं । च । वाघतां । अध्वराणां । चेतनं । जातऽवेदसं । प्र । शंसंति । नमसा । जूतिऽभिः । वृधे ॥ ८ ॥ विभाऽवा । देवः । सुऽरणः । परि । क्षितीः । अग्निः । बभूव । शवसा । सुमत्ऽरथः । तस्य । व्रतानि । भूरिऽपोषिणः । वयं । उप । भूषेम । दमे । आ । सुवृक्तिऽभिः ॥ ९ ॥ वैश्वानर । तव । धामानि । आ । चके । येभिः । स्वःऽवित् । अभवः । विऽचक्षण । जातः । आ । अपृणः । भुवनानि । रोदसी इति । अग्ने । ता । विश्वा । परिऽभूः । असि । त्मना ॥ १० ॥

वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः ।
उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥ ११ ॥ २१ ॥

॥ ४ ॥ ऋषिः—विश्वामित्रः । देवता—आप्रियः । छन्दः—त्रिष्टुप् ॥

॥४॥ समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः ।
आ देव देवान्यजथाय वक्षि सखा सखीन्त्सुमना यक्ष्यग्ने ॥ १ ॥
यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः ।
सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद्घृतयोनिं विधन्तम् ॥ २ ॥
प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै ।
अच्छा नमोभिर्वृषभं वन्दध्यै स देवान्यक्षदिषितो यजीयान् ॥ ३ ॥
ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि ।
दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः ॥ ४ ॥

वैश्वानरस्य । दंसनाभ्यः । बृहत् । अरिणात् । एकः । सुऽअपस्यया । कविः । उभा । पितरा । महयन् । अजायत । अग्निः । द्यावापृथिवी इति । भूरिऽरेतसा ॥ ११ ॥ २१ ॥

समित्ऽसमित् । सुऽमनाः । बोधि । अस्मे इति । शुचाऽशुचा । सुऽमतिं । रासि । वस्वः । आ । देव । देवान् । यजथाय । वक्षि । सखा । सखीन् । सुऽमनाः । यक्षि । अग्ने ॥ १ ॥ यं । देवासः । त्रिः । अहन् । आऽयजंते । दिवेऽदिवे । वरुणः । मित्रः । अग्निः । सः । इमं । यज्ञं । मधुऽमंतं । कृधि । नः । तनूऽनपात् । घृतऽयोनिं । विधंतं ॥ २ ॥ प्र । दीधितिः । विश्वऽवारा । जिगाति । होतारं । इळः । प्रथमं । यजध्यै । अच्छ । नमःऽभिः । वृषभं । वंदध्यै । सः । देवान् । यक्षत् । इषितः । यजीयान् ॥ ३ ॥ ऊर्ध्वः । वां । गातुः । अध्वरे । अकारि । ऊर्ध्वा । शोचींषि । प्रऽस्थिता । रजांसि । दिवः । वा । नाभा । नि । असादि । होता । स्तृणीमहि । देवऽव्यचाः । वि । बर्हिः ॥ ४ ॥

सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वं प्रति यन्नृतेन ।
नृपेशसो विदथेषु प्र जाता अभीइमं यज्ञं वि चरन्त पूर्वीः ॥ ५ ॥ २२ ॥
आ भन्दमाने उषसा उपाके उत स्मयेते तन्वाइविरूपे ।
यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः ॥ ६ ॥
दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥ ७ ॥
आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु ॥ ८ ॥
तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ९ ॥

सप्त । होत्राणि । मनसा । वृणानाः । इन्वंतः । विश्वं । प्रति । यन् । ऋतेन । नृऽपेशसः । विदथेषु । प्र । जाताः । अभि । इमं । यज्ञं । वि । चरंत । पूर्वीः ॥ ५ ॥ ॥ २२ ॥ आ । भंदमाने इति । उषसा । उपाके इति । उत । स्मयेते इति । तन्वा । विरूपे इति विऽरूपे । यथा । नः । मित्रः । वरुणः । जुजोषत् । इंद्रः । मरुत्वान् । उत । वा । महःऽभिः ॥ ६ ॥ दैव्या । होतारा । प्रथमा । नि । ऋंजे । सप्त । पृक्षासः । स्वधया । मदंति । ऋतं । शंसंतः । ऋतं । इत् । ते । आहुः । अनु । व्रतं । व्रतऽपाः । दीध्यानाः ॥ ७ ॥ आ । भारती । भारतीभिः । सऽजोषाः । इळा । देवैः । मनुष्येभिः । अग्निः । सरस्वती । सारस्वतेभिः । अर्वाक् । तिस्रः । देवीः । बर्हिः । आ । इदं । सदंतु ॥ ८ ॥ तत् । नः । तुरीपं । अध । पोषयित्नु । देव । त्वष्टः । वि । रराणः । स्यस्वेति स्यस्व । यतः । वीरः । कर्मण्यः । सुऽदक्षः । युक्तऽग्रावा । जायते । देवऽकामः ॥ ९ ॥

वन॑स्पतेऽव॑ सृजोप॑ दे॒वान॒ग्निर्ह॒विः श॑मि॒ता सू॑दयाति ।
सेदु॒ होता॑ स॒त्यत॑रो यजाति॒ यथा॑ दे॒वानां॒ जनि॑मानि॒ वेद॑ ॥ १० ॥
आ या॑ह्यग्ने समिधा॒नो अ॒र्वाङिन्द्रे॑ण दे॒वैः स॒रथं॑ तु॒रेभिः॑ ।
ब॒र्हिर्न॑ आस्ता॒मदि॑तिः सुपु॒त्रा स्वाहा॑ दे॒वा अ॒मृता॑ मादयन्ताम् ॥११॥२३॥

॥ ५ ॥ ऋषिः—विश्वामित्रः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ ५ ॥ प्रत्य॒ग्निरु॒षस॒श्चेकि॑ता॒नोऽबो॑धि॒ विप्रः॑ पद॒वीः क॑वी॒नाम् ।
पृ॒थु॒पाजा॑ देव॒यद्भिः॒ समि॑द्धोऽप॒ द्वारा॒ तम॑सो॒ वह्नि॑रावः ॥ १ ॥
प्रेद्व॒ग्निर्वा॑वृधे॒ स्तोमे॑भिर्गी॒र्भिः स्तो॑तॄ॒णां न॑म॒स्य॑ उ॒क्थैः ।
पू॒र्वीरृ॒तस्य॑ सं॒दृश॑श्चका॒नः सं दू॒तो अ॑द्यौदु॒षसो॑ वि॒रोके॑ ॥ २ ॥
अधा॑य्य॒ग्निर्मानु॑षीषु वि॒क्ष्व१॒॑पां गर्भो॑ मि॒त्र ऋ॒तेन॒ साध॑न् ।
आ ह॑र्य॒तो य॑ज॒तः सान्व॑स्था॒दभू॑दु॒ विप्रो॒ हव्यो॑ मती॒नाम् ॥ ३ ॥

वन॑स्पते । अव॑ । सृ॒ज॒ । उप॑ । दे॒वान् । अ॒ग्निः । ह॒विः । श॒मि॒ता । सू॒द॒या॒ति॒ । सः । इत् । ऊँ इति॑ । होता॑ । स॒त्यऽत॑रः । य॒जा॒ति॒ । यथा॑ । दे॒वानां॑ । जनि॑मानि । वेद॑ ॥ १० ॥ आ । या॒हि॒ । अ॒ग्ने॒ । स॒म्ऽइ॒धा॒नः । अ॒र्वाङ् । इन्द्रे॑ण । दे॒वैः । स॒ऽरथं॑ । तु॒रेभिः॑ । ब॒र्हिः । नः॒ । आ॒स्तां॒ । अदि॑तिः । सु॒ऽपु॒त्रा । स्वाहा॑ । दे॒वाः । अ॒मृताः॑ । मा॒द॒य॒न्तां॒ ॥ ११ ॥ २३ ॥

प्रति॑ । अ॒ग्निः । उ॒षसः॑ । चेकि॑तानः । अबो॑धि । विप्रः॑ । प॒द॒ऽवीः । क॒वी॒नां । पृ॒थु॒ऽपाजाः॑ । दे॒व॒यत्ऽभिः॑ । सम्ऽइ॑द्धः । अप॑ । द्वारा॑ । तम॑सः । वह्निः॑ । आव॒रित्या॑वः ॥ १ ॥ प्र । इत् । ऊँ इति॑ । अ॒ग्निः । व॒वृ॒धे॒ । स्तोमे॑भिः । गीः॒ऽभिः । स्तो॒तॄ॒णां । न॒म॒स्यः॑ । उ॒क्थैः । पू॒र्वीः । ऋ॒तस्य॑ । स॒म्ऽदृशः॑ । च॒का॒नः । सं । दू॒तः । अ॒द्यौ॒त् । उ॒षसः॑ । वि॒ऽरोके॑ ॥ २ ॥ अधा॑यि । अ॒ग्निः । मानु॑षीषु । वि॒क्षु । अ॒पां । गर्भः॑ । मि॒त्रः । ऋ॒तेन॑ । साध॑न् । आ । ह॒र्य॒तः । य॒ज॒तः । सानु॑ । अ॒स्था॒त् । अभू॑त् । ऊँ इति॑ । विप्रः॑ । हव्यः॑ । म॒ती॒नां ॥ ३ ॥

मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः ।
मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम् ॥ ४ ॥
पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य ।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥ ५ ॥ २४ ॥
ऋभुश्चक्र ईळ्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ।
ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी रक्षत्यप्रयुच्छन् ॥ ६ ॥
आ योनिमग्निर्घृतवन्तमस्थात्पृथुप्रगाणमुशन्तमुशानः ।
दीद्यानः शुचिरृष्वः पावकः पुनःपुनर्मातरा नव्यसी कः ॥ ७ ॥
सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन ।
आप इव प्रवता शुम्भमाना उरुष्यदग्निः पित्रोरुपस्थे ॥ ८ ॥

मित्रः । अग्निः । भवति । यत् । सम्ऽइद्धः । मित्रः । होता । वरुणः । जातऽवेदाः ।
मित्रः । अध्वर्युः । इषिरः । दमूनाः । मित्रः । सिन्धूनां । उत । पर्वतानां ॥ ४ ॥
पाति । प्रियं । रिपः । अग्रं । पदं । वेः । पाति । यह्वः । चरणं । सूर्यस्य । पाति ।
नाभा । सप्तऽशीर्षाणं । अग्निः । पाति । देवानां । उपऽमादं । ऋष्वः ॥ ५ ॥ २४ ॥
ऋभुः । चक्रे । ईळ्यं । चारु । नाम । विश्वानि । देवः । वयुनानि । विद्वान् । ससस्य ।
चर्म । घृतऽवत् । पदं । वेः । तत् । इत् । अग्निः । रक्षति । अप्रऽयुच्छन् ॥ ६ ॥
आ । योनिं । अग्निः । घृतऽवन्तं । अस्थात् । पृथुऽप्रगाणं । उशन्तं । उशानः ।
दीद्यानः । शुचिः । ऋष्वः । पावकः । पुनःऽपुनः । मातरा । नव्यसी इति ।
करिति कः ॥ ७ ॥ सद्यः । जातः । ओषधीभिः । ववक्षे । यदि । वर्धन्ति । प्रऽस्वः ।
घृतेन । आपःऽइव । प्रऽवता । शुम्भमानाः । उरुष्यत् । अग्निः । पित्रोः । उपऽस्थे ॥ ८ ॥

उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः ।
मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥ ९ ॥
उदस्तम्भीत्समिधा नाकमृष्वोऽग्निर्भवन्नुत्तमो रोचनानाम् ।
यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे ॥ १० ॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ११ ॥ २५ ॥

॥ ६ ॥ ऋषिः-विश्वामित्रः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ ६ ॥ प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः ।
दक्षिणावाड्वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची ॥ १ ॥
आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो ।
दिवश्चिदग्ने महिना पृथिव्या वच्यन्तां ते वह्नयः सप्तजिह्वाः ॥ २ ॥

उत् । ऊँ इति । स्तुतः । सम्ऽइधा । यह्वः । अद्यौत् । वर्ष्मन् । दिवः । अधि । नाभा । पृथिव्याः । मित्रः । अग्निः । ईड्यः । मातरिश्वा । आ । दूतः । वक्षत् । यजथाय । देवान् ॥ ९ ॥ उत् । अस्तंभीत् । सम्ऽइधा । नाकं । ऋष्वः । अग्निः । भवन् । उत्ऽतमः । रोचनानां । यदि । भृगुऽभ्यः । परि । मातरिश्वा । गुहा । संतं । हव्यऽवाहं । सम्ऽईधे ॥ १० ॥ इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ११ ॥ २५ ॥

प्र । कारवः । मनना । वच्यमानाः । देवद्रीचीं । नयत । देवऽयंतः । दक्षिणाऽवाट् । वाजिनी । प्राची । एति । हविः । भरंती । अग्नये । घृताची ॥ १ ॥ आ । रोदसी इति । अपृणाः । जायमानः । उत । प्र । रिक्थाः । अध । नु । प्रयज्यो इति प्रऽयज्यो । दिवः । चित् । अग्ने । महिना । पृथिव्याः । वच्यंतां । ते । वह्नयः । सप्तऽजिह्वाः ॥ २ ॥

द्यौश्च त्वा पृथिवी यज्ञियासो नि होतारं सादयन्ते दमाय ।
यदी विशो मानुषीर्देवयन्तीः प्रयस्वतीरीळते शुक्रमर्चिः ॥ ३ ॥
महान्त्सधस्थे ध्रुव आ निषत्तोऽन्तर्द्यावा माहिने हर्यमाणः ।
आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ॥ ४ ॥
व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ ।
त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम् ॥ ५ ॥ २६ ॥
ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व ।
अथा वह देवान्देव विश्वान्त्स्वध्वरा कृणुहि जातवेदः ॥ ६ ॥
दिवश्चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः ।
अपो यदग्न उशधग्वनेषु होतुर्मन्द्रस्य पनयन्त देवाः ॥ ७ ॥

द्यौः । च । त्वा । पृथिवी । यज्ञियासः । नि । होतारं । सादयंते । दमाय । यदि । विशः । मानुषीः । देवऽयंतीः । प्रयस्वतीः । ईळंते । शुक्रं । अर्चिः ॥ ३ ॥ महान् । सधऽस्थे । ध्रुवः । आ । निऽसत्तः । अंतः । द्यावा । माहिने इति । हर्यमाणः । आस्क्रे इति । सपत्नी इति सऽपत्नी । अजरे इति । अमृक्ते इति । सबर्दुघे इति सबःऽदुघे । उरुऽगायस्य । धेनू इति ॥ ४ ॥ व्रता । ते । अग्ने । महतः । महानि । तव । क्रत्वा । रोदसी इति । आ । ततंथ । त्वं । दूतः । अभवः । जायमानः । त्वं । नेता । वृषभ । चर्षणीनां ॥ ५ ॥ २६ ॥ ऋतस्य । वा । केशिना । योग्याभिः । घृतऽस्नुवा । रोहिता । धुरि । धिष्व । अथ । आ । वह । देवान् । देव । विश्वान् । सुऽअध्वरा । कृणुहि । जातऽवेदः ॥ ६ ॥ दिवः । चित् । आ । ते । रुचयंत । रोकाः । उषः । विऽभातीः । अनु । भासि । पूर्वीः । अपः । यत् । अग्ने । उशधक् । वनेषु । होतुः । मंद्रस्य । पनयंत । देवाः ॥ ७ ॥

उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः ।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ॥ ८ ॥
ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः ।
पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ॥ ९ ॥
स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः ।
प्राची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये ॥ १० ॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ११ ॥ २७ ॥ ८ ॥ २ ॥

उरौ । वा । ये । अंतरिक्षे । मदंति । दिवः । वा । ये । रोचने । संति । देवाः । ऊमाः । वा । ये । सुऽहवासः । यजत्राः । आऽयेमिरे । रथ्यः । अग्ने । अश्वाः ॥ ८ ॥ आ । एभिः । अग्ने । सऽरथं । याहि । अर्वाङ् । नानाऽरथं । वा । विऽभवः । हि । अश्वाः । पत्नीऽवतः । त्रिंशतं । त्रीन् । च । देवान् । अनुऽस्वधं । आ । वह । मादयस्व ॥ ९ ॥ सः । होता । यस्य । रोदसी इति । चित् । उर्वी इति । यज्ञंऽयज्ञं । अभि । वृधे । गृणीतः । प्राची इति । अध्वराऽइव । तस्थतुः । सुमेके इति सुऽमेके । ऋतवरी इत्यृतऽवरी । ऋतऽजातस्य । सत्ये इति ॥ १० ॥ इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ११ ॥ २७ ॥ ८ ॥ २ ॥

॥ इति द्वितीयाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥

अध्याय ८.

सूक्त ३७.

॥ ऋषि-गृत्समद । देवता-द्रविणोद ॥

[हे **द्रविणोदा**, हे अग्नि] आप होताके पात्रमें सोमरसका आकण्ठ प्राशन करके प्रसन्न हूजिये । हे अध्वर्युजन, केवल तृप्ति होनेतक अर्पण किये हुवे सोमरसको वे चाहते हैं । अतः इस **अग्निको** अर्पण करनेके लिये सोमरसको ले आइये । (हे **द्रविणोदा**,) आप बहोत उदार हैं और इस मधुर सोमरसके ऊपर आपका अतीव प्रेम है, इस लिये भक्तोंको सामर्थ्यरूप धन अर्पण करनेवाले हे **अग्निदेव**, आप हरएक यज्ञसमयपर इधर आकर होताके यज्ञपात्रमें सोमरसका प्राशन कीजिये । १

जिसको मैं आगे बुलाता था उसको आजभी बुलाता हूं । यदि कोई देव स्मरण करनेके योग्य हो तो यही अति उदार देव है । वह सर्वोका स्वामी है । इस लिये, (भक्तोंको) सामर्थ्यरूप धन अर्पण करनेवाले हे **अग्निदेव**, हरएक यज्ञसमयपर इधर आकर अध्वर्युने आपको अर्पण किये हुवे इस मधुर सोमरसका, होताके यज्ञपात्रसे प्राशन कीजिये । २

जिनको जोतकर आप सर्वत्र गमन करते हैं वे आपके ज्वालारूप घोडे पुष्ट हो । आप सब वृक्ष—वनस्पतिओंके भी स्वामी हैं । अत एव हे भगवन, भक्तोंकी किसी प्रकार हानि न होने दीजिये और उनको प्रबल कीजिये । हे धैर्यके समुद्र, हे सामर्थ्यरूप धनको अर्पण करनेवाले अग्निदेव, आप यहां आइये और हमारा उत्साह बढाइये । हरेक यज्ञसमयमें, **नेष्टा** नामक ऋत्विजके पात्रमेंही आप सोमरसका प्राशन कीजिये । ३

---

१ होत्रात् अनु जोषम (सोमस्य) अन्धसः मन्दस्व, हे अध्वर्यवः सः अग्निः पूर्णाम् आसिचम् वष्टि । (अतः) तस्मै एतं (अन्धः) भरत, गः ददः तद्वशः हि, तत हे द्रविणोदः त्वम ऋतुभिः होत्रात् सोमं पिब ।

२ यम उ पूर्व अहुवे तम् इदं हुवे, यः नाम पत्यते सः इत ददिः हव्यः । अध्वर्युभिः सोम्यं मधु प्रस्थितम (तत) हे द्रविणोद , त्वम् ऋतुभिः पोत्रात सोमं पिब ।

३ येभिः त्वं ईयसे ते ते वन्हयः मेद्यन्तु, हे वनस्पते (अग्ने) अरिष्यन त्वम् (भक्तान) वीळयस्व, हे धृष्णो द्रविणोदः, त्वम् आगूय अभिगूर्य, ऋतुभिः नेष्ट्रात् सोमं पिब ।

अग्निदेवने सोमरसका होताके पात्रसे प्राशन किया। पोता नामक ऋत्विजके भी पात्रसे उसका प्राशन कर वह तुष्ट हुवा। और नेष्टाके पात्रसेभी मधुर सोमरसका स्वीकार कर उसको आनन्द प्राप्त हुवा। अब जो चौथा यज्ञपात्र है वह निर्मल और अमरपद देनेवाला है। और सब दानशूर यजमान उससेही सोमरसका दान करते हैं। इसलिये सामर्थ्यरूपी धन देनेवाला यह अग्निदेव इस चौथे पात्रसे सोमरसका प्राशन करे। ४

आपका रथ आपके तुल्य शूरोंको बैठने योग्य है और वह बहुत वेगसे जाता है। इस लिये आज हमारी ओर आनेके उद्देशसे उसको जोड़कर शीघ्र चलिये और यहां आ पहुँच अश्वोंको मुक्त कीजिये। आपके मधुर रससे हमारे हविको पावन करिये, प्रसन्न चित्तसे यहां आइये और हे सात्त्विक धनके भाण्डार, आप इस सोमका स्वीकार कीजिये। ५

हे अग्नि, समिधोंका स्वीकार कर तुष्ट हूजिये, हविसे प्रसन्न रहिये, हितकारक और उत्कृष्ट स्तोत्रसे आनन्दका लाभ लीजिये और स्तवनोंमें सन्तोष मानिये। हे दिव्य धनके भाण्डार अग्निदेव, प्रेमपूर्ण चित्तसे आपके सर्व सामर्थ्योंके साथ आकर सब श्रेष्ठ और प्रेमी देवताओंको उचित समयपर सोमरसके हवियोंका आस्वाद कराइये। ६ (१)

सूक्त ३८.

॥ ऋषि–गृत्समद । देवता–सविता ॥

देखिये, यह देदीप्यमान सविता—यह विश्वकी प्रेरणा और निग्रह करनेवाला पवित्र देव—अखिल प्राणियोंको उत्साह देनेके लिये उदित हुवा है। उसका यह उद्योग निर्विघ्न चला है। उसीने सब देवोंके पास रत्नोंका भाण्डार रखकर जो कोई भक्त यज्ञकर्मोंपर ध्यान रखता है उसको अनुपम सौख्यका विभागी किया है। १

---

४ सः होत्रात् अपात उत पोत्रात् अमत्त, उत नेष्ट्रात् हितं प्रयः अजुषत। तुरीयं पात्रं अमृक्तं अमृतं च (भवति), (तद्) द्रविणोदाः (तस्मात् तुरीयात्) द्राविणोदसः रसं पिबतु।

(५. युवयोः यज्यं नृवाहणं रथं अद्य अर्वाञ्चं युज्याथाम् (ततः) वाम् इह विमोचनम् अस्तु। नः हवींषि मधुना पृङ्क्तम् कम् आगतम् हि, अथ हे वाजिनी वसू सोमं पिबतम्।

६ हे अग्ने इमां समिधं जोषि, आहुतिम् जोषि, ब्रह्म जोषि, ब्रह्म जोषि सुष्टुतिम् जोषि,। हे वसो, विश्वाभिः (स्व शक्तिभिः आगत्य) महः उशतः विश्वान् देवान् त्वम् उशन् ऋतुना हविः पायय।

१ स्यः देवः सविता वन्हिः, शश्वत्तम तद्पाः उद् अस्थात्। सः नूनं देवेभ्यो रत्नम् वि दधाति हि; अथ वीतिहोत्रम् स्वस्तौ आ अभजत।

विश्वका हित करनेके लिये यह हमेशा सिद्ध है । सर्वत्र फैलनेवाला किरणोंका समुदाय यही उसका हाथ है । अखिल विश्वके कल्यानके लिये इस हाथको वह बारबार बढ़ाता है । उसके आज्ञासेही पातकोंका नाश करनेका सामर्थ्य जलमें आया है और वायु अन्तरिक्षमें सञ्चार और क्रीडा करता है । २

अपने अतीव वेगवान अश्वोंको रथको जोतकर जातेही वह उनको छोड़ देता है, किन्तु इस रीतिसे जब वह रथको खड़ा करता है उस समय शीघ्रतामे चलनेवाले सब मुसाफिरोंको वह आराम करनेके लिये ठहराता है और सर्पकी तरह आवेशसे आगे दौड़नेवाले वीरोंका वेगही वह कुण्ठित करता है । रातभी सविता देवके आज्ञासे वृद्धि पाती है । ३

अन्धकाररूपी बहुत बड़ा कपडा बुनकर तैयार करनेवाले रातने जब उसको सब विश्वपर फैला दिया, उसी समय ज्ञानवान भक्तने अपना पूजनकर्म बीचमें छोड़ दिया था, किन्तु थोड़े अवसरके बाद निद्राका त्याग कर वह फेर पूजा करने लगा और इतनेमें परम तेजस्वी सविता, जिसको आराम कभी नही मिलता और जिसने सब ऋतुओंका योग्य काल निश्चित किया है, फेर उदय पाया । ४

इस गृहाग्नीका तेज यजमानोंको घरमें फैला जाता है । इतनाही नही किन्तु सब सचेतन प्राणियोंके शरीरमेंभी वह प्रवेश करता है । इसी कारण, अग्निदेवके इच्छाके अनुसार (सुखोका) जो श्रेष्ठ भाग सर्वको प्रेरणा करनेवाले देवसे उषा माताको मिला है उसी भागको वह अपने भक्तरूपी पुत्रोंको अर्पण करती है । ५ (२)

---

२ सः देवः विश्वस्य श्रुष्टये ऊर्ध्वः हि, पृथुपाणि. सः बाहुवा प्र सिसर्ति । अस्य व्रते आ आपः चित् निमृग्राः, अयं वातः चित् परिज्मन् रमते ।

३ आशुभिः चित् यान् सः (तान्) विमुचाति, (परं) नूनम् अतमानत् चित् एतोः अरीरमत् । अह्यर्षूण चित् अविष्याम् नि अयान्, सावितुः व्रतम् अनु मोकी आ अगात् ।

४ विततं (तमः) वयन्ती (तमिस्रा) तत् पुनः समव्यत् धीरः शक्म मध्या कर्तोः नि अधात् । (अचिरात् निद्रां) सहाय उदस्थात्, इदानीं अरमतिः सविता देवः यः ऋतून् वि अदर्धः सः आ अगात् च ।

५ पुर्यः प्रभव. अग्नेः शोकः (न केवलं) नाना ओकांसि किंतु विश्वम् आयुः वि तिष्ठते । (अतः) अस्य केतुम् अनु सवित्रा सुषितम् ओष्ठम् भागं माता सुनवे आ आधात् ।

जयप्राप्तिके लिये जो उत्सुक है ऐसा वीर रणमैदानपर कितनाहि दूर क्यों न गया हो तोभी लोटके आता है। इतनाही नही किन्तु सब दिन इधर उधर परिभ्रमण करनेवाले प्राणियोंका ध्यान घरपर लग जाता है। तमाम लोग अपना पुरा न हुवा काम वैसाही छोड़कर आराम करने लगते हैं और जगतको प्रेरणा करनेवाले ईश्वरके आज्ञेसेही यह सब होता है। ६

आकाशमें जो जलका सञ्चय आपने रक्खा है वह जलरहित और रेतीले प्रदेशमें निवास करनेवाले प्राणियोंको प्राप्त होता है। जङ्गलके सब वृक्षोंकोभी आपने पक्षियोंके रहनेके लिये अर्पण किये हैं। तात्पर्य, सर्वप्रेरक और तेजस्वी सविताकी आज्ञा कोई भङ्ग नहीं कर सकता। ७

प्रवासके लिये सबसे सुभीताका स्थान समुद्र है। उस समुद्रको और आकाशको यह सविता एक क्षणमें, सूर्यका अस्त होतेही, वरुणका रूप लेकर व्याप्त करता है। सब पक्षी उस समय अपने २ को रोंमे घुसते हैं और सब पशु अपने २ आश्रा. सके स्थानमें जा बैठते हैं। तात्पर्य, जगत्प्रेरक सविताजीने सबको विश्राम लेनेका स्थल निश्चित कर दिया है। ८

इसके कार्यका नाश जो इन्द्र, वरुण, मित्र, अर्यमा, और रुद्रभी नही कर सकता तो अधर्मी और दुष्ट लोग उसको क्या करेंगे? इसी कारण मैं जगत्प्रेरक और तेजस्वी सविताको नमन और उसका स्तवन करके सबके कल्याणके लिये उसको बुलाता हूं। ९

---

६ विम्यिन जिगीषु. समावर्वात, विश्रेषा चरता कामः असा अभूत्। शश्वान् लोक. विकृत अप. हित्वी आ अगात्, परं सर्वम् एतत् सवितु. देव्यस्य व्रतम अनु।

७ अप्यं भागं त्वया अप्सु हितं धन्वा अनु मृगयसः आ वि तस्थुः। त्वम् वनानि विभ्यः (अददः), अस्य सवितुः देवस्य तानि व्रतानि नकिः मिनन्ति।

८ (सः) वरुणः यात् राध्यं अप्यं योनिम् निमिषि अनिशितं जर्भुराणः (अभवत्)। विश्वः मार्तण्डः पशुश्च व्रजं आ गात्, सविता जन्मानि स्थशः वि आ अकः।

९ यस्य व्रतं (अस्य कृपात्मकः) इंद्रः न, वरुणः न, मित्रः न, अर्यमा रुद्रः वा न मिनन्ति। अरातयोपि नेति (किमु वक्तव्यम्), तं सवितारं देवं हुवं स्वस्ति नमोभिर्हुवे।

श्रेष्ठ भाग्य, मनकी एकाग्रता और स्फूर्ति इनका लाभ अपने पराक्रमसे करानेके लिए हम अतीव उत्सुक हैं। अतः सब लोगोंके स्तुतिको पात्र और दिव्य शक्तिके स्वामी सविता हमारे ऊपर कृपादृष्टि रखें। यद्यपि हमको उत्कृष्ट धनका लाभ हो या ऐश्वर्यका उपभोग मिले तोभी हम इतनाही चाहते हैं कि इस जगत्प्रेरक देवके हम प्रिय भक्त बन जायँ। १०

हे देव, आपने हमारे ऊपर किया हुवा प्रसाद हमको आकाशसे, उदकसे और पृथिवीसेभी प्राप्त हो। हे विश्वको प्रेरणा करनेवाले देव, उससे जगत्का केवल हितही होता है। आपकी हमेश स्तुति करनेवाले कवि-भक्तोंकोभी उससे एक प्रेमल मित्रकी प्राप्ति होती है। ११ (३)

सूक्त ३९

॥ ऋषि—गृत्समद। देवता—अश्विदेव॥

जैसा दो सोमपाषाणोंका ध्वनि [सोमरसको निचोडना] इसी एक उद्देशसे होता है उसी प्रकार आप दोनों एकही भक्तकी प्रशंसा करते हैं। गधिकी समान क्षुधासे पीडित पक्षी जैसे फलोंसे भरे हुवे झाडकी ओर दौडते हैं उसी प्रकार आपभी प्रेमसे भरे हुवे भक्तकी ओर बहुत त्वरासे दौडते हैं। देवताओंका स्तवन करनेवाले ब्रह्मा नामक ऋत्विज जैसे दो रहते हैं उसी प्रकार आपभी दो हैं। लोगोंके हितकी इच्छा करनेवाले मध्यस्थ जैसे दो होते हैं वैसे आपभी दोंही हैं। १

युद्धकुशल वीरके समान आप रणशूर हैं। आप भक्तकी ओर बडी प्रभात जाते हैं। आप जन्मरहित हैं और आप अपने इच्छासेही चलते हैं। जैसी सुन्दर युवतियाँ अलङ्कारोंको धारण करनेसे और भी सुन्दर दिखती हैं उस प्रकार आपकी मधुर वाणी सुन्दर है। यह सबको विदित है कि जैसी कोई स्त्रीपुरुषोंकी जोडी ईश्वरकी उपासनामें प्रवीण रहती है वैसा आप दोनोंकोभी ईश्वरके कर्तृत्वका गुह्य ज्ञान है। २

---

१० वयं भगं धियं पुरन्धिं न वाजयन्तः, तत् नराशंसः ग्नास्पतिः नः अव्याः। वामस्य आये, रयीणां संगथेऽपि सवितुर्देवस्य प्रियाः (भक्ताः) स्याम।

११ हे सवितः यत् स्तोतृभ्यः शर्म, उरुशंसाय जरित्रे आपये भवाति तद् त्वया दत्तम् काम्यम् राधः, असभ्यम् दिवः अद्भयः पृथिव्याश्च आ गात्।

१ युवां ग्रावणेव तदिदर्थं (भक्तम्) जरेथे, गध्रेव (अशमयार्दितौ पक्षिणौ) वृक्षं (उप इयेथे तथा युवां) निधिमन्तं अच्छ आ पततः। विदथे उक्थशासा ब्रह्माणेव अथवा जन्या दूतेव स्तः, पुरुत्रा हव्या (भवथा)।

२ रथ्या वीरेव प्रातर्यावाना, आजा इव (युवां) यमा वरम् आसचेथे। तन्वा शुंभमाने मेने इव युवां शुभमाने भवथः, दंपतीव युवा क्रतुविदेति जनेषु (प्रसिद्धौ)।

सींगोंकी तरह आप पहले हमारी ओर (अपनी दृष्टि रखकर) आइये । खुरोंके समान वेगसे दौडते २ आप हमारी ओर आइये । हे तेजस्वी आश्विनों, हे पराक्रमी देव, चक्रवाक पक्षीओंकी तरह या दो पराक्रमी पुरुषोंके समान आप हरदिन प्रभातसमय हमारी ओर आइये । ३

जैसी नाव लोगोंको किनारेके पास ले जाता है उस प्रकार आप हमको दुःखोंके पार ले आइये । जिसका दोनों तरफका जोखड, दोनों तरफका चाक और दोनों तरफका दूसराभी सामान अच्छा है ऐसे रथके समान हमको सङ्कटोंके पार ले आइये । आपकी हानि होनेका कभी सम्भव नही है। इस लिये आप जागृत रहकर हमानी कुत्तेके समान हमको बचाइये । कवचकी तरह सब प्रकारकी दुर्बलतासे हमारी रक्षा कीजिये। ४

वायुके समान आपको कभी क्षीणता नही आती । नदीओंके समान आपका गमन शीघ्र है और जिनकी शक्ति क्षीण हुई नही ऐसे आंखोंके समान आपकी जोडी अभंग है। इस लिये हमारी ओर आइये । जैसे शरीरके हाथ पांव अवश्य हैं उस प्रकार आपभी हमको बहोत सुख देनेवाले हैं । अतः इच्छा करनेके लायक धनकी ओर हमको ले आइये । ५ (५)

जैसे हमारे होंट हमारे लिये मधुर बात करते हैं उस प्रकार आप भी हमारे साथ मीठी बात कीजिये । जननीके दो स्तनोंके समान हमको दुग्ध पिलाइये, इस उद्देशसे कि हम अपना आयुष्य आनन्दमें ले जायें । शरीरमें जैसा नाक मुख्य है वैसे हमारी रक्षा करनेमें आप प्रधान हैं । इस लिये जैसे हमारे कान हमारा शब्द तत्परतासे सुनेंगे वैसे आपभी हमारा शब्द अच्छी तरह सुनिये । ६

---

३ (अश्विनौ) शृंगेव प्रथमा नः अर्वाक् आ गन्तम्, शफाविव तरोभिः जर्भुराणा आगतं । हे उस्रा हे शक्रा, चक्रवाकाविव, अथवा रथ्याविव प्रतिवस्तोः अर्वाञ्चा यातम् ।

४ नावेव नः पारयतं, (अश्वस्य रथस्य) युगेव, नभ्येव, उपधीव, प्रधीव नः पारयतम् । अरिषण्या युवा श्वानेव नः तनूनां पातम्, कृकलेव अस्मान् विस्रसः पातम ।

५ युवां वातेव अजुर्या, नद्येव रीतिः, चक्षुषा अक्षी इव अर्वाक् आ यातम् । हस्ताविव तन्वे शंभविष्ठा युवां पदेव नः वस्वः अच्छ नयतम् ।

६ ओष्ठाविव मधु वदन्ता (भवतः) स्तनाविव जीवसे नः पिप्यतम् । नासेव नः तन्वः रक्षितारा (भवतः), कर्णाविव च अस्मे सुश्रुता भूतम् ।

हमको ऐसा उत्कृष्ट सामर्थ्य दीजिये कि जाणों आपही हमारे हाथ हैं। सूखे घासके समान हमारे पातकोंका नाश कीजिये। हे अश्विदेवो, हमारी स्तुति आपमें रममाण हो गई है इस लिये जैसे पत्थरपर छुरीको धार लगाते हैं उस प्रकार हमारे स्तुतिको तीक्ष्णता देके उसको उत्कृष्ट बनाइये। ७

हे अश्विदेवो, हम गृत्समद ऋषिओंने आपका महिमा बढानेवाली और आपको अतीव आनन्द देनेवाली स्तुति की है। इस लिये, हे वीरो, आप प्रसन्न होके यहां आइये और हमारे मित्रगणसमेत यज्ञसभामें आपके यशाका वर्णन करने दीजिये। ८ (५)

सूक्त ४०

॥ ऋषि-गृत्समद । देवता-सोमापूषण ॥

हे सोम, सृष्टिके पोषण करनेवाले हे देव, आप दिव्य सम्पत्तिके, आकाशके और इस भूमिकेभी पिता है। सर्व भुवनोंकी रक्षा करनेवाले आप अचानक प्रकट हुवे। सब देवताओंने ऐसी गवाही दी है कि अमर्त्यपनका प्रधान—तत्त्व आपही हैं। १

ये दोनों देव प्रकट होतेंही सब देवताओंको आनन्द प्राप्त हुवा। क्यों कि सर्व लोगोंको अप्रिय होनेवाले अन्धकारका उन्होंने नाश किया। सोम और पूषा इन दोन देवोंके लिये, यद्यपि धेनुओंकी वाढ पूर्ण नही हुई थी तोभी इन्द्रने उनके शरीरमें सफेद और मधुर दूध निर्माण किया। २

---

७ नः हस्तेव न शक्तिम् अभि संददी (भवतः). क्षामेव नः रजांसि समजतम्। हे अश्विना, इमाः गिरः युष्मयन्तीः क्ष्मात्रेण स्वधितिम् इव सम शिशितम्।

८ हे अश्विना यानि एतानि वां वर्धनानि, ब्रह्म (वा) स्तोमं वा गृत्समदासः अक्रन्। हे नरा तानि जुजुषाणा यात (येन) सुवीराः वयं विदथे बृहत् वदेम्।

१ हे सोमा पूषणा, युवां रयीणां जनना, दिवो जनना, पृथिव्याश्च जनना (भवथः)। युवां जातौ एव विश्वस्य भुवनस्य गोपौ, देवा अपि युवां अमृतस्य नाभिम् अकृण्वन्।

२ इमौ देवौ जायमानौ (दृष्ट्वा देवाः) जुषन्त, यतः इमौ अजुष्टा तमांसि गूहतां। आभ्यां सोमपूषभ्यां, इंद्रः आमास्वपि उस्रियासु अन्तः पक्वं (प्रकाश दुग्धं) जनत्।

हे सोम, (विश्वका) पोषण करनेवाले हे देव, रजोलोक बहुतही बड़ा है किन्तु आपका रथ उसकाभी नाप ले सकेगा । आपके रथको सात चाक हैं। अखिल विश्वकोभी आपके रथका ज्ञान नही होता । चाहे वहां वह जा सकता है और केवल संकल्पसे वह जोड़ा जाता है । हे वीरश्रेष्ठ देवो, किरणरूप पांच लगाम लगाके आप अपने रथको दौड़ने दीजिये । ३

